# Vicharasagarah

# વિચારસાગરઃ

## Document Information

Text title : Vicharasagarah

File name : vichArasAgaraH.itx

Category : major_works, vedAnta, advaita

Location : doc_z_misc_major_works

Author : Vasudeva Brahmendra Sarasvati Sanskrit translation of original Hindi by Nishchala Das

Transliterated by : Nikhil Gandhi

Proofread by : Nikhil Gandhi

Latest update : August 12, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 15, 2025

*sanskritdocuments.org*

Vicharasagarah

# વિચારસાગરઃ

॥ ॐ ॥

શ્રીચિદ્ઘનગણેશાય નમો મહ્યમ્ ।

શ્રીવાસુદેવબ્રહ્મેન્દ્રસરસ્વતીવિરચિતઃ

## ॥ સંસ્કૃતવિચારસાગરઃ ॥

તદીયયા ટિપ્પણ્યા સમલઙ્કૃતઃ ।

Main Topics (આવર્તાઃ A. Section Groups)

(Chapter 1  તત્રાનુબન્ધાનાં સામાન્યતો નિરૂપણં નામ પ્રથમસ્તરઙ્ગઃ ।)

(A. 1-11)  વસ્તુનિર્દેશરૂપમઙ્ગલાચરણં

(A. 4-11)  સ્વપ્રત્યગાત્મવિષયકમઙ્ગલાચરણવિષયે આક્ષેપસમાધાનાનિ

(A. 12-13)  ગ્રન્થમહિમા-

(A. 14-37)  સાધનચતુષ્ટયનિરૂપણમ્-

(A. 15-31)  અધિકારિનિરૂપણમ્-

(A. 24-26)  જ્ઞાને મુખ્યાન્તરઙ્ગસાધનશ્રવણાદીનાં લક્ષણમ્-

(A. 29-31)  મહાવાક્યમપરોક્ષજ્ઞાનહેતુરિત્યત્રાક્ષેપસમાધાનાનિ

(A. 33-38)  પ્રયોજનનિરૂપણમ્-

(Chapter 2  સંસ્કૃતવિચારસાગરે અનુબન્ધાનાં વિશેષતો નિરૂપણં નામ દ્વિતીયસ્તરઙ્ગઃ ।)

(A. 40-43)  અધિકારિવિષયકાક્ષેપાઃ-

(A. 44-45)  અધિકારિવિષયકાક્ષેપાણાં સમાધાનાનિ-

(A. 55-60)  વિષયે આક્ષેપાઃ-

(A. 56-60)  સાક્ષિબ્રહ્મૈક્યવિષયે આક્ષેપઃ-

(A. 61-65)  વિષયવિષયકાક્ષેપાણાં સમાધાનાનિ-

(A. 66-82)  પ્રયોજનવિષયકાક્ષેપાઃઆ

(A. 66-72)  ન જ્ઞાનેન બન્ધનિવૃત્તિરિત્યાક્ષેપઃ-

(A. 73-81) કર્મણૈવ મોક્ષઃ સિદ્ધ્યતીત્યૈકભવિકવાદમવલમ્બ્યાક્ષેપઃ-
(A. 76-80) મુમુક્ષુણા અનુષ્ઠેયકર્મણાં નિરૂપણમ્-
(A. 83-106) પ્રયોજનવિષયકાક્ષેપાણાં સમાધાનાનિ
(A. 83-98) "બન્ધઃ સત્યઃ, સ ચ જ્ઞાનેન ન નિવર્ત્યેત" ઇત્યાક્ષેપસ્ય સમાધાનાનિ-
(A. 97-98) કારણાધ્યાસનિરૂપણમ્-
(A. 99-106) કર્મણા મોક્ષો ન સિદ્ધ્યતિ-
(A. 107-108) સમ્બન્ધવિષયાક્ષેપઃ સમાધાનણ ચ-
(Chapter 3 સંસ્કૃતવિચારસાગરે ગુરુશિષ્યસ્વરૂપનિરૂપણં નામ તૃતીયસ્તરઙ્ગઃ ।)
(A. 109-121)
(Chapter 4 સંસ્કૃતવિચારસાગરે ઉત્તમાધિકારિણ ઉપદેશનિરૂપણં નામ ચતુર્થસ્તરઙ્ગઃ ।)
(A. 122-125) શુભસન્તતેઃ રાજ્ઞઃ, તત્ત્વદૃષ્ટિરિતિ, અદૃષ્ટિરિતિ, તર્કદૃષ્ટિરિતિ સમાખ્યાતાનાં તત્પુત્રાણાં ચ કથા-
(A. 128-168) જ્ઞાનોપદેશઃ-
(A. 129-168) અત્રાક્ષેપસમાધાનાનિ
(A. 129-132) સુખવિષયકાક્ષેપસમાધાનાનિ-
(A. 133-168) દુઃખવિષયકપ્રશ્નપ્રત્યુક્તયઃ-
(A. 138-143) શિષ્યઃ સ્વપ્રશ્નસ્યાશયં વર્ણયતિ-
(A. 141-142) અન્યથાખ્યાતિઃ-
(A. 144-145) અખ્યાતિમતખણ્ડનમ્-
(A. 146-149) સિદ્ધાન્તિનોઽનિર્વચનીયખ્યાતિનિરૂપણમ્-
(A. 150-159) અત્રાક્ષેપસમાધાનાનિ-
(A. 153-155) સર્પાભાવાત્સર્પજ્ઞાનસ્ય કારણે લયરૂપનિવૃત્તિરિતિ સમાધિઃ-
(A. 161-162) પૂર્વપ્રશ્નસ્યોત્તરમ્-
(A. 167-168) ગુરુઓરુત્તરમ્-
(A. 169-225) પૂર્વોપદિષ્ટવિષયે આક્ષેપસમાધાનાનિ
(A. 169-188) જીવબ્રહ્મણોરભેદનિરૂપણમ્
(A. 169-171) જીવબ્રહ્માભેદવિષયે તત્ત્વદૃષ્ટિપ્રશ્નઃ-
(A. 172-185) સ્વરૂપભેદાજ્જીવબ્રહ્મણોરૈક્યાસઙ્ગતિરિતિ શઙ્કાયાઃ
(A. 173-176) ચતુર્વિધાકાશવર્ણનમ્-
(A. 177-185) ચૈતન્યસ્ય ચાતુર્વિધ્યવર્ણનમ્-
(A. 179-183) જીવસ્વરૂપવર્ણનમ્
(A. 179-182) બુદ્ધિપ્રતિબિમ્બિતચૈતન્યં જીવઃ-
(A. 186-188) "દ્વા સપર્ણા" ઇતિ શ્રુત્યા જીવબ્રહ્મભેદઃ

(A. 189-198) “અહં બ્રહ્મ” ઇતિ જ્ઞાનં કસ્યેતિ વિચારઃ-
(A. 190-196) પ્રાગુક્તપ્રશ્નસ્યોત્તરમ્
(A. 190-191) આભાસસ્ય સમાવસ્થાઃ-
(A. 199-218) કૂટસ્થાભાસયોઃ “અહંવૃત્તૌ” ભાનં કિં
(A. 200-218) પૂર્વપ્રશ્નસ્યોત્તરમ્-
(A. 204-209) પ્રમાણપ્રસઙ્ગાત્પ્રત્યક્ષાનુમાનશબ્દોપમાનાર્થાપત્ત્યનુપલબ્ધિપ્રમાણાનિ નિરૂપ્યન્તે-
(A. 214-217) પ્રમાતૃલક્ષણમ્-
(A. 219-223) ઇન્દ્રિયસમ્બન્ધં વિના “અહં બ્રહ્મ” ઇતિ
(A. 220-222) બ્રહ્મ ન જ્ઞાનેન્દ્રિયાણાં વિષયઃ-
(A. 224-225) પૂર્વોક્તપ્રશ્નસ્યોત્તરમ્-
(Chapter 5 સંસ્કૃતવિચારસાગરે મધ્યમાધિકારિણ ઉપદેશનિરૂપણં નામ પઞ્ચમસ્તરઙ્ગઃ ।)
(A. 226-251) ગુરુવેદપ્રભૃતીનાં વ્યાવહારિકસત્તાપ્રતિપાદનમ્-
(A. 227-249) શ્રીસદ્ગુરોરુત્તરમ્
(A. 227-229) શાઙ્કરમતસ્યાદ્વૈતસ્ય પ્રામાણિકત્વવર્ણનમ્-
(A. 230-240) દૃષ્ટાન્તત્વેન રાજામાત્યભર્ચ્છુકથાપ્રસ્તાવઃ-
(A. 232-239) ભર્ચ્છોર્વૈરાગ્યવર્ણનમ્-
(A. 234-237) સ્ત્રીસઙ્ગજદુઃખવર્ણનમ્-
(A. 246-248) વ્યાવહારિકપ્રાતિભાસિકપારમાર્થિકસત્તાનાં
(A. 252-283) સંસારવિષયકવિચારઃ-
(A. 253-283) પૂર્વપ્રશ્નસ્ય ગુરોરુત્તરમ્-
(A. 255-272) શ્રુત્યુક્તોત્પત્તિક્રમનિરૂપણમ્
(A. 255-260) પ્રસઙ્ગાન્માયાસ્વરૂપપ્રતિપાદનમ્-
(A. 261-262) પ્રસઙ્ગાદીશ્વરસ્વરૂપવર્ણનમ્-
(A. 264-272) જગત્સૃષ્ટિવર્ણનમ્-
(A. 266-270) સૂક્ષ્મસૃષ્ટિનિરૂપણમ્-
(A. 271-272) સ્થૂલસૃષ્ટિઃ-
(A. 273-183) આત્મવિવેકઃ, અથવા પઞ્ચકોશવિવેકઃ-
(A. 279-282) આનન્દમયકોક્ષ એવાત્મેતિ મતમ્-
(A. 284-316) મહાવાક્યાર્થોપદેશનિરૂપણમ્-
(A. 286-316) પૂર્વોક્તપ્રશ્નસ્યોત્તરમ્-
(A. 290-292) લયચિન્તનક્રમઃ-
(A. 294-326) પ્રણવોપાસનનિરૂપણમ્-

(A. 296-315) નિર્ગુણપ્રણવોપાસનક્રમઃ-
(A. 298-305) બ્રહ્મસ્વરૂપસ્યોઙ્કારસ્યાત્મનશ્ચાભેદઃ-
(A. 308-309) ઓઙ્કારધ્યાનફલમ્-
(A. 310-316)
(Chapter 6 સંસ્કૃતવિચારસાગરે ગુરુવેદાન્તાદિસાધનમિથ્યાત્વવર્ણનં નામ ષષ્ઠસ્તરઙ્ગઃ ।)
(A. 317-317)
(A. 318-319) કનિષ્ઠાધિકારિણસ્તર્કદૃષ્ટેઃ પ્રશ્નઃ-
(A. 320-321) પૂર્વોક્તપ્રશ્નયોરુત્તરમ્-
(A. 322-341) "જાગ્રત્સ્વપ્નયોસ્તુલ્યતા" ઇતિ સિદ્ધાન્તનિરૂપણમ્-
(A. 323-234) સ્વાપ્નપદાર્થસ્યાધિષ્ઠાનોપાદાનયોઃ પ્રદર્શનપૂર્વકમુત્પત્તિવર્ણનમ્-
(A. 325-331) ત્રિવિધસત્તાપક્ષે વિલક્ષણયોર્જાગ્રત્સ્વપ્નયોઃ
(A. 325-326) સત્તાભેદઃ; વસ્તુતસ્તયોરવૈલક્ષણ્યાત્સત્તૈક્યમેવ તત્ર શઙ્કા-
(A. 327-328) પૂર્વોક્તશઙ્કયોઃ સમાધાનમ્-
(A. 332-334) બ્રહ્મનિષ્ઠકારણતાયા દેશકાલોયરઙ્ગીકારે
(A. 336-337) જાગ્રતિ પદાર્થા જ્ઞાનસમકાલમેવોત્પદ્યન્તે
(A. 338-340) જાગ્રત્પદાર્થાનાં મિથઃ કાર્યકારણતાનાસ્તીતિ પ્રતિપાદનમ્-
(A. 342-460) ગુરુવેદાન્તાદીનાં મિથ્યાત્વે દૃષ્ટાન્તપ્રદર્શનમ્-
(A. 343-460) અગૃધદેવસ્ય (ઇચ્છારહિતાત્મદેવસ્ય)
(A. 344-460) અગૃધદેવસ્ય સ્વપ્નઃ-
(A. 346-352) મિથ્યાચાર્યેણ મિથ્યાશિષ્યાય મિથ્યાસંસ્કૃતગ્રન્થેનોપદેશઃ
(A. 346-348) ગ્રન્થારમ્ભે મઙ્ગલાચરણમ્-
(A. 349-351) વેદાન્તશાસ્ત્રપ્રણેતુરાચાર્યસ્ય (શ્રીવેદવ્યાસસ્ય) નમસ્કારઃ
(A. 353-382) "અહં કઃ" ઇતિ પ્રશ્નસ્યોત્તરમ્-
(A. 356-364) ત્રિવિધનૈયાયિકમતવર્ણનમ્, તન્નિરાકણં ચ-
(A. 356-360) આત્મા વ્યાપક ઇતિ મતવર્ણનં તત્ખણ્ડનં ચ-
(A. 356-358) આત્મનો વ્યાપકત્વોપપાદનમ્-
(A. 361-362) આત્મનો મધ્યમપરિમાણત્વવાદિમતનિરાકરણમ્-
(A. 365-367) સિદ્ધાન્તપ્રદર્શનમ્-
(A. 369-371) આત્મનશ્ચિદ્રૂપત્વવર્ણનમ્-
(A. 373-376) આત્મા આનન્દસ્વરૂપઃ-
(A. 377-378) સચ્ચિદાનન્દાઃ પરસ્પરં ન ભિન્ના ઇતિ
(A. 379-381) બ્રહ્મરૂપસ્યાત્મનો જન્મરહિતત્વપ્રતિપાદનમ્-

(A. 383-387) “અસ્ય સંસારસ્ય કર્તા કઃ” ઇતિ દ્વિતીયપ્રશ્નસ્યોત્તરમ્-
(A. 384-385) ઈશ્વરઃ સર્વજ્ઞઃ સર્વશક્તિમાન્ સ્વતન્ત્રશ્ચેતિ
(A. 388-419) “મોક્ષસ્ય કારણં કિમ્” ઇતિ તૃતીયપ્રશ્નસ્યોત્તરમ્-
(A. 389-392) કર્મોપાસનયોર્મોક્ષસાધનત્વાભાવઃ-
(A. 393-396) કર્મોપાસને જ્ઞાનસ્ય મોક્ષસ્ય ચ સાધને
(A. 397-399) કર્મોપાસનયોર્જ્ઞાનિન સહ વિરોધ ઇતિ
(A. 400-413) મોક્ષમુદ્દિશ્ય જ્ઞાનસ્ય કર્મોપાસનયોરપેક્ષાભાવઃ-
(A. 405-406) જ્ઞાનિનઃ પાપચાઞ્ચલ્યયોરભાવાત્તસ્ય કર્મોપાસને અનુપયુક્તે-
(A. 408-409) દૃઢજ્ઞાનિનામદૃઢજ્ઞાનિનામુત્તમજિજ્ઞાસૂનાં ચ
(A. 410-412) કર્મોપાસને દૃઢબોધસ્ય ન વિરોધિની
(A. 414-417) ઉપદિષ્ટાર્થસઙ્ગ્રહઃ-
(A. 415-416) જ્ઞાનસાધનવર્ણનમ્-
(A. 418-419) મોક્ષસ્ય સાધનં જ્ઞાનમિતિ પ્રકારાન્તરેણ
(A. 420-462) મહાવાક્યાર્થજ્ઞાનમ્-
(A. 420-442) લક્ષણાનિરૂપણમ્-
(A. 423-440) શક્તિલક્ષણમ્-
(A. 425-427) શક્તિવિષયે મતાન્તરખણ્ડનમ્-
(A. 427-428) વૈયાકરણાભિમતશક્તિખણ્ડનમ્-
(A. 429-431) ભટ્ટમતેન શક્તિલક્ષણમ્-
(A. 432-437) ભટ્ટમતખણ્ડનમ્-
(A. 432-434) વાચ્યવાચકયોર્ભેદાભેદરૂપતાદાત્મ્યમસઙ્ગતમિતિ નિરૂપણમ્-
(A. 435-437) ઉપાદાનકારણતત્કાર્યયોર્ભેદાભેદરૂપતાદાત્મ્યસમ્બન્ધો દુર્ઘટઃ-
(A. 440-442) જહદજહદ્ભાગત્યાગલક્ષણાનાં લક્ષણમ્-
(A. 443-449) મહાવાક્યેષુ લક્ષણા-
(A. 449-453) જીવેશ્વરસ્વરૂપે આભાસપ્રતિબિમ્બાવચ્છેદવાદાઃ-
(A. 456-460) પૂર્વોક્તાક્ષેપસમાધિઃ । પદદ્વયલક્ષણા સફલેતિ પ્રદર્શનમ્-
(A. 462-463) પૂર્વોક્તપ્રશ્નસ્યોત્તરમ્-
(Chapter 7 સંસ્કૃતવિચારસાગરે જીવન્મુક્તિવિદેહમુક્તિવર્ણનં નામ સપ્તમસ્તરઙ્ગઃ ।)
(A. 465-483) જ્ઞાનિનો વ્યવહારાનિયમાક્ષેપઃ-
(A. 469-474) સમાધ્યષ્ટાઙ્ગનિરૂપણમ્-
(A. 487-488) જ્ઞાનિનો વ્યવહારોઽનિયતઃ-
(A. 492-502) તર્કદૃષ્ટેર્નિશ્ચયઃ-

(A. 509-518) શુભસન્તતિરાજપ્રસઙ્ગઃ-

# વિચારસાગરઃ

## Chapter 1 તત્રાનુબન્ધાનાં સામાન્યતો નિરૂપણં નામ પ્રથમસ્તરઙ્ગઃ ।

### (A. 1-11) વસ્તુનિર્દેશરૂપમઙ્ગલાચરણં

(૧)

જીવબ્રહ્મૈક્યરૂપમઙ્ગલં
સુખં નિત્યં સ્વપ્રકાશં વ્યાપકં નામરૂપયોઃ ।
અધિષ્ઠાનં બુદ્ધ્યબોધ્યં બુદ્ધેર્દૃગ્યત્તુ નિર્મલમ્ ॥ ૧॥

અપારં સર્વવેદાન્તવેદ્યં પ્રત્યક્ પરં મહઃ ।
તદેવાહં ન મત્તોઽન્યદિતિ મે નિશ્ચિતા મતિઃ ॥ ૨॥

અસ્યાર્થસ્તુ - "તદેવાહમ્" ઇત્યુક્ત્યા મહાવાક્યાર્થપ્રત્યગભિન્નપરમાત્મૈવ સ્વસ્વરૂપમિતિ । તદ્વિશેષણાનિ નિરૂપ્યન્તે - તત્ પ્રત્યક્ પરં મહઃ (બ્રહ્મ)
કથં ભૂતં - સુખમ્, નિત્યમ્, સ્વપ્રકાશમ્, વ્યાપકમ્, નામરૂપયોરધિષ્ઠાનં ચ ભવતિ ।
પુનશ્ચ તદ્બ્રહ્મ કથં ભૂતં - બુદ્ધ્યબોધ્યં બુદ્ધેર્દૃક્ ચ ભવતિ । અસ્યાર્થઃબુદ્ધ્યબોધ્યં = ન હિ બુદ્ધિર્બ્રહ્મ વિજાનાતિ = પ્રકાશયતિ । "નૈવ વાચા ન મનસા પ્રાપ્તું શક્યો ન ચક્ષુષા" (ક. ૨.૩.૧૨) "યતો વાચો નિવર્તન્તે અપ્રાપ્ય મનસા સહ" (તૈ. બ્ર. ૪, ૯) "ન તત્ર સૂર્યો ભાતિ" (ક. ૨.૨.૧૫, મુ. ૨ । ૨.૧૦, શ્વે. ૬.૧૪) ઇત્યાદિશ્રુતિભ્યઃ । કિન્તુ બુદ્ધેર્દૃક્ = સર્વસાક્ષિ બ્રહ્મૈવ બુદ્ધિં

૧. નિર્ગુણબ્રહ્માત્માવબોધનમ્ ।
૨. વિઘ્નધ્વંસાનુકૂલવ્યાપારવિશેષઃ ।
૩. પરમપ્રેમાસ્પદીભૂતનિરતિશયાનન્દઃ ।
૪. ત્રિકાલાબાધ્યં કૂટસ્થસત્યમ્ ।
૫. અનન્યાધીનપ્રકાશરૂપમ્, ચિન્માત્રમિતિ યાવત્ ।
૬. દેશકાલવસ્તુપરિચ્છેદશૂન્યમ્, અનન્તમ્, નિરતિશયમહત્ ।
૭. વિવર્તોપાદાનકારણમ્ ।

પ્રકાશયતિ । “યન્મનસા ન મનુતે યેનાહુર્મનો મતમ્“(કે. ૧.૫) “તસ્ય ભાસા સર્વમિદં વિભાતિ“(ક. ૨.૨.૧૫, મુ. ૨.૨.૧૦, શ્વે. ૬.૧૪) ઇત્યાદિશ્રુતિભ્યઃ । (૨) બુદ્ધિર્ન શબ્દસ્ય શક્તિવૃત્ત્યા બ્રહ્મ વિજાનાતિ, કિન્તુ લક્ષણાવૃત્ત્યા । (૩) મલવિક્ષેપાદિદોષયુક્તા બુદ્ધિર્ન બ્રહ્મ વિજાનાતિ, કિન્તુ તદ્રહિતા ।
“શાસ્ત્રાચાર્યોપદેશશમદમાદિસંસ્કૃતં મન આત્મદર્શને કરણમ્“ઇતિ ગીતાભાષ્યવચનાત્ (ભ. ગી. ૨.૨૧) । અસૌ બુદ્ધિરપિ ફલવ્યાપ્ત્યા ન બ્રહ્મ વિજાનીયાત્, કિન્તુ વૃત્તિવ્યાપ્ત્યૈવ ।
ઇયઞ્ચ વૃત્તિર્દીપો યથા સ્વસમ્બદ્ધપદાર્થાન્ પ્રકાશયતિ ન તથા બ્રહ્મ પ્રકાશયિતું પ્રભવતિ । કિન્ત્વન્ધકારે ઘટાદ્યાવૃતરત્નપ્રદીપાદિર્યથા ઘટાદિસ્વાવરણભઙ્ગે સ્વયમેવ પ્રકાશતે, એવં “અહં બ્રહ્માસ્મિ“
ઇતિ પ્રમાણજન્યપ્રમારૂપવૃત્તિર્બ્રહ્માવારકાજ્ઞાનનાશમાત્રં કરોતિ, બ્રહ્મ તુ બુદ્ધ્યાદિસાધનાન્તરનિરપેક્ષમેવ સ્વસમ્બદ્ધસર્વાવભાસકત્વરૂપ-સ્વયઞ્જ્યોતિષ્ટ્વેન નિત્યાપરોક્ષરૂપત્વાત્ સ્વયં પ્રથતે । ઇતિ બ્રહ્મણઃ સ્વપ્રકાશત્વબોધકં ઇદં વિશેષણમ્ ।
પુનશ્ચ તદ્બ્રહ્મ કથં ભૂતમ્ । નિર્મલં = શુદ્ધમ્,
અપારં = દેશકાલવસ્ત્વપરિચ્છિન્નં ભવતિ ।

## (૨)

અથ વિશેષણાનાં પ્રત્યેકં પ્રયોજનમુચ્યતે

(૧) સુખમ્, નિત્યં - સુખસ્ય નિત્યત્વવિશેષણાનુપાદાને વૈષયિકે સામયે

૧. વૃત્તિપ્રતિફલિતચિદાભાસવિષયત્વં ફલવ્યાપ્તિઃ ।

૨. કેવલવૃત્તિવિષયત્વં વૃત્તિવ્યાપ્તિઃ । તથા ચોક્તં પઞ્ચદશ્યાં

સ્વપ્રકાશોઽપિ સાક્ષ્યેષ ધીવૃત્ત્યા વ્યાપ્યતેઽન્યવત્ ।
ફલવ્યાપ્યત્વમેવાસ્ય શાસ્ત્રકૃદ્ભિર્નિવારિતમ્ ॥ તૃપ્તિદીપે ૯૦॥

બુદ્ધિતત્સ્થચિદાભાસૌ દ્વાવપિ વ્યાપ્નુતો ઘટમ્ ।
તત્રાજ્ઞાનં ધિયા નશ્યેદાભાસેન ઘટઃ સ્ફુરેત્ ॥ ૯૧॥

બ્રહ્મણ્યજ્ઞાનનાશાય વૃત્તિવ્યાપ્તિરપેક્ષિતા ।
સ્વયં સ્ફુરણરૂપત્વાન્નાભાસ ઉપયુજ્યતે ॥ ૯૨॥

ચક્ષુર્દીપાવપેક્ષ્યેતે ઘટાદેર્દર્શને તથા ।
ન દીપદર્શને કિન્તુ ચક્ષુરેકમપેક્ષ્યતે ॥ ૯૩॥

૩. માયાતત્કાર્યરહિતત્વાન્નિર્મલં = શુદ્ધમ્ ।

૪. પારઃ = અન્તઃ । સ ચ દેશકાલવસ્તુકૃતભેદાત્ ત્રિવિધઃ । તદભાવાદપારં બ્રહ્મ ।

(૧) તત્ર દેશઃ = પ્રદેશઃ, યત્ સર્વત્રવ્યાપિત્વેનૈકદેશવર્તિ તસ્ય દેશતોઽન્તઽસ્તિ, યથા ઘટાદેઃ, ન તુ બ્રહ્મણઃ, તચ્ચ સર્વત્ર વ્યાપ્યાવતિષ્ઠતે । સર્વસ્યાપિ દેશસ્ય માયયા તસ્મિન્નધ્યસ્તત્વેન તદનવચ્છેદકત્વાત્ ।

(૨) કાલઃ = અવિદ્યાચિત્સંયોગઃ । "કાલો માયા-॥ સુખે, નૈયાયિકાભિમતે આત્મગુણે આનન્દે ચ અતિવ્યાપ્તિઃ । તદુપાદાને તુ વિષયાનન્દસ્ય, આત્મગુણસ્ય ચાનન્દસ્યાનિત્યત્વપ્રસિદ્ધેર્નાતિવ્યાપ્તિઃ ।

(૨) નિત્યમ્, સ્વપ્રકાશં - નિત્યત્વમાત્રોક્તૌ ન્યાયમતસિદ્ધકાલાકાશાદિનિત્યપદાર્થેષ્વતિવ્યાપ્તેસ્તદ્વારણાય "સ્વપ્રકાશમ્"ઇતિ । આકાશાદીનાં નિત્યત્વેઽપિ ન્યાયમતે તેષાં જડત્વેન સ્વપ્રકાશત્વાભાવાન્નાતિવ્યાપ્તિઃ ।

(૩) સ્વપ્રકાશમ્, વ્યાપકં - સ્વપ્રકાશત્વમાત્રોક્તૌ સૂર્યાદિજ્યોતિષિ, ન્યાયમતસિદ્ધાત્મ*ગુણે જ્ઞાને, બૌદ્ધાનાં ક્ષણિકવિજ્ઞાનાત્મનિ ચાતિવ્યાપ્તિપ્રસક્તેસ્તદ્વારણાય "વ્યાપકમ્"ઇતિ । તેષાં પરિચ્છિન્નત્વાન્નાતિવ્યાપ્તિઃ ।

(૪) વ્યાપકમ્, નામરૂપયોરધિષ્ઠાનં - વ્યાપકત્વમાત્રોક્તૌ નૈયાયિકપ્રાભાકરમતસિદ્ધાત્મનિ, આકાશાદૌ, સાઙ્ખ્યમતસિદ્ધપ્રકૃતૌ ચાતિવ્યાપ્તેસ્તદ્વારણાય "નામરૂપયોરધિષ્ઠાનમ્"ઇતિ । પુર્વોક્તેષુ આકાશાદિષુ ત્રિષુ વ્યાપકત્વાઙ્ગીકારેઽપિ નામરૂપયોરધિષ્ઠાનત્વાનઙ્ગીકારાન્નાતિવ્યાપ્તિઃ ।

(૫) નામરૂપયોરધિષ્ઠાનમ્, સ્વપ્રકાશં [બુદ્ધ્યબોધ્યં બુદ્ધેર્દૃક્] - નામરૂપયોરધિષ્ઠાનત્વમાત્રોક્તૌ પ્રાતિભાસિકસર્પાદિનામરૂપાધિષ્ઠાનરજ્જ્વાદાવતિવ્યાપ્તિસ્તદ્વારણાય "સ્વપ્રકાશમ્"[બુદ્ધ્યબોધ્યં બુદ્ધેર્દૃક્] ઇતિ । રજ્જ્વાદેર્જડત્વાન્નાતિવ્યાપ્તિઃ । અયં ચ પરિષ્કારો મન્દદૃષ્ટ્યા । વસ્તુતસ્તુ વેદાન્તિમતે રજ્જ્વાદિસર્વકલ્પનાધિષ્ઠાનં તત્તદુપહિતચૈતન્યમેવ । અતો "નામરૂપયોરધિષ્ઠાનમ્"ઇત્યેવ લક્ષણમ્ ।

॥ આત્મસમ્બન્ધઃ સર્વસાધારણાત્મકઃ” ઇત્યુક્તેઃ । યસ્ય તુ જન્મતઃ પ્રાગૂર્ધ્વં ચાભાવો દૃશ્યતે તસ્ય કાલતોઽન્તોઽસ્તિ, યથા વિદ્યુદાદેઃ, ન બ્રહ્મણો જન્માદિવિકારાભાવાત્ તસ્ય, કાલસ્યાપિ તદધ્યસ્તત્વાચ્ચ ।

(૩) વસ્તુ = પદાર્થઃ । યત્ યસ્માદ્ભિદ્યતે તેન તસ્યાન્તો ભવેત્, યથા ઘટઃ પટાદ્ભિદ્યત ઇતિ ઘટેન પટસ્યાન્તો ભવતિ । બ્રહ્મણિ તુ સર્વસ્યાપિ જગતઃ મૃદિ ઘટશરાવાદેરિવ કલ્પિતત્વેનાવસ્તુત્વાન્ન વસ્તુ પરિચ્છેદોઽપિ તસ્ય સમ્ભવતિ ।

તસ્માદ્બ્રહ્મ અપારં = અનન્તં = દેશકાલવસ્તુપરિચ્છેદશૂન્યં, તતોઽન્યસ્ય દ્વિતીયસ્યાભાવાત્ ।

૧. અલક્ષ્યે લક્ષણસ્ય સત્ત્વમતિવ્યાપ્તિઃ, લક્ષ્યૈકદેશાસત્ત્વમવ્યાપ્તિઃ, લક્ષ્યસામાન્યાસત્ત્વમસમ્ભવઃ ।

(*વ્યવસાયાત્મકજ્ઞાનસ્યાનુવ્યવસાયગ્રાહ્યત્વવાદિનૈયાયિકૈરપ્યનુવ્યવસાયસ્ય ગ્રાહકાન્તરાઙ્ગીકારેઽનવસ્થાભયાત્ સ્વપ્રકાશત્વમઙ્ગીકર્તવ્યમ્ । તથા ચ વ્યવસાયાત્મકજ્ઞાનસ્યાપિ સ્વપ્રકાશત્વમસ્ત્વિત્યભિપ્રાયેણૈવમુક્તમ્)

૨. આકાશાદીનાં વ્યાપકત્વમાપેક્ષિકમ્ ।

૩. પ્રતીતિકાલમાત્રસત્તાકં = કલ્પિતં = મિથ્યેત્યર્થઃ ।

(૬) સ્વપ્રકાશં [બુદ્ધ્યબોધ્યં બુદ્ધેર્દૃક્], નિર્મલં - સ્વપ્રકાશત્વમાત્રોક્તૌ કેષાઞ્ચિદુપાસકાનાં મતે આત્મન્યતિવ્યાપ્તિસ્તદ્વારણાય “ઇનર્મલમ્“ઇતિ । ઉપાસકમતે ત્વાત્મનઃ સ્વપ્રકાશત્વેઽપિ અવિદ્યાદિમલવત્ત્વેનૈવાભ્યુપગમાન્નાતિવ્યાપ્તિઃ ।

(૭) નિર્મલમ્, અપારં - નિર્મલત્વમાત્રોક્તૌ સાઙ્ખ્યાભિમતે આત્મન્યતિવ્યાપ્તિસમ્ભવાત્તદ્વારણાય “અપારમ્“ઇતિ । તન્મતે આત્મનો દેશકાલપરિચ્છેદાભાવેઽપિ વસ્તુપરિચ્છેદસ્યેષ્ટત્વાત્ । તસ્યાપ્યભાવાદ્બ્રહ્મણો નાતિવ્યાપ્તિઃ ।

## (3)

અનેકવિશેષણાનાં પ્રયોજનં - પૂર્વોક્તાત્મલક્ષણેષુ “સુખમ્, નિત્યમ્“; “નિત્યમ્, સ્વપ્રકાશમ્“; ઇતિ દ્વાભ્યાં દ્વાભ્યામેવ લક્ષણાભ્યાં સર્વત્રાતિવ્યાપ્તિદોષનિવૃત્તાવપિ અનેકધાતિવ્યાપ્તિનિરાસોક્તિસ્તુ તલ્લક્ષણપ્રયોજનેષુ

વિસ્પષ્ટાર્થરુચીનાં સર્વપ્રકારેણ બ્રહ્મજ્ઞાનોત્પત્તયે । પૂર્વોક્તાખિલલક્ષણલક્ષિતચિન્માત્રબ્રહ્મૈવાહં ન પરાગ્રૂપ ઇતિ મઙ્ગલાર્થઃ ।

## (A. 4-11) સ્વપ્રત્યગાત્મવિષયકમઙ્ગલાચરણવિષયે આક્ષેપસમાધાનાનિ

### (૪)

પ્રથમ આક્ષેપઃ - નનુ હરિહરબ્રહ્મદિષૂપાસ્યેષુ સત્સુ તત્સ્મરણાત્મકમઙ્ગલાચરણં વિહાય સ્વાત્મસ્મરણરૂપં મઙ્ગલં કિમિતિ યુક્તં કર્તુમિતિ ચેત્ ।

### (૫)

તત્સમાધાનં - ઉચ્યતે । મય્યખણ્ડચિદમ્ભોધૌ હરિહરબ્રહ્માર્કેન્દ્રચન્દ્રવરુણયમશક્તિકુબેરગણપત્યાદ્યુપલક્ષિતાઃ સર્વેપિ દેવાસ્તરઙ્ગાયન્તે । અતો મયિ સર્વપ્રપઞ્ચાધિષ્ઠાને જગત્કારણે સ્મૃતે મત્કાર્યભૂતાસ્તે સર્વેઽપિ દેવાઃ સ્મૃતા એવ ભવન્તિ । તસ્માત્સ્વવિષયકં મઙ્ગલાચરણમેવ યુક્તમ્ ।

### (૬)

દ્વિતીય આક્ષેપઃ - નનુ હરિહરાદયો દેવા માયાવિશિષ્ટચૈતન્યાત્મકેશ્વરરૂપસમુદ્રસ્ય તરઙ્ગા ઇતિ વક્તું યુક્તમ્, ન તુ તવ । અત ઈશ્વરવિષયકં મઙ્ગલાચરણં યુજ્યતે । કિઞ્ચ વૃક્ષમૂલસેચનેન યથા તચ્છાખાસ્કન્ધાદયસ્તૃપ્યન્તિ, યથાન્નપાનાદિજનિતપ્રાણતૃપ્ત્યા ઇન્દ્રિયાદિતૃપ્તિઃ, એવમીશ્વરવિષયકમઙ્ગલાચરણેનૈવ તદ્વિભૂતિભૂતેતરદેવતામઙ્ગલાચરણં સિદ્ધ્યેત્, ન તુ ત્વન્મઙ્ગલાચરણાદિતિ ચેત્ । ૧. અસ્ય ગ્રન્થસ્ય જીવબ્રહ્મૈક્યં વિષય ઇત્યનેન મઙ્ગલેન સૂચ્યતે ।

### (૭)

સમાધાનં - ઉચ્યતે । યોગિભિર્હૃદયે ચિન્ત્યમાનઃ સર્વજ્ઞઃ કૃપાલુરીશ્વરોઽપિ માયોપાધિવશાન્મય્યેવાખણ્ડચિન્માત્રે સ્વપ્નેન્દ્રજાલમાયામરીચ્યુદકગન્ધર્વનગરરજ્જુસર્પાદિવન્મૃષાધ્યારોપિતઃ । તથા ચ ઉક્તમ્મય્યેવ સકલં જાતં મયિ સર્વં પ્રતિષ્ઠિતમ્ । મયિ સર્વં લયં યાતિ તદ્બ્રહ્માદ્વયમસ્મ્યહમ્ ॥ કૈ. ૧૯॥

આત્મત એવેદં સર્વમ્ ॥ છા. ૭.૨૬.૧॥

અણોરણીયાનહમેવ તદ્વન્મહાનહં વિશ્વમિદં વિચિત્રમ્ ।
પુરાતનોઽહં પુરુષોઽહમીશો હિરણ્મયોઽહં શિવરૂપમસ્મિ ॥ કૈ. ૨૦॥

સ્વપૂર્ણાત્માતિરેકેણ જગજ્જીવેશ્વરાદયઃ ।

ન સન્તિ નાસ્તિ માયા ચ તેભ્યશ્ચાહં વિલક્ષણઃ ॥ વરાહ. ૨.૧૧॥

સર્વાધિષ્ઠાનરૂપોઽસ્મિ સર્વદા ચિદ્ઘનોઽસ્મ્યહમ્ ॥ તેજોબિન્દુ. ૩.૧૩॥

રક્ષકો વિષ્ણુરિત્યાદિ બ્રહ્મા સૃષ્ટેસ્તુ કારણમ્ ।
સંહારે રુદ્ર ઇત્યેવં સર્વં મિથ્યેતિ નિશ્ચિનુ ॥ તેજોબિન્દુ. ૫.૫૧॥

"તદેવ બ્રહ્મ ત્વં વિદ્ધિ નેદં યદિદમુપાસતે" (કેન. ૧.૪.૮) । "અથ
યોઽન્યાં દેવતામુપાસ્તે અન્યોઽસાવન્યોઽહમસ્મીતિ ન સ વેદ યથા પશુઃ" (બૃ. ૧.૪.૧૦) । "સર્વં તં
પરાદાદ્યોઽન્યત્રાત્મનઃ સર્વં વેદ" (બૃ. ૨.૪.૬) ઇત્યાદિશ્રુતિભ્યઃ ।
સર્વં ચૈતદવિદ્યયા ત્રિગુણયા સેશં મયા કલ્પિતમ્ ॥ મ. પ. ૨॥

સ્વસ્મિન્નેવ સ્વપ્નવદીશાનત્વાદિસર્વકલ્પનયા ।
જીવઃ સર્વવિકારોપાદાનમિતિ બ્રુવન્ત્યન્યે ॥

ઇત્યાદિ વચનશતેભ્યશ્ચ"યત્ યત્રકલ્પિતં નૈવ
તત્તતોઽધિષ્ઠાનાદતિરિચ્યતે"ઇતિ ન્યાયાદીશ્વરાદીનાં
મય્યખણ્ડચિદાત્મન્યધ્યસ્તત્વેન મત્સ્વરૂપાનુસન્ધાનાદેવ તેષાં
દેવતાન્તરાણામપિ મઙ્ગલાચરણં સિદ્ધ્યતીતિ ન કાપ્યનુપપત્તિઃ ।

## (૮)

તૃતીય આક્ષેપઃ - નનુ શુદ્ધે બ્રહ્મણીશ્વરઃ કલ્પિત ઇતિ શક્યતે વક્તું, ન તુ સુતરાં ત્વયિ પરિચ્છિન્ને । અતો નિર્ગુણબ્રહ્મસ્મરણેનૈવ કૃતાનિ ભવન્તીતરસકલદેવતામઙ્ગલાનિ, ન તુ ત્વત્સ્મરણાદિતિ ચેત્-

## (૯)

સમાધાનં - ઉચ્યતે । યથા અધિષ્ઠાનભૂતરજ્જ્વાદ્યજ્ઞાનાત્સર્પાદિભ્રમઃ, તદધિષ્ઠાનયાથાત્મ્યજ્ઞાનેન તન્નિવૃત્તિશ્ચ, તથા
સકલજગદધિષ્ઠાનપ્રત્યગેકરસબ્રહ્માજ્ઞાનાત્ જગત્પ્રતીયતે,
તદાપરોક્ષ્યેણ નિશ્શેષં નિવર્તતે ચ ।
તચ્ચાધિષ્ઠાનં બ્રહ્મ પ્રત્યગાત્મા અહમેવ ।
અયમાત્મા હિ બ્રહ્મૈવ સર્વાત્મકતયા સ્થિતઃ ।
ઇતિ નિર્ધારિતં શ્રુત્યા બૃહદારણ્યસંસ્થયા ॥ અપરોક્ષાનુભૂતિ. ૬૫॥

યચ્ચાપ્નોતિ યદાદત્તે યચ્ચાત્તિ વિષયાનિહ ।
યચ્ચાસ્ય સન્તતો ભાવસ્તસ્માદાત્મેતિ ગીયતે ॥ લિ. પુ. ૧.૭૦.૯૬॥

તત્ત્વમસિ ॥ છા. ૬.૮.૭॥ ત્વં તદસિ ॥ પૈઙ્ગલ. ૩.૧ ॥

યત્પરમ્બ્રહ્મ સર્વાત્મા વિશ્વસ્યાયતનં મહત્ ।
સૂક્ષ્માત્સૂક્ષ્મતરં નિત્યં તત્ ત્વમેવ ત્વમેવ તત્ ॥ કૈ. ૧૬॥

એકમાદ્યન્તરહિતં ચિન્માત્રમમલં તતમ્ ।
ખાદપ્યતિતરાં સૂક્ષ્મં તદ્બ્રહ્માસિ ન સંશયઃ ॥ અન્નપૂર્ણા. ૫.૬૫॥

અનેન સર્વં હ્યેતદ્વેદ ॥ બૃ. ૧.૪.૭॥

“તદેતત્પ્રેયઃ પુત્રાત્પ્રેયો વિત્તાત્પ્રેયોઽન્યસ્માત્સર્વસ્માદન્તરતરં યદયમાત્મા । સ યોઽન્યમાત્મનઃ પ્રિયં બ્રુવાણં બ્રૂયાત્ પ્રિયં રોત્સ્યતીતીશ્વરો હ તથૈવ સ્યાત્ । આત્માનમેવ પ્રિયમુપાસીત” (બૃ. ૧.૪.૮) । “આત્મા હ્યેષાં સ ભવતિ” (બૃ. ૧.૪.૧૦) “યત્સાક્ષાદપરોક્ષાદ્બ્રહ્મ ય આત્મા સર્વાન્તરઃ” (બૃ. ૩.૪.૧) ઇત્યાદિશ્રુતિભ્યઃ । “એવ” ઇત્યવધારણેનાંશાંશિત્વવિકારવિકારિત્વોપાસ્યોપાકત્વાદિદ્વિત્વનિબન્ધનો ભેદઃ સુતરાં પ્રત્યગેકરસસ્ય મમ ચિન્માત્રસ્ય બ્રહ્મણશ્ચ નાસ્તીતિ સિદ્ધ્યતિ । એતેન કારણાધીનત્વરૂપકાર્યત્વમ્, પ્રકાશાધીનત્વરૂપપ્રકાશ્યત્વમ્, અધિષ્ઠાનાધીનત્વરૂપાધેય(રોપિત) ત્વં ચેત્યેતત્ત્રિવિધપારતન્ત્ર્યં મમ ન સમ્ભવતીતિ સૂચ્યતે । તસ્માચ્ચિન્માત્રપ્રત્યગ્રૂપસ્ય મમ મઙ્ગલમેવ શુદ્ધબ્રહ્મવિષયકં મઙ્ગલં ભવતિ ।

(૧૦)

ચતુર્થ આક્ષેપઃ - નનુ ભવદ્ગુરુપરમ્પરાગતસગુણેષ્ટદેવતાનમસ્કારાત્મકમઙ્ગલં યુક્તં કર્તું ઇતિ ચેત્ ।

(૧૧)

સમાધાનં - ઉચ્યતે । યત્સ્વરૂપપરિજ્ઞાનાય સાધકાઃ ચિત્તશુદ્ધયે નિષ્કામકર્માણિ, ચિત્તૈકાગ્ર્યાયોપાસનાનિ ચ યમાદ્યષ્ટાઙ્ગસહિતા આચરન્તિ તાદૃશપ્રત્યગેકરસચિન્માત્રાખણ્ડબ્રહ્મરૂપત્વાત્ સ્વસ્ય મમ, કમન્યં નમસ્કુર્યામ્ । સ્વસ્વરૂપાતિરિક્તસ્ય દ્વૈતસ્યાણુમાત્રસ્યાપ્યભાવાત્ ભેદઘટિતત્રિપુટીવિષયભૂતનમસ્કારાદિવ્યવહાર એવ ન સમ્ભવતીત્યભિપ્રાયઃ ।

## (A. 12-13) ગ્રન્થમહિમા-

(૧૨)

વેદાન્તસિદ્ધાન્તરૂપનીરપૂર્ણોઽતિગમ્ભીરોઽયં વિચારસાગરાખ્યો ગ્રન્થઃ । ગુરુમુખાત્ તીવ્રતરશ્રદ્ધાભક્તિસાધનચતુષ્ટયપૂર્વકમસ્ય ગ્રન્થસ્ય શ્રવણમનનનિદિધ્યાસનજન્યસ્વસ્વરૂપાપરોક્ષસાક્ષાત્કારેણ અવિદ્યાદ્યખિલાનર્થનિવૃત્ત્યા કેવલાદ્વિતીયચિન્માત્રરૂપો ધીરઃ પરમાનન્દં આપ્નોતિ ।

નનુ સત્સ્વેનકપ્રાચીનોદ્ગ્રન્થેષુ સૂત્રતદ્ભાષ્યવાર્તિકાદિષુ કિમિત્યયં
૧. રામકૃષ્ણાદિ ।
૨. ગુરુશિષ્યયોસ્તત્ત્વબુભુત્સાકથારૂપેણ
વાદેન વા, પૂર્વપક્ષસિદ્ધાન્તચર્ચારૂપેણ વા,
જડચેતનપદાર્થયોરુપક્રમાદિષડ્વિધતાત્પર્યલિઙ્ગૈર્યો
નિર્ણયઃ સ વિચારઃ । તેન પર્યવસન્નોઽર્થઃ
સિદ્ધાન્તઃ । સ એવ સાગર ઇવ સાગરઃ । કુતઃ -
અનેકશઙ્કાપઙ્કપ્રક્ષાલકસમાધાનરૂપસલિલપૂર્ણત્વાત્ ।
અનેકાધ્યાયરૂપતરઙ્ગવત્ત્વાત્ । કઠિનપ્રમેયરૂપગ્રાહવત્ત્વાત્ ।
શુદ્ધબોધસ્વરૂપનિર્ણાયકસિદ્ધાન્તરૂપરત્નાનામાકરત્વાત્ ।
પરકૂલપ્રાપણાય શુદ્ધબુદ્ધિરૂપ નૌકાવત્ત્વાત્ ।
અસકૃદભ્યાસાત્મકાનુકૂલવાતેરિતત્વાત્ ।
અનન્યપ્રત્યગ્બ્રહ્મનિષ્ઠગુરુરૂપ - નૌકાદણ્ડવત્ત્વાત્ ।
એતદ્ગ્રન્થાભ્યાસજનિતજ્ઞાનગમ્યમોક્ષરૂપતીરવત્વાચ્ચ ।
૩. "ધી"શબ્દસ્ય બુદ્ધિરર્થઃ । "ર" ઇત્યસ્ય
વિષયેભ્યઃ પરાવૃત્ય તદ્રક્ષણમર્થઃ । તથા ચ વિષયેભ્યો
બુદ્ધિં યો નિયચ્છતિ સ એવ ધીરઃ । "પરાઞ્ચિ ખાનિ
વ્યતૃણત્ સ્વયમ્ભૂસ્તસ્માત્પરાક્પશ્યતિ નાનતરાત્મન્ । કશ્ચિદ્ધીરઃ
"(ક. ૨.૧.૧) ઇત્યાદિશ્રુતેઃ ।
૪. "અલ્પાક્ષરમસન્દિગ્ધં સારવદ્વિશ્વતોમુખમ્ ।
અસ્તોભમનવદ્યઞ્ચ સૂત્રં સૂત્રવિદો વિદુઃ" ।
ષડ્દર્શનાત્મકાનેકગ્રન્થેષુ સત્સ્વપ્યત્ર
"સૂત્ર"શબ્દેન શ્રીકૃષ્ણદ્વૈપાયનપ્રણીતં (૫૫૫
સૂત્રાત્મકમ્) શારીરકમીમાંસાશાસ્ત્રં ગૃહ્યતે ।
૫. "સૂત્રાર્થો વર્ણ્યતે યત્ર પદૈઃ સૂત્રાનુસારિભિઃ । સ્વપદાનિ
ચ વર્ણ્યન્તે ભાષ્યં ભાષ્યવિદો વિદુઃ" । એવં સત્સ્વપ્યનેકેષુ
ભાષ્યેષુ ભગવત્પાદીયમેવાત્ર ભાષ્યં યોગ્યં ગ્રહીતુમ્ ।
૬. "ઉક્તાનુક્તદુરુક્તાનાં ચિન્તા યત્ર
પ્રવર્તતે । તદેવ વાર્તિકં પ્રાહુર્વાર્તિકજ્ઞા
મહર્ષયઃ" । સત્સ્વપ્યેવઞ્જાતીયકેષ્વનેકેષુ શ્રીમત્
શઙ્કરભગવત્પાદપૂજ્યશિષ્યમણ્ડનમિશ્રાખ્યશ્રીસુરેશ્વરાચાર્યકૃતમેવાત્ર
વાર્તિકં ગ્રાહ્યમ્ ।

૭. આદિપદગ્રાહ્યાણિ ઉપનિષદ્ગીતાદીનિ ।
અપૂર્વો ગ્રન્થોઽધુના વિરચ્યત ઇતિ ચેન્ન ।
તેષામત્યન્તપ્રૌઢોત્તમાધિકારિકત્વેન મન્દાનામુપકારાયાસ્ય સાફલ્યાત્ ।

(૧૩)

સત્સ્વપ્યનેકેષુ ભાષાગ્રન્થેષુ પઞ્ચભાષાત્મબોધાદિષુ વિના વિચારસાગરં સ્વાત્મવિષયકસર્વસંશયા ન નિવર્તેરન્ । યતઃ કેચન ગ્રન્થકારાઃ શ્રવણમાત્રં કૃત્વા ભાષાગ્રન્થં રચયામાસુઃ । તતસ્તદ્ગતવિષયાઃ કેચન શાસ્ત્રાનુસારિણો ન ભવન્તિ । ક્વચિત્ શાસ્ત્રાર્થવૈપરીત્યઞ્ચોપલભ્યતે । અપરે કેચન સ્વલ્પશાસ્ત્રાભ્યાસમાત્રેણ ભાષાગ્રન્થાન્ રચયામાસુઃ । તત્ર વેદાન્તાર્થસ્ય સમગ્રસ્યાનુક્તત્વાત્ ન તૈર્નિસ્સંશયજ્ઞાનમુદેતિ । અસ્મિન્ વિચારસાગરે તુ વેદાન્તાર્થાઃ સમર્મકાઃ સમગ્રતયા શાસ્ત્રાનુસારેણ પ્રતિપાદ્યન્તે । સર્વત્ર શાસ્ત્રાવિરોધેન ચાત્મજ્ઞાનોપયોગિવિષયાઃ સપ્રપઞ્ચં નિરૂપ્યન્તે । તસ્માદયમેવ સર્વેભ્યો વેદાન્તગ્રન્થેભ્ય ઉત્તમોત્તમઃ । નાસ્ત્યસ્ય સમં ગ્રન્થાન્તરમ્ ।

## (A. 14-37) સાધનચતુષ્ટયનિરૂપણમ્-

(૧૪)

અનુબન્ધચતુષ્ટયં - અધિકારિવિષયપ્રયોજનસમબન્ધાનામનુબન્ધ ઇતિ નામ ।
સર્વસ્યૈવ હિ શાસ્ત્રસ્ય કર્મણો વાપિ કસ્યચિત્ ।
યાવત્પ્રયોજનં નોક્તં તાવત્ તત્કેન ગૃહ્યતે ॥

ઇતિ વચનાત્પ્રયોજનાદિજ્ઞાનાભાવે વિવેકિનાં ગ્રન્થે પ્રવૃત્ત્યનુપપત્તેસ્તદઙ્ગભૂતો અનુબન્ધઃ પ્રથમં નિરૂપ્યતે ।

## (A. 15-31) અધિકારિનિરૂપણમ્-

(૧૫)

અધિકારિલક્ષણં - નિસર્ગત એવ સર્વેષાં અન્તઃકરણે મલ
૧. સ્તમ્ભચતુષ્ટયાભાવે યથા મણ્ડપો ન તિષ્ઠતિ
તદ્વદનુબન્ધચતુષ્ટયાભાવે ન કસ્યાપિ ગ્રન્થે પ્રવૃત્તિઃ
સિદ્ધ્યેત્ । તસ્માદ્ગ્રન્થાદૌ તત્ર પ્રવૃત્ત્યર્થમવશ્યં
ગ્રન્થકર્ત્રા તચ્ચતુષ્ટયં નિરૂપણીયમ્ । સ્વજ્ઞાનમનુ =
સ્વવિવેકવિજ્ઞાનાન્તરમેવ મુમુક્ષું ગ્રન્થેન બધ્નાતિ = વેદાન્તવિચારે

પ્રવર્તયતીત્યનુબન્ધઃ ।
૨. સ્થૂલદેહગતવાતપિત્તશ્લેષ્મરૂપદોષત્રયજન્યરોગનિવૃત્તયે
યથા ધન્વન્તરિપ્રભૃતિભિરાયુર્વેદઃ પ્રાણાયિ, એવં
સર્વપ્રાણિસાધારણાન્તઃકરણગતમલવિક્ષેપાજ્ઞાનાખ્યદોષત્રયનિવૃત્તયે
કર્મોપાસનાજ્ઞાનકાણ્ડત્રયોપબૃંહિતં વેદચતુષ્ટયમીશ્વરેણાકારિ ।
મલં નામ પાપં - તચ્ચ સંસ્કારાત્મનાતિસૂક્ષ્મત્વાન્ન
પ્રત્યક્ષીક્રિયતે । કિન્તુ નિષિદ્ધકર્માનુષ્ઠાનેન,
વિષયાસક્ત્યા ચિત્તગતાશુભવાસનાભિશ્ચાનુમીયતે । તદ્વાન્
પુરુષો મલિનો ભવતિ । અતસ્તન્નિવૃત્ત્યર્થં નિષ્કામકર્માણિ,
ભૂતદયાદિ, ઈશ્વરનામોચ્ચારણાદીનિ ચ સાધનાનિ વિહિતાનિ ।
તત્રાદ્યદ્વયં મલમાત્રં નિવર્તયેત્ । નામોચ્ચારણં
તુ વિક્ષેપમપિ ॥ વિક્ષેપાવરણાત્મકદોષત્રયં આસ્તે ।
નિષ્કામકર્માનુષ્ઠાનેનાન્તઃકરણસ્થમલરૂપદોષનિવૃત્તિઃ ।
ઉપાસનયા વિક્ષેપસ્ય । યસ્ય નિષ્કામકર્મોપાસનાભ્યાં
મલવિક્ષેપયોર્નિવૃત્તાવપિ સ્વસ્વરૂપાવારકાજ્ઞાનં ન નિવૃત્તં,
યશ્ચ પુષ્કલસાધનચતુષ્ટયસમ્પન્નઃ સઃ અધિકારી ।

## (૧૬)

સાધનચતુષ્ટયં - (૧) નિત્યાનિત્યવસ્તુવિવેકઃ, (૨) ઇહામુત્રાર્થફલભોગવિરાગઃ, (૩) શમદમાદિષટ્કસમ્પત્તિઃ, (૪) મુમુક્ષુત્વં ચેતિ ।

## (૧૭)

નિત્યાનિત્યવસ્તુવિવેકઃ - ચિન્માત્ર આત્મા નિત્યઃ (સત્યઃ), નાશાપ્રતિયોગી, ક્રિયાશૂન્યઃ । તદ્વિલક્ષણોઽનાત્મા તુ દૃશ્યઃ પ્રપઞ્ચો નાશપ્રતિયોગી, અનિત્યઃ (અસત્યઃ), ક્રિયાસહિતશ્ચેતિ વિવેચનમેવ વિવેકઃ । વિક્ષેપો નામ - ચિત્તચાઞ્ચલ્યમ્ । યસ્ય ચિત્તં વિદાન્તશ્રવણે સ્વરૂપાનુસન્ધાને વા સ્થૈર્યં ન પ્રાપ્નોતિ કિન્તુ વિષયાભિમુખીભવતિ, તેન તન્નિવૃત્તયે ઈશ્વરનામોચ્ચારણમ્, અજપામન્ત્રાવૃત્તિઃ, ઈશ્વરમૂર્તિધ્યાનમ્, નિર્ગુણબ્રહ્માનુસન્ધાનમિત્યાદ્યુપાયા અનુષ્ઠેયાઃ । ઉપાસનાદિભિશ્ચિત્તૈકાગ્ર્યસમ્ભવાત્ । અથવા - શરીરવાઙ્મનોભિઃ, પુષ્કલેન ધનેન, શુશ્રુષયા ચ ઈશ્વર એવાસ્મદનન્તકોટિજન્માર્જિતસુકૃતપરિપાકવશાત્ ગુરુમૂર્તિરૂપેણાવતીર્ણ ઇતિ શ્રીસદ્ગુરૂપાસનં કુર્યાત્ । "યસ્ય દેવે પરા ભક્તિઃ" ઇત્યાદિશ્રુતેઃ । એતચ્ચ ગુરૂપાસનં વિનૈવ કર્મોપાસનાદિસાધનકલાપં ચિત્તશુદ્ધિદ્વારા ચિત્તૈકાગ્ર્યં જનયેત્ ।

અથવા - અહર્નિશં વેદાન્તશ્રવણ એવાત્યન્તમાદરેણ તીવ્રતરા પ્રવૃત્તિરપ્યુપાયાન્તરમેવ ।

તથા ચ શ્રુતિસ્મૃતિવાદાઃ - "શ્રોતવ્યો મન્તવ્યો નિદિધ્યાસિતવ્યઃ" (બૃ. ૪.૫.૬)
"વેદાન્તવિજ્ઞાનસુનિશ્ચિતાર્થાઃ" (મુ. ૩.૨.૬) "વેદાન્તે
પરમં ગુહ્યં પુરાકલ્પે પ્રચોદિતમ્"
(શ્વે. ૬.૨૨) "દિને દિને ચ વેદાન્તશ્રવણાત્" (કૈ. ૪) "આસુપ્તેરામૃતેઃ કાલં
નયેદ્વેદાન્તચિન્તયા" ઇત્યાદયઃ । એતચ્ચ વેદાન્તશ્રવણં
સ્વાતન્ત્ર્યેણૈવ કર્મોપાસનાદિકમનપેક્ષ્ય ચિત્તશુદ્ધ્યૈકાગ્ર્યાદિ જનયેત્ ।
"નાહમખણ્ડચિન્માત્રબ્રહ્મરૂપપ્રત્યાગાત્માનં જાને"ઇતિ વ્યવહારહેતુરજ્ઞાનમ્ ।
તચ્ચ તાદૃશતત્ત્વજ્ઞાનાદેવ નશ્યતિ ।

૧. યથા બૃહસ્પતિસવે બ્રાહ્મણસ્યૈવાધિકારઃ, રાજસૂયે
ક્ષત્રિયસ્યૈવ, વૈશ્યસ્તોમે વૈશ્યસ્યૈવ, તથા
સાધનચતુષ્ટયસમ્પન્નસ્યૈવ વેદાન્તવિચારેઽધિકારો નાન્યસ્ય ।

૨. હંસસ્ય નીરક્ષીરવિવેચનવત્ આત્માનાત્મનોઃ
દૃઢતરવેદાન્તાર્થવિચારેણ સ્વરૂપવિવેચનં વિવેકઃ ।
ઈદૃશવિવેકેન જગન્મિથ્યાત્વવિષયકપરોક્ષજ્ઞાનમાત્રં
જાયતે, નાપરોક્ષજ્ઞાનમ્ । તસ્માત્ સાધનાન્તરવતાપિ મુમુક્ષુણા
ભાવ્યમ્ । નનુ વાદિવિજિગીષૂણામપિ પણ્ડિતાનાં "આત્મા નિત્યઃ,
તતોઽન્યો દેહાદિપ્રપઞ્ચરૂપાનાત્માનિત્યઃ" ઇતિ ભેદજ્ઞાનં
અસ્તિ । કસ્માત્ તદ્ભેદજ્ઞાનં તેષાં વૈરાગ્યાદિત્રયમુત્તરં
સાધનજાતં ન જનયતીતિ ચેન્ન । તેષાં શાસ્ત્રાભ્યાસવશાદ્વિવેકે
સત્યપિ નિષ્કામકર્મોપાસનસાધ્યચિત્તશુદ્ધ્યભાવેન
મલિનવિક્ષિપ્તાન્તઃકરણત્વાત્ । યથોષરભૂમૌ કદલીવૃક્ષો ન
પ્રરોહતિ ઉર્વરાવનૌ તૂત્તરોત્તરમભિવર્ધતે ॥

ઉત્તરેષાં ત્રયાણામપિ સાધનાનામયં હેતુઃ, એતત્સ્થિત્યધીનોત્પત્તિકત્વાદ્વૈરાગ્યાદીનાં ત્રયાણામ્ । અતો નિમિત્તાભાવે નૈમિત્તિકાભાવાદવશ્યમેવાદૌ વિવેકઃ સમ્પાદનીયઃ ।

## (૧૮)

વૈરાગ્યં - દોષદૃષ્ટ્યા આબ્રહ્મલોકાદ્વિપરિવર્તમાનેષુ ભોગેષ્વનાદરરૂપોપેક્ષૈવ વૈરાગ્યં ઇત્યુચ્યતે બ્રહ્મપારગૈઃ ।

## (૧૯)

શમાદિષટ્કં નામ - શમદમશ્રદ્ધાસમાધાનોપરતિતિતિક્ષાઃ ।
શમો નામ - પ્રાચીનવિષયવાસનાત્યાગપૂર્વકં વિષયેભ્યો મનસઃ પ્રતિનિવર્તનમ્ ।

દમો નામ - તદ્વત્ વિષયેભ્યો બાહ્યેન્દ્રિયાણાં પ્રતિનિવર્તનમ્ ।
શ્રદ્ધા નામ - ગુરુવેદાન્તવાક્યેષુ દૃઢતરવિશ્વાસઃ, આસ્તિક્યમ્ ।
સમાધાનં નામ - લક્ષ્યે બ્રહ્મણિ ચિત્તૈકાગ્ર્યમ્ ।
તથા શુદ્ધાન્તઃકરણે મલવિક્ષેપાભાવાદ્વિવેકો વૈરાગ્યાદિસાધનાન્તરાણિ જનયેત્, નાન્યથા ।
તસ્માન્મુમુક્ષુભિશ્ચિત્તશુદ્ધિપૂર્વકં વિવેકાદિ સમ્પાદનીયમ્ ।

૧. વૈરાગ્યં નામ - સર્વવિષયતિત્યાજયિષા, ઇચ્છાસામાન્યાભાવો વા ।

(૧) યતમાનં (૨) વ્યતિરેકઃ (૩) એકેન્દ્રિયં (૪) વશીકરણં ચેતિ ચતુર્વિધમ્ ।

(૧) યતમાનં નામ - મન્દવિવેકઃ ।

(૨) વ્યતિરેકો નામ - નકુલો યથા નકુલલતામાશ્રિત્ય સર્પેણ યુદ્ધ્યતે તથા સત્સઙ્ગેન દુર્ગુણપરિહારે સદ્ગુણસમ્પાદને ચોત્સાહસમ્પત્તિઃ ।

(૩) એકેન્દ્રિયં નામ - વિષયેભ્ય ઇન્દ્રિયનિગ્રહ એવ ।

(૪) વશીકરણં નામ - સર્વતો મનોનિગ્રહ એવ ।

તદપિ ત્રિવિધં - મન્દમ્, તીવ્રમ્, તીવ્રતરઞ્ચેતિ ।

પુત્રવિત્તકલત્રાદિહાનિકાલિકવૈરાગ્યોપેતચિત્તવૃત્તિર્મન્દમ્ ।

ઐહિકપુત્રાદિવિષયોપભોગજસુખેઽસ્પૃહા તીવ્રમ્ ।

સાતિશયત્વપુનરાવૃત્ત્યાદ્યનેકદોષાવમર્શેન લોકાન્તરભોગેષ્વખિલેષ્વપીચ્છાનુદયસ્તીવ્રતરમ્ ।

તત્રાપરોક્ષજ્ઞાનાન્તરઙ્ગસાધનં તુ તીવ્રતરવશીકરણાખ્યવૈરાગ્યમેવ । અતોઽતિપ્રયત્નેન સમ્પાદનીયં તન્મુમુક્ષુભિઃ ।

૨. ઇવષયદોષદૃષ્ટ્યાત્મકાઙ્કુશેન મનોરૂપમાતઙ્ગસ્ય સ્વાયત્તીકરણં શમઃ ।

૩. દોષદૃષ્ટિપૂર્વકં શાસ્ત્રચિન્તારૂપકશાઘાતેન તત્તચ્છબ્દાદિવિષયરૂપવિષમમાર્ગેભ્ય ઇન્દ્રિયરૂપહયાનાં સ્વવશતાપાદાનં દમઃ ।

૪. યસ્ય ત્વીશ્વરાચાર્યવેદવાક્યાદિષુ પૂજ્યત્વગ્રહેણ પ્રેમાતિશયરુપા નિરતિશયભક્તિઃ સઞ્જાયતે તસ્યૈવ વેદશાસ્ત્રાચાર્યાદિષુ શ્રદ્ધા જાયેત, નેતરસ્ય । અતઃ શ્રદ્ધા ભક્તિમપેક્ષતે ।

૫. લક્ષ્યે બ્રહ્મણિ ચિત્તૈકાગ્ર્યં સમાધાનમ્ । પૂર્વમધિકારિલક્ષણે સગુણોપાસનયા વિક્ષેપદોષનિવૃત્તિજન્યચિત્તૈકાગ્રતોક્તા । અનયોરેકાગ્ર્યયોર્ભેદસ્તુ - સગુણબ્રહ્મધ્યાનેન વા મૂર્ત્યુપાસનેન વા પ્રથમં જાયતે । દ્વિતીયં તુ નિર્ગુણબ્રહ્મણ્યનવરતસ્થિત્યા ।

ઉપરતિઃ નામ - સસાધનાનાં ઐહિકામુષ્મિકભોગહેતૂનાં લૌકિકવૈદિકકર્મણામ્, સ્રક્ચન્દનાદિવિષયાણામ્, વિશેષતઃ સ્રીણાં ચ પરિત્યાગો હાલાહલવત્ ।

તિતિક્ષા નામ - શીતોષ્ણક્ષુત્પિપાસાદિદ્વન્દ્વસહનમ્ ।

શમાદીનાં ષણ્ણામપિ સાધનાનાં એકસાધનત્વેન એવાભિપ્રેતત્વાત્ વિવેકાદીનિ ચત્વાર્યેવ સાધનાનિ । ન નવેતિ જ્ઞેયમ્ ।

૧. ત્યક્તેઽપિ વિષયે કથઞ્ચિત્પુનઃ પ્રાપ્તે પૂર્વાનુભવજનિતવાસનાવશાત્પુનરિચ્છાનુદયો વૈરાગ્યસ્ય ફલીભૂતાવસ્થા ઉપરતિરિત્યુચ્યતે । અપ્રાપ્તે વિષયે દોષદૃષ્ટિપૂર્વકમિચ્છાનુદયો વૈરાગ્યમિતિ ભેદઃ ।

૨. પત્નીપુત્રવિત્તવયોઽવસ્થાજાત્યભિમાનાદિકં કર્મસાધનમ્ ।

૩. નનુ વિષયગ્રહણેનૈવ સ્ત્રીરૂપવિષયસ્ય ગૃહીતત્વાત્પુનરુક્તિરનર્થકેતિ ચેન્ન । અતીતાનન્તકોટિજન્માર્જિતસ્ત્રીવિષયોપભોગજનિતવાસનાયાઃ તીવ્રતરત્વાત્, શબ્દસ્પર્શરૂપરસગન્ધમૈથુનાત્મકષડેન્દ્રિયવિષયાણામેકત્રૈવ સ્ત્રીપિણ્ડે સમ્ભવાત્, સર્વેભ્યોઽપિ વિષયેભ્યઃ સંસારાર્ણવનિમજ્જનહેતુભૂતેભ્યઃ સ્ત્રીવ્યક્તેરેવ પ્રબલતરત્વાત્સર્વાનર્થમૂલત્વાચ્ચ સ્ત્રીરૂપે વિષયેઽતિતરાં વૈરસ્યં સમ્પાદનીયમિત્યભિપ્રાયં દ્યોતયિતું પુનર્ગ્રહણમ્ । તથા ચોક્તમ્ ।

યસ્ય સ્ત્રી તસ્ય ભોગેચ્છા નિસ્ત્રીકસ્ય ક્વ ભોગભૂઃ ।
સ્ત્રિયં ત્યક્ત્વા જગત્ત્યક્તં જગત્ત્યક્ત્વા સૂખી ભવેત્ ॥

લિન્દુ માભિગાં લિન્દુ માભિગામ્ । (છા. ૮.૧૪.૧)
સર્વેન્દ્રિયાણાં જરયન્તિ તેજઃ । (ક. ૧.૧.૨૬) ઇતિ ।
"અથ યદ્યજ્ઞ ઇત્યાચક્ષતે બ્રહ્મચર્યમેવ તત્"(છા. ૮.૫.૧) ઇત્યાદિના બહુપ્રપઞ્ચેન કેવલબ્રહ્મચર્યસ્ય સ્ત્રીવિષયપરિત્યાગલક્ષણસ્ય વૈરાગ્યસ્ય (મૈથુનાસમાચારસ્ય) દહરાદ્યુપાસનાન્તરપ્રાપ્યબ્રહ્મલોકાવાપ્તિસાધનત્વમુચ્યતે ।

૪. વેદાન્તશ્રવણાદિપ્રસઙ્ગે સતિ તત્પ્રતિબન્ધકશીતોષ્ણક્ષુત્પિપાસાદિદ્વન્દ્વાન્તરાયસહનરૂપા તિતિક્ષા કાર્યા । અન્યથા ક્ષુત્પિપાસાદિપ્રતીકારે વ્યાપૃતચિત્તસ્ય શ્રવણાદિપ્રવૃત્ત્યસમ્ભવઃ સ્યાત્ । અતોઽવશ્યં તિતિક્ષા સમ્પાદનીયા ।

૫. આત્માનં રથિનં વિદ્ધિ શરીરં રથમેવ તુ ।
બુદ્ધિં તુ સારથિં વિદ્ધિ મનઃ પ્રગ્રહમેવ ચ ॥ ક. ૧.૩.૩॥

ઇન્દ્રિયાણિ હયાનાહુર્વિષયાંસ્તેષુ ગોચરાન્ ।
આત્મેન્દ્રિયમનોયુક્તં ભોક્તેત્યાહુર્મનીષિણઃ ॥ ૪॥

યસ્ત્વવિજ્ઞાનવાન્ ભવત્યયુક્તેન મનસા સદા ।
તસ્યેન્દ્રિયાણ્યવશ્યાનિ દુષ્ટાશ્વા ઇવ સારથેઃ ॥ ૫॥

યસ્તુ વિજ્ઞાનવાન્ ભવતિ યુક્તેન મનસા સદા ।
તસ્યેન્દ્રિયાણિ વશ્યાનિ સદશ્વા ઇવ સારથેઃ ॥ ૬॥

યસ્ત્વવિજ્ઞાનવાન્ ભવત્યમનસ્કઃ સદાઽશુચિઃ ।
ન સ તત્પદમાપ્નોતિ સંસારં ચાધિગચ્છતિ ॥ ૭.. ..

યસ્તુ વિજ્ઞાનવાન્ ભવતિ સમનસ્કઃ સદા શુચિઃ ।
સ તુ તત્પદમાપ્નોતિ યસ્માદ્ભૂયો ન જાયતે ॥ ૮॥

વિજ્ઞાનસારથિર્યસ્તુ મનઃપ્રગ્રહવાન્ નરઃ ।
સોઽધ્વનઃ પારમાપ્નોતિ તદ્વિષ્ણોઃ પરમં પદમ્ ॥ ૯॥

શરીરરૂપરથસ્યેન્દ્રિયાણિ હયાઃ, મનઃ પ્રગ્રહઃ,
બુદ્ધિઃ સારથિઃ, આત્મા યજમાનો રથી । યસ્ય યજમાનસ્ય
બુદ્ધિરૂપસારથિર્વિજ્ઞાનવાન્ કુશલસ્તસ્યેન્દ્રિયાશ્વાઃ સન્માર્ગે
ગત્વા યજમાનં મોક્ષં ગમયેયુઃ । વિપરીતબુદ્ધિસારથ્યુપેતસ્તુ
યજમાનોઽદાન્તેન્દ્રિયાશ્વૈર્નિષિદ્ધમાર્ગેણ નરકમાપ્નુયાત્ ।
તસ્માન્મુમુક્ષુર્બુદ્ધિસારથિં સ્વેચ્છાચારાત્પ્રતિનિવર્તયન્ ઇન્દ્રિયાશ્વાન્
સન્માર્ગે પ્રવર્તયેત્ । અત્ર બુદ્ધિસારથેઃ સ્વવશતાપાદનં શમઃ ।
ઇન્દ્રિયાશ્વવશીકરણં દમઃ ઇતિ ।
અન્યત્રાપ્યુક્તમ્મન એવ મનુષ્યાણાં કારણં બન્ધમોક્ષયોઃ ।
બન્ધાય વિષયાસક્તં મુક્ત્યૈ નિર્વિષયં સ્મૃતમ્ ॥ (પ. બ્ર. યો. ૧૧૭)
ચિત્તં કારણમર્થાનાં તસ્મિન્ સતિ જગત્ત્રયમ્ ।
તસ્મિન્ ક્ષીણે જગત્ક્ષીણં તચ્ચિકિત્સ્યં પ્રયત્નતઃ ॥ ઇતિ ।
સારથેરશ્વાનાં ચ યથા પરસ્પરાધીનતા તથા બુદ્ધેરિન્દ્રિયાણાં
ચ પરસ્પરાધીનતા વર્તતે । વિચિત્રાનેકમણિઘટિતમાલાયા યથા
ચામીકરત્વેનૈકત્વવ્યવહારસ્તથા ષણ્ણામપિ વિલક્ષણાનાં શમાદીનાં
પરસ્પરાપેક્ષણેનૈકસાધનત્વવ્યવહારઃ । શમાદીનાં પરસ્પરસહાયતા
ચેત્થમ્-

(૧) મનોવશીકરણમન્તરેણ ઇન્દ્રિયસ્ય જયો ન સમ્ભવતીતિ દમઃ શમં અપેક્ષતે ।

(૨) બહિર્મુખસ્ય મનસો દારપુત્રવિત્તાદ્યાસક્તસ્ય
વેદાન્તશાસ્ત્રગુરુપ્રભૃતિષુ પૂર્ણશ્રદ્ધાસમ્ભવાચ્છ્રદ્ધા શમમપેક્ષતે ।
(૩) અન્તરા મનોનિરોધં બ્રહ્મણિ ચિત્તૈકાગ્ર્યાસમ્ભવાત્સમાધાનં શમમપેક્ષતે ।
(૪) ક્ષીરાદિના સંવર્ધિતો માર્જારઃ
પાશાદ્યવશીકૃતત્વાન્મૂષકદર્શનમાત્રેણ યથા તદ્ગ્રહણાય
ધાવેદેવં વિષયેભ્ય ઉપરતમપિ મનો નિરોધાદિભિરવશીકૃતં
ચેત્, સમ્પ્રાપ્તે વિષયે પ્રાચીનવાસનાવેગાદ્ધાવેદિત્યત ઉપરતિઃ
શમમપેક્ષતે ।
(૫) અન્તર્મુખીભૂતમનસૈવ શીતોષ્ણાદિદ્વન્દ્વસહનં કર્તું શક્યતે,
ન તુ બહિર્મુખીભૂતમનસેત્યતસ્તિતિક્ષાપિ શમમપેક્ષતે । ઇતિ
શમઃ દમાદીનાં પઞ્ચાનાં સહકારી ।
(૬) વિના તુ ઇન્દ્રિયદમેન મનો ન જીયત ઇત્યતઃ શમોઽપિ દમમાકાઙ્ક્ષતે ।
(૭) રૂપરસાદિવિષયાસક્તસ્ય ગુરુવેદાન્તવાક્યશ્રદ્ધા ન જાયેતેત્યતઃ
શ્રદ્ધાપિ દમમાકાઙ્ક્ષતે ।
(૮) ઇન્દ્રિયનિગ્રહમન્તરા ચૈકાગ્ર્યં ન મનસો જાયેતેત્યતઃ સમાધાનમપિ
દમમાકાઙ્ક્ષતે ।
(૯) ઋતે ત્વિન્દ્રિયદમેનાનુભૂતવિષયકવાસનાવેગવશાત્
દૃષ્ટેષ્ટવિષયેષુ પુનઃ પુનરિચ્છા જાયેતેત્યત ઉપરતિરપિ દમમાકાઙ્ક્ષતે ॥

## (૨૦)

મુમુક્ષા નામ - સ્વસ્વરૂપભૂતબ્રહ્માવાપ્તિરનર્થનિવૃત્તિશ્ચ મોક્ષ ઇતિ તસ્મિન્ તીવ્રતરેચ્છા ।

## (૨૧)

જ્ઞાનોત્પત્તિસાધનાનિ - વિવેકાદિચતુષ્ટયં, શ્રવણમનનનિદિધ્યાસનાનિ ત્રીણિ, તત્ત્વમ્પદાર્થશોધનં ચેત્યષ્ટૌ જ્ઞાનસાધનાનિ ।

## (૨૨)

અન્તરઙ્ગબહિરઙ્ગસાધનાનિ - વિવેકાદીનિ પૂર્વોક્તસાધનાન્યષ્ટાવપિ અન્તરઙ્ગસાધનાનિ । યજ્ઞદાનતપાદીનિ બહિરઙ્ગસાધનાનિ । અનયોર્મુમુક્ષુર્જિજ્ઞાસૌત્કટ્યેઽન્તરઙ્ગમેવ સાધનમનુતિષ્ઠેત્ ।
(૧૦) અન્તરેણ ત્વિન્દ્રિયદમેન વિષયસાન્નિધ્યવશાત્ ક્ષુભિતં સન્મનઃ

શીતોષ્ણાદિદ્વન્દ્વં ન વિષહેતેત્યતસ્તિતિક્ષાપિ દમમાકાઙ્ક્ષતે ।
ઇતિ દમઃ શમાદીનાં પઞ્ચાનાં સહકારી ।
(૧૧) શ્રીસદ્ગુરુવેદાન્તશાસ્ત્રેષુ તીવ્રતરશ્રદ્ધાભાવે શ્રવણાદૌ શ્રવણોપયોગિશમાદિસાધને પ્રવૃત્તિર્ન જાયેતેત્યતઃ શમાદયોઽપિ શ્રદ્ધામપેક્ષન્તે ।
(૧૨) અન્તરેણ ચિત્તૈકાગ્ર્યં શમાદિસાધનાનિ ન સિદ્ધ્યેરન્નિત્યતઃ શમાદયઃ સમાધાનમપેક્ષન્તે ।
(૧૩) વિષયેભ્યશ્ચેત્ સ્યાદનુપરતં ચિત્તં તદા શમાદયો ન સિદ્ધ્યેરન્નિત્યતઃ શમાદય ઉપરતિમપેક્ષન્તે ।
(૧૪) શીતોષ્ણક્ષુત્પિપાસાલાભાલાભાદિવિચિત્રવિષયાનુભવજનિતતાપત્રયાસહં ચેત્ સ્યાચ્ચિત્તમ્, મનસઃ શમઃ, ઇન્દ્રિયાણાં દમઃ, ગુરુવેદાન્તવાક્યે શ્રદ્ધા, ચિત્તૈકાગ્ર્યં, પ્રાપ્તોપભોગયોગ્યધનાદિવિષયેભ્ય ઉપરતિશ્ચેત્યાદિસાધનાનિ ન સિદ્ધ્યેરન્નિત્યતઃ શમાદયસ્તિતિક્ષામપેક્ષન્તે । ઇત્થં પરસ્પરસાપેક્ષત્વાત્ શમાદિષટ્કમપિ મિલિત્વૈકમેવ સાધનમિત્યુચ્યતે ।
૧. યથા બુભુક્ષિતસ્યાનન્યચિત્તતયા અન્નપાનાદિસમ્પિપાદયિષા, યથાગ્નિના દગ્ધસ્ય તચ્છાન્ત્યર્થં જલાશયાન્વેષણમ્, એવં સંસારતાપત્રયપરિવેષ્ટિતસ્ય તતો મુમુક્ષાયામનન્યચિત્તતયા તદૈકાગ્ર્યમેવ તત્ર તીવ્રતા । “પ્રયોજનમનુદ્દિશ્ય ન મન્દોપિ પ્રવર્તતે “ઇતિ ન્યાયેન મોક્ષરૂપફલે મન્દેચ્છાભાવે નિષ્કામકર્માનુષ્ઠાને ન કસ્યચિત્પ્રવૃત્તિઃ સ્યાત્ । અતો મન્દમુમુક્ષયા સકલેતરસાધનેભ્યઃ પ્રથમતો ભાવ્યમ્ । તદાનીં સા ન તીવ્રા સ્યાત્ । સિદ્ધેષુ ત્વિતરસાધનેષુ સા તીવ્રા ભવેત્ । સૈવ તીવ્રેચ્છા શ્રવણાદિપ્રવૃત્તૌ નિદાનમ્ ।
૨. યથા હંસેન ક્ષીરનીરવિવેચનં ક્રિયતે, યથા વા દધ્નો નવનીતસ્ય વિવેચનં ક્રિયતે એવં ચિજ્જડયોરુપલભ્યમાનકારણકાર્યત્વાધિષ્ઠાનારોપિતત્ત્વ-દૃગ્દૃશ્યત્વ-સાક્ષિસાક્ષ્યત્વાદિસ્વરૂપસ્ય શાસ્ત્રાનુસારિવિચારણમેવ શોધનમ્ ।
૩. ધનુષિ લક્ષ્યવેધાય સન્ધીકૃતો વા, ધનુષો મુક્તો વા બાણો યથા તદ્વેધનેઽન્તરઙ્ગસાધનં ભવતિ, એવં જ્ઞાનોત્પત્તૌ વિવેકાદયોઽષ્ટાવપ્યન્તરઙ્ગસાધનાનિ સન્નિપત્યોપકારકત્વાત્ ।
૪. યથા ધનુઃ લક્ષ્યવેધને બહિષ્ઠમેવ સત્

બાણસન્ધાનદ્વારોપકારકત્વાદ્બહિરઙ્ગસાધનમ્ ॥

યસ્ય સાધનસ્ય શ્રવણાદિકં તત્કાર્યભૂતમપરોક્ષજ્ઞાનં વા દૃષ્ટં ફલં, તદન્તરઙ્ગમિત્યુચ્યતે । વિવેકાદિચતુષ્ટયં શ્રવણે મુખ્યસાધનમ્; બહિર્વિષયાભિમુખસ્ય વિવેકાદ્યયોગાચ્છ્રવણાદ્યસિદ્ધેઃ । એવં શ્રવણમનનનિદિધ્યાસનાન્યપિ બ્રહ્મસાક્ષાત્કારે મુખ્યસાધનાનિ, તદભાવે તદભાવાત્ । તત્ત્વમોઃ પદાર્થજ્ઞાનમપ્યખણ્ડમહાવાક્યાર્થાભેદજ્ઞાને કારણમ્ । ઇત્થં વિવેકાદિચતુષ્ટયસ્ય શ્રવણાદૌ, શ્રવણાદેશ્ચાપરોક્ષજ્ઞાને તત્ત્વમ્પદાર્થજ્ઞાનસ્ય મહાવાક્યાર્થજ્ઞાને ચ ક્રમેણ કારણભાવાપત્તૌ પૂર્વોક્તાન્યષ્ટાવપ્યન્તરઙ્ગસાધનાનીત્યુચ્યન્તે । અતસ્તાનિ સાધનાનિ મુમુક્ષુણા તીવ્રતરશ્રદ્ધયા સમ્પાદનીયાનિ । યસ્ય સાધનસ્ય શ્રવણં વા જ્ઞાનં વા દૃષ્ટપ્રયોજનં ન ભવતિ, કિન્તુ ચિત્તશુદ્ધિમાત્રં ફલં, તત્ જ્ઞાનસ્ય બહિરઙ્ગસાધનમ્ । એવં યજ્ઞાદિકર્માણિ બહિરઙ્ગસાધનાનીત્યુચ્યન્તે । યદ્યપિ તાનિ સકામસ્યાનુષ્ઠીયમાનાનિ સંસારહેતુત્વેન બન્ધાય ભવન્તિ ન તુ ચિત્તશુદ્ધયે, તથાપિ "યથાક્રતુ"શ્રુત્યા સંયોગપૃથક્ત્વન્યાયેન ચ નિષ્કામસ્ય ચિત્તશુદ્ધયે ભવન્તિ । તસ્માન્નિષ્કામસ્ય મુમુક્ષોઃ ચિત્તશુદ્ધિદ્વારા જ્ઞાનોત્પત્તિહેતુત્વાદ્યજ્ઞાદીનિ બહિરઙ્ગસાધનાનીતિ, વિવેકાદીનિ ત્વન્તરઙ્ગસાધનાનીતિ ચોચ્યન્તે । બહિરઙ્ગાનિ = વિપ્રકૃષ્ટાનિ । અન્તરઙ્ગાનિ = સન્નિકૃષ્ટાનિ । યજ્ઞાદિનિખિલકર્માણિ તત્સાધનવિત્તદારપુત્રાદીનિ ચ નિશ્શેષં યઃ સન્ન્યસ્યતિ સ એવ જ્ઞાને ઉત્તમાધિકારી । જ્ઞાનાધિકારિણિ યજ્ઞાદીનામસમ્ભવાત્તાનિ બહિરઙ્ગાનીત્યુચ્યન્તે ।

## (૨૩)

વિવેકાદીનામન્તરઙ્ગસાધનત્વનિરૂપણં - વિવેકાદીનાં જ્ઞાનાધિકારિણિ સમ્ભવાત્તાન્યન્તરઙ્ગાનીત્યુચ્યન્તે । અત્ર ચાયં વિશેષઃ - વિવેકા॥એવં નિત્યનૈમિત્તિકયજ્ઞાદીનિ શ્રૌતસ્માર્તકર્માણિ, સગુણોપાસનાદીનિ ચ મલવિક્ષેપાદિદોષનિરાકરણેન ચિત્તશુદ્ધિમૈકાગ્ર્યં ચોત્પાદ્ય જિજ્ઞાસોત્પત્તિદ્વારા જ્ઞાને
આરાદુપકારકત્વાદ્બહિરઙ્ગાનીત્યુચ્યન્તે ।
આરુરુક્ષોર્મુનેર્યોગં કર્મકારણમુચ્યતે ।
યોગારૂઢસ્યતસ્યૈવ શમઃ કારણમુચ્યતે ॥ (ભ. ગી. ૬.૩)
ઇત્યાદિવચનૈરન્તરઙ્ગસાધનસિદ્ધ્યનન્તરમેવ વહિરઙ્ગસાધનાનિ પરિત્યાજ્યાનિ । અન્યથા વિવેકાદિસાધનસિદ્ધેઃ પૂર્વમેવ નિત્યનૈમિત્તિકયજ્ઞાદિકર્મપરિત્યાગે ઉભયભ્રષ્ટોઽધઃ પતેદેવ । યથા અન્ધકૂપે પતિતો દુર્બલં તૃણાદ્યાશ્રયમવલમ્બ્ય લમ્બમાનઃ સ્વોદ્ધરણાય પ્રહિતદૃઢતરરજ્જ્વવલમ્બનાત્પૂર્વમેવ પ્રાક્તનાવલમ્બં પરિત્યજન્નધઃ પતેત્તદ્વત્ । દીનાં શ્રવણે ઉપયુક્તત્વાત્ શ્રવણાદીનાં ચ જ્ઞાને વિનિયુક્તત્વાત્ વિવેકાદીન્યપેક્ષ્ય શ્રવણાદીન્યન્તરઙ્ગસાધનાનિ । વિવેકાદીનિ તુ તદપેક્ષયા બહિરઙ્ગાનિ । યદ્યપિ સર્વત્ર વેદાન્તશાસ્ત્રેષુ જ્ઞાનં પ્રતિ વિવેકાદીન્યન્તરઙ્ગસાધનત્વેનૈવોક્તાનિ ન બહિરઙ્ગસાધનત્વેન, તથાપિ વિવેકાદીનાં હિ, જ્ઞાને અન્તરઙ્ગસાધનીભૂતશ્રવણમેવ પ્રત્યક્ષં ફલમ્ । શ્રવણાદિવદ્વિવેકાદીન્યપિ જિજ્ઞાસુના મુમુક્ષુણાવશ્યમાદર્તવ્યાન્યેવ, ન તુ યજ્ઞાદિવદ્ધાતવ્યાનિ । તસ્માત્કારણાત્, યજ્ઞાદ્યપેક્ષયાન્તરઙ્ગત્વાચ્ચ તાન્યન્તરઙ્ગસાધનાનીત્યુચ્યન્તે ।

## (A. 24-26) જ્ઞાને મુખ્યાન્તરઙ્ગસાધનશ્રવણાદીનાં લક્ષણમ્-

### (૨૪)

શ્રવણલક્ષણં - વસ્તુતો વિચાર્યમાણે શ્રવણાદીન્યપિ નાન્તરઙ્ગસાધનાનિ જ્ઞાનસ્ય, કિન્તુ તત્ત્વમસ્યાદિમહાવાક્યાન્યેવ; પ્રમાણફલત્વાત્ જ્ઞાનસ્ય । "તં ત્વૌપનિષદં પુરુષમ્"(બૃ. ૩.૯.૨૬) "વેદાન્તવિજ્ઞાનસુનિશ્ચિતાર્થાઃ" (મુ. ૩.૨.૬) ઇત્યાદિશ્રુતિભ્યઃ । શ્રવણં નામ યુક્ત્યા ષડ્વિધતાત્પર્યલિઙ્ગૈઃ વેદાન્તવાક્યાનામદ્વિતીયે પ્રત્યગભિન્નબ્રહ્મણિ તાત્પર્યનિર્ણયાનુકૂલચેતોવૃત્તિવિશેષઃ ।

૧. વેદાન્તશ્રવણં હિ દીર્ઘકાલં નૈરન્તર્યેણાદરેણાનુષ્ઠેયમ્ । વિવેકાદિસાધનચતુષ્ટયરહિતસ્ય બહિર્મુખસ્ય નિરન્તરાયતયા શ્રવણં ન સિદ્ધ્યેત્ । શ્રવણમન્તરા મનનનિદિધ્યાસને ન સ્યાતામ્ । અતઃ શ્રવણાદ્યઙ્ગતયા વિવેકાદિચતુષ્ટયમવશ્યં સમ્પાદ્ય વિચારયેત્ । લોકે શાસ્ત્રજ્ઞોઽપિ વિવેકમાત્રયુક્તોઽપ્યત્યન્તવિષયાસક્તઃ સન્ કામ્યકર્મસુ પ્રવર્તતે । અતો દ્વિતીયસાધનેનેહામુત્રફલભોગવૈરાગ્યેણાપ્યવશ્યં ભાવ્યમ્ । પ્રથમદ્વિતીયાભ્યાં સમ્પન્નોઽપિ કશ્ચિત્કોપાદિના તપ્યત ઇતિ તૃતીયેનાપિ શમાદિસાધનેન ભાવ્યમ્ । સત્સ્વપિ ત્રિષુ સાધનેષુ મુમુક્ષાભાવે શ્રવણાદૌ ન પ્રવર્તેતેતિ ચતુર્થ્યા અપિ મુમુક્ષયા અવશ્યં ભાવ્યં ઇતિ ।

૨. ધૂમજ્ઞાનેન વહ્નિજ્ઞાનસ્ય જાયમાનત્વાદ્યથા ધૂમો વહ્નિનિશ્ચયે લિઙ્ગં, તથાદ્વૈતસ્વરૂપે પ્રત્યગભિન્નબ્રહ્મણિ વેદાન્તાનાં તાત્પર્યમિતિ, ઉપક્રમોપસંહારાદિષડ્વિધતાત્પર્યલિઙ્ગૈર્નિર્ણીયમાનત્વાત્તાનિ તાત્પર્યલિઙ્ગાનીત્યુચ્યન્તે । યુક્તિશબ્દેન ચૈતાનિ લિઙ્ગાનિ ગૃહ્યન્તે । તાનિ ચ લિઙ્ગાનિ ષડ્વિધાનિઉપક્રમોપસંહારાવભ્યાસોઽપૂર્વતાફલમ્ । અર્થવાદોપપત્તી ચ લિઙ્ગં તાત્પર્યનિર્ણયે ॥ ઇતિ વચનાત્ ।

(૧) છાન્દોગ્યે ષષ્ઠપ્રપાઠકે "સદેવ સોમ્યેદમગ્ર આસીદેકમેવાદ્વિતીયમ્" (છા. ૬-૨-૧) ઇતિ પ્રકરણોપક્રમે યોઽર્થ ઉક્તઃ સ એવોપસંહારેઽપિ "ઐતદાત્મ્યમિદં સર્વં તત્સત્યં સ આત્મા"(છા. ૬.૧૬.૩) ઇત્યુપસંહૃતઃ । ઇત્યુપક્રમોપસંહારૈકરૂપ્યમેકં લિઙ્ગમ્ ।

(૨) યથા અર્થી પુરુષઃ સ્વાભિલષિતમર્થં ભિન્નભિન્નવાક્યૈઃ પુનઃ
પુનઃ પ્રકટીકુર્યાદેવં ભિન્નભિન્નયુક્તિમદ્વચનૈઃ પ્રત્યગ્બ્રહ્મૈક્યં
“તત્ત્વમસિ“(છા. ૬.૮.૭) ઇતિ નવકૃત્વઃ પુનઃ
પુનરભ્યસ્યતે । ઇત્યભ્યાસોઽપિ દ્વિતીયં લિઙ્ગમ્ ॥

## (૨૫)

મનનલક્ષણં - મનનં નામ પ્રત્યગ્બ્રહ્મૈક્યસાધક-તદ્ભેદબાધક-
(૩) અદ્વિતીયં પ્રત્યગભિન્નં બ્રહ્મ વેદાન્તેતરપ્રમાણાગમ્યમિતિ
સ્વપ્રકાશત્વેન નિત્યાપરોક્ષમિતિ ચાર્થઃ
“શ્રદ્ધત્સ્વ સોમ્ય“(છા. ૬.૧૨.૨)
“આચાર્યવાન્ પુરુષો વેદ“ (છા. ૬.૧૪.૨) ઇતિ
ગુરુવેદાન્તવાક્યશ્રદ્ધામાત્રસમધિગમ્યત્વબોધકવચનૈર્ગમ્યત
ઇત્યપૂર્વતા તૃતીયં લિઙ્ગમ્ ।
(૪) “તસ્ય તાવદેવ ચિરં યાવન્ન વિમોક્ષ્યે અથ
સમ્પત્સ્યે“(છા. ૬.૧૪.૨) ઇત્યનેન કાર્યકરણસઙ્ઘાતાદ્વ્યાવૃત્તો
બ્રહ્મવિત્ બ્રહ્મૈવ ભવતીત્યદ્વૈતબ્રહ્મભાવાપત્તિરૂપફલં
પ્રતિપાદ્યત ઇતિ ફલં ચતુર્થં લિઙ્ગમ્ ।
(૫) “તદૈક્ષત બહુ સ્યાં
પ્રજાયેય તત્તેજોઽસૃજત“(છા. ૬.૨.૩)
ઇત્યાદિસૃષ્ટિવાક્યૈર્ભેદનિન્દાપૂર્વકમભેદઃ સ્તૂયત ઇત્યર્થવાદોઽપિ
પઞ્ચમં લિઙ્ગમ્ ।
(૬) પ્રતિપાદયિષિતસ્યાદ્વૈતસ્યાનુકૂલદૃષ્ટાન્તપ્રદર્શનમુપપત્તિઃ ।
“યથા સોમ્યૈકેન મૃત્પિણ્ડેન સર્વં મૃણ્મયં
વિજ્ઞાતં સ્યાદ્વાચારમ્ભણં વિકારો નામધેયં મૃત્તિકેત્યેવ
સત્યમ્“ (છા. ૬.૧.૪) “યથા સોમ્યૈકેન
લોહમણિના ॥“(છા. ૬.૧.૫) “યથા સોમ્યૈકેન
નખનિકૃન્તનેન“(છા. ૬.૧.૬) “એવમેવ ખલુ
સોમ્યાન્નેન શુઙ્ગેનાપો મૂલમન્વિચ્છાદ્ભિઃ સોમ્ય શુઙ્ગેન તેજો
મૂલમન્વિચ્છ તેજસા સોમ્ય શુઙ્ગેન સન્મૂલમન્વિચ્છ સન્મૂલાઃ
સોમ્યેમાઃ સર્વાઃ પ્રજાઃ સદાયતનાઃ સત્પ્રતિષ્ઠાઃ“(છા. ૬.૮.૪)
ઇત્યાદિવચનૈઃ કારણસદ્રૂપવ્યતિરેકેણ કાર્યં નાસ્ત્યેવ, માયામાત્રમિદં

દૃશ્યમિતિ મૃલ્લોહાદિદૃષ્ટાન્તમુખેન જગત્સર્વં પ્રત્યક્ચેતનં બ્રહ્મૈવેત્યુપપત્તિરુચ્યત ઇત્યુપપત્તિરપિ ષષ્ઠં લિઙ્ગમ્ ।

એવં ઉપક્રમોપસંહારાદિષડ્વિધલિઙ્ગૈર્વેદાન્તવાક્યાનામદ્વૈતે પ્રત્યગાત્મનિ તાત્પર્યનિર્ણયાનુકૂલચેતોવૃત્તિઃ શ્રવણમ્ । એવમેવ સર્વેષામપિ વેદાન્તાનામદ્વૈતે તાત્પર્યાવધારણં બોધ્યમ્ । ઉપક્રમઃ = પ્રકરણારમ્ભઃ, ઉપસંહારઃ = પ્રકરણસમાપ્તિઃ ।

૧. ઐક્યસાધકયુક્તયઃ-

(૧) અનુમાનપ્રમાણં - યત્ સચ્ચિદાનન્દસ્વરૂપં ન તતો બ્રહ્મણો ભિદ્યતે; યત્ સચ્ચિદાનન્દસ્વરૂપં ન ભવતિ તત્ બ્રહ્મણો ભિદ્યતે । યથેશ્વરઃ સચ્ચિદાનન્દસ્વરૂપત્વાદેવ બ્રહ્મણો ન ભિદ્યતે, વ્યાવહારિકો ઘટાદિસ્ત્વનૃતજડદુઃખાત્મકત્વેન સચ્ચિદાનન્દરૂપત્વાભાવાદ્બ્રહ્મણો ભિદ્યતે । એવં જીવોઽપિ બ્રહ્મૈવ, સચ્ચિદાનન્દસ્વરૂપત્વાત્ ઈશ્વરવત્ ઇત્યનુમાનમ્ ।

(૨) ઉપમાનપ્રમાણં - યથા ઘટાકાશમઠાકાશયોર્ઘટમઠરૂપોપાધી વિના ન સ્વતો ભેદોઽસ્તિ, તથા અન્તઃકરણ(બુદ્ધિ) માયારૂપોપાધી અન્તરા જીવબ્રહ્મણોરપિ ભેદો નૈવ સિદ્ધ્યતિ ।

(૩) અર્થાપત્તિપ્રમાણં - "નેહ નાનાસ્તિ કિઞ્ચન"(બૃ. ૪.૪.૧૯, ક. ૨.૧.૧૧) ;
"ન તુ તતો દ્વિતીયમસ્તિ"(બૃ. ૪.૩.૨૩)
"અતોઽન્યદાર્તમ્" (બૃ. ૩.૭.૨૩)
ઇત્યાદિશ્રુત્યુક્તભેદનિન્દાન્યથાનુપપત્ત્યા વસ્તુતોઽભેદાસિદ્ધૌ શ્રુતિવૈયર્થ્યપ્રસઙ્ગાદવશ્યમૈક્યમભ્યુપેયમ્ । યથા દેવદત્તશરીરગતપીનત્વબુદ્ધ્યા ભોજનાભાવબુદ્ધિર્બાધ્યતે, એવં ભેદધીરપિ "નેહ નાનાસ્તિ"(બૃ. ૪.૪.૧૯, ક. ૨.૧.૧૧) "નેતિ નેતિ" (બૃ. ૨-૩-૬) ઇત્યાદિશ્રુતિભિર્બાધ્યત એવ ।

ઇદં ચ યુક્તિત્રયમભેદસાધકમ્ ।

૨. ભેદબાધકયુક્તયઃ-

(૧) અનુમાનપ્રમાણં - પ્રત્યક્પરચિતોર્ભેદો મિથ્યા, ઉપાધ્યધીનત્વાત્, ઘટા-॥

યુક્તિભિઃ સદાઽદ્વિતીયબ્રહ્માત્મૈક્યાનુસન્ધાનમ્ ।

## (૨૬)

નિદિધ્યાસનલક્ષણં - ભેદપ્રત્યય(અનાત્મપ્રત્યય) અનન્તરિતબ્રહ્માકારપ્રત્યયપ્રવાહ એવ નિદિધ્યાસનં ઉચ્યતે । નિદિધ્યાસનપરિપાકાવસ્થૈવ સમાધિરિતિ, નિદિધ્યાસનેઽન્તર્ભાવાન્ન સમાધિઃ પૃથક્સાધનત્વેન ગણ્યતે ।

## (૨૭)

શ્રવણાદિપ્રયોજનનિરૂપણં - શ્રવણાદીનિ યદ્યપિ ન સાક્ષાજ્જ્ઞાનસાધનાનિ, અપ્રમાણત્વાત્; તથાપિ તાનિ જ્ઞાનપ્રતિબન્ધકીભૂતબુદ્ધિદોષાસમ્ભાવનાવિપરીતભાવનાદીન્ નાશયન્તિ । અસમ્ભાવના = સંશયઃ । વિપરીતભાવના = વિપર્યયઃ । કાશમઠાકાશયોઃ ભેદવત્ । યન્નૈવં તન્નૈવં (યદૌપાધિકં ન ભવતિ તન્મિથ્યા ન ભવતિ), યથા વ્યાવહારિકઘટપટાદિભેદઃ ઔપાધિકસ્વાભાવાદેવ સત્યઃ (ન મિથ્યા) તદ્વત્ । અત એવ યત્ર યત્રોપાધિનિબન્ધનો ભેદસ્તત્ર તત્ર મિથ્યૈવ સઃ ।

(૨) ઉપમાનપ્રમાણં - યથા બિમ્બપ્રતિબિમ્બયોર્ભેદો મિથ્યા તથા જીવબ્રહ્મણોરપિ ।

(૩) અર્થાપત્તિપ્રમાણં - મહાવાક્યૈરુપનિષત્સુ જીવબ્રહ્મણોરભેદ એવ નિશ્ચિતઃ ।
યદિ પ્રતીયમાનોઽપિ ભેદો વસ્તુતો ન મિથ્યા સ્યાત્તર્હિ મહાવાક્યૈરભેદો ન પ્રતિપાદ્યેત,
પ્રતિપાદ્યતે તુ । તસ્માદર્થાપત્તિપ્રમાણાદપિ જીવબ્રહ્મણોર્ભેદો મિથ્યૈવ ।

(૪) અનુપલબ્ધિપ્રમાણં - જાગ્રતસ્વપ્નયોરુપાધેઃ સત્વાજ્જીવબ્રહ્મણોર્ભેદઃ
પ્રતીયતે । સુષુપ્તૌ તદભાવાદ્ભેદો નૈવોપલભ્યત ઇત્યતો જીવબ્રહ્મણોર્ભેદઃ પરમાર્થતો નૈવેતિ
નિશ્ચીયતે । ઇત્યનુપલબ્ધિપ્રમાણમ્ । એવં એતા ભેદખણ્ડનયુક્તયઃ ।

૧. અયમેવ ભેદઃ સાક્ષાત્કારનિદિધ્યાસનયોઃ - સ્વયમેવ નમ્રીભૂતવૃક્ષશાખાવદ્વિનૈવ સ્વપ્રયત્નં “અહં બ્રહ્માસ્મિ” ઇતિ વેદાન્તજન્યા અનાત્માકારવૃત્તિરૂપાન્તરાયરહિતા બ્રહ્માકારવૃત્તિઃ સાક્ષાત્કાર ઉચ્યતે । નિદિધ્યાસનં તુ સ્વપ્રયત્નાદાનમિતવૃક્ષશાખાવત્સ્વપ્રયત્નમાત્રસાધ્યા બ્રહ્માકારવૃત્તિઃ । પ્રયત્નોપરમે તુ શાખાયા ઉન્નમનવત્, નિદિધ્યાસનનિવૃત્તૌ નિવર્તતૈવ બ્રહ્માકારવૃત્તિરપિ ઇતિ ।

૨. અત્ર સમાધિશબ્દેન ત્રિપુટીભાનરહિતનિર્વિકલ્પકસમાધિરભિધીયતે । નિદિધ્યાસનશબ્દેન ધ્યાતૃધ્યાનધ્યેયાત્મકત્રિપુટીયુક્તસવિકલ્પસમાધિરુચ્યતે ।

તથા ચોક્તં પઞ્ચદશ્યામ્ । તાભ્યાં નિર્વિચિકિત્સેઽર્થેચેતસઃ સ્થાપિતસ્ય યત્ ।
એકતાનત્વમેતદ્ધિ નિદિધ્યાસનમુચ્યતે ॥ તત્ત્વ. ૫૪॥

ધ્યાતૃધ્યાને પરિત્યજ્ય ક્રમાત્ ધ્યેયૈકગોચરમ્ ।

નિવાતદીપવચ્ચિત્તં સમાધિરભિધીયતે ॥ ૫૫॥ ઇતિ ।

૩. ઇયં રજ્જુર્વા સર્પો વેતિ કોટિદ્વયવિષયકં જ્ઞાનં સંશયઃ ।

૪. રજ્જૌ “અયં સર્પઃ” ઇત્યવિદ્યાવૃત્તિર્વિપર્યયઃ ।

અયમેવ ભ્રાન્તિજ્ઞાનમ્, વિપરીતભાવના, વિપરીતજ્ઞાનમ્, જ્ઞાનાધ્યાસ

ઇતિ ચોચ્યતે । પ્રકૃતે મિથ્યાભૂતેષુ દેહાદિષ્વનાત્મસુ

સત્યત્વબુદ્ધિઃ આત્મત્વબુદ્ધિશ્ચ વપર્યયઃ । શ્રવણસ્યોપયોગઃ - વેદાન્તવાક્યં કિમદ્વિતીયં બ્રહ્મ બોધયતિ, ઉત યત્કિઞ્ચિદર્થાન્તરમિતિ પ્રમાણગતસન્દેહઃ શ્રવણેન નિવર્ત્યતે । મનનસ્યોપયોગઃ - જીવબ્રહ્મણોરભેદઃ સત્ય ઉત ભેદ ઇતિ પ્રમેયગતસન્દેહઃ । સ ચાનેકપ્રકારોઽપિ મનનેન નિવાર્યતે । નિદિધ્યાસનસ્યોપયોગઃ - “દેહાદિદૃશ્યપ્રપઞ્ચઃ સર્વોઽપિ સત્યઃ, જીવબ્રહ્મણોર્ભેદશ્ચ સત્યઃ“ઇતિ ધીરવિપરીતભાવના । સા ચ નિદિધ્યાસનેન નિવાર્યતે । એવં શ્રવણાદિત્રયં જ્ઞાનપ્રતિબન્ધકીભૂતાસમ્ભાવનાવિપરીતભાવનાનિવૃત્તિદ્વારા પરમ્પરયા અપરોક્ષજ્ઞાનસાધનં ભવતિ । ન તુ સાક્ષાત્ ।

## (૨૮)

અપરોક્ષજ્ઞાનસાક્ષાત્સાધનં - જ્ઞાનસ્ય સાક્ષાત્સાધનં તુ શ્રોત્રેન્દ્રિયસમ્બદ્ધવેદાન્તવાક્યમેવ । તચ્ચ દ્વિપ્રકારમ્ । અવાન્તરવાક્યં મહાવાક્યં ચેતિ । જીવાત્મપરમાત્મસ્વરૂપપ્રતિપાદકવાક્યમવાન્તરવાક્યમ્ । તદૈક્યપ્રતિપાદકવાક્યં મહાવાક્યમિતિ ચોચ્યતે । અવાન્તરવાક્યેન પરોક્ષમેવ જ્ઞાનં જાયતે । મહાવાક્યેન ત્વપરોક્ષમેવ । “અસ્તિ બ્રહ્મ“ઇતિ જ્ઞાનં પરોક્ષમ્ । “અહમેવ બ્રહ્મ“ઇતિ જ્ઞાનમપરોક્ષમ્ । “ત્વમેવ બ્રહ્માસિ” ઇતિ ગુરૂપદિષ્ટમહાવાક્યશ્રવણાનન્તરં શ્રોતુઃ શિષ્યસ્ય પુષ્કલસાધનસમ્પન્નસ્ય “અહં બ્રહ્માસ્મિ” ઇત્યપરોક્ષમેવ જ્ઞાનં જાયતે । શ્રોત્રેણાસમ્બદ્ધં વાક્યં નૈવ જ્ઞાનં જનયેત્ । અતઃ શ્રોત્રેન્દ્રિયસમ્બદ્ધમહાવાક્યમેવાપરોક્ષજ્ઞાનહેતુઃ । મહાવાક્યેન સર્વેષાં જ્ઞાનમપરોક્ષમેવ જાયતે, ન તુ પરોક્ષમિતિ નિયમઃ ।

## (A. 29-31) મહાવાક્યમપરોક્ષજ્ઞાનહેતુરિત્યત્રાક્ષેપસમાધાનાનિ

૧. પ્રમાણં = ઉપનિષદ્વાક્યાનિ, શબ્દપ્રમાણમ્ ।

૨. પ્રમેયઃ = મોક્ષાદિજ્ઞેયવિષયઃ ।

૩. એવં સંશયદ્વયે નિવૃત્તેઽપિ સાક્ષાત્કારાત્પૂર્વમવિદ્યાયાઃ સત્વાત્

“અહં બ્રહ્મ ન ભવામિ, જીવ એવાહં; મત્તો ભિન્નમેવ બ્રહ્મ;

દેહાદિજગત્ સત્યમ્;” ઇત્યેવંવિધાનેકસંશયાઃ [વિપર્યયાઃ]

પુનઃ પુનર્જાયેરન્ । તન્નિવૃત્તયે સદા નિદિધ્યાસિતવ્યમેવ ।

૪. નેત્રાઞ્જનં નેત્રરોગનિવૃત્તિદ્વારા સૂર્યાવલોકને ઉપકરોતિ

નેત્રસ્ય । નેત્રમેવ તુ સૂર્યં સાક્ષાદ્યથા પશ્યતિ, તથા

શ્રવણાદીન્યપિ જ્ઞાનપ્રતિબન્ધકીભૂતસંશયવિપર્યયરૂપ(દોષ)

રોગનિવૃત્તિદ્વારા બ્રહ્મજ્ઞાનસાધનાનિ ભવન્તિ ।
સાક્ષાજ્જ્ઞાનસાધનં તુ શ્રોત્રસમ્બદ્ધમહાવાક્યમેવ ।

## (૨૯)

અત્ર કેચિદાક્ષિપન્તિ -
(૧) શ્રવણાદીનિ મહાવાક્યાનિ ચ સમુચ્ચિત્યૈવાપરોક્ષજ્ઞાનં જનયન્તિ । કેવલાનિ તુ વાક્યાનિ પરોક્ષમેવ જ્ઞાનં જનયેયુઃ, નાપરોક્ષમ્ ।
(૨) કેવલવાક્યાન્યેવ યદ્યપરોક્ષજ્ઞાનં જનયેયુસ્તર્હિ વ્યર્થાનિ સ્યુઃ શ્રવણમનનનિદિધ્યાસનાનીતિ ।

ન ચ કેવલમહાવાક્યાદપરોક્ષમેવ જ્ઞાનં જાયતે, શ્રવણાદીનાં ત્વસમ્ભાવનાવિપરીતભાવનાનિવૃત્તાવુપયુક્તત્વાન્ન વ્યર્થતેતિ વાચ્યમ્ । અપરોક્ષજ્ઞાનવિષયે વસ્તુનિ કસ્યાપ્યસમ્ભાવનાવિપરીતભાવનાનુદયાત્, કેવલાદપિ મહાવાક્યાદપરોક્ષમેવ જ્ઞાનં જાયત ઇતિ વદતાં મતે, તત્ત્વમસ્યાદિમહાવાક્યૈર્બ્રહ્માપરોક્ષજ્ઞાનોત્પત્ત્યનન્તરમસમ્ભાવનાવિપરીત શ્રવણાદિસાધનાનાં વ્યર્થતૈવ સ્યાત્ । અસ્મન્મતે તુ (પૂર્વપક્ષિમતે) કેવલવાક્યેન પરોક્ષમેવ જ્ઞાનં પ્રથમં જાયતે । શ્રવણાદિસહકૃતેન વાક્યેન તુ પશ્ચાદપરોક્ષમિત્યઙ્ગીકારાન્ન શ્રવણાદિવૈયર્થ્યમ્ । ઇત્યનેકગ્રન્થકૃત્તાત્પર્યમિતિ ।

## (૩૦)

પ્રથમાક્ષેપસ્ય સમાધાનં - યદુક્તં શબ્દસામાન્યં પરોક્ષમેવ જ્ઞાનં જનયેદિતિ, નૈતત્સાધુ । યતોઽયમેવ સ્વભાવઃ શબ્દસ્ય યત્ પરોક્ષાપરોક્ષરૂપદ્વિવિધજ્ઞાનજનકત્વમિતિ । દેશકાલપરિચ્છિન્નં (આવૃતમ્) વસ્તુ વ્યવહિતમિત્યુચ્યતે । તદનવચ્છિન્નં (તદનાવૃતમ્) અવ્યવહિતમિતિ ચ । વ્યવહિતવિષયકં શાબ્દં જ્ઞાનં પરોક્ષમેવ, ન કદાચિત્ કથઞ્ચિદપ્યપરોક્ષં ભવતિ; સ્વર્ગેન્દ્રદેવતાદીનાં વ્યવહિતાનાં જ્ઞાનસ્ય શાસ્ત્રરૂપશબ્દપ્રમાણેન જાયમાનસ્ય નિત્યં પરોક્ષત્વાત્ । અવ્યવહિતવસ્તુવિષયકં શાબ્દં જ્ઞાનં પરોક્ષમપરોક્ષં ચ ભવતિ । યદા અવ્યવહિતવસ્તુવિષયકં જ્ઞાનં “અસ્તિ“ઇતિ શબ્દેન જાયતે તદા અવ્યવહિતસ્યાપિ વસ્તુનો જ્ઞાનં પરોક્ષમેવ ભવતિ । યથા “દશમોઽસ્તિ“ ઇત્યત્ર “અસ્તિ”શબ્દેન જાયમાનમવ્યવહિતસ્યાપિ દશમપુરુષસ્ય જ્ઞાનં પરોક્ષમેવ ભવતિ । યદા અવ્યવહિતવસ્તુવિષયકં જ્ઞાનં “ઇદમસ્તિ” ઇત્યાદિ શબ્દપ્રમાણેન જાયતે તદા તજ્જ્ઞાનમપરોક્ષમેવ ભવતિ, ન પરોક્ષમ્ । યથા

૧. પઞ્ચદશપ્રકરણાદિકૃદ્વિદ્યારણ્યપ્રભૃતયઃ ।

૨. ઇદં શારીરકમીમાંસાયાસ્તાત્પર્યમ્ ।

૩. દૂરદેશે સ્થિતં વસ્તુ દેશતો વ્યવહિતમ્ । ભૂતભવિષ્યદ્વસ્તુ કાલતો વ્યવહિતમિત્યુચ્યતે ।

“દશમસ્ત્વમસિ” ઇત્યત્ર “ત્વમસિ”શબ્દેન જાયમાનં દશમપુરુષજ્ઞાનમપરોક્ષમેવ ભવતિ । એવમેવ પ્રકૃતસ્ય બ્રહ્મણઃ સર્વપ્રાણિપ્રત્યગાત્મભૂતત્વાદત્યન્તાવ્યવહિતસ્ય નિત્યાપરોક્ષરૂપસ્યાપિ જ્ઞાનમ્, “તદસ્તિ“ઇત્યવાન્તરવાક્યેન પરોક્ષમેવ જાયતે । મહાવાક્યં તુ “દશમસ્વમસિ “ઇતિવત્ શ્રોતુરાત્મત્વેનાપરોક્ષતયા બ્રહ્મ બોધયતિ । અત એવ મહાવાક્યેનાવ્યવહિતપ્રત્યગ્બ્રહ્માપરોક્ષજ્ઞાનમેવ જાયતે, ન તુ પરોક્ષમિતિ ।

## (૩૧)

દ્વિતિયાક્ષેપસ્ય સમાધાનં - યત્તૂક્તં મહાવાક્યેનાપરોક્ષજ્ઞાનોત્પત્ત્યઙ્ગીકારેઽપરોક્ષજ્ઞાનોત્પત્ત્યધિકરણેઽસમ્ભાવનાદ્યનુત્પત્તેઃ શ્રવણાદીનાં વૈયર્થ્યં સ્યાદિતિ, તદસત્ । કશ્ચન રાજા સ્વામાત્યં ભર્ચ્છુનામકં ચક્ષુષા પશ્યન્નપિ વિપરીતભાવનયા યથા ન વિવેદ તમ્, તથા મહાવાક્યેન બ્રહ્માપરોક્ષજ્ઞાનોત્પત્તાવપિ યસ્યાન્તઃકરણે અસમ્ભાવનાદિદોષાઃ પ્રતિબન્ધકાઃ વર્તન્તે તસ્ય સકલઙ્કું જ્ઞાનં નૈવ ફલાય કલ્પતે । અતઃ પ્રતિબન્ધકીભૂતદોષનિવૃત્ત્યર્થં તેન શ્રવણાદિકમવશ્યમાવર્તનીયમ્ । યસ્ય તુ પુનર્બુદ્ધૌ મહાભાગ્યવશાત્ રાગદ્વેષાદિકારણીભૂતાસમ્ભાવનાદિદોષા નૈવ વિદ્યન્તે તસ્ય શ્રવણાદિવૈયર્થ્યમિષ્ટમેવ । એવઞ્ચ જ્ઞાનસ્ય સાક્ષાત્કારણં મહાવાક્યમેવ, ન શ્રવણાદિ । શ્રવણાદિ તુ જ્ઞાનપ્રતિબન્ધકીભૂતાસમ્ભાવનાદિદોષાપનયનમાત્રં કુર્યાત્ । તાવન્માત્રેણ શ્રવણાદ્યપિ જ્ઞાનસાધનમિતિ ગૌણ્યા વૃત્ત્યોચ્યતે । તથા ચ વિવેકાદિચતુષ્ટયમપિ શ્રવણાદ્યુપકારકતયા જ્ઞાનસાધનમિત્યેવોચ્યતે । તથા ચ વિવેકાદિસાધનચતુષ્ટયસમ્પન્ન એવાધિકારીતિ સિદ્ધમ્ ।

૧. દશમપુરુષકથા - દશ પથિકા દેશાન્તરગમનસમયે
મધ્યે માર્ગે કાઞ્ચિન્નદીં ગભીરાં પ્રાપ્ય એકૈકશસ્તીર્ત્વા પરં
પારમાસાદ્ય સર્વે વયમુત્તીર્ણા ન વેતિ સન્દિહાનાસ્તત્પ્રત્યયાર્થં
પ્રત્યેકં સ્વાત્માનં વિહાય ગણયન્તઃ "નવૈવ વયં સ્મઃ
એકો નદ્યાં મમાર"ઇતિ રુરુદુઃ । તદા કશ્ચન પાન્થઃ તેષાં
પરિદેવનં શ્રુત્વા, બુદ્ધ્વા ચ દુઃખનિદાનં, કૃપયા પ્રથમતઃ
"દશમોઽસ્તિ" ઇત્યવોચત્ । તદા તેષાં પરોક્ષમેવ જ્ઞાનં
દશમવિષયમભૂત્ । તેષ્વેકઃ "કુત્રાસ્તિ દશમઃ"
ઇત્યપૃચ્છત્ । સોઽબ્રવીત્ "સ દશમઃ ત્વમસિ" ઇતિ ।
તદૈવ તસ્ય સ્વવિષયકદશમત્વજ્ઞાનમપરોક્ષમેવાજાયત ।
તથા ચાપરોક્ષ્યે સત્યપિ દશમસ્ય, કરણે ચ ચક્ષુષિ
સતિ, "દશમસ્ત્વમસિ"ઇતિ પરોપદેશમન્તરા
સ્વવિષયકં જ્ઞાનં પરોક્ષકલ્પમેવાસીત્ । યથૈવાત્ર
"ત્વમેવાસિ દશમઃ"ઇત્યાપ્તોપદિષ્ટવાક્યમપરોક્ષજ્ઞાને
સાક્ષાત્સ્વયં કરણમ્, એવમેવ પ્રત્યગ્બ્રહ્માપરોક્ષજ્ઞાનેઽપિ
ગુરૂપદિષ્ટમહાવાક્યમપિ સાક્ષાદેવ કરણં ભવતિ । તસ્ય ચ
સંશયાદિદોષપ્રતિબન્ધકશૂન્યશુદ્ધાન્તઃકરણં સહકારિસાધનમ્ ।
(ચતુર્થસ્તરઙ્ગે અસ્ય વિસ્તરઃ)

૨. ઇયં કથા પઞ્ચમતરઙ્ગે વિવ્રિયતે ।

3. અયં પુરુષો વેદાન્તગ્રન્થે તદ્વિચારદ્વારા આત્મજ્ઞાને

આત્મજ્ઞાનદ્વારા મોક્ષે ચ અધિક્રિયતે ।

(૩૨)

વિષયનિરૂપણં - અયં ચ ગ્રન્થો જીવબ્રહ્મૈક્યં પ્રતિપાદયતિ । અતઃ પ્રત્યક્પરચિતોરૈક્યમેવાસ્ય ગ્રન્થસ્ય વિષયઃ । સર્વે વેદાસ્તમેવાર્થં પ્રતિપાદયન્તિ । ઇતોઽન્યથા દ્વૈતવાદિનો વેદવિરુદ્ધાર્થવાદિત્વાદ્વેદબાહ્યાઃ શઠાઃ = ગૂઢવિપ્રિયકારિણઃ = પ્રત્યક્ષં સ્તુતિકર્તારઃ પરોક્ષે ચાતિદૂષકાઃ ।

## (A. 33-38) પ્રયોજનનિરૂપણમ્-

(૩૩)

પ્રયોજનલક્ષણં - સર્વપ્રપઞ્ચકારણીભૂતાજ્ઞાનં તત્કાર્યદૃશ્યજાતં સર્વં દ્વૈતં ચ જનનમરણપ્રબન્ધરૂપાખિલદુઃખનિદાનત્વાન્મહાનર્થ ઇતિ શ્રુતિસ્મૃતિપુરાણેતિહાસાનુભવાદિસકલપ્રમાણસિદ્ધમ્ । ઈદૃશાનર્થનિવૃત્તિઃ પરમાનન્દાવાપ્તિશ્ચ મોક્ષ ઇત્યુચ્યતે । અયમેવ મોક્ષોઽસ્ય ગ્રન્થસ્ય પરમપ્રયોજનમ્ । જ્ઞાનં ત્વવાન્તરપ્રયોજનમ્ । પુરુષસ્ય યદ્વિષયે ઉત્કટેચ્છા જાયતે તદેવ તસ્ય પરમં પ્રયોજનં પુરુષાર્થ ઇતિ ચોચ્યતે । સકલજનાનાં ચ દુઃખનિવૃત્તૌ સુખાવાપ્તૌ ચેદૃશીચ્છા સઞ્જાયતે । પૂર્વોક્તાનર્થદ્વૈતાભાવોપલક્ષિતપરમાનન્દચિદેવ મોક્ષસ્વરૂપમ્ । અત એવ મોક્ષઃ પરમપ્રયોજનં, ન જ્ઞાનમ્ । દુઃખનિવૃત્તાવાનન્દાવાપ્તૌ ચ જ્ઞાનસ્ય હેતુત્વાત્, તસ્ય દુઃખનિવૃત્યાનન્દરૂપત્વાભાવાચ્ચ જ્ઞાનમવાન્તરપ્રયોજનમ્ । પરમપ્રયોજનાવાપ્તૌ યત્ દ્વારીભવતિ તદવાન્તરપ્રયોજનમ્ । યથા કદલીફલપ્રાપ્તૌ તત્પત્રપુષ્પાદિ । એતાદૃશવેદાન્તગ્રન્થજનિતજ્ઞાનદ્વારા મુક્તિરૂપપરમપ્રયોજનફલપ્રાપ્તૌ જ્ઞાનમવાન્તરપ્રયોજનં ભવતિ ।

(૩૪)

અત્ર પ્રથમાક્ષેપઃ - યદુક્તમનર્થનિવૃત્તિઃ પરમાનન્દાવાપ્તિશ્ચ ગ્રન્થસ્ય પરમપ્રયોજનમિતિ, તન્ન સઙ્ગચ્છતે । યતઃ સર્વેષ્વપિ વેદાન્તેષુ જીવસ્ય પરમાનન્દરૂપત્વં વર્ણિતમ્ । ભવદ્ભિરપિ તથૈવાઙ્ગીકૃતમ્ । લોકે ત્વપ્રાપ્તસ્યૈવ પ્રાપ્તિર્યુજ્યતે । ન તુ સદા પ્રાપ્તસ્યૈવ પ્રાપ્તિઃ કદાચિદપિ સઙ્ગચ્છતે । તસ્માત્સદા પરમાનન્દસ્વરૂપસ્યૈવ સત આત્મનઃ પુનઃ પરમાનન્દપ્રાપ્તિકથનં સર્વથાપ્યસમ્ભાવિતમેવેતિ ।

(૩૫)

તત્સમાધિઃ - એતાદૃશપૂર્વપક્ષ્યાક્ષેપશ્રવણમાત્રેણાદ્વૈતગ્રન્થોક્ત- પ્રયોજનેઽનાદરો ન કાર્યઃ । વેદાન્તજ્ઞાનોપદેષ્ટૃ??-સદ્ગુરુકૃપાલેશપાત્રીભૂતાનામીદૃશાશેષસન્દેહતૂલનિરાસસ્ય દૃષ્ટાન્તપ્રચણ્ડવાતબલેન સુકરત્વાત્ । તથા હિ, કશ્ચન પુરુષો ભ્રાન્ત્યા સ્વકરસ્થકઙ્કણં નષ્ટં મત્વા અન્વેષમાણ ઇતસ્તતો ભ્રમન્

૧. જીવશબ્દેન જીવશબ્દલક્ષ્યાર્થઃ કૂટસ્થો બોધ્યઃ ।
૨. “વિજ્ઞાનમાનન્દં બ્રહ્મ” (બૃ. ૩.૯.૨૭)
ઇત્યાદ્યનન્તશ્રુતયઃ । અસ્યાર્થસ્તુવિજ્ઞાનં જીવચૈતન્યમ્, આનન્દં
બ્રહ્મૈવ ન તતોઽતિરિચ્યત ઇતિ ।

અન્યેન કેનચિદાપ્તેન પ્રબોધિતઃ સન્, પ્રાપ્તમેવ કરસ્થં કઙ્કણમપૂર્વતયા પ્રાપ્તમિતિ મન્યમાનઃ “મમ કઙ્કણમિદાનીમુપલબ્ધમ્“ઇતિ યથા વદતિ; તથૈવ પરમાનન્દસ્વરૂપે સ્વાત્મનિ નિત્યાપરોક્ષતયા સદા પ્રાપ્તેપ્યવિદ્યાવશાદપ્રાપ્તત્વભ્રાન્ત્યા “નાહં પરમાનન્દસ્વરૂપઃ, કિન્તુ બ્રહ્મૈવ તથા; તતો વિલક્ષણસ્ય મમ તદુપાસનયા તાદૃશબ્રહ્મપ્રાપ્તિઃ સમ્પાદ્યા“ઈત મૂઢો ભ્રાન્ત્યા પ્રતિપદ્યતે । એવંવિત્ પણ્ડિતોઽપિ મૂઢતમ એવ । “અન્યોઽસાવન્યોઽહમસ્મીતિ ન સ વેદ યથા પશુઃ” (બૃ. ૧.૪.૧૦) “તદેવ બ્રહ્મ ત્વં વિદ્ધિ નેદં યદિદમુપાસતે” (કે. ૧.૪.૮) “યોઽન્યથા સન્તમાત્માનમન્યથા પ્રતિપદ્યતે । કિં તેન ન કૃતં પાપં ચૌરેણાત્માપહારિણાઃ” ઇત્યાદિશ્રુતિસ્મૃતિશતેભ્યો જીવબ્રહ્મભેદવાદિનાં મૂર્ખત્વાઙ્ગીકારાત્ । ઇત્થં ભૂતાનામપિ મૂર્ખાણામનન્તજન્માર્જિતપુણ્યપુઞ્જવશાત્સંસ્કૃતચિત્તાનામ્, પ્રશાન્તચિત્તાત્ બ્રહ્મવિદ્વરિષ્ઠાત્ સદ્ગુરોર્યદિ કદાચિદ્વેદાન્તશ્રવણં લભ્યેત, તદા “પરમાનન્દો વેદાન્તવાક્યૈઃ સદ્ગુરુકૃપાકટાક્ષલેશેન ચાસ્માભિઃ પ્રાપ્તઃ“ઇતિ મતિર્જાયેત । અયં ભાવઃ - આત્મનઃ પરમાનન્દસ્વરૂઊપત્વેઽપિ સ્વપ્રકાશાપરોક્ષસ્વરૂપત્વેઽપિ સ્વાવિદ્યાવૃતત્વાદપ્રાપ્તવત્તેષાં સ્વસ્વરૂપં પૂર્વમભાત્ । યદા તુ શ્રીમદાચાર્યમુખાદ્વેદાન્તશ્રવણેન સ્વસ્વરૂપભૂત એવ પરમાનન્દો બુદ્ધાવવભાસતે તદૈવ સ અપૂર્વતયા પ્રાપ્તવદ્વ્યવહ્રિયતે । એવમેવ પ્રાપ્તસ્યાપિ પુનઃ પ્રાપ્તિકથનમુપપદ્યતે । તસ્માત્પરમાનન્દપ્રાપ્તિરેવાસ્ય ગ્રન્થસ્ય પરમપ્રયોજનમિતિ યુક્તમેવોક્તમ્ ।

## (૩૬)

પ્રાપ્તપ્રાપ્તિરૂપપ્રયોજનં નિરૂપ્યેદાનીં નિત્યનિવૃત્તનિવૃત્તિરૂપપ્રયોજનમપિ યુક્તમેવોક્તમિત્યુચ્યતે । રજ્જૌ સર્પસ્ય નિત્યનિવૃત્તસ્યાપિ કદાચિદ્ભ્રમાદવભાસે સતિ, “રજ્જુરેવેયમ્“ઇત્યધિષ્ઠાનસાક્ષાત્કારમાત્રેણ સ નિવર્તતે યથા, તથા સ્વાત્મનિ ભ્રમાત્ પ્રતીયમાનોઽપિ સંસારઃ, નિત્યનિવૃત્ત એવ સ્વસ્વરૂપારોક્ષસાક્ષાત્કારેણ નિશ્શેષં નિવર્તતે । તસ્માન્નિત્યનિવૃત્તસ્યાપિ

૧. વયાવહારિકદશાયાં પ્રાતિભાસિકદશાયાઞ્ચાવભાસમાનસ્યાપિ
પ્રપઞ્ચસ્ય “નેતિ નેતિ” (બૃ. ૨.૩.૬)
“અતોઽન્યદાર્તમ્” (બૃ. ૩.૭.૨૩) “ન તુ તદ્દ્વિતીયમસ્તિ
તતોઽન્યદ્વિભક્તમ્” (બૃ. ૪.૩.૨૩) “નેહ નાનાસ્તિ
કિઞ્ચન” (બૃ. ૪.૪.૧૯) ઇત્યાદિશ્રુતિભિઃ યુક્તિભિઃ
સ્વાનુભવૈશ્ચ પરમાર્થતોઽવિદ્યમાનત્વમેવ । કાલત્રયનિષેધ
એવ નિત્યનિવૃત્તિરિત્યુચ્યતે । પૂર્વોક્તપ્રમાણૈઃ કાલત્રયેઽપિ
પ્રપઞ્ચો નાસ્ત્યેવેતિ પ્રપઞ્ચયાથાત્મ્યનિશ્ચય એવ નિત્યનિવૃત્તસ્ય

તસ્ય નિવૃત્તિરજ્ઞેયા । ઇનવૃત્તિઃ, નિત્યપ્રાપ્તસ્યાપિ પ્રાપ્તિશ્ચ
વેદાન્તગ્રન્થસ્ય પરમપ્રયોજનં સુતરામુપપન્નમેવ ।

## (૩૭)

દ્વિતીયાક્ષેપઃ - નનુ સવિલાસાજ્ઞાનનિવૃત્તિઃ પરમાનન્દાવાપ્તિશ્ચ ગ્રન્થસ્ય પ્રયોજનમિત્યુક્તં ન સઙ્ગચ્છતે । યતો નિવૃત્તિર્નામ નિશ્શેષનાશ એવ; નાશસ્તુ પ્રધ્વંસાભાવ એવ । અતોઽનર્થનિવૃત્તિરૂપાભાવસ્ય પરમાનન્દપ્રાપ્તિરૂપભાવસ્ય ચૈકત્ર મુક્તિસ્વરૂપે સામાનાધિકરણ્યં ન ઘટેત, ભાવાભાવયોરન્યોન્યવિરોધાત્, વિરુદ્ધધર્મયોરેકત્ર યુગપત્સમાવેશાયોગાચ્ચ । તસ્માદુક્તપ્રયોજનં ગ્રન્થસ્ય ન સમ્ભવતીતિ ચેત્-

## (૩૮)

તત્સમાધિઃ - નૈષ દોષઃ । સવિલાસાવિદ્યાનિવૃત્તેરધિષ્ઠાનબ્રહ્મચૈતન્યમાત્રત્વાન્ન તતોઽતિરિચ્યતે સા । યથા આરોપિતસર્પનિવૃત્તિરધિષ્ઠાનરજ્જુમાત્રમ્, એવં કલ્પિતનામરૂપાત્મકસકલવસ્તુનિવૃત્તિરપિ તદધિષ્ઠાનચિન્માત્રમેવ, ન તતોઽતિરિક્તેતિ સિદ્ધમ્ । આરોપિતપ્રતિયોગિકપ્રધ્વંસસ્ય પ્રતિયોગ્યધિષ્ઠાને ભાસમાનસ્યાધિષ્ઠાનમાત્રત્વનિયમાત્ । તદુક્તં વાર્તિકે "અધિષ્ઠાનાવશેષો હિ નાશઃ કલ્પિતવસ્તુનઃ" ઇતિ । અયમેવ ભગવત્પાદાદીનામાશયઃ આકરાદિષુ સ્ફુટતરઃ । અત એવ પ્રકૃતેઽપ્યનર્થનિવૃત્તિર્બ્રહ્મમાત્રમિત્યુક્તદોષાનવકાશઃ । સર્વાનર્થદૃશ્યકલ્પનાધિષ્ઠાનત્વાદ્બ્રહ્મણઃ । તચ્ચ બ્રહ્મ સિદ્ધવસ્તુસ્વરૂપત્વાદ્ભાવરૂપમ્ । તસ્માદનર્થનિવૃત્તેર્ભાવરૂપત્વાદેવ તસ્યા અસ્મિન્ ગ્રન્થે પ્રયોજનત્વકથનં યુક્તમેવેતિ ।

૧. "તદ્યથા હિરણ્યનિધિં નિહિતમક્ષેત્રજ્ઞા ઉપર્યુપરિ
સઞ્ચરન્તો ન વિન્દેયુરેવમેવેમાઃ સર્વાઃ પ્રજા અહરહર્ગચ્છન્ત્ય એતં
બ્રહ્મલોકં ન વિન્દન્ત્યનૃતેન હિ પ્રત્યૂઢાઃ" (છા. ૮.૩.૨)
ઇત્યાદિશ્રુત્યુક્તરીત્યા ગૃહેઽન્તર્નિહિતો હિરણ્યનિક્ષેપો
વિદ્યમાનોઽપિ યાવદવિદ્યમવિદ્યમાનવદવિદ્યયાપ્રાપ્તવદ્ભવતિ ।
અઞ્જનાદ્યુપાયૈર્જ્ઞાતશ્ચેત્ પ્રાપ્તવદ્ભવતિ । ઇયમેવ
નિત્યપ્રાપ્તસ્ય પ્રાપ્તિરિત્યુચ્યતે । યથાયં દૃષ્ટાન્તઃ, એવમેવ
"અયમાત્મા બ્રહ્મ" (બૃ. ૨.૫.૧૯) "પ્રજ્ઞાનં
બ્રહ્મ" (ઐ. ૩.૧) "સર્વં ખલુમિદં બ્રહ્મ"
(છા. ૩.૧૪.૧) "આત્મૈવેદં સર્વમ્" (છા. ૭.૨૫.૨)
"બ્રહ્મૈવેદં સર્વમ્" (બૃ. ૨.૫.૧) ઇત્યાદિશ્રુતિભિઃ
સર્વસ્ય બ્રહ્મત્વોપદેશેન પરમાનન્દસ્વરૂપસ્ય સ્વસ્ય
બ્રહ્મત્વાત્ નિત્યપ્રાપ્તત્વેઽપ્યવિદ્યયાપ્રાપ્તત્વભ્રમઃ ।
"અખણ્ડપરમાનન્દચિદ્રૂપબ્રહ્મૈવાહમ્"ઇતિ

શ્રુતિયુક્ત્યનુભવૈર્જાયમાનસ્વસ્વરૂપસાક્ષાત્કાર એવ નિત્યપ્રાપ્તસ્ય
પ્રાપ્તિરિતિ ।
૨. રજ્વાં પ્રતીયમાનસર્પસ્ય રજ્જુરધિષ્ઠાનત્વેન કથ્યતે ।
મન્દાન્ધકારે પ્રતિભાસમાનસર્પભ્રમાધિષ્ઠાનસ્ય
પ્રકાશસમ્બન્ધે સતિ "રજ્જુરેવેયેમ્"ઇતિ
નિશ્ચયે જાતે તત્ક્ષણાદેવ સર્પો નિવર્તતે ।
તસ્માત્સર્પનિવૃત્તિતદધિષ્ઠાનરજ્જુસાક્ષાત્કારયોશ્ચૈકક્ષણાવચ્છેદેન
જાયમાનત્વાત્ સર્પનિવૃત્તિરધિષ્ઠાનરજ્જુમાત્રં ભવતિ ।

(૩૯)

સમ્બન્ધનિરૂપણં - (૧) ગ્રન્થસ્ય વિષયસ્ય (પ્રમેયસ્ય) ચ પ્રતિપાદ્યપ્રતિપાદકભાવઃ સમ્બન્ધઃ । ગ્રન્થઃ પ્રતિપાદકઃ, વિષયઃ (જીવબ્રહ્મૈક્યમ્) પ્રતિપાદ્યઃ । યત્ વિષયં વિવિચ્ય બોધયતિ તત્ પ્રતિપાદકમ્, યત્ બોધ્યતે તત્પ્રતિપાદ્યમ્ । (૨) અધિકારિફલયોઃ પ્રાપ્યપ્રાપકભાવરૂપઃ સમ્બન્ધઃ । ફલં પ્રાપ્યમ્, અધિકારી પ્રાપકઃ । યદ્વસ્તુ લભ્યતે તત્ પ્રાપ્યં, યો લબ્ધા સ પ્રાપકઃ । (૩) અધિકારિવિચારયોસ્તુ કર્તૃકર્તવ્યભાવરૂપઃ સમ્બન્ધઃ । અધિકારી કર્તા, કર્તવ્યો વિચારઃ । યઃ કરોતિ સ કર્તા, યત્ ક્રિયતે તત્કર્તવ્યમ્ । (૪) ગ્રન્થજ્ઞાનયોઃ જન્યજનકભાવઃ સમ્બન્ધઃ । વિચારદ્વારા જ્ઞાનં પ્રતિ ગ્રન્થો જનકઃ જ્ઞાનં જન્યમ્ । યદુત્પાદયતિ તજ્જનકમ્, યદુત્પદ્યતે તજ્જન્યમ્ । એવમેવ સમ્બન્ધાન્તરમપિ બોધ્યમ્ । યસ્તુ સાધનસમ્પન્નો જિજ્ઞાસુઃ પ્રથમં પઠેત્ । ઇમં તરઙ્ગં સતતં મુક્તોઽસૌ નાત્ર સંશયઃ ॥ ઇતિ શ્રીવાસુદેવબ્રહ્મેન્દ્રસરસ્વતીવિરચિતે સંસ્કૃતવિચારસાગરે અનુબન્ધસામાન્યનિરૂપણં નામ
॥ પ્રથમસ્તરઙ્ગઃ ॥

૧. સમ્બન્ધરૂપાનુબન્ધકથને પ્રયોજનં - યદ્વસ્તુનો
યેન સહ સમ્બન્ધો ભવતિ તસ્ય તદ્વિષયેઽપ્યુપયોગોઽસ્તિ ।
યથા કુલાલાદીનાં ઘટાદીનાં સહ સમ્બન્ધોઽસ્તિ, અતઃ કુલાલાદયો
ઘટાદ્યુત્પત્તિવિષયે ઉપયુજ્યન્તે । યસ્ય યેન સમ્બન્ધો નાસ્તિ ન
તસ્ય તદ્વિષયે ઉપયોગોઽસ્તિ । યથા ચક્ષુષો વાય્વાકાશાભ્યાં
સમ્બન્ધાભાવાત્ તદ્વિષયીકરણે નોપયોગઃ । એવં ગ્રન્થબ્રહ્મણોઃ
સમ્બન્ધાભાવે ગ્રન્થસ્ય ન બ્રહ્મ વિષયો ભવેત્ । ગ્રન્થોઽપિ ન
બ્રહ્મપ્રતિપાદકઃ સ્યાત્ । તસ્માત્પરસ્પરોપકારસિદ્ધ્યર્થમનયોઃ
સમ્બન્ધઃ અતદ્વ્યાવૃત્ત્યા બોધ્યબોધકભાવરૂપઃ કલ્પ્યતે । ઇતિ ।
૨. સમ્બન્ધાન્તરશબ્દેન શ્રવણાદેર્જ્ઞાનેન સહ, જ્ઞાનસ્ય ચ
મોક્ષેન સહ ચ સાધ્યસાધનભાવરૂપઃ સમ્બન્ધો વિજ્ઞેયઃ ।

# વિચારસાગરઃ

## Chapter 2 સંસ્કૃતવિચારસાગરે અનુબન્ધાનાં વિશેષતો નિરૂપણં નામ દ્વિતીયસ્તરઙ્ગઃ ।

પૂર્વતરઙ્ગે અનુબન્ધજાતં સઙ્ક્ષેપત ઉક્તમ્ ।
અસ્મિંસ્તુ દ્વિતીયતરઙ્ગે તદ્વિસ્તરતઃ પ્રતિપાદ્યતે ।

### (A. 40-43) અધિકારિવિષયકાક્ષેપાઃ-

(૪૦)

દુઃખનિવૃત્તાવાક્ષેપઃ - સાધનચતુષ્ટયસમ્પન્નોઽધિકારીતિ પૂર્વં પ્રત્યપાદિ । તેષુ સાધનેષુ “મુમુક્ષુતા” નામૈકા । સા ચ સાધનેષૂત્તમા । મુમુક્ષુતા નામ તીવ્રતરમોક્ષેચ્છા । મોક્ષશ્ચ સોપાદાનકારણજગન્નિવૃત્ત્યુપલક્ષિતબ્રહ્માવાપ્તિરિત્યુચ્યતે । અત્ર મોક્ષલક્ષણઘટકવિશેષણરૂપપ્રથમાંશે સોપાદાનકારણજગન્નિવૃત્તૌ પૂર્વપક્ષી શઙ્કતે - મૂલાવિદ્યયા સહ જગન્નાશં ન કોઽપિ વાઞ્છતિ । કિન્તુ વિવેકી તાપત્રયનિવૃત્તિમાત્રં વાઞ્છતિ । તાપત્રયઞ્ચ (૧) આધ્યાત્મિકં (૨) આધિભૌતિકં (૩) આધિદૈવિકઞ્ચેતિ । તત્ર શરીરે જ્વરાદિરોગક્ષુત્પિપાસાદિજન્યં દુઃખં આધ્યાત્મિકં, ચોરવ્યાઘ્રસર્પાદિજન્યં દુઃખં આધિભૌતિકં, યક્ષરાક્ષસપ્રેતપિશાચગ્રહાદિજન્યં શીતવાતાતપાદિજન્યં ચ દુઃખં આધિદૈવિકમ્ । એતત્ત્રિવિધદુઃખનિવૃત્તિરેવ સર્વૈઃ પ્રાર્થ્યતે । ન દુઃખાદન્યસ્ય કસ્યચિદપિ નિવૃત્તિર્વિવેકિભિઃ પ્રાર્થ્યતે । તસ્માન્મૂલાવિદ્યા

૧. કશ્ચિત્કિલ ગૃહી ગૃહપ્રાસાદાદિસમારમ્ભસમયે પરિસરવર્તિનાન્યેન ગૃહસ્થેન પ્રતિરુદ્ધો ન્યાયાધિપતિદ્વારા સ્વસ્વામ્યં સંસાધ્ય યથા ગૃહારમ્ભે પ્રવર્તતે, તદ્વદેવાયં ગ્રન્થકર્તાપિ પ્રથમતરઙ્ગે સામાન્યતોઽનુબન્ધચતુષ્ટયં નિરૂપ્ય ગ્રન્થમારભમાણઃ પૂર્વપક્ષ્યાક્ષેપેણ પ્રતિબદ્ધઃ, શ્રુતિયુક્ત્યનુભવાદિપ્રમાણાવલમ્બેન સ્વપક્ષં સંસાધયન્નિમં ગ્રન્થમારભતે ।

૨. ઉપાદાનકારણં = મૂલાવિદ્યા ।

૩. “ન હિ ભિક્ષુકાઃ સન્તીતિ સ્થાલ્યો નાધિશ્રીયન્તે,” “ન હિ યૂકાઃ સન્તીતિ વસ્ત્રાણિ ન પરિધીયન્તે,” “ન હિ મૃગાઃ શલભાશ્ચ સન્તીતિ શાલયો નોપ્યન્તે” ઇતિ યથા તથા વિવેકી તાપત્રયભયાન્ન જગતો નાશમિચ્છતિ । કિન્તુ તાપત્રયનિવૃત્તિમાત્રમિચ્છતિ, ઇતીયં સાઙ્ખ્યમતાનુયાયિનાં શઙ્કા ।

૪. આત્માનમધિકૃત્ય વર્તમાનં સ્થૂલસૂક્ષ્મશરીરમધ્યાત્મમ્ । તતો જાયમાનં દુઃખાદિકમાધ્યાત્મિકમ્ ।

૫. સ્વશરીરાદિસઙ્ઘાતવ્યતિરિક્તં સત્ યત્ ચક્ષુરિન્દ્રિયગોચરં તદધિભૂતમ્ । તતો જાયમાનં દુઃખાદિકમાધિભૌતિકમ્ ।

૬. સ્વશરીરાદિસઙ્ઘાતવ્યતિરિક્તં સત્ યત્ ચક્ષુરિન્દ્રિયાગોચરં તદધિદૈવમ્ । તતો જાયમાનં દુઃખાદિકમાધિદૈવિકમ્ । સહિતજગન્નિવૃત્તૌ ન કસ્યાપીચ્છા જાયતે । ઇતિ ।

## (૪૧)

ન ચ સર્વેષાં નિઃશેષસકલદુઃખનિબર્હણેચ્છા વિદ્યતે, સમૂલાજ્ઞાનજગન્નિવૃત્તિમન્તરા ન નિઃશેષદુઃખોચ્છેદઃ સમ્ભવતિ, ઇત્યતો નિઃશેષદુઃખનિવૃત્ત્યન્યથાનુપપત્ત્યા સમૂલાજ્ઞાનજગન્નિવૃત્તિરર્થાદાક્ષિપ્યતે ઇતિ વાચ્યમ્ । આર્તાનાં ધન્વન્તર્યાદિકૃતાયુર્વેદોક્તભૈષજ્યસેવનાત્ જ્વરાદિરોગહેતુકદુઃખક્ષયદર્શનાત્ । ભોજનેન ક્ષુજ્જન્યદુઃખનિવૃત્તેઃ સર્વાનુભવસિદ્ધત્વાચ્ચ । ઇત્થમેવ તત્તત્પ્રતીકારેણ તત્તદ્દુઃખનિવૃત્તિસમ્ભવે સમૂલાજ્ઞાનજગન્નિવૃત્તિમન્તરેણાપિ દુઃખનિવૃત્તેઃ સમ્ભાવિતત્વાત્, નાપેક્ષ્યતે દુઃખનિવૃત્ત્યર્થં સમૂલાજ્ઞાનજગન્નિવૃત્તિઃ । તસ્માન્મોક્ષલક્ષણઘટકસમૂલાજ્ઞાનજગન્નિવૃત્તિરૂપે વિશેષણાંશે ન કસ્યાપીચ્છા જાયેત ।

## (૪૨)

સુખપ્રાપ્તિવિષયાક્ષેપાઃ - મોક્ષલક્ષણઘટકવિશેષ્યાંશે બ્રહ્માવાપ્તિરૂપેઽપિ ન કસ્યાપીચ્છા જાયેત । તથા હિ - યદેવ વસ્તુ પ્રાગનુભૂતં તજ્જાતીયવસ્ત્વન્તરસ્યૈવ સુખસાધનત્વેન સમ્પ્રાપ્તાવિચ્છા સર્વેષાં જાયેત, નાનનુભૂતસમ્પ્રાપ્તૌ । યથા દેશાન્તરેષુ વિદ્યમાનેષ્વત્યદ્ભુતેષ્વપ્યનિર્જ્ઞાતેષુ પદાર્થેષુ, તત્પ્રાપ્તીચ્છા ન કસ્યાપિ જાયત એવ । તદ્વદેવાત્રાપિ મુમુક્ષોરધિકારિણઃ પ્રાઙ્ન બ્રહ્મવિષયકજ્ઞાનમસ્તિ । યસ્ય તુ બ્રહ્મજ્ઞાનમસ્તિ સ નાધિકારી, તસ્ય મુક્તત્વાત્ । મુક્તસ્ય ચ મુમુક્ષાનુપપત્તેરધિકારાભાવઃ । અતો વેદાન્તશ્રવણાત્પૂર્વમનિર્જ્ઞાતસ્ય બ્રહ્મણોઽવાપ્તીચ્છા કસ્યાપિ નોન્મિષત્યેવ । ઇત્થં સમૂલાજ્ઞાનજગન્નિવૃત્ત્યાત્મકે, તદુપલક્ષિતબ્રહ્માવાપ્તિરૂપે ચ મોક્ષે ન જાયેતૈવેચ્છા કસ્યચિદપિ । તસ્માદધિકારી મુમુક્ષુર્ન કોઽપિ સિદ્ધ્યતિ ।

(૪૩)

અધિકાર્યભાવં પ્રકારાન્તરેણ પ્રતિપાદયતિ - સર્વોઽપિ વિષયસુખમેવ વાઞ્છતિ । તપસ્વિનોઽપિ પારલૌકિકભોગાઇભલાષેણૈવૈહિકાન્ ભોગાન્ પરિત્યજ્યાનેકવિધક્લેશાન્સહન્તે । તથા ચૈહિકેભ્યો વામુષ્મિકેભ્યો વા વિષયસુખેભ્ય એવ સર્વે સ્પૃહયન્તિ । નૈવેદમસ્તિ વિષયસુખં મોક્ષે । તતો ન કોઽપિ મોક્ષસાધનમિચ્છેત્ । તતશ્ચ મોક્ષેચ્છારૂપા મુમુક્ષા ન કસ્યાપિ સિદ્ધ્યેત્ । કિઞ્ચ બ્રહ્માદિસ્તમ્બાન્તસ્ય લોકસ્ય વિષયસુખાશાપાશપરવશીકૃતચિત્તત્વાત્ વૈરાગ્યોપરમશમદમાદિસાધનં ન કસ્યાપિ સિદ્ધ્યેત્ । તસ્માત્સાધનચતુષ્ટયસમ્પન્નસ્યાધિકારિણોઽભાવાદ્વિફલોઽયં ગ્રન્થારમ્ભઃ ।

## (A. 44-45) અધિકારિવિષયકાક્ષેપાણાં સમાધાનાનિ-

(૪૪)

મોક્ષસ્ય પ્રથમાંશભૂતે સમૂલાજ્ઞાનજગન્નિવૃત્તિરૂપે ઇચ્છાસમ્ભવપ્રકારઃ - મોક્ષેચ્છા ન કસ્યાપિ સમ્ભવતિ; યતો મોક્ષે અંશદ્વયમસ્તિ, પ્રથમઃ સોપાદાનકારણજગન્નિવૃત્તિરૂપોઽંશઃ, દ્વિતીયો બ્રહ્મપ્રાપ્તિરૂપોઽંશઃ । તત્ર સોપાદાનકારનજગન્નિવૃત્તિરૂપે મોક્ષસ્ય પ્રથમાંશે ન કસ્યાપીચ્છા સમ્ભવતિ; અપિ તુ ત્રિવિધદુઃખનિવૃત્તીચ્છૈવ સર્વેષાં સમ્ભવતિ । તત્તદ્દુઃખનિવૃત્તિસ્તત્તદુપાયાદ્ભવતિ । તસ્માત્સોપાદાનકારણજગન્નિવૃત્તિકામો મુમુક્ષુરધિકારીત્યેતન્ન સઙ્ગચ્છત ઇતિ હિ પ્રથમઃ પૂર્વપક્ષઃ । તત્ર સમાધિઃ - સર્વાનર્થબીજભૂતમૂલાજ્ઞાનતત્કાર્યજગન્નિવૃત્તિવ્યતિરેકેણ નોપાયાન્તરેણ તાપત્રયનાશો નિઃશેષમુપજાયેત । નિઃશેષમૂલાવિદ્યાનિવૃત્ત્યૈવ સકલદુઃખાનિ તત્કારણીભૂતરોગાદયો રોગાદ્યાશ્રયશરીરાદયશ્ચ નિરવશેષં નશ્યન્તિ । તસ્માત્તાપત્રયનિવૃત્તયે સમૂલાજ્ઞાનજગન્નિવૃત્તિરૂપે મોક્ષલક્ષણઘટકવિશેષણાંશે ઉદેત્યેવેચ્છા સર્વેષામ્ । અયમાશયઃ - યસ્તુ સકલૌષધાદ્યુપાયનિર્માણે નિખિલરોગચિકિત્સાયાં ચાત્યન્તસમર્થસ્તસ્યાપિ ન નિયમેન દુઃખશાન્તિર્દૃશ્યતે । કસ્યચિદેવ રોગાદિજન્યદુઃખમૌષધાદ્યુપાયૈર્નિવ કસ્યચિન્નૈવ । અત એવૌષધાદ્યુપાયૈ રોગાદિજન્યદુઃખં ન નિયમેન સર્વેષાં નિવર્તતે । કિઞ્ચ યસ્ય રોગઃ ઔષધાદ્યુપાયૈર્નિવર્તતે તસ્યાપિ કાલાન્તરે પુનર્જાયત એવ રોગઃ । તસ્માદૌષધાદ્યુપાયૈર્દુઃખં નાત્યન્તિકતયા નિવર્તતે । નિવૃત્તસ્ય પુનરપિ કદાચિદપ્યનુત્પત્તિરેવાત્યન્તિકી નિવૃત્તિરિત્યુચ્યતે । ઔષધાદ્યુપાયૈર્નિયમેન દુઃખનિવૃત્ત્યસમ્ભવાત્, નિવૃત્તસ્ય ચ પુનરુત્પત્તિદર્શનાત્ તાદૃશૈરુપાયશતૈરપિ ન નિઃશેષદુઃખનિવૃત્તિર્જાયેત । પરન્તુ સકલદુઃખનિદાનનિવૃત્તાવેવ નિયમેનાશેષદુઃખનિવૃત્તિઃ સ્યાત્ । તાદૃશદુઃખનિદાનનાશે સત્યેવ ભૂયો નૈવ જાયેત દુઃખલેશોઽપિ । તસ્માત્સર્વસ્યાપિ લોકસ્ય દુઃખનિવૃત્ત્યર્થં તન્નિદાનનિવૃત્તીચ્છા જાયેતૈવ ।

(૪૫)

દુઃખનિદાનં ત્વજ્ઞાનં તત્કાર્યરૂપપ્રપઞ્ચેતિ - છાન્દોગ્યોપનિષદિ ભૂમવિદ્યાપ્રકરણે સ્ફુટતરં નિરૂપ્યતે । તત્ર હિ “અધીહિ ભગવ ઇતિ હોપસસાદ સનત્કુમારં નારદઃ । તં હોવાચ યદ્વેત્થ તેન મોપસીદ તતસ્ત ઊર્ધ્વં વક્ષ્યામીતિ । (છા. ૭-

૧-૧) સ હોવાચ ઋગ્વેદં ભગવોઽધ્યેમિ ॥ એતદ્ભગવોઽધ્યેમિ । (છા. ૭-૧-૨) સોઽહં મન્ત્રવિદેવાસ્મિ નાત્મવિત્ । શ્રુતં હ્યેવ

૧. યથા જ્વરાદિરોગગ્રસ્ત આરોગ્યકામનયા વૈદ્યોક્તપથ્યપદાર્થાન્ જ્ઞાત્વા આરોગ્યવિરુદ્ધપદાર્થપરિત્યાગેન રોગનિદાનાનિ નિરસ્યતિ, તથાત્યન્તિકદુઃખનિવૃત્તિકામોઽપિ તત્સાધનાનિ ગુરૂપદિષ્ટવેદાન્તશાસ્ત્રપ્રમાણેન જ્ઞાત્વા તાનિ દુઃખનિદાનાનિ નિવર્તયેદેવ । મે ભગવદ્દૃશેભ્યસ્તરતિ શોકમાત્મવિદિતિ । સોઽહં ભગવઃ શોચામિ । તં મા ભગવાન્ શોકસ્ય પારં તારયત્વિતિ । તં હોવાચ યદ્વૈ કિઞ્ચૈતદધ્યગીષ્ઠા નામૈવતત્ ।” (છા. ૭.૧.૩) ઇત્યાદિના દ્વાવિંશતિભિઃ ખણ્ડિકાભિરપરબ્રહ્મોપાસનં જ્ઞાનસાધનમુક્ત્વા, તતઃ પરં “યો વૈ ભૂમા તત્સુખં નાલ્પે સુખમસ્તિ । ભૂમૈવ સુખં, ભૂમા ત્વેવ વિજિજ્ઞાસિતવ્યઃ । ભૂમાનં ભગવો વિજિજ્ઞાસે ।” (છા. ૭.૨૩.૧) યત્ર નાન્યત્પશ્યતિ નાન્યચ્છૃણોતિ નાન્યદ્વિજાનાતિ સ ભૂમા । અથ યત્રાન્યત્પશ્યત્યન્યચ્છૃણોત્યનદ્વિજાનાતિ તદલ્પં, યો વૈ ભૂમા તદમૃતમ્, અથ યદલ્પં તન્મર્ત્યમ્” (છા. ૭.૨૪.૧) ઇત્યાદિના ભૂમવિદ્યોપદિશ્યતે । અત્રાયમર્થઃ- સકલકલાભિજ્ઞોઽપિ નારદઃ આત્માનં શોકાક્રાન્તમેવાપશ્યત્ । નિઃશેષતઃ શોકતરણં ચાત્મજ્ઞાનાન્નાન્યતો ભવતીતિ શ્રુતવાંશ્ચ । તતશ્ચાત્મનઃ શોકનિદાનાજ્ઞાનનિવૃત્તયે આત્મજ્ઞાનલાભાય ચ સનત્કુમારં પપ્રચ્છ “તં મા ભગવાન્ શોકસ્ય પારં તારયતુ” (છા. ૭.૧.૩) ઇતિ । સ ચાનેકસાધનોપદેશાનન્તરં શોકશૂન્યમપરિચ્છિન્નં નિરતિશયસુખસ્વરૂપં ભૂમાનમુપદિશ્ય, તતોઽન્યત્ સર્વં દૃશ્યજાતં પરિચ્છિન્નં દુઃખમેવેતિ, ભૂમા તુ બ્રહ્મૈવેતિ ચોવાચત્ । તથા ચ મૂલાજ્ઞાનતત્કાર્યભૂતદૃશ્યપ્રપઞ્ચમાત્રસ્ય બ્રહ્મણોઽન્યત્વાત્ તદેવાત્ર સકલદુઃખનિદાનમિત્યુક્તં ભવતિ । તાદૃશદુઃખનિદાનસ્ય દ્વૈતપ્રપઞ્ચસ્ય મૂલાજ્ઞાનસહિતસ્ય “નેતિ નેતિ” (બૃ. ૨.૩.૬) ઇત્યાદિશ્રુત્યુક્તરીત્યા સ્વરૂપતો નિવૃત્તૌ સત્યામેવ નિખિલદુઃખાનાં નિઃશેષતયા નિયમેન નિવૃત્તિરુપપદ્યેત । તસ્માન્નિઃશેષદુઃખનિવૃત્તયે સમૂલાજ્ઞાનપ્રપઞ્ચનિવૃત્તિરૂપે મોક્ષલક્ષણવિશેષણાંશે

જાયેતૈવેચ્છા । ૧. સમૂલાજ્ઞાનજગન્નિવર્તનેચ્છા સર્વેષાં
જાયેતેત્યત્રૈવમાશઙ્કા જાયેત - પ્રાગનુભૂતવસ્તુન્યેવેચ્છા
જાયેત ન ત્વનનુભૂતે । ન હિ બ્રહ્મરૂપાધિષ્ઠાનસાક્ષાત્કારેણ
સમૂલાનપ્રપઞ્ચનિવૃત્તૌ મુમુક્ષોઃ પૂર્વાનુભવોઽસ્તિ ।
અતસ્તન્નિવૃત્તીચ્છા ન કસ્યાપિ જાયેતેતિ । તન્ન, પ્રાગનુભૂત એવેચ્છા
જાયેતેતિ નિયમસ્યાભાવાત્ । તથા સત્યતીતભોજનાદાવિચ્છા પુનરપિ
પ્રસજ્યેત । ન તુ તથા ભવતિ । કિન્તુ પૂર્વાનુભૂતભોજનસજાતીયે
ભોજનાન્તરે ઇચ્છા જાયત ઇત્યેવ નિયમઃ । તથા ચ
પૂર્વોક્તશઙ્કાયા નાવકાશઃ । તથા હિ, યથારોપિતસર્પસ્ય
રજ્જુરધિષ્ઠાનં તથારોપતિસમૂલાજ્ઞાનપ્રપઞ્ચસ્ય
બ્રહ્માધિષ્ઠાનમિતિ, રજ્જુબ્રહ્મણોરધિષ્ઠાનત્વાંશે સાજાત્યમસ્તિ ।
એવમારોપિતસર્પાદિનિવૃત્તેરારોપતિસમૂલાજ્ઞાનપ્રપઞ્ચનિવૃત્તેશ્ચાસ્તિ
પરસ્પરં સાજાત્યમ્ । મુમુક્ષોશ્ચ
પૂર્વં રજ્જ્વાદ્યધિષ્ઠાનસાક્ષાત્કારેણ
સર્પાદિનિવૃત્તિઆવનુભવોઽસ્તિ । તતશ્ચ તત્સજાતીયાયાં
નિખિલદૃશ્યપ્રપઞ્ચાધિષ્ઠાનભૂતબ્રહ્મસાક્ષાત્કારપ્રયુક્ત-
સમૂલાજ્ઞાનપ્રપઞ્ચનિવૃત્તાવિચ્છા મુમુક્ષોર્જાયેતૈવ ।

(૪૬)

દ્વિતીયાક્ષેપસ્ય સમાધાનં - યત્તૂક્તં પ્રાગનુભૂતસ્યૈવ વસ્તુનઃ પ્રાપ્તીચ્છા જાયતે । બ્રહ્મણસ્તુ કેનાપ્યનનુભૂતપૂર્વત્વાત્ તત્પ્રાપ્તિરૂપે મોક્ષસ્ય દ્વિતીયાંશે ન કસ્યાપીચ્છા જાયેતેતિ । તદસત્ । સર્વૈઃ સુખસ્યાનુભૂતત્વાત્સર્વેષાં તત્રેચ્છા જાયતે । બ્રહ્મણશ્ચ નિત્યનિરતિશયસુખસ્વરૂપત્વેન સર્વવેદાન્તપ્રસિદ્ધત્વાત્ સાધનચતુષ્ટયસમ્પન્નસ્યોત્તમાધિકારિણઃ સુખસ્વરૂપબ્રહ્મપ્રાપ્તીચ્છા જાયેતૈવ ।

(૪૭)

તૃતીયાક્ષેપસ્ય સમાધાનં - યત્તાવદભિહિતં સર્વોઽપિ લોકો વિષયેન્દ્રિયસંયોગજસુખમેવ વાઞ્છતિ । ન હ્યેતદસ્તિ મોક્ષે, અદ્વિતીયત્વાન્મોક્ષસ્ય; દ્વૈતપ્રપઞ્ચાયત્તત્વાચ્ચ વિષયસુખસ્ય । અતોઽધિકારિણો મુમુક્ષોરભાવાત્ ગ્રન્થારમ્ભો નિરર્થક ઇતિ । તત્રાસ્તિ તાવત્પ્રષ્ટવ્યં - કિં મુમુક્ષુરેવ નાસ્તિ કિઞ્ચિદપીત્યુચ્યતે, ઉત સત્યપિ મુમુક્ષૌ તસ્ય ગ્રન્થે પ્રવૃત્તિરેવ ન જાયેતેતિ । નાદ્યઃ । સર્વેષામાત્યન્તિકદુઃખનિવૃત્તૌ નિત્યનિરતિશયસુખાવાપ્તૌ ચેચ્છાદર્શનાત્ । નિઃશેષદુઃખધ્વંસપૂર્વકનિત્યનિરતિશયસુખસ્યૈવ મોક્ષરૂપત્વાત્ । તસ્માત્સર્વેઽપિ મુમુક્ષવ એવ ।

(૪૮)

વૈષયિકમેવ સુખં સર્વેઽભિલષન્તીત્યેતદસમઞ્જસં - કિન્તર્હિ, સર્વે સુખસામાન્યમિચ્છન્તિ । તચ્ચ સુખં વિષયજન્યં વાસ્તુ તદિતરદ્વા । યદિ વિષયજન્યસુખમેવેચ્છન્તીત્યુચ્યતે તર્હિ સુષુપ્તિસુખે ન સ્યાદેવેચ્છા કસ્યચિદપિ; વિષયાજન્યત્વાત્તસ્ય । અતઃ સુખસામાન્યમેવ સર્વેઽપીચ્છન્તિ, ન વૈષયિકસુખમેવેતિ નિયમઃ । પ્રત્યુત સર્વેષાં પ્રત્યહં સુષુપ્તિગમનાત્ સ્વાત્મસુખેચ્છૈવ જાયત ઇતિ વસ્તુસ્થિતિઃ । “સુખમહમસ્વાપ્સમ્” ઇતિ પરામર્શેન નિરતિશયસૌષુપ્તસુખસ્યાત્મસ્વરૂપસુખત્વેન નિશ્ચિતત્વાત્ । કિઞ્ચ તારતમ્યોપેતં વૈષયિકં સુખં સર્વપ્રાણિનાં સિદ્ધમેવ । અતશ્ચાસિદ્ધે નિત્યનિરતિશયૈકવિધસુખપ્રાપ્તાવેવેચ્છા નૈસર્ગિકી સર્વપ્રાણિનામ્ । તાદૃશં ચ સુખં નિત્યસિદ્ધાત્મસ્વરૂપસુખમેવ । આત્મસ્વરૂપસુખમેવ ચ મોક્ષઃ, નેતરત્ । તસ્માત્ સર્વેઽપિ મુમુક્ષવ એવ । નાસ્ત્યેવ મુમુક્ષુઃ કશ્ચિદપીતિ સાહસમાત્રમ્ ।

૧. યદ્યનુભૂતસામાન્યે ઇચ્છા જાયેતેતિ નિયમસ્તર્હિ પૂર્વાનુભૂતે પ્રતિકૂલે રોગતન્નિમિત્તકદુઃખાદૌ ચેચ્છાપદ્યેત । ન તુ તથા લોકે દૃશ્યતે । તસ્માદનુકૂલે પ્રાગનુભૂતસુખતત્સાધનસજાતીયે એવેચ્છા જાયત ઇત્યેવ નિયમઃ । બ્રહ્માનન્દપ્રતિબિમ્બભૂતં વૈષયિકં સુખં ચ સર્વાનુભવપ્રસિદ્ધમ્ । તતશ્ચ તત્સજાતીયબિમ્બભૂતનિત્યનિરતિશયાદ્વિતીયબ્રહ્માનન્દે સર્વેષામિચ્છા જાયેતૈવ ।

(૪૯)

સત્યપિ મુમુક્ષૌ તસ્ય મોક્ષગ્રન્થે પ્રવૃત્ત્યનુપપત્તેસ્તદારમ્ભો વિફલ ઇતિ દ્વિતીયોઽપિ પક્ષો ન સઙ્ગચ્છતે - અત્ર વાદી પ્રષ્ટવ્યઃ - (૧) અસ્મિન્ ગ્રન્થે મુમુક્ષોઃ પ્રવૃત્ત્યભાવકારણં કિમસ્ય ગ્રન્થસ્ય મોક્ષસાધનત્વાભાવો વા (૨) કિં વા ઇતોઽપ્યુત્કૃષ્ટસ્ય સાધનતમસ્ય ગ્રન્થાન્તરસ્ય સત્ત્વં વા (૩) ઉત વેદાન્તગ્રન્થેષુ યાનિ સાધનાનિ શમદમાદીન્યુક્તાનિ અધિકારિવિશેષણત્વેન તાદૃશશમદમાદિસાધનચતુષ્ટયસહિતસ્ય જ્ઞાનસમ્પાદનયોગ્યાધિકારિણ એકસ્યાપ્યભાવો વા । નાદ્યઃ । ન હિ ગ્રન્થો મોક્ષસાધનમ્ । યતઃ “તમેવ વિદિત્વાતિમૃત્યુમેતિ” (શ્વે. ૬.૧૫) ઇત્યાદિપ્રમાણૈર્જ્ઞાનમેવ મોક્ષસાધનં નાન્યદિતિ સિદ્ધાન્તઃ । તચ્ચ જ્ઞાનં વેદાન્તશ્રવણાદેવ જાયતે । શ્રવણમપિ દ્વિવિધં (૧) પ્રથમં વેદાન્તવાક્યસ્ય શ્રોત્રેન્દ્રિયેણ સંયોગરૂપમ્ । (૨) વેદાન્તવાક્યાર્થવિચારરૂપં તુ દ્વિતીયમ્ । એતયોર્જ્ઞાનસ્ય મુખ્યસાધનં પ્રાથમિકં શ્રવણમેવ, ન તુ દ્વિતીયમ્ । શાબ્દબોધં પ્રતિ શ્રોત્રેણ શબ્દસન્નિકર્ષસ્યૈવ સર્વત્ર કારણત્વાઙ્ગીકારાત્ । અતો વેદાન્તવાક્યસ્ય શ્રોત્રેન્દ્રિયેણ સહ સંયોગરૂપશ્રવણમેવ બ્રહ્માપરોક્ષજ્ઞાનહેતુર્ભવતિ । તત્રાવાન્તરવાક્યશ્રવણં પરોક્ષજ્ઞાનહેતુઃ । મહાવાક્યશ્રવણં તુ અપરોક્ષજ્ઞાનહેતુરિતિ ચ પ્રાક્ પ્રતિપાદિતમ્ । યસ્ય તુ પુનર્જ્ઞાનોદયાનન્તરમપ્યસમ્ભાવનાવિપરીતભાવને સમ્ભવતઃ, સ તુ દ્વિતીયં વિચારરૂપશ્રવણં મનનં નિદિધ્યાસનઞ્ચ તન્નિવૃત્તયે કરોતુ । ઇદઞ્ચ દ્વિતીયં વેદાન્તવાક્યાર્થવિચારરૂપશ્રવણં, “કિં વેદાન્તવાક્યાનિ બ્રહ્માદ્વિતીયં પ્રતિપાદયન્તિ, આહોસ્વિદર્થાન્તરમિત્યેવમાત્મકં” વેદાન્તવાક્યેષૂત્પદ્યમાનમસમ્ભાવનારૂપસંશયં

નિરસ્યતિ । મનનં હિ પ્રમેયગતાસમ્ભાવનાં “કિં જીવબ્રહ્મૈક્યં વાસ્તવં ઉત તદ્ભેદ” ઇત્યાદિસંશયાત્મિકાં ૧. કિમિયં રજ્જુર્વા સર્પો વેત્યાદિદ્વિકોટિકજ્ઞાનં સંશય ઇત્યુચ્યતે । આત્માનાત્મનોશ્ચ નાનાવિધઃ સંશયઃ સમ્ભવેત્ । અનાત્મવિષયકસંશય ઉપેક્ષ્યતેઽત્ર, નિષ્ફલત્વાત્ । આત્મવિષયકસંશયસ્તુ દ્વિપ્રકારઃ પ્રમાણગતઃ પ્રમેયગતશ્ચેતિ । તત્રોપનિષદ્રૂપવેદાન્તવાક્યાનિ, “કિં દ્વૈતં પ્રતિપાદયન્તિ આહોસ્વિદદ્વૈતમુતાર્થાન્તરમિત્યેવંરૂપઃ પ્રમાણગતસંશયઃ । અયઞ્ચ શ્રવણાત્પ્રાક્ સમ્ભવતિ । વેદાન્તપ્રમાણવેદ્યમોક્ષાદિપદાર્થાઃ સર્વેઽપિ પ્રમેયા ઉચ્યન્તે । એતદ્વિષયકસંશયઃ પ્રમેયગત ઇતિ । અયઞ્ચ પ્રમેયગતસંશયો વિષયભેદાદનન્તવિધઃતથા હિ (૧) મોક્ષસાધનવિષયકસંશયાઃ - સર્વાનર્થનિવૃત્તિઃ પરમાનન્દાવાપ્તિશ્ચ મોક્ષ ઇતિ સિદ્ધાન્તઃ । તત્ર સાક્ષાન્મોક્ષસાધનં કિં કર્મ, ઉતોપાસનમ્, અથવા જ્ઞાનમિતિ મોક્ષસાધને સંશયાઃ । (૨) જ્ઞાનસાધનવિષયકસંશયાઃ - જ્ઞાનસ્ય મોક્ષ- સાધનત્વે, અપરોક્ષજ્ઞાનં પ્રતિ સાક્ષાત્સાધનં કિં યજ્ઞાદિકર્મ, ઉતોપાસનમ્, અથવા વિવેકા-॥ નિવર્તયતિ । નિદિધ્યાસનન્તુ “દેહાદિદૃશ્યપ્રપઞ્ચસ્ય જિવબ્રહ્મણોશ્ચ ભેદઃ સત્ય” ઇત્યાદ્યનાદિકાલસિદ્ધવિપરીતભાવનાં નિઃશેષમુન્મૂલયતિ । ઇત્થં પ્રાથમિકં શ્રવણં બ્રહ્માત્મૈક્યજ્ઞાનદ્વારા મોક્ષહેતુઃ । વાક્યાર્થવિચારરૂપં દ્વિતીયં શ્રવણં મનનં નિદિધ્યાસનં ચેત્યાદિરસમ્ભાવનાવિપરીતભાવનાનિવૃત્તિદ્વારા મોક્ષહેતુઃ । વેદાન્તા ઇત્યુપનિષદ એવોચ્યન્તે । યદ્યપ્યેતસ્માત્ પૌરુષેયાત્ પ્રકરણાત્તાઃ ભિન્નાસ્તથાપિ તદર્થસ્યૈવાયં ગ્રન્થો બાલાનાં સુલલિતં બોધકો ભવતિ । એતદ્ગ્રન્થશ્રવણેઽનાયાસેન યથા આત્મસ્વરૂપસાક્ષાત્કારો જાયેત, તથોપરિષ્ટાત્પ્રપઞ્ચયિષ્યતે । ઇત્થમયમપિ ગ્રન્થો જ્ઞાનોત્પત્તિહેતુત્વેન મોક્ષકારણં ભવતિ, અસમ્ભાવનાદ્યશેષદોષશઙ્કાપકરણસમર્થશ્રવણમનનાત્મકત્વાદસ્ય ગ્રન્થસ્ય । તસ્માન્નાનેન ગ્રન્થેન મોક્ષો જાયેતેત્યેતત્કેવલં હઠઃ ।

## (૫૦)

યદ્યપ્યસ્ય ગ્રન્થસ્ય મોક્ષહેતુત્વમસ્તિ તથાપિ પ્રાચીનૈઃ પ્રૌઢગ્રન્થાન્તરૈઃ સાધનતમૈર્મોક્ષોપાયસ્ય સમ્યક્પ્રતિપાદિતત્વાદ્વિફલોઽયં ગ્રન્થ ઇતિ વદન્ વાદી પ્રષ્ટવ્યઃ - કાનિ તાનિ સાધનતમાનિ ગ્રન્થાન્તરાણીતિ । સ યદ્યાહજીવબ્રહ્મૈક્યબોધકનિખિલોપનિષદ્ગીતાસ તદ્ભાષ્યાદયોઽનેકગ્રન્થાઃ પ્રૌઢાઃ પ્રાગેવ સિદ્ધાઃ । તેભ્યો ગ્રન્થેભ્યો જ્ઞાનદ્વારા મોક્ષઃ સિદ્ધ્યતિ, અતોઽયં ગ્રન્થો વિફલ ઇતિ - તર્હિ તાદૃગ્ગ્રન્થવિચારાસમર્થાનાં મુમુક્ષૂણાં તાદૃશગ્રન્થૈર્જ્ઞાનોદયાસમ્ભવાત્, ॥ દિસાધનચતુષ્ટયમ્, શ્રવણાદિત્રયં વા, તત્ત્વમ્પદાર્થશોધનરૂપાવાન્તરવાક્યાર્થજ્ઞાનં વા, આહોસ્વિત્તત્ત્વમસ્યાદિમહાવાક્યાર્થોપદેશો વેત્યાદિજ્ઞાનસાધનવિષયકસંશયાઃ । (૩) વેદાન્તજ્ઞાનવિષયીભૂત- જગત્ત્વમ્પદાર્થજીવતત્પદાર્થેશ્વરવિષયકસંશયાઃ - જ્ઞાનસ્ય વિષયઃ કિં ભેદોઽભેદો વા । અભેદે કિં પ્રત્યગ્બ્રહ્મણોરભેદઃ, ઉતાન્તઃકરણવિશિષ્ટચિદાત્મકજીવસ્ય વિરાડ્ઢિરણ્યગર્ભાન્તર્યામિરૂપેશ્વરેણાભેદઃ । પ્રત્યગાત્મા કિં સ્થૂલદેહાદ્ભિન્નઃ અભિન્નો વા । ભિન્નત્વે આત્મા કિં જડ ઉત ચિદ્રૂપઃ, અથવા ચિજ્જડોભયાત્મકઃ । ચેતનત્વે હિ કર્તૃભોક્તૃસ્વરૂપો વા, અકર્તૃભોક્તૃસ્વરૂપો વા । આત્મા કિમણુપરિમાણો વા, મધ્યમપરિમાણો વા, મહાપરિમાણો વા । આત્મનોઽભેદઃ કિં તત્પદવાચ્યાર્થેન, ઉત તત્પદલક્ષ્યાર્થેન । જગતઃ કારણં કિં પ્રધાનાદિઃ, ઉતેશ્વરઃ । ઈશ્વરશ્ચેત્સ કિં પરિચ્છિન્નઃ, ઉત વ્યાપકઃ । સ ચેશ્વરો જગતઃ કિમુપાદાનકારણમાહોસ્વિન્નિમિત્તમુતાભિન્નનિમિત્તોપાદાનકારણમ્ । ઈશ્વરઃ કિં જીવાદૃષ્ટવશાત્સૃજતિ, ઉત વિષમદૃષ્ટ્યા । આત્મા કિં બ્રહ્મણોઽભિન્ન ઉત ભિન્નઃ । અભિન્નશ્ચેત્ કિં સદાભિન્નઃ, ઉત મોક્ષદશાયામેવ । આત્મા

કિમાનન્દાદિયુક્તઃ, અથવા ન । સચ્ચિદાનન્દાદયોઽસ્યાત્મનઃ કિં ગુણાઃ, ઉત સ્વરૂપમેવ । તે ચ સચ્ચિદાનન્દાદયઃ કિં પરસ્પરં ભિન્નાઃ, ઉતાભિન્ના એવ । ઇત્યેવમાદ્યનન્તસંશયા જાયન્તે । એવંરૂપાન્ પ્રમાણપ્રમેયગતસન્દેહાનાદૌ શ્રવણમનનનિદિધ્યાસનૈરપોહ્ય બ્રહ્માપરોક્ષજ્ઞાનેન તાન્ નિઃશેષં નાશયેત્ । અત્ર ચ મન્દમતીનાં તીવ્રતરમુમુક્ષૂણાં પ્રવૃત્તિસમ્ભવાચ્ચ સફલોઽયં ગ્રન્થ ઇતિ પ્રતિબ્રૂયાત્ ।

## (૫૧)

પ્રૌઢગ્રન્થૈર્મન્દમતીનાં મુમુક્ષૂણાં બોધાનુદયાદયં ગ્રન્થો યદ્યપિ તેષાં મોક્ષોપયોગી સ્યાત્ તથાપિ મુમુક્ષામાત્રેણાસ્મિન્ ગ્રન્થે પ્રવૃત્તિર્ન જાયેત । વિવેકવૈરાગ્યશમદમાદિસાધનકલાપયુક્તમુમુક્ષુજનાસમ્ભવાદિતિ શઙ્કમાનો વિકલ્પ્યતે કિમધિકારિણો બહવો ન સન્તિ, ઉત નૈકોઽપીતિ । આદ્યે ઇષ્ટાપત્તિઃ સર્વવાદિસમ્પ્રતિપત્તેઃ । ન દ્વિતીયઃ - જ્ઞાનયોગ્યાધિકાર્યેવ નાસ્તીત્યેતદસઙ્ગતમેવ । તથા હિ, સર્વેષામપ્યન્તઃકરણં નિસર્ગત એવ મલવિક્ષેપસ્વરૂપાવરણાખ્યદોષત્રયદૂષિતં વર્તતે । મલં = પાપમ્, વિક્ષેપઃ = ચાઞ્ચલ્યમ્, આવરણં = સ્વરૂપાજ્ઞાનમ્ । તત્ર શુભકર્મણા મલસ્ય, ઉપાસનયા વિક્ષેપસ્ય, જ્ઞાનેન સ્વરૂપાવરણસ્ય ચ નિવૃત્તિર્જાયત એવ । યસ્યાન્તઃકરણે મલવિક્ષેપાદિદોષાઃ સન્તિ ન સોઽધિકારીતિ સિદ્ધમ્ । યસ્ય તુ પુનરિહ જન્મનિ જન્માન્તરે વાનુષ્ઠિતશુભકર્મોપાસનાદિભિર્મલવિક્ષેપાદિદોષા અન્તઃકરણાન્નિવૃત્તાઃ સ એવ વેદાન્તવિચારજનિતજ્ઞાને મુખ્યો યોગ્યાધિકારી ભવતિ । તસ્યાસ્મિન્ ગ્રન્થે જાયેતૈવ પ્રવૃત્તિઃ ।

## (૫૨)

પામરવિષયિણોર્લક્ષણં - યત્તૂક્તં સર્વેઽપિ વિષયસુખાસક્તા એવ, ન કોઽપિ નિત્યનિરતિશયસુખં વાઞ્છતીતિ, તન્ન । પામરો, વિષયી, જિજ્ઞાસુર્મુક્તશ્ચેતિ લોકે ચતુર્વિધાઃ પુરુષાઃ । તત્ર વિહિતપ્રતિષિદ્ધેષ્વૈહિકવિષયભોગેષ્વાસક્તઃ સન્ શાસ્ત્રીયસંસ્કારશૂન્યો યઃ સ પામરઃ । શાસ્ત્રાનુસારિવિષયભોગાન્ ભુઞ્જાનઃ સન્ ઇહામુત્રાર્થફલભોગાવાપ્તયે કર્મ કુર્વાણો વિષયી ।

## (૫૩)

જિજ્ઞાસુલક્ષણં - યસ્તુ શાસ્ત્રીયોત્તમસંસ્કારબલાદધ્યાત્માદિસચ્છાસ્ત્રશ્રવણં કરોતિ તસ્ય વક્ષ્યમાણરીત્યા વિવેકો જાયતે । તથા વિવેકો યસ્ય ભવતિ સ એવ જિજ્ઞાસુઃ ।

(૧) તત્ર વૈષયિકં સુખં સર્વમપિ દુઃખમેવેતિ
પ્રથમતો વિવેકો ભવતિ । તથા હિ, સર્વમનિત્યમેવ
વિષયેન્દ્રિયસંયોગજત્વેનાગમાપાયિત્વાત્ । સુખં ચ વૈષયિકં
સ્વાવસ્થિતિસમયેઽપિ યત્કિઞ્ચિદ્દુઃખાનુષઙ્ગ્યેવ ભવતિ
। સ્વવિનાશેનાપિ દુઃખહેતુર્ભવતિ । કિઞ્ચ વૈષયિકં

સુખમનુભવદશાયામપિ, ઇતઃ પરમીદૃશં સુખં ક્ષીયેત કિલેતિ
વ્યાકુલતોત્પાદનેનાપિ દુઃખનિદાનમેવ । એવઞ્ચ વૈષયિકં સુખં
સર્વં દુઃખેન કબલીકૃતમેવ વર્તતે । તસ્માદ્વિષયજન્યં સુખં
વસ્તુતઃ સુખસ્વરૂપમપિ વિષયોપાધિસમ્બન્ધાદ્દુઃખમેવ । ભવતિ
સર્વદા । ન ચૈતદ્દુઃખં કેનચિદપિ લૌકિકોપાયેન પરિહર્તું
શક્યતે ઉપાયાન્વેષણકુશલસ્યાપિ નિશ્શેષદુઃખનિવૃત્તેરદર્શનાત્
। નિવૃત્તમિવ ચ સદપિ પુનરુત્પદ્યતે એવ ।
(૨) તતઃ, યાવચ્છરીરસ્થિતિ દુઃખં ન નિવર્તતેતિ વિવેકી ભવતિ
। "ન વૈ સશરીરસ્ય સતઃ પ્રિયાપ્રિયયોરપહતિરસ્તિ,
અશરીરં વાવ સન્તં ન પ્રિયાપ્રિયે સ્પૃશતઃ"
(છા. ૮.૧૨.૧) ઇતિ, શરીરમાત્રસ્ય પુણ્યપાપફલત્વાત્
શરીરાન્વયવ્યતિરેકાભ્યાં સુખદુઃખસમ્બન્ધતદભાવૌ
શ્રૂયેતે । તત્ર મનુષ્યશરીરં તુ પુણ્યપાપમિશ્રકર્મફલમિતિ
પ્રસિદ્ધમેવ । દેવશરીરમપિ મિશ્રકર્મફલમિત્યેવ વક્તવ્યમ્;
કેવલપુણ્યફલત્વે તુ દેવાનાં દેવતાન્તરવિભૂત્યતિશયદર્શનેન
ન તાપો જાયેત । જાયત ઇતિ હીતિહાસપુરાણાદિષુ કથ્યતે ।
કિઞ્ચાશેષદેવપ્રધાનભૂતસ્યાપીન્દ્રસ્યાનેકદૈત્યદાનવાદિભ્યો
ભયાન્મહદ્દુઃખં પાપફલભૂતં જાયત ઇતિ શાસ્ત્રેણ પ્રતિપાદ્યતે ।
યદિ દેવશરીરં કેવલપુણ્યફલં સ્યાન્નૈવ સ્યાત્કદાચિદપિ દેવાનાં
દુઃખમ્ । તસ્માદ્દેવશરીરમપિ પુણ્યાપુણ્યમિશ્રકર્મફલમિત્યેવ
નિશ્ચીયતે । ન ચ "ન હ વૈ દેવાન્ પાપં ગચ્છતિ
પુણ્યમેવામું ગચ્છતિ" (બૃ. ૧.૫.૨૦) ઇત્યાદિશ્રુતેર્ન
દેવાનાં પાપસમ્બન્ધોઽસ્તીતિ વાચ્યં - અન્યપરત્વાત્તસ્યાઃ શ્રુતેઃ;
કર્માધિકારયોગ્યં શરીરં માનુષમેવ, નેતરદ્દેવતિર્યગાદિશરીરમ્ ।
અતો દેવતાશરીરેણ કૃતપુણ્યાપુણ્યફલં જન્માન્તરે ન તાન્
ગચ્છતીત્યર્થો ન તુ તેષાં કર્મફલાભાવમાત્રમિતિ કિન્તર્હિ;
દેવશરીરોત્પત્તેઃ પ્રાગ્જન્મનિ શરીરાન્તરકૃતશુભાશુભકર્મફલં
દેવજાતિશરીરેઽનુભૂયત એવ । તસ્માદ્દેવાદિશરીરમપિ
મિશ્રકર્મફલમેવ । તિર્યક્પશુપક્ષિમૃગાદીનામપિ શરીરં
મિશ્રકર્મફલમેવ । તૈરનુભૂયમાનપ્રચુરદુઃખાનાં
પાપકર્મફલત્વેઽપિ મૈથુનાદિજન્યસુખસ્ય પુણ્યફલત્વાભ્યુપગમાત્ ।

તિર્યગ્ = કીટાદિઃ । પશુઃ = ચતુષ્પાત્ । પક્ષી = પક્ષાભ્યાં ગગનચારી । મૃગઃ = વ્યાઘ્રાદિઃ । કેચન પશુપક્ષ્યાદીનપિ તિર્યગિત્યાચક્ષતે । એવં નિખિલમપિ શરીરં પુણ્યાપુણ્યકાર્યમિત્યેવ સિદ્ધાન્તઃ । તથાપિ દેવશરીરસ્ય પાપોપસર્જનપુણ્યાતિશયજન્યત્વાત્ તદભિપ્રાયેણ શાસ્ત્રેષુ દેવશરીરં પુણ્યફલમિત્યુચ્યતે । અતો નાત્ર વિરોધશઙ્કાવકાશો યથા બ્રાહ્મણપ્રચુરો ગ્રામો "બ્રાહ્મણગ્રામ" ઇત્યુચ્યતે, એવં પુણ્યાતિશયફલત્વાદ્દેવશરીરં પુણ્યસ્ય ફલમિત્યુપચર્યતે, ન તુ વસ્તુતઃ । તિર્યગાદિશરીરં પુણ્યોપસર્જનપાપતિશયફલમ્ । ઉત્તમમનુષ્યશરીરં દેવશરીરમેવ । નીચશરીરં સર્પાદિશરીરતુલ્યમ્ । એવં નિખિલમપિ શરીરં પુણ્યાપુણ્યફલમેવ । અત એવ પાપફલત્વાદ્દુઃખસ્ય શરીરસમ્બન્ધો યાવત્ તાવદ્દુઃખક્ષયો ન સ્યાત્ ।

(૩) તતઃ, સર્વશરીરિણાં સ્વસ્વશરીરં સ્વસ્વાર્જિતધર્માધર્મફલભૂતમેવેતિ વિવેક ઉત્પદ્યતે । વિના તુ નિશ્શેષધર્માધર્માદિનિવૃત્તિં નાત્યન્તિકતયા શરીરવિનાશઃ સમ્ભવેત્ । પ્રારબ્ધનાશાદદ્યતનશરીરનાશેઽપિ પુનઃ શરીરાન્તરં પ્રાચીનાનન્તકોટિજન્માર્જિતપુણ્યાપુણ્યવશાજ્જાયેતૈવ । તસ્માન્નિશ્શેષકર્મક્ષયમન્તરા નાત્યન્તિકશરીરનાશરૂપમોક્ષઃ સમ્ભવતિ ।

(૪) પુણ્યાપુણ્યયોશ્ચ ક્ષયો ન રાગદ્વેષાદિનિવૃત્તિમન્તરા ઘટેતેતિ વિવેકસ્તતો જાયતે । એતચ્છરીરામ્ભકપુણ્યાપુણ્યયોર્ભોગેન ક્ષયેઽપિ રાગદ્વેષવશાત્પુણ્યાપુણ્યરૂપકર્માન્તરોત્પત્તિઃ સ્યાત્ । તસ્માન્નિશ્શેષરાગદ્વેષનિવૃત્તિમન્તરા નાશેષકર્મક્ષયઃ ।

(૫) રાગદ્વેષૌ ચેષ્ટાનિષ્ટસાધનતાજ્ઞાનપ્રયોજ્યાવિતિ તતો જાનાતિ વિવેકી । ઇષ્ટે રાગોઽનિષ્ટે દ્વેષશ્ચ સર્વપ્રાણિસાધારણૌ । તસ્માદિષ્ટાનિષ્ટસાધનતાબુદ્ધિનિવૃત્તિમન્તરા ન રાગદ્વેષૌ નિવર્તેતે ।

(૬) ઇષ્ટાનિષ્ટસાધનતાબુદ્ધિરપિ ભેદધીનિબન્ધનેતિ વિવેકસ્તતો જાયતે । યદા સ્વસ્વરૂપાદન્યદિવ દ્વિતીયં વસ્ત્વવબુધ્યતે તદા તત્રેષ્ટસાધનતાબુદ્ધિર્વા અનિષ્ટસાધનતાબુદ્ધિર્વા જાયેત । સ્વસ્વરૂપમાત્રે તુ કસ્યચિદપિ ઇષ્ટસાધનતાબુદ્ધિર્વા અનિષ્ટસાધનતાબુદ્ધિર્વા ન જાયતે । સુખસાધનં = અનુકૂલં ઇષ્ટસાધનમિતિ ચોચ્યતે । દુઃખસાધનં = પ્રતિકૂલમનિષ્ટસાધનમિતિ ચોચ્યતે । સ્વસ્વરૂપં તુ ન સુખસ્ય વા દુઃખસ્ય વા સાધનં ભવતિ, તસ્ય સુખસ્વરૂપત્વેન સુખસાધનત્વાસમ્ભવાત્ । અતઃ સ્વસ્વરૂપાતિરિક્તત્વેનાવગતે વસ્તુનિ આનુકૂલ્યપ્રાતિકૂલ્યબુદ્ધી યથાસમ્ભવં જાયેતે ।

એવઞ્ચાખણ્ડાનન્દાદ્વિતીયાસઙ્ગચિદ્રૂપસ્વસ્વરૂપાદતિરિક્તવસ્તુ-
સઙ્કલ્પનમેવાનુકૂલ્યપ્રાતિકૂલ્યબુદ્ધિહેતુઃ ।
ઈદૃગ્ભેદબુદ્ધિનિવૃત્તિમન્તરા આનુકૂલ્યપ્રાતિકૂલ્યબુદ્ધી ન નિવર્તેતે ।
(૭) ઈદૃગ્ભેદબુદ્ધિઃ સ્વસ્વરૂપાજ્ઞાનાજ્જાયતે ઇતિ વિવેકસ્તતો ભવતિ
। “યત્ર હિ દ્વૈતમિવ ભવતિ તદિતર ઇતરં જિઘ્રતિ”
(બૃ. ૨.૪.૧૪) “યત્ર વાન્યદિવ સ્યાત્ તત્રાન્યોઽન્યત્પશ્યેત્”
(બૃ. ૪.૩.૩૧) “યદેવ જાગ્રદ્ભયં પશ્યતિ તદત્રાવિદ્યયા
મન્યતે” (બૃ. ૪.૮.૨૦) ઇત્યાદ્યનન્તશ્રુતયઃ
સ્વસ્વરૂપાજ્ઞાનદશાયામેવ સકલદ્વૈતપ્રપઞ્ચવ્યવહાર ઇતિ
બોધયતિ । એવમશેષદુઃખનિદાનં સ્વસ્વરૂપાજ્ઞાનમિતિ સિદ્ધમ્ ।
(૮) તતઃ સ્વસ્વરૂપાજ્ઞાનં સ્વસ્વરૂપજ્ઞાનેનૈવ નિવર્તતે
નાન્યેન, તયોઃ તમઃપ્રકાશવત્પરસ્પરવિરોધિત્વાદિતિ
વિવેક ઉત્પદ્યતે । યદ્વિષયકમજ્ઞાનં ભવતિ
તદજ્ઞાનં તદ્વિષયકાપરોક્ષજ્ઞાનેનૈવ નિવર્તતે; યથા
રજ્જ્વજ્ઞાનં રજ્જુસાક્ષાત્કારેણૈવ નિવર્તતે, તદ્વત્ । તસ્માત્
સ્વસ્વરૂપાપરોક્ષજ્ઞાનમેવાખિલાનર્થનિદાનસ્વસ્વરૂપાજ્ઞાનનિવૃત્તિદ્વારા
નિશ્શ્રેયસાત્મકનિખિલદુઃખનિવૃત્તિહેતુર્ભવતિ ।
સ્વસ્વરૂપસ્યૈવ સત્યજ્ઞાનાનન્તાનન્દબ્રહ્મરૂપત્વાત્
સ્વસ્વરૂપજ્ઞાનેન બ્રહ્માવાપ્તિર્ભવતિ । બ્રહ્મ ચ
નિત્યનિરતિશયાખણ્ડાનન્દરૂપં દુઃખાસમ્ભિન્નમિતિ
સર્વવેદાન્તપ્રમાણસિદ્ધમ્ । અત એવ સ્વસ્વરૂપસાક્ષાત્કારેણૈવ
નિત્યનિરતિશયદુઃખાસમ્ભિન્નસ્વસ્વરૂપભૂતબ્રહ્માનન્દોઽવાપ્યતે ।
એવં નિખિલદુઃખનિવૃત્ત્યુપલક્ષિતસ્વસ્વરૂપભૂતાખણ્ડાનન્દપ્રાપ્તેઃ
સાક્ષાત્સાધનં સ્વસ્વરૂપજ્ઞાનમેવ । તસ્માત્ સ્વસ્વરૂપવિચાર એવ
કર્તવ્યઃ । ઇત્થં યસ્ય વિવેકો જાયતે સ એવ જિજ્ઞાસુરિત્યુચ્યતે ।

મુક્તલક્ષણં - સ્થૂલસૂક્ષ્મકારણાત્મકશરીરત્રયવિલક્ષણં પઞ્ચકોશવિલક્ષણં ચ સ્વસ્વરૂપં અખણ્ડાદ્વિતીયસ્વયઞ્જ્યોતિસ્સ્વભાવ
યઃ સાક્ષાદપરોક્ષીકરોતિ કરતલામલકવત્ સ એવ મુક્ત ઇત્યુચ્યતે ।

## (૫૪)

જિજ્ઞાસોરસ્મિન્ ગ્રન્થે પ્રવૃત્ત્યુપપત્તિઃ - એવં પૂર્વોક્તચતુર્વિધેષુ પુરુષેષુ પામરવિષયિણૌ વિષયોપભોગજન્યસુખેણેવાત્માનં તૃપ્તં કૃતાર્થં ચ મન્યમાનૌ વર્તેતે । કેષાઞ્ચિદ્વિષયિણાં પારલૌકિકપરમસુખેચ્છાયાં સત્યામપ્યતત્પ્રાપ્તિસાધનમેવ

તત્પ્રાપ્તિસાધનત્વેનાન્યથા ગૃહીત્વા તત્રૈવ તે પ્રવર્તન્તે, સાધુસઙ્ગસચ્છાસ્ત્રશ્રવણાદિરૂપપરમાનન્દપ્રાપ્તિસાધનજ્ઞાનાભાવાત્તેષામ્ । તતશ્ચ પામરવિષયિણોઃ પરમાનન્દાવાપ્ત્યર્થં નાસ્મિન્ ગ્રન્થે પ્રવૃત્તિર્જાયેત । દુઃખહત્યૈ ચ ન તેષામત્ર ગ્રન્થે પ્રવૃત્તિઃ, ઉપાયાન્તરે પ્રવૃત્તત્વાત્ । તસ્માન્નિરતિશયસુખાવાપ્તયે આત્યન્તિકદુઃખહાનાય ચ પામરવિષયિણોરસ્મિન્ગ્રન્થે ન સમ્ભવતિ પ્રવૃત્તિઃ । મુક્તસ્યાપિ નાસ્ત્યધિકારોઽસ્મિન્ ગ્રન્થે । જ્ઞાની હિ કૃતકૃત્યો મુક્ત ઇત્યુચ્યતે ।

૧. અજ્ઞાનદશાયામૈહિકભોગાદિસિદ્ધ્યર્થં
કૃષ્યાદિવ્યવસાયાઃ, આમુષ્મિકભોગાર્થં કામ્યકર્મોપાસનાદયઃ,
ચિત્તશુદ્ધ્યૈકાગ્ર્યાર્થં નિષ્કામકર્મોપાસનાદયઃ,
વેદાન્તશ્રવણાય વિવેકવૈરાગ્યાદિચતુર્વિધસાધનમ્,
અદ્વિતીયાત્મસાક્ષાત્કારાય ગુરૂપદેશઃ, સંશયાદિનિવૃત્ત્યર્થં
શ્રવણાદયઃ, તત્પદાર્થવિષયકપરોક્ષત્વભ્રમનિવૃત્તયે
ત્વમ્પદાર્થવિષયકપરિચ્છિન્નત્વભ્રમનિવૃત્તયે
ચાન્યોન્યવ્યતિષઙ્ગઃ, (વ્યતિહારઃ, ઓતપ્રોતભાવઃ), મોક્ષાર્થં
દૃઢતરાદ્વિતીયચિન્માત્રાત્માપરોક્ષસાક્ષાત્કારશ્ચેત્યેવમાદિપુષ્કલ-
સાધનાનુષ્ઠાનં, તત્સમ્પાદનઞ્ચ “કર્તવ્યમ્” ઇત્યુચ્યતે ।
એતદનુષ્ઠાનસમ્પાદનરૂપં કર્તવ્યં યેન કૃતં સ એવ
“કૃતકર્તવ્યઃ” = “કૃતકૃત્યઃ” ઇત્યુચ્યતે ।
નૈવાસ્તિ તસ્ય કર્તવ્યાન્તરં દૃઢતરાદ્વિતીયાત્માપરોક્ષજ્ઞાનવત્ત્વાત્ ।
લીલયાત્ર કાલયાપનાર્થં પ્રવૃત્તોઽપિ નાસ્ત્યસ્ય ગ્રન્થતઃ
પ્રયોજનમ્ । તસ્માન્ન મુક્તોદ્દેશેનાપ્યયં ગ્રન્થઃ પ્રવૃત્તઃ ।
કિન્તુ મુમુક્ષુરૂપજિજ્ઞાસુમુદ્દિશ્ય પ્રવૃત્તોઽયં ગ્રન્થઃ । ન
તસ્યાસ્તિ વિષયસુખેચ્છા । નિરતિશયભૂમાનન્દલિપ્સયા તસ્ય
સંસારદુઃખજિહાસાવત્ત્વાત્ । નિત્યનિરતિશયપરમાનન્દપ્રાપ્તિઃ
આત્યન્તિકદુઃખનિવૃત્તિશ્ચાપરોક્ષાત્મજ્ઞાનં વિના
કર્મયોગસાઙ્ખ્યયોગોપસનાદિભિર્ન સિદ્ધ્યતીતિ વિવેકો
યસ્ય સત્સઙ્ગાજ્જાયતે તસ્ય જિજ્ઞાસોરદ્વૈતવેદાન્તગ્રન્થે
પ્રવૃત્તિર્જાયેતૈવ ।

## (A. 55-60) વિષયે આક્ષેપાઃ-

## (૫૫)

જીવબ્રહ્મણોરૈક્યરૂપવિષયે આક્ષેપઃ - યત્તૂક્તં જીવબ્રહ્મણોરૈક્યમેવાસ્ય ગ્રન્થસ્ય વિષય ઇતિ તન્નોપપદ્યતે; તયોઃ સ્વભાવભેદાત્ । તથા હિ, બ્રહ્મ તુ
અવિદ્યાસ્મિતારાગદ્વેષાઽભિનિવેશાત્મકપઞ્ચક્લેશશૂન્યં વ્યાપકમેકં સજાતીયભેદ

૧. વિચારે ક્રિયમાણે સ્વરૂપસત્તાભાવાદ્યા ન વિદ્યતે સા અવિદ્યા ।
સા દ્વિપ્રકારા મૂલાવિદ્યા તૂલાવિદ્યેતિ ચ । શુદ્ધચિન્માત્રાવારિકા
મૂલાવિદ્યા ઘટાદ્યુપહિતચૈતન્યાવારિકા તૂલાવિદ્યા । મૂલાવિદ્યા તુ
કાર્યકારણભેદેન દ્વિવિધા । આવરણવિક્ષેપશક્તિસહિતાનાદિભાવરૂપા
કારણાવિદ્યા । વસ્તુનોઽન્યથાપ્રતીતિરેવ કાર્યાવિદ્યા । કાર્યાવિદ્યા
ચતુર્વિધા -
(૧) અનિત્યસ્વર્ગાદિલોકેષુ તત્રત્યવિષયેષુ ચ નિત્યતાબુદ્ધિરૂપા પ્રથમા ।
(૨) અશુદ્ધશરીરસ્ત્રીપુત્રાદ્યાલિઙ્ગનચુમ્બનાદિનિકૃષ્ટકાર્યેષુ શુચિત્વબુદ્ધિરૂપા દ્વિતીયા ।
(૩) દુઃખાત્મકધનાદિષુ ભોગસાધનેષુ સુખત્વબુદ્ધિરૂપા
તૃતીયા । (૪) અનાત્મદેહાદિષુ આત્મત્વભ્રમરૂપા ચતુર્થી ।
પઞ્ચક્લેશાન્તર્ગતાવિદ્યાશબ્દેનેયમેવ કાર્યાવિદ્યા ગૃહ્યતે ।
૨. બુદ્ધ્યાત્મનોરવિવેકેનાભેદધીઃ અસ્મિતા । ઇયમેવ સામાન્યાહઙ્કાર ઇત્યુચ્યતે ।
૩. પ્રાચીનવિષયાનુભવજન્યસંસ્કારવશાદનુકૂલવિષયકભોગેચ્છા રાગઃ ।
૪. પ્રતિકૂઊલવિષયકહાનેચ્છા દ્વેષઃ ।
૫. મરણભયાચ્છરીરસંરક્ષણાયાગ્રહોઽભિનિવેશઃ ।
૬. બ્રહ્મ હિ સજાતીવિજાતીસ્વગતભેદશૂન્યમ્ । તથા હિ સજાતીયાનાં
પરસ્પરં ભેદઃ સજાતીયભેદઃ, યથા બ્રાહ્મણાદીનામન્યોન્યભેદઃ ।
સ્વભિન્નજાતીયવસ્ત્વન્તરાત્ સ્વસ્ય ભેદો વિજાતીયભેદઃ, યથા
બ્રાહ્મણક્ષત્રિયયોરન્યોન્યભેદઃ । અવયવિનઃ સ્વાવયવાદ્ભેદઃ
સ્વગતભેદઃ । યથા શરીરસ્ય કરચરણાદિભ્યઃ, વૃક્ષસ્ય
શાખાદિભ્યશ્ચ ભેદઃ । “સર્વં ખલ્વિદં બ્રહ્મ”
(છા. ૩.૧૪.૧) ઇતિ સર્વસ્ય દ્વૈતસ્ય બ્રહ્મમાત્રત્વોક્ત્યા
બ્રહ્માન્તરાભાવાચ્ચ બ્રહ્મ સજાતીયભેદશૂન્યમ્ ।
બ્રહ્માન્તરાભાવશ્ચ “એકમેવાદ્વિતીયમ્”
(છા. ૬.૨.૧) ઇતિ શ્રુત્યા “એક” શબ્દેનોચ્યતે ।
બ્રહ્મરૂપપ્રત્યક્ચૈતન્યાદ્વિલક્ષણજડદૃશ્યપ્રપઞ્ચો વિજાતીયઃ ।
સ ચેત્સત્યઃ સ્યાત્ બ્રહ્માપિ તદા વિજાતીયભેદસહિતં સ્યાત્ । ન

તુ પ્રપઞ્ચઃ સત્યઃ, રજ્જ્વારોપિતસર્પવન્મિથ્યૈવ । યન્મિથ્યા ન
તદધિષ્ઠાનાદતિરિચ્યતે । તસ્માત્ બ્રહ્મ વિજાતીયભેદશૂન્યમિતિ
“એવ”કારેણોચ્યતે ॥ રહિતં ચ; બ્રહ્મણઃ
સજાતીયબ્રહ્માન્તરાભાવાત્ । જીવસ્તુ નિખિલક્લેશભાક્ પરિચ્છિન્નઃ
અનેકશ્ચ । યાવન્તિ શરીરાણિ તાવન્તો જીવાઃ । સર્વશરીરેષુ
જીવસ્ય એકત્વાભ્યુપગમે ત્વેકશરીરે જાયમાનસુખદુઃખાદયઃ
સર્વશરીરેષુ જાયેરન્ । ન તુ તથાસ્તિ । બ્રહ્મ નિરવયવમ્ ।
સચ્ચિદાનન્દાદયસ્તુ બ્રહ્મણઃ સ્વરૂપલક્ષણત્વાદસાધારણધર્માઃ,
ન ત્વવયવાઃ । પુષ્પાદિગતરૂપરસગન્ધસ્પર્શાદિગુણા યથા
પુષ્પાદિસ્વરૂપભૂતાસ્તથા સચ્ચિદાનન્દાદયો ધર્મા બ્રહ્મસ્વરૂપભૂતા
એવ, ન તતોઽતિરિક્તાઃ । તસ્માદ્બ્રહ્મ સ્વગતભેદરહિતઞ્ચેતિ
“અદ્વિતીય”-પદેનોચ્યતે ।

૧. ભિન્નઃ ।

૨. જીવબ્રહ્મૈક્યવિષયે આક્ષેપસમાધાનાનિઆક્ષેપઃ - સર્વશરીરેષુ
યદ્યેક એવાત્મા સ્યાત્તદા જીવાત્મપરમાત્મૈક્યમપિ સ્યાત્ । ન તુ તથાસ્તિ ।
અનેકત્વાદાત્મનઃ ।

સમાધિઃ - આત્મનોઽનેકત્વે ન કિઞ્ચિદપિ પ્રમાણમસ્તિ । અજ્ઞજનપ્રસિદ્ધાત્મભેદવિષયકૈન્દ્રિયકપ્રત્યક્ષં તુ નાત્મભેદાયત્તં, કિન્તૂપાધિભૂતશરીરભેદનિબન્ધનમ્ । “નાવેદવિન્મનુતે તં બૃહન્તમ્,” “તં ત્વૌપનિષદં પુરુષં પૃચ્છામિ” (બૃ. ૩.૯.૨૬) ઇત્યાદિશ્રુતિભ્યો વેદેતરપ્રમાણાનવગમ્યત્વાદાત્મનઃ । “એકો દેવઃ સર્વભુતેષુ ગૂઢઃ” (શ્વે. ૬-૧૧) ઇત્યાદિશ્રુતિભિઃ સર્વશરીરેષુ બ્રહ્માદિસ્તમ્બાન્તેષૂપલભ્યમાન આત્મા એક એવ । અનેકઘટેષૂપલભ્યમાનોઽપ્યાકાશો યથા એક એવ, તથા શરીરભેદેષ્વપ્યાત્મા એક એવ । “અગ્નિર્યથૈકો ભુવનં પ્રવિષ્ટો રૂપં રૂપં પ્રતિરૂપો બભૂવ । એકસ્તથા સર્વભૂતાન્તરાત્મા રૂપં રૂપં પ્રતિરૂપો બહિશ્ચ ।” (ક. ૨.૨.૯) ઇત્યાદિશ્રુતિભ્યઃ । તસ્માત્ જીવબ્રહ્મૈક્યં યુજ્યતે ।

આક્ષેપઃ - આત્મનોઽનેકત્વે ન પ્રમાણાભાવઃ, પ્રત્યક્ષાદ્યનેકપ્રમાણસત્ત્વાત્ ।

તથા હિ-

(૧) પ્રત્યક્ષપ્રમાણં - “બ્રાહ્મણોઽહમ્”
“ક્ષત્રિયોઽહમ્” ઇત્યહઙ્કારપૂર્વકં
પ્રતિપ્રાણિશરીરમાત્મભેદઃ પ્રત્યક્ષ એવ;
અહઙ્કારભેદસ્યાત્મભેદનિયામકત્વાત્ । સર્વદેહેષ્વાત્મન એકત્વે
“ત્વં” “અહં” “અયં” ઇત્યાદિભેદવ્યવહારો
ન સ્યાત્ । તસ્માદાત્મનાનાત્વં પ્રત્યક્ષસિદ્ધમ્ ।

(૨) અર્થાપત્તિપ્રમાણં - આત્મનો નાનાત્વાભાવે “ત્વં”

"અહં" "અયં" ઇત્યાદિભેદવ્યવહારો ન સ્યાત્ ।
તસ્માત્ ભેદવ્યવહારસિદ્ધ્યન્યથાનુપપત્ત્યા આત્મભેદોઽઙ્ગીકાર્ય
ઇત્યર્થાપત્તિરપિ તત્ર માનમ્ ।
(૩) અનુમાનપ્રમાણં - વિમત આત્મા પ્રતિશરીરં ભિન્નઃ,
પ્રતિશરીરં "ત્વં" "અહં" "અયં" ઇતિ
વ્યવહારભેદાત્, તત્તચ્છરીરરૂપવ્યક્તિભેદાચ્ચ; ઘટશરાવાદિવત્ ।
ઇત્યનુમાનપ્રમાણમપિ ।
(૪) શ્રુતિપુરાણાદિપ્રમાણં - શ્રુતિપુરાણાદિષુ
દેવદાનવયક્ષરાક્ષસગન્ધર્વકિન્નરકિમ્પુરુષમાનવાદિ-
ભેદવાદદર્શનાદાત્મનાનાત્વમેવ સિદ્ધ્યતિ ।
(૫) યુક્તિઃ - યદ્યાત્મા સર્વશરીરેષ્વેકોઽભ્યુપગમ્યેત, તદૈકસ્ય
સુખદુઃખાદિના સર્વેષાં તદુપલબ્ધિસાઙ્કર્યં સ્યાત્ । તથૈકસ્ય
જ્ઞાનાતિશયેન સર્વે જ્ઞાનિનઃ ॥

સ્યુઃ । તથા સતિ વિધિપ્રતિષેધશાસ્ત્રાણાં વૈયર્થ્યપ્રસઙ્ગઃ, જ્ઞાનિનો વિધિનિષેધાતીતત્વાત્ ।
તથૈવૈકસ્ય બન્ધેન સર્વે બદ્ધાઃ સ્યુઃ । તસ્માદાત્મનાનાત્વમેવ યુક્તમ્ ।
સમાધિઃ -

(૧) યત્તૂક્તં અહમહમિતિ અહમ્પ્રત્યયસ્ય ભેદાદાત્મા અનેક
ઇતિ, તન્ન યુજ્યતે - તથા હિ "અહં શિશુરહં
કુમારોઽહં યુવાહં વૃદ્ધ" ઇત્યાદિવ્યવહારેષુ
શૈશવાદ્યવસ્થાભેદૈરહમ્પ્રત્યયસ્ય ભેદેપ્યેક
એવાત્મા સર્વાવસ્થાસ્વનુવર્તતે । ન હિ યૌવનાદ્યવસ્થાસુ
કૌમારાદ્યવસ્થાન્તરાનુવૃત્તિરસ્તિ, તથાપિ ભિન્નાસુ
સર્વાસ્વપ્યવસ્થાસ્વેક એવાહંશબ્દાભિધેય આત્માનુવર્તમાનોઽનુભૂયતે ।
તસ્માદહમ્પ્રત્યયભેદો નાત્મભેદનિયામકઃ । કિઞ્ચ તત્તદવસ્થાગત
આત્મા ભિન્નો યદિ, તર્હિ શૈશવાદ્યવસ્થાન્તરકૃતકર્માણિ
યૌવનાદ્યવસ્થાન્તરે સ્મરણગોચરાણિ ન સ્યુઃ । તસ્માન્ન
પ્રત્યક્ષવિષય આત્મભેદઃ ।
(૨) એકસ્મિન્નેવ દેહે યથા અવયવભેદમાશ્રિત્ય
શિરઃપાણિપાદાદિવ્યવહારઃ સિદ્ધ્યતિ, તથા સકલશરીરેષ્વાત્મન
એકત્વેઽપિ તત્તચ્છરીરભેદમાશ્રિત્ય "ત્વમ્"
"અહમ્" "અયમ્" ઇત્યાદિભેદવ્યવહાર

ઉપપદ્યતે । ન હ્યયં ભેદવ્યવહાર આત્મભેદનિબન્ધનઃ ।
તસ્માદ્ભેદવ્યવહારસિદ્ધ્યન્યથાનુપપત્ત્યાત્મભેદઃ
સિદ્ધ્યતીત્યર્થાપત્તિરપિ ન પ્રમાણમ્ ।
(૩) શરીરવ્યક્તિભેદાત્, “ત્વમ્” “અહમ્”
“અયમ્” ઇત્યાદિવ્યવહારભેદાચ્ચાત્મનાનાત્વાનુમાનં ન પ્રમાણમ્ ।
સ્થૂલસૂક્ષ્મકારણશરીરાણાં જાગ્રત્સ્વપ્નશરીરાણાં ચ ભેદેઽપિ
અહમહમિતિ પ્રત્યભિજ્ઞાયમાનસ્યાત્મનો ભેદાભાવાત્ ।
(૪)
પૂર્વોક્તશ્રુતિસ્મૃતિપુરાણેતિહાસાદિસિદ્ધદેવદાનવમનુષ્યાદિભેદવ્યવહારસ્તુ
બ્રહ્માદિસ્તમ્બાન્તતત્તદ્દેહભેદાધીનો નાત્મભેદનિબન્ધનઃ ।
સર્વશરીરેષ્વપિ ચૈતન્યસ્યૈકરૂપત્વેન ચૈતન્યસ્વરૂપસ્યાત્મનો
ભેદાસિદ્ધેઃ । “એકો દેવઃ સર્વભૂતેષુ ગૂઢઃ”
(શ્વે. ૬.૧૧) “એકધૈવાનુદ્રષ્ટવ્યમેતદપ્રમયં ધ્રુવમ્”
(બૃ. ૪.૪.૨૦) “મૃત્યોઃ સ મૃત્યુમાપ્નોતિ ય ઇહ નાનેવ
પશ્યતિ” (બૃ. ૪.૪.૧૯, ક. ૨.૨.૯) “તત્ર કો મોહઃ
કઃ શોક એકત્વમનુપશ્યતઃ” (ઈ. ૭) ઇત્યાદિશ્રુતિભ્ય આત્મન
એકત્વનિશ્ચયાચ્ચ ।
(૫) ન ચાત્મૈકત્વે સુખદુઃખાદિવ્યવસ્થા પ્રત્યક્ષસિદ્ધા ન
સિદ્ધ્યેદિતિ વાચ્યમ્, અન્તઃકરણરૂપોપાધિભેદનિબન્ધનત્વાત્તસ્યાઃ ।
તત્તદુપાધિગતસુખદુઃખાદિવ્યવસ્થાયાસ્તત્તત્પ્રારબ્ધકર્માધીનત્વાત્ ।
એકસ્મિન્નેવ દેહે સુખદુઃખાદીનાં વૈચિત્ર્યં કર્મભેદાદુપપદ્યતે ।
તસ્માત્સુખદુઃખાદીનાં પુણ્યાપુણ્યકર્મકાર્યત્વેન, તદ્ભેદાત્,
ચિદાભાસયુક્તતત્તદન્તઃકરણરૂપભોક્તૃભેદાચ્ચ
સુખદુઃખાદિવ્યવસ્થા સમ્ભવત્યેવ । આત્મન એકત્વે એકસ્ય સર્વજ્ઞત્વે
સર્વે સર્વજ્ઞાઃ સ્યુઃ, તતો વિધિનિષેધાદિશાસ્ત્રમનર્થકં
સ્યાદિતીયમપિ શઙ્કા ન યુજ્યતે । યદ્યપ્યેક એવાત્મા સર્વદા સર્વત્ર
સર્વં વિજાનાતિ, તથાપિ તત્તદ્દેહસ્થાન્તઃકરણવૃત્તિદ્વારૈવ
ઘટપટાદિવિષયવિશેષાન્ જાનાતિ । યતો દેહભેદનિબન્ધો
બુદ્ધિભેદસ્તત એવ પ્રતિદેહં જ્ઞાનભેદોઽપ્યવશ્યં જાયેતૈવ
। અથવા તત્તદ્બુદ્ધિવૃત્ત્યા સમ્બદ્ધમેવ ઘટપટાદિ વસ્તુ
ભાસતે, નેતરત્ । બુદ્ધિવૃત્તિરૂપં જ્ઞાનં પરિચ્છિન્નમ્ ।
યસ્માત્ પરિચ્છિન્નાયાસ્તત્તદ્બુદ્ધિવૃત્તેસ્તત્તદ્વસ્તુભિરેવ

સમ્બન્ધો ન સર્વૈઃ; તસ્માન્ન સર્વેષાં સર્વજ્ઞત્વાપત્તિઃ ।
શબ્દોત્પાદકસ્યાકાશસ્યૈકત્વેન સર્વવ્યાપિતયા ચ સર્વત્ર
ભેરીમૃઽઙ્ગાદિસમ્બન્ધે સત્યપિ દણ્ડાદિભિરભિઘાતો યત્ર ભવતિ
તત્પ્રદેશમાત્રે શબ્દ ઉત્પદ્યતે નાન્યત્રેતિ યથા, એવમેવૈકસ્ય
ચિન્માત્રસ્યાત્મનઃ પરિપૂર્ણસ્યાપિ, યત્ર બુદ્ધિવૃત્તેઃ યેન વસ્તુના ॥

## (A. 56-60) સાક્ષિબ્રહ્મૈક્યવિષયે આક્ષેપઃ-

### (૫૬)

જીવાતિરિક્તસાક્ષી નાસ્તિ; સત્ત્વેઽપિ સાક્ષી નાનેતિ

શઙ્કા - યદુક્તં સુખદુઃખાદયોઽન્તઃકરણધર્માઃ । તચ્ચાન્તઃકરણમનેકમ્ । તસ્માદેકોપાધિસ્થસુખદુઃખાદયો ધર્મા ઉપાધ્યન્તરસમ્બન્ધિનો ન ભવન્તિ । સાક્ષી તુ સર્વસુખદુઃખાદિસાક્ષ્યધર્માસમ્બદ્ધ એક એવ । તસ્ય ચ બ્રહ્મણૈક્યં વક્તું શક્યત એવેતિ । તન્ન । કર્તૃત્વભોક્તૃત્વાદિધર્મવિશિષ્ટજીવાતિરિક્તસાક્ષિસત્ત્વે પ્રમાણાભાવાત્ । સાક્ષ્યઙ્ગીકારપક્ષેઽપિ સ એક ઇત્યભ્યુપગન્તું ન શક્યતે । કિન્ત્વનેકે સાક્ષિણ ઇત્યેવ યુક્તમ્ । તથા હિ, અન્તઃકરણં તદ્ધર્મસુખદુઃખાદયશ્ચ નાન્તઃકરણેન ન વેન્દ્રિયેણ વિષયીક્રિયન્તે, કિન્તુ સાક્ષિણૈવેતિ વેદાન્તસિદ્ધાન્તઃ । સાક્ષિણશ્ચૈકત્વે યદા એકાન્તઃકરણસુખદુઃખાદયઃ સાક્ષિણા વિષયીક્રિયન્તે તદા સર્વાન્તઃકરણગતસુખદુઃખાદયોઽપિ વિષયીક્રિયેરન્ । તથાનુભવાભાવાદેવાનેકે સાક્ષિણ ઇત્યભ્યુપગન્તવ્યમ્ । ન ચાસ્ત્યસ્મિન્ પક્ષે કોઽપિ દોષઃ । યસ્ય હિ સાક્ષિણો યદન્તઃકરણમુપાધિસ્તદન્તઃકરણગતા એવ ધર્માસ્તેન સાક્ષિણા વિષયીક્રિયેરન્, નાન્યોપાધિગતાઃ । એવં ચ સાક્ષિણોઽનેકત્વાન્ન તેષામેકેન બ્રહ્મણૈક્યં યુજ્યેત ।

### (૫૭)

અન્તઃકરણસ્યેન્દ્રિયાવિષયત્વમિન્દ્રિયાણિ પઞ્ચીકૃતભૂતતત્કાર્યાણ્યેવ વિષયીકુર્યુઃ । અત્રાપ્યસ્તિ વક્ષ્યમાણરીત્યા ભેદઃ । ચક્ષુરિન્દ્રિયં નીલપીતાદિવર્ણયુક્તઘટાદિનિષ્ઠનૈલ્યાદિરૂપં તદાધારભૂતઘટાદિ ચ વિષયીકરોતિ । ત્વગિન્દ્રિયમપિ સ્પર્શં તદાશ્રયં ચોભયં વિષયીકરોતિ । જિહ્વાઘ્રાણશ્રવણાનિ તુ ત્રીણીન્દ્રિયાણિ વસ્ત્વાશ્રિતરસગન્ધશબ્દાનેવ ક્રમાદ્વિષયીકુર્વન્તિ, ન તુ તદાશ્રયદ્રવ્યમ્ । અત એવૈતત્ત્રયેણાપી॥ સહ સમ્બદ્ધો ભવતિ તત્રૈવ તદ્વસ્તુમાત્રવિષયકં જ્ઞાનં જાયતે, ન ત્વન્યત્ર । તસ્માદનેકત્વાદવ્યાપકત્વાચ્ચાન્તઃકરણતદ્વૃત્તીનાં ન સર્વેષાં સર્વજ્ઞત્વાપત્તિઃ । વિધિનિષેધાદિપરશાસ્ત્રાણાં ચાજ્ઞજનપ્રવૃત્તિનિવૃત્તિવિષયકત્વાન્ન વૈયર્થ્યાપત્તિઃ । જીવાનાં સર્વજ્ઞત્વાભાવાત્તેષાં મધ્યે યસ્તુ વેદાન્તશ્રવણજન્યજ્ઞાનેન પ્રત્યગભિન્નં પરં બ્રહ્મ સ્વાત્મસ્વરૂપત્વેન “અહં બ્રહ્માસ્મિ” ઇતિ નિર્વિશઙ્કં જાનાતિ સ એવ મુક્તો નાન્યઃ । તસ્માદ્બન્ધમોક્ષવ્યવસ્થા ચ સિદ્ધ્યતિ । ઇત્થં પૂર્વોક્તાક્ષેપાસમ્ભવાત્ જીવબ્રહ્મૈક્યરૂપવિષયશ્ચ સિદ્ધ્યત્યેવ ।

૧. તથા હિ - રસાદ્યાશ્રયદ્રવ્યં ચક્ષુષો વા ત્વચો વા
વિષયીભવતિ, ન તુ જિહ્વાદેઃ । તથા હિ માધુર્યાદ્યાસ્વાદને
જિહ્વયા માધુર્યાદિગુણ એવ ગૃહ્યતે, ન તદાશ્રયદ્રવ્યમ્ ।
તચ્ચ ત્વગિન્દ્રિયેણૈવ ગૃહ્યતે । ન્દ્રિયેણાન્તરમન્તઃકરણં
ન વિષયીક્રિયતે । તથૈવ ન ચક્ષુષા ત્વચા ચાન્તઃકરણં
વિષયીક્રિયતે । યતો બાહ્યપઞ્ચીકૃતભૂતાનિ, તત્કાર્યં રૂપાશ્રયં
સ્પર્શાશ્રયં વા વસ્તુ, ચક્ષુષા ત્વચા ચ વિષયીક્રિયન્તે ।
અન્તઃકરણં ત્વપઞ્ચીકૃતભૂતકાર્યત્વાન્નેત્રત્વચોર્ન વિષયીભવતિ ।
અત એવાપઞ્ચીકૃતભૂતકાર્યં નેત્રેન્દ્રિયમપિ નેત્રેન્દ્રિયેણ ન
વિષયીક્રિયતે । બાહ્યવસ્તૂન્યેવ સર્વેન્દ્રિયાણાં વિષયીભવન્તિ ।
ઇન્દ્રિયાપેક્ષયાન્તરત્વાદન્તઃકરણં નેન્દ્રિયાણાં વિષયીભવતિ ।

## (૫૮)

અન્તઃકરણસ્ય સ્વવૃત્ત્યવિષયત્વં - કિઞ્ચાન્તઃકરણં ન સ્વવૃત્તેરપિ ગોચરીભવતિ । અન્તઃકરણસ્ય વૃત્ત્યાશ્રયત્વાન્ન તત્ સ્વાશ્રિતવૃત્તેર્વિષયીભવતિઉમર્હતિ । યથા અગ્ન્યાશ્રિતા દાહશક્તિઃ સ્વાશ્રયાતિરિક્તેન્ધનાદ્યેવ વિષયીકરોતિ, તથાન્તઃકરણવૃત્તિરપિ સ્વાશ્રયાન્તઃકરણવ્યતિરિક્તમેવ વસ્તુ વિષયીકુર્યાત્ । તસ્માદન્તઃકરણં નૈવ સ્વવૃત્તેઃ વિષયીભવતિ ।

## (૫૯)

અન્તઃકરણધર્માઃ નાન્તઃકરણવૃત્તેર્વિષયાઃ - એવમેવાન્તઃકરણવૃત્તિઃ સ્વાશ્રયાન્તઃકરણાશ્રિતરાગદ્વેષસુખદુઃખાદિધર્માનપિ ન વિષયીકર્તું શક્નોતિ । યદ્યન્તઃકરણવૃત્તિઃ સ્વાશ્રયભૂતમન્તઃકરણં વિષયીકુર્યાત્તર્હિ તદાશ્રિતતદ્ધર્મભૂતાન્ સુખદુઃખાદીનપિ વિષયીકુર્યાત્ । યતોઽન્તઃકરણં વિષયીકુર્વાણા વૃત્તિર્નાન્તઃકરણાભિમુખા ભવતિ, તસ્માદન્તઃકરણવત્ તદ્ધર્માશ્ચ નાન્તઃકરણવૃત્તેર્વિષયીભવન્તિ । અસ્તિ ચાયમત્ર નિયમઃ - વૃત્તિર્હિ સ્વાશ્રયાત્ કિઞ્ચિદ્વિપ્રકૃષ્ટમેવ વસ્તુ વિષયીકુર્યાત્, નાતીવ વિપ્રકૃષ્ટં નાપ્યત્યન્તં સન્નિકૃષ્ટં વેતિ । યથા નયનવૃત્તિઃ સ્વાશ્રયસમીપસ્થમઞ્જનાદિકં ન વિષયીકરોત્યત્યન્તં સન્નિકૃષ્ટત્વાત્, તથાન્તઃકરણવૃત્તિરપિ સ્વાશ્રયાન્તઃકરણગતાન્ સુખદુઃખાદીનત્યન્તસન્નિહિતાન્ ધર્માન્ ન વિષયીકુર્યાત્ । ઇત્થમન્તઃકરણં તદ્ધર્માશ્ચ નેન્દ્રિયાણામન્તઃકરણવૃત્તેશ્ચ વિષયીભવન્તિ, કિન્તુ કેવલસાક્ષિણા તે વિષયીક્રિયન્તે; ઇતિ હિ વેદાન્તસિદ્ધાન્તઃ ।

૧. નનુ અન્ધકારાવૃતં ગૃહં યથાન્ધકારસ્યાશ્રયો વિષયશ્ચ
ભવતિ, યથા વા ચૈતન્યમેકમેવ સ્વાજ્ઞાનસ્યાશ્રયો વિષયશ્ચ
ભવતિ; એવમેવાન્તઃકરણમપિ સ્વવૃત્તેરાશ્રયો વિષયશ્ચ
કુતો ન સ્યાદિતિ ચેન્ન । ગૃહાન્ધકારવદ્યત્રાશ્રયાશ્રયિણૌ

ભિન્નૌ ભવતસ્તત્રૈકસ્યૈવાશ્રયત્વં વિષયત્વં ચ સ્યાત્
। યત્ર તુ વહ્નિતદાશ્રિતદાહશક્તિવદાશ્રયાશ્રયિણૌ ન
ભિન્નૌ ભવતસ્તત્રૈકમેવ વસ્ત્વાશ્રયો વિષયશ્ચ ન સ્યાત્ ।
પ્રકૃતે ચાન્તઃકરણતદ્વૃત્ત્યોશ્ચ ભેદાભાવાન્નાન્તઃકરણં
સ્વવૃત્તેર્વિષયીભવતિ । કિન્ત્વાશ્રયમાત્રં ભવતિ,
ઉપાદાનકારણત્વાદન્તઃકરણસ્ય સ્વવૃત્તિં પ્રતિ ।

(૬૦)

અનેકસાક્ષિણામેકેન બ્રહ્મણૈક્યાસમ્ભવઃ - એવં ચાન્તઃકરણતદ્ધર્માણાં કેવલસાક્ષિવેદ્યત્વમતે સાક્ષિણ એકત્વાઙ્ગીકારો ન યુજ્યત એવ । પૂર્વમેવ પ્રદર્શિતરીત્યા એકેન સાક્ષિણા યદા એકાન્તઃકરણસ્થસુખદુઃખાદયો વિષયીક્રિયન્તે તદા સર્વાન્તઃકરણગતસુખદુઃખાદેરપિ વિષયીકરણાપત્તેરનિવાર્યત્વાત્ । લોકે તથાનનુભવાદનેકે સાક્ષિણ ઇત્યેવાભ્યુપગન્તવ્યમ્ । સાક્ષિણોઽનેકત્વપક્ષે યથા ન દોષસ્તથોક્તમેવ પ્રાક્ । તથા ચાનેકસાક્ષિણામેકેન બ્રહ્મણૈક્યં ન યુજ્યત એવ ।

## (A. 61-65) વિષયવિષયકાક્ષેપાણાં સમાધાનાનિ-

(૬૧)

સાક્ષિસ્વરૂપં - યદુક્તં જીવો રાગદ્વેષાદિક્લેશવિશિષ્ટઃ, તદ્રહિતઞ્ચ બ્રહ્મ; તસ્માત્ તયોર્જીવબ્રહ્મણોરૈક્યરૂપો વિષયો ગ્રન્થસ્ય ન સિદ્ધ્યેદિતિ યદ્યપિ તત્સત્યમેવ, તથાપિ રાગાદિવિયુક્તસાક્ષિણો બ્રહ્મણૈક્યં યુજ્યત એવ । ન ચ કર્તૃત્વભોક્તૃત્વાદિધર્મવિશિષ્ટજીવાદન્યઃ સાક્ષી વન્ધ્યાસૂનુસમત્વાન્નાસ્તીતિ વાચ્યમ્, ઉપહિતસ્ય સાક્ષિત્વાત્ । કર્તૃત્વભોક્તૃત્વાદિરૂપસંસારિવિશેષણાનાં યો વિશેષ્યાંશઃ સ એવ સાક્ષીત્યુચ્યતે । તાદૃશસાક્ષિનિષેધે, સંસારિણો વિશેષ્યાંશાપલાપે કર્તૃભોક્તૃસ્વરૂપસંસારિનિષેધ એવ પર્યવસ્યેત્ । એકસ્યૈવ ચૈતન્યસ્ય સાક્ષિત્વે વિવક્ષિતેઽન્તઃકરણમુપાધિર્ભવતિ । તસ્યૈવ કર્તૃત્વભોક્તૃત્વવિશિષ્ટજીવત્વે વિવક્ષિતેઽન્તઃકરણં વિશેષણઞ્ચ ભવતિ । વિશેષણેન યુક્તં વિશિષ્ટમુપાધિના યુક્તમુપહિતમિતિ ચોચ્યતે । કાર્યાનન્વયિત્વે સતિ વિદ્યમાનત્વે સતિ વ્યાવર્તક ઉપાધિઃ । યથા ન્યાયમતે કર્ણગોલકાન્તર્ગત આકાશઃ શ્રોત્રેન્દ્રિયમિત્યુચ્યતે । તત્ર કર્ણગોલકં શ્રોત્રસ્યોપાધિઃ, યતઃ કર્ણગોલકં સ્વાવચ્છિન્નમાકાશં શ્રોત્રેન્દ્રિયત્વેન બોધયિત્વા સ્વયં તેનાસમ્બદ્ધં ભવતિ । તસ્માત્કર્ણગોલકં શ્રોત્રસ્યોપાધિઃ । એવમન્તઃકરણમપિ સ્વોપહિતં ચૈતન્યં સાક્ષિત્વેન બોધયિત્વા સ્વયં તેનાસમ્બદ્ધં વર્તતે । તસ્માદન્તઃકરણં સાક્ષિણ ઉપાધિરિતિ, અન્તઃકરણસ્થચૈતન્યમાત્રં સાક્ષીતિ ચ સિદ્ધ્યતિ ।

## (૬૨)

જીવસ્વરૂપં - કાર્યાન્વયિત્વે સતિ વિદ્યમાનત્વે સતિ વ્યાવર્તકં વિશેષણમ્ । યથા "કુણ્ડલી આગતઃ" ઇત્યત્ર કુણ્ડલં

૧. યદ્વસ્તુ સ્વસમીપસ્થં વસ્ત્વન્તરં વ્યાવર્તયતિ, અપિ તુ સ્વયં તેન ન સમ્બધ્યતે, સ ઉપાધિરિત્યુચ્યતે ।

૨. સ્વાત્મના સહૈવ વસ્તુનોઽવભાસકં વિશેષણમિત્યુચ્યતે ।

વિશેષણં, સ્વવિશિષ્ટસ્યૈવ પુરુષસ્થગમનક્રિયાકર્તૃત્વેન બોધકત્વાત્ । યથા વા "નીલં ઘટમપશ્યમ્," ઇત્યત્ર નીલવર્ણો વિશેષણમ્, ઘટસ્યેવ નીલવર્ણસ્યાપિ દર્શનક્રિયાયાં કર્મત્વેનાન્વયાત્ । તથાન્તઃકરણમપિ કર્તૃત્વભોક્તૃત્વવિશિષ્ટજીવચૈતન્યસ્ય વિશેષણમ્, સ્વાવચ્છિન્નચૈતન્યે કર્તૃત્વભોક્તૃત્વવ્યવહારાસ્પદત્વસ્ય બોધનાત્ । તસ્માત્સંસારિણો જીવસ્યાન્તઃકરણં વિશેષણમ્ । તથા ચાન્તઃ- કરણં તદવચ્છિન્નચૈતન્યં ચૈકીકૃત્ય સંસારીતિ વ્યપદેશઃ । અયગ્ચોત્તરત્ર સ્પષ્ટીક્રિયતે ।

## (૬૩)

ઐક્યોપપત્તિઃ - રાગદ્વેષાદયઃ ક્લેશાઃ સંસારિણ્યેવ વર્તન્તે, ન તુ સાક્ષિણિ । તત્રાપિ સંસારિણો વિશેષણીભૂતાન્તઃકરણમેવાશ્રિતાસ્તે, ન તુ વિશેષ્યભૂતચૈતન્યમ્ । સંસારિણો વિશેષ્યભૂતચૈતન્યમેવ સાક્ષીતિ વ્યવહ્રિયતે । એકમેવ ચૈતન્યમન્તઃકરણવિશિષ્ટગ્ચેત્ સંસારીત્યુચ્યતે, તદ્વિરહિતં ચેત્ સાક્ષીતિ ચ । તસ્માત્સાક્ષિસ્વરૂપસ્ય, સંસારિણો વિશેષ્યસ્વરૂપસ્ય ચ શબ્દભેદં વિના ન કોઽપ્યર્થતો ભેદઃ । યદિ વિશેષ્યસ્વરૂપેઽપિ ક્લેશા અઙ્ગીક્રિયેરન્ તર્હિ સાક્ષિણોઽપિ તેઽઙ્ગીકૃતાઃ સ્યુઃ । ન ચૈતદિષ્ટમ્ । "સાક્ષી ચેતા કેવલો નિર્ગુણશ્ચ," (શ્વે. ૬.૧૧) "ન લિપ્યતે લોકદુઃખેન બાહ્યઃ," (ક. ૨.૨.૧૧) "અસઙ્ગો હ્યયં પુરુષઃ," (બૃ. ૪.૩.૧૫, ૪.૩.૧૬) "સ ન સાધુના કર્મણા ભૂયાન્નો એવાસાધુના કનીયાન્," (બૃ. ૪.૪.૨૨) "ન વર્ધતે કર્મણો નો કનીયાન્" (બૃ. ૪.૪.૨૩) ઇત્યાદિશ્રુતિભ્યઃ સાક્ષિણો ન ક્લેશગન્ધોઽપ્યસ્તીતિ વેદાન્તસિદ્ધાન્તાત્ । અતઃ સંસારિણો વિશેષ્યસ્વરૂપે ન ક્લેશાઃ સન્તિ, કિન્તુ વિશેષણીભૂતાન્તઃકરણમાત્રે । "કામઃ સઙ્કલ્પો વિચિકિત્સા શ્રદ્ધાશ્રદ્ધા ધૃતિરધૃતિર્હ્રીર્ધીર્ભીરિત્યેતત્સર્વં મન એવ," (બૃ. ૧.૫.૩) "કામો યેઽસ્ય હૃદિ શ્રિતાઃ," (બૃ. ૪.૪.૬, ક. ૨.૩.૧૪) "અકામં રૂપં શોકાન્તરમ્," (બૃ. ૪.૩.૨૧) "તીર્ણો હિ તદા સર્વાગ્ચ્છોકાન્ હૃદયસ્ય ભવતિ" (બૃ. ૪-૩-૨૨) ઇત્યાદિશ્રુતિભ્યઃ ।

રાગેચ્છાસુખદુઃખાદિ બુદ્ધૌ સત્યાં પ્રવર્તતે ।
સુષુપ્તૌ નાસ્તિ તન્નાશે તસ્માદ્બુદ્ધેસ્તુ નાત્મનઃ ॥ અ. બો. ૨૩ ॥

ઇતિ વૃદ્ધવચનાચ્ચ રાગાદયો બુદ્ધિધર્મા એવ, ન તુ જીવાત્મધર્મા ઇત્યુક્તમ્ । તથા ચાન્તઃકરણવિશિષ્ટસ્ય જીવસ્ય બ્રહ્મણા સહૈક્યાસમ્ભવેઽપ્યન્તઃકરણોપહિતસાક્ષિણસ્તત્સમ્ભવત્યેવ ।

## (૬૪)

સાક્ષિણો નાનાત્વેઽપ્યેકેન બ્રહ્મણૈક્યં સમ્ભવતિ - યદુક્તં
સાક્ષિણોઽનેકત્વાદેકત્વાચ્ચ બ્રહ્મણઃ, અનેકસાક્ષિણામેકેન બ્રહ્મણૈક્યં ન યુજ્યતે,
યદિ યુજ્યતે તર્હિ બ્રહ્મણ ઇવ સાક્ષિણોઽપિ સર્વશરીરવર્તિત્વવ્યાપકત્વૈકત્વસિદ્ધ્યા યુગપત્સર્વશરીરેષુ સુખદુઃખસાક્ષાત્કારપ્રસઙ્ગ ઇતિ, તન્ન ।
યતઃ સાક્ષી દ્વિવિધઃ, ઈશ્વરસાક્ષી જીવસાક્ષી ચેતિ । તત્રાદ્ય એક એવ ।
દ્વિતીયોઽનેકઃ પરિચ્છિન્નશ્ચ, તથાપિ વ્યાપકબ્રહ્મણો ન ભિન્નઃ । યથા ઘટાકાશો નાના પરિચ્છિન્નોઽપિ મહાકાશાદનન્યતયા મહાકાશસ્વરૂપ એવ ભવતિ,
તથા જીવસાક્ષી નાન પરિચ્છિન્નોઽપિ તત્ત્વતો બ્રહ્માભિન્નતયા બ્રહ્મૈવ ભવતિ ।

## (૬૫)

સુખદુઃખાદયો વૃત્ત્યારૂઢસાક્ષિવિષયાઃ - સુખદુઃખાદયોઽન્તઃકરણવૃત્તેર્ન વિષયીભવન્તીતિ યદુક્તં નૈતદસ્તિ । યદ્યપિ સુખદુઃખાદયઃ સાક્ષિભાસ્યાઃ, તે ચ સાક્ષિણો નાના; તથાપિ ન કેવલઃ સાક્ષી સુખદુઃખાદીન્ ભાસયતિ, કિન્તુ વૃત્તિદ્વારૈવ । તથા હિ, યદાન્તઃકરણસ્ય સુખદુઃખાદ્યાકારઃ પરિણામો ભવતિ, તદૈવાન્તઃકરણસ્યાન્યાપિ વૃત્તિઃ સુખદુઃખાદિવિષયકજ્ઞાનાકારા ભવતિ । તાદૃશજ્ઞાનરૂપવૃત્ત્યારૂઢઃ સાક્ષી સુખદુઃ- ખાદીન્ પ્રકાશયતિ । અનયા રીત્યા સુખદુઃખાદયઃ સાક્ષિણો વિષયીભવન્તિ, વૃત્તિમન્તરા તુ ન કેવલસાક્ષિણો વિષયીભવન્તિ; ઇતિ હિ પ્રાચીનગ્રન્થકારા આહુઃ । અત્રૈતદાકૂતં - કેવલેઽપ્યાકાશે “ઘટાકાશ” ઇતિ નામ જલાહરણાદિકં કાર્યં ચ ઘટરૂપોપાધિદૃષ્ટિમનુ પ્રતીયતે, ન તુ તામુપાધિદૃષ્ટિં વિના । ઉપાધિદૃષ્ટ્યભાવે ત્વાકાશ એવ કેવલઃ પ્રતીયતે । અતો ઘટાકાશોઽપિ મહાકાશ એવ, વિકારસ્ય વાચારમ્ભણમાત્રત્વેન મિથ્યાત્વાત્ । એવમેવ સાક્ષાચ્છુદ્ધચૈતન્યમાત્રે “સાક્ષી” ઇતિ નામ સુખદુઃખાદિધર્માશ્રયાન્તઃકરણપ્રકાશકત્વરૂપકાર્યઞ્ચાન્તઃકરણરૂપોપાધિદૃષ્ટિમનુસૃત્યૈવ પ્રતીયતે, ન તુ તાં વિના । ઉપાધિદૃષ્ટ્યભાવે તુ ચિન્માત્રબ્રહ્મૈવ કેવલં ભાસતે । અતઃ સાક્ષ્યપિ બ્રહ્મૈવ । ઈદૃગભિપ્રાયેણૈવોક્તં “સાક્ષી એક” એવેતિ, યત ઉપાધિપ્રયુક્તભેદદૃષ્ટિમન્તરા સાક્ષિણોઽનેકત્વપરિચ્છિન્નત્વાદિકં ન સ્વતોઽવભાસતે । અયમેવ સાક્ષી જીવવા૧. યથા સ્વતઃ શુભ્રે પત્રે મષીરેખાભિરક્ષરાણીવ ભાસન્તે । વસ્તુતસ્ત્વક્ષરાણાં પત્રસ્ય ચ શબ્દતઃ કેવલં ભેદઃ । મષીરૂપોપાધિદૃષ્ટિમન્તરા પૃથગક્ષરાણામનુપલમ્ભાત્, શુદ્ધપત્રમાત્રસ્યાવશિષ્ટત્વાચ્ચ । તથાન્તઃકરણરૂપોપાધિજનિતભેદદૃષ્ટિમન્તરા સાક્ષીતિ નામાપિ ન સિદ્ધ્યતિ, શુદ્ધચિન્માત્રમેવાસ્તે । ચકત્વમ્પદલક્ષ્યાર્થઃ । ઉપરિષ્ટાદેતત્સ્પષ્ટીક્રિયતે । ઇત્થં જીવબ્રહ્મૈક્યમસ્ય ગ્રન્થસ્ય વિષય ઇતિ યુક્તમેવોક્તમ્ ।

# (A. 66-82) પ્રયોજનવિષયકાક્ષેપાઃઆ

## (A. 66-72) ન જ્ઞાનેન બન્ધનિવૃત્તિરિત્યાક્ષેપઃ-

### (૬૬)

બન્ધઃ સત્ય ઇત્યાક્ષેપઃ - અહઙ્કારાદિદેહાન્તાનાત્મભૂતદૃશ્યવસ્તુજાતં સર્વમપિ બન્ધ ઇત્યુચ્યતે । સ બન્ધો યદ્યધ્યસ્તઃ સ્યાત્તર્હિ જ્ઞાનેન નિવર્ત્યેત । અનધ્યસ્તશ્ચેન્નૈવ જ્ઞાનેન નિવર્ત્યેત । જ્ઞાનસ્ય હ્યેષઃ સ્વભાવઃ - યત્ સ્વવિષયીભૂતવસ્તુનિષ્ઠાજ્ઞાનતત્કાર્યાધ્યાસનિવર્તકત્વમિતિ । યથા રજ્જુસાક્ષાત્કારઃ સ્વવિષયીભૂતરજ્જ્વધ્યસ્તસર્પાદીન્ રજ્જ્વજ્ઞાનઞ્ચ નિવર્તયતિ । ભ્રમજ્ઞાનવિષયીભૂતમિથ્યાવસ્તુ તદ્વિષયકભ્રાન્તિજ્ઞાનં ચ અધ્યાસ ઇત્યુચ્યતે । યત્ર યદ્વસ્તુ મિથ્યાત્વમન્તરા પરમાર્થતો વર્તતે, નાસ્તિ તસ્ય જ્ઞાનાન્નિવૃત્તિઃ । એવમાત્મન્યપ્યહઙ્કારાદિબન્ધો યદ્યધ્યસ્તઃ સ્યાત્તર્હિ જ્ઞાનેન નિવર્ત્યેત । આત્મનિ મિથ્યાભૂતબન્ધાધ્યાસસામગ્રી નાસ્તિ, તથાપ્યાત્મનિ પ્રતીયતે ચ બન્ધઃ । તસ્માદ્બન્ધઃ સત્ય એવ ભવિતુમર્હતિ । સત્યત્વાદેવ જ્ઞાનેન બન્ધનિવૃત્ત્યાશા નિરર્થિકૈવ ।

### (૬૭)

અધ્યાસસામગ્ર્યઃ - (૧) સત્યવસ્ત્વનુભવજન્યસંસ્કારઃ, (૨) પ્રમાતૃદોષાઃ, (૩) પ્રમાણદોષાઃ, (૪) પ્રમેયદોષાઃ, (૫) અધિષ્ઠાનવિશેષાજ્ઞાનં તત્સામાન્યજ્ઞાનં ચેત્યેતા અધ્યાસસામગ્ર્યઃ । વિના ત્વાભિરધ્યાસ એવ ન સિદ્ધ્યેત્ । શુક્તિકાયાં રજતાધ્યાસઃ, રજ્જ્વાં સર્પાધ્યાસશ્ચ જાયતે । સ ચ યસ્ય પરમાર્થસત્યરજતસર્પાદ્યનુભવાહિતસંસ્કારો વર્તતે તસ્યૈવ જાયતે,

૧. અધ્યાસો નામાતસ્મિંસ્તદ્બુદ્ધિઃ - અતસ્મિન્ = કાલત્રયેઽપિ
સર્પાભાવવતિ રજ્જ્વાદૌ, તદ્બુદ્ધિઃ = પ્રાતિભાસિકસર્પાદિબુદ્ધિઃ ।
તાદૃશસર્પાદિ તજ્જ્ઞાનં ચાધ્યાસ ઇત્યુચ્યતે ।
અયઞ્ચાધ્યાસો દ્વિવિધઃ - અર્થાધ્યાસો જ્ઞાનાધ્યાસશ્ચેતિ ।
ભ્રાન્તિજ્ઞાનવિષયીભૂતમિથ્યાસર્પાદિરર્થાધ્યાસઃ ।
તાદૃશમિથ્યાર્થજ્ઞાનં જ્ઞાનાધ્યાસઃ । ઇદઞ્ચ જ્ઞાનં
પરોક્ષત્વાપરોક્ષત્વધર્મભેદાદ્દ્વિવિધમ્ । તચ્ચ વિષયાધીનમ્
। જ્ઞાનાધ્યાસ એવ “મિથ્યાજ્ઞાનં” “ભ્રાન્તિઃ”
ઇતિ ચોચ્યતે । અર્થાધ્યાસોઽપિ સ્વરૂપાધ્યાસસંસર્ગાધ્યાસભેદેન
દ્વિવિધઃ । અજ્ઞાનતત્કાર્યાદીનાં ચેતને આત્મનિ સ્વરૂપાધ્યાસઃ ।
સચ્ચિદાનન્દરૂપસ્યાત્મનોઽજ્ઞાનતત્કાર્યાદૌ સંસર્ગાધ્યાસમાત્રમ્ ।

૨. સામગ્રી નામ = કારણકલાપઃ । યથા પાકસ્ય ચુલ્લ્યુદકકાષ્ઠાદિઃ ।

૩. પ્રમાતા = જીવઃ ।

૪. પ્રમાણં = ઇન્દ્રિયાદિકરણમ્ ।

૫. પ્રમેયઃ = વિષયઃ ।

તદ્રહિતસ્ય તુ ન; ઇત્યતઃ સત્યવસ્તુપ્રમાહિતસંસ્કારોઽધ્યાસહેતુઃ । શુક્તિકાયાં સર્પાધ્યાસસ્ય રજ્જૌ રજતાધ્યાસસ્ય ચાનુદયાત્પ્રમેયગતસાદૃશ્યદોષોઽપ્યધ્યાસહેતુર્ભવતિ । એવં પ્રમાતૃગતલોભભયાદિદોષાઃ, ચક્ષુરાદિપ્રમાણગતકાચકામલાદિદોષાશ્ચાધ્યાસહેતવઃ । શુક્તિકાયાં રજતાધ્યાસસમયે “ઇયમ્” ઇત્યધિષ્ઠાનસામાન્યજ્ઞાને સતિ “ઇયં શુક્તિઃ” ઇતિ વિશેષજ્ઞાનેઽસતિ ચાધ્યાસો ભવતિ । “શુક્તિઃ” ઇતિ વિશેષજ્ઞાને સતિ વા “ઇયમ્” ઇતિ સામાન્યજ્ઞાનેઽસતિ વા અધ્યાસો ન જાયતે । તસ્માત્ અધિષ્ઠાનસામાન્યજ્ઞાનં તદ્વિશેષાજ્ઞાનં ચાધ્યાસહેતુઃ । પૂર્વોક્તસામગ્રીણાં પઞ્ચાનામન્યતમાભાવે નાધ્યાસઃ સિદ્ધ્યતિ । ઘટોત્પત્તૌ કુલાલદણ્ડચક્રમૃત્સલિલાદયઃ સામગ્ર્યઃ । યથૈતેષામન્યતમાભાવે નૈવોત્પદ્યતે ઘટસ્તથાધ્યાસસામગ્રીણામન્યતમાભાવેઽપ્યધ્યાસો નોત્પદ્યતે । તસ્માત્પૂર્વોક્તાનાં પઞ્ચાનાં સામગ્રીણામાવશ્યકત્વાત્તાસાં સર્વાસાં સત્ત્વ એવાધ્યાસો જાયેત, નાન્યથા ।

## (૬૮)

બન્ધાધ્યાસે પ્રથમસામગ્ર્યભાવઃ - બન્ધસ્યાધ્યસ્તત્ત્વસાધકો નૈકોઽપિ હેતુઃ સમ્ભવતિ । તથા હિ, યદ્યન્યત્ર કદાચિત્સત્યબન્ધોઽનુભૂતઃ સ્યાત્તદા તત્પ્રમાનુભવજન્યસંસ્કારવશાદાત્મનિ બન્ધાધ્યાસો જાયેત, ન તુ તદસ્તિ । વેદાન્તસિદ્ધાન્તે આત્મનોઽન્યસ્ય સર્વસ્યાપિ મિથ્યાત્વેન સત્યસ્ય વસ્તુનોઽણુમાત્રસ્યાપ્યભાવનિશ્ચયાત્ । તસ્માત્ સત્યબન્ધાનુભવજનિતસંસ્કારાભાવાદાત્મનિ બન્ધાધ્યાસો ન યુજ્યતે ।

## (૬૯)

દ્વિતીયતૃતીયસામગ્ર્યભાવઃ - પ્રમાતૃપ્રમાણદોષાવપિ બન્ધાધ્યાસકારણભાવં ન ભજતઃ । પ્રમાત્રાદિનિખિલપ્રપઞ્ચોઽધ્યાસરૂપ ઇતિ, સ ચાધ્યાસ એવ બન્ધ ઇતિ ચ વેદાન્તસિદ્ધાન્તઃ । તથા ચ બન્ધાધ્યાસાત્પૂર્વં પ્રમાતૃપ્રમાણસ્વરૂપસ્યૈવાસિદ્ધેસ્તદ્ગતદોષાણાં સુતરામસિદ્ધિઃ । તસ્માત્પ્રમાતૃપ્રમાણદોષાસિદ્ધેર્બન્ધાધ્યાસો ન સિદ્ધ્યતિ ।

૧. રજ્જૌ સર્પવત્કૌટિલ્યદીર્ઘત્વાદિ, શુક્તૌ ચ રજતવચ્ચાકચક્યાદિ ચ પ્રમેયગતસાદૃશ્યદોષઃ ।

૨. યો ભ્રાન્તિદશાયામપિ પ્રતિભાતિ, યદભાવે ભ્રાન્તિરેવ ન સ્યાત્,
સ એવ સામાન્યાંશ આધાર ઇતિ ચોચ્યતે ।

૩. યો ભ્રાન્તિદશાયાં ન ભાતિ, યદ્ભાને ભ્રાન્તિર્નિઃશેષં નશ્યેત્,
સ એવ વિશેષાંશોઽધિષ્ઠાનમિતિ ચોચ્યતે ।

૪aઇતન્યરૂપબ્રહ્મણોઽન્યસ્યાજ્ઞાનતત્કાર્યભૂતસ્થૂલસૂક્ષ્મપ્રપઞ્ચસ્ય
દ્વૈતમાત્રસ્ય સર્વસ્યાપિ દૃશ્યસ્ય ચૈતન્યે

બ્રહ્મણ્યધ્યસ્તતયાન્તઃકરણાત્મકપ્રમાતુરિન્દ્રિયાત્મકપ્રમાણસ્ય
ચ દૃશ્યાન્તર્ગતત્વેન પ્રમાતૃપ્રમાણેઽપ્યધ્યસ્તે એવ ।
તસ્માત્પ્રપઞ્ચાધ્યાસાત્પૂર્વં પ્રમાત્રાદયઃ પ્રપઞ્ચાધ્યાસકારણત્વેન
ન સિદ્ધ્યન્તીત્યુપનિષત્સિદ્ધાન્તઃ ।

## (૭૦)

ચતુર્થસામગ્ર્યભાવઃ - બન્ધાત્મનોરન્યોન્યં સાદૃશ્યરૂપપ્રમેયદોષોઽપિ નાસ્તિ, તમઃપ્રકાશવદ્વિરુદ્ધસ્વરૂપત્વાત્તયોઃ । આત્મા = પ્રત્યક્ આન્તરશ્ચ; બન્ધઃ = અનાત્મા પરાક્ બાહ્યશ્ચ । આત્મા વિષયી = પ્રકાશકઃ । બન્ધસ્તુ વિષયઃ = પ્રકાશ્યો જડશ્ચ । પ્રતીચિ પરાચઃ, પરાચિ પ્રતીચશ્ચાધ્યાસો ન સમ્ભવતિ । પુત્રાદ્યપેક્ષયા સ્વદેહઃ પ્રત્યક્, સ્વદેહે પુત્રાદીનાં પુત્રાદૌ ચ સ્વદેહસ્ય ચાધ્યાસો ન ભવતિ । તથા વિષયે વિષયિણો વિષયિણિ વિષયસ્ય ચાધ્યાસો ન ભવતિ । વિષયાત્મકઘટાદિષુ દીપાદિવિષયિણામ્, દીપાદૌ વા ઘટાદીનાં નાધ્યાસઃ । એવમેવ સાદૃશ્યાભાવાત્પ્રતીચિ વિષયિણ્યાત્મનિ પરાચો વિષયસ્યાનાત્મનો બન્ધસ્ય નૈવાધ્યાસઃ સમ્ભવતિ । પ્રત્યક્પરાચોર્યથા પરસ્પરં વિરોધઃ, એવં વિષયવિષયિણોરપિ । તસ્માદીદૃશયોરાત્માનાત્મનોઃ સાદૃશ્યાભાવાદાત્મનિ બન્ધાધ્યાસો ન શક્યતે વર્ણયિતુમ્ ।

## (૭૧)

પઞ્ચમસામગ્ર્યભાવઃ - બન્ધાધ્યાસે અધિષ્ઠાનવિશેષાંશાજ્ઞાનમપિ ન સમ્ભવતિ, બન્ધાધિષ્ઠાનબ્રહ્મણઃ સ્વયમ્પ્રકાશજ્ઞાનસ્વરૂપત્વાત્ । "યત્સાક્ષાદપરોક્ષાદ્બ્રહ્મ" (બૃ. ૩.૪.૧, ૩.૫.૧) ઇતિ શ્રુતેઃ । એતાદૃશે બ્રહ્મણિ, આદિત્યે અન્ધકારવદજ્ઞાનં ન કથઞ્ચન યુજ્યેત । યથા પ્રકાશાત્મકસવિતુરન્ધકારસ્ય ચ વિરોધોઽપરિહાર્ય એવં સ્વપ્રકાશચૈતન્યાત્મકબ્રહ્મણસ્તમોરૂપાજ્ઞાનસ્ય ચ પરસ્પરવિરોધોઽસ્તિ । તસ્માત્સ્વયમ્પ્રકાશરૂપત્વાદધિષ્ઠાનસ્ય તદ્વિશેષાંશાજ્ઞાનાસમ્ભવ એવ ।

## (૭૨)

બ્રહ્મણો નિર્વિશેષત્વાદપ્યધ્યાસસામગ્ર્યભાવઃ - ઇતોઽપિ બ્રહ્મણિ બન્ધાધ્યાસો ન સમ્ભવતિ । યતોઽત્યન્તમવિજ્ઞાતે વા વિશેષતો જ્ઞાતે વાધિષ્ઠાનેઽધ્યાસો ન સમ્ભવતિ । કિન્તુ વિશેષતોઽજ્ઞાતે સામાન્યતો જ્ઞાત એવાધિષ્ઠાનેઽધ્યાસો જાયેત । બ્રહ્મ હિ સામાન્યવિશેષાદિધર્મશૂન્યં નિર્વિશેષમિતિ ચ વેદાન્તસિદ્ધાન્તઃ । તત્કથં બ્રહ્મ વિશેષતોઽજ્ઞાતં સામાન્યતો જ્ઞાતમિતિ ચ વક્તું શક્યતે । અપિ ચાધ્યાસલોભેન સામાન્યવિશેષધર્મકમેવ બ્રહ્મેતિ યદ્યભ્યુપગમ્યતે, તર્હિ નિર્વિશેષં પરં બ્રહ્મેત્યભ્યુપગમહાનિઃ સ્યાત્ । એવં ચ નિર્વિશેષસ્વપ્રકાશસ્વરૂપે બ્રહ્મણિ વિશેષાજ્ઞાનસ્ય સામાન્યજ્ઞાનસ્ય ચાસમ્ભવાદધ્યાસો નૈવ યુજ્યતે । તસ્માદ્બ્રહ્મણિ બન્ધોઽધ્યસ્ત ઇતિ ન શક્યત એવ વક્તુમ્ । પ્રત્યુત બન્ધઃ સત્ય ઇત્યેવ વક્તવ્યમ્ । સત્યશ્ચેદ્બન્ધો ન જ્ઞાનાન્નિવર્તેત । તસ્માદસ્ય

ગ્રન્થસ્ય જ્ઞાનાદ્બન્ધનિવૃત્ત્યાત્મકમોક્ષરૂપપ્રયોજનકથનમસઙ્ગતં સ્યાત્ ।

## (A. 73-81) કર્મણૈવ મોક્ષઃ સિદ્ધ્યતીત્યૈકભવિકવાદમવલમ્બ્યાક્ષેપઃ-

### (૭૩)

કર્મણોઽવશ્યકર્તવ્યત્વં - પૂર્વં જ્ઞાનમાત્રાન્ન સત્યબન્ધનિવૃત્તિરિત્યુક્તમ્ । અધુના ત્વૈકભવિકવાદરીત્યા કર્મણૈવ મોક્ષસિદ્ધિરિત્યભિપ્રાયઃ પ્રપઞ્ચ્યતે । સત્યબન્ધો ન જ્ઞાનમાત્રાન્નિવર્તેતેતિ પૂર્વં સાધિતત્વાન્મુમુક્ષુણા નિત્યં નૈમિત્તિકં ચ કર્મૈવ યાવજ્જીવં કર્તવ્યમ્ ।

### (૭૪)

કર્મવિવરણં - કર્મ હિ વિહિતં પ્રતિષિદ્ધઞ્ચેતિ દ્વિવિધમ્ । તત્ર પુરુષપ્રવૃત્તિમધિકૃત્ય યદ્વેદેન વિધીયતે તદ્વિહિતમ् । વેદેનૈવ યત્પ્રતિષિધ્યતે તત્પ્રતિષિદ્ધમ્ । સ્વભાવસિદ્ધરાગદ્વેષાદિવશાદનુષ્ઠીયમાનાસ્તુ ચેષ્ટારૂપાઃ ક્રિયા ન કર્માણીત્યુચ્યન્તે । પ્રવૃત્તિનિવૃત્ત્યર્થં વેદોક્તા એવ ક્રિયાઃ કર્માણીત્યુચ્યન્તે, ન તૂદાસીનક્રિયાઃ સર્વા અપિ । તસ્માદ્વિપ્રકારાણ્યેવ કર્માણિ । ન તતોઽધિકાનિ ।

### (૭૫)

વિહિતકર્મવિવરણં - વિહિતં કર્મ ચતુર્વિધમ્ । (૧) નિત્યં (૨) નૈમિત્તિકં (૩) કામ્યં (૪) પ્રાયશ્ચિત્તં ચેતિ । તત્ર પાપપરિહારાર્થં વિહિતં કર્મ પ્રાયશ્ચિત્તમિત્યુચ્યતે । યથા પ્રમાદાત્ કશ્ચન સન્ન્યાસી દ્રવ્યાર્જનેન પાપં કરોતિ યદિ, સ તત્પાપક્ષયાર્થમર્જિતં ધનં સર્વં દૂરતસ્ત્યક્ત્વા ત્રિરાત્રં યદુપવસતિ, તત્તસ્ય પાપસ્ય પ્રાશ્ચિત્તં ભવતિ । ફલાર્થં વિહિતં કર્મ કામ્યમ્ । યથા વૃષ્ટિકામેન ક્રિયમાણકારીર્યાદિયાગઃ, સ્વર્ગાદ્યર્થિના ક્રિયમાણાગ્નિહોત્રજ્યોતિષ્ટોમાદિકં ચ કામ્યં કર્મ । યસ્યાનનુષ્ઠાનાત્પ્રત્યવાયઃ શ્રૂયતે, અનુષ્ઠાનાચ્ચ પુણ્યાપુણ્યફલાભાવઃ, યચ્ચ ન નિત્યમેવ વિહિતં, કિન્તુ યત્કિઞ્ચિન્નિમિત્તમધિકૃત્યૈવ વિધીયતે તત્કર્મ નૈમિત્તિકમ્ । યથા સૂર્યોપરાગાદિનિમિત્તે ક્રિયમાણશ્રાદ્ધસ્નાનાદિકં, વયોવૃદ્ધજાતિવૃદ્ધાશ્રમવૃદ્ધવિદ્યાવૃદ્ધધર્મવૃદ્ધજ્ઞાનવૃદ્ધાદીનામાગમને અવશ્યકર્તવ્યપ્રત્યુત્થાનાદિકં ચ કર્મ નૈમિત્તિકમ્ । અત્ર વિદ્યાશબ્દેન શાસ્ત્રજન્યપરોક્ષજ્ઞાનં જ્ઞાનશબ્દેનાપરોક્ષજ્ઞાનઞ્ચ ગ્રાહ્યમ્ । પૂર્વોક્તેષુ યથાક્રમમુત્તરોત્તરો વરિષ્ઠઃ । યસ્યાનનુષ્ઠાનાત્પ્રત્યવાયો ભવતિ, અનુષ્ઠાનાચ્ચ ન સુકૃતં ભવતિ, યચ્ચ નિત્યતયા

૧. વેદેનાનિષિદ્ધમવિહિતં ચ સદરાગદ્વેષતઃ કૃતં ગમનાગમનશૌચાદિ સ્વાભાવિકં સર્વપ્રાણિસાધારણં કર્મ ઉદાસીનમિતિ કથ્યતે ।

૨. અવશ્યાનુષ્ઠેયકર્મણો વિસ્મરણં, સત્યામપીચ્છાયામનનુષ્ઠાનં વા પ્રમાદઃ । વિહિતમ્, તન્નિત્યં કર્મ । યથા સ્નાનસન્ધ્યાગ્નિહોત્રાદિકમ્ ।

ઇત્થં ચતુર્વિધાનિ વિહિતકર્માણિ । નિષિદ્ધેન સહ પઞ્ચવિધાનિ
કર્માણિ ભવન્તિ ।

## (A. 76-80) મુમુક્ષુણા અનુષ્ઠેયકર્મણાં નિરૂપણમ્-

### (૭૬)

મુમુક્ષુણા નિત્યનૈમિત્તિકકર્માણિ કર્તવ્યાનિ - મુમુક્ષુણા કામ્યનિષિદ્ધાનિ કર્માણિ સર્વથા નાનુષ્ઠેયાનિ; કામ્યકર્મણાં દેવાદ્યુત્તમજન્મહેતુત્વાત્, નિષિદ્ધાનાં કર્મણાં કૃમિકીટસ્થાવરાદિનીચજન્મહેતુત્વાચ્ચ । તસ્માન્મુમુક્ષુસ્તાનિ કામ્યનિષિદ્ધાનિ કર્માણિ વર્જયિત્વા સદા નિત્યાન્યનુતિષ્ઠેત્, સતિ ચ નિમિત્તે નૈમિત્તિકાન્યપિ । અન્યથા નિત્યનૈમિત્તિકાનનુષ્ઠાયી પ્રત્યવેયાત્, પ્રત્યવાયેન તિર્યગાદિનીચયોનિં ચ પ્રાપ્નુયાત્ । તસ્માત્ પાપપરિહારાય નિત્યનૈમિત્તિકાનિ કર્માણ્યવશ્યમનુષ્ઠેયાન્યેવ । નિત્યનૈમિત્તિકકર્મણાં તદનનુષ્ઠાનપ્રયુક્તપ્રત્યવાયપરિહાર એવ ફલમ્, ન તુ ફલાન્તરમસ્તિ । તસ્માદવશ્યં નિત્યનૈમિત્તિકકર્માણિ કુર્યાદેવ મુમુક્ષુઃ ।

### (૭૭)

મુમુક્ષુણા પ્રાયશ્ચિત્તકર્માણ્યનુષ્ઠેયં - યઃ પ્રમાદાત્પાપં કર્મ કદાચિત્સકૃત્પ્રસઙ્ગાત્સમાચરેત્ તદ્દોષપરિહારાય તદુક્તપ્રાયશ્ચિત્તં તેનાનુષ્ઠેયમ્ । ઇહ જન્મનિ નિષિદ્ધાચરણાસમ્ભવેઽપિ જન્માન્તરાર્જિતપાપપરિહારાય સાધારણપ્રાયશ્ચિત્તમવશ્યં સર્વૈરનુષ્ઠેયમ્ । પ્રાયશ્ચિત્તં ચ દ્વિવિધં સાધારણમસાધારણઞ્ચેતિ । અસ્ય પાપસ્યેદં પ્રાયશ્ચિત્તમિતિ શાસ્ત્રવિહિતં યત્તદસાધારણમ્, યથા પૂર્વોક્તોપવાસાદિ । સર્વપાપક્ષયાય શાસ્ત્રવિહિતં પ્રાયશ્ચિત્તં સાધારણં, યથા ગઙ્ગાદિપુણ્યતીર્થસ્નાનેશ્વરનામોચ્ચારણપઞ્ચાક્ષરાદિજપોપવાસાદિ । એવં શાસ્ત્રેણૈવ દ્વિવિધમપિ પ્રાયશ્ચિત્તં વિહિતમ્ । તત્ર ચેહ જન્મનિ બુદ્ધિપૂર્વકૃતપાપપરિહારાય શાસ્ત્રોક્તાસાધારણપ્રાયશ્ચિત્તં કાર્યમ્ । ઇહ જન્મનિ જન્માન્તરે વાનુષ્ઠિતસ્યાજ્ઞાતસ્ય સર્વસ્ય પાપસ્ય પરિહારાર્થં શાસ્ત્રવિહિતસાધારણપ્રાયશ્ચિત્તમનુષ્ઠેયમ્ । અસાધારણપ્રાયશ્ચિત્તસ્ય હ્યયં સ્વભાવઃ - યત્પાપનિવૃત્તયે યત્ પ્રાયશ્ચિત્તત્વેન વિહિતં તેન તત્પાપમવશ્યં નિવર્તતે, તદ્ભિન્નપાપનિર્હરણે તદસમર્થમિતિ । ઇદમિત્થમેવેતિ જન્માન્તરાનુષ્ઠિતપાપપરિજ્ઞાનાત્તન્નિવૃત્તયે સાધારણપ્રાયશ્ચિત્તમેવાનુષ્ઠેયમ્ ।

### (૭૮)

સાધારણપ્રાયશ્ચિત્તસ્ય દ્વિવિધં ફલં - સાધારણપ્રાયશ્ચિત્તેન સર્વાણ્યપિ પાપાનિ નિવર્તન્તે । ગઙ્ગાસ્નાનાદિસાધારણપ્રાયશ્ચિત્તાનિ
ન કેવલં પ્રાયશ્ચિત્તત્વેન ભવન્તિ, કિન્તુ કામ્યાનિ ભવન્તિ કામિનાં પ્રાયશ્ચિત્તરૂપાણિ ચ ભવન્તિ પાપક્ષયે । ગઙ્ગાસ્નાનેશ્વરનામોચ્ચારણાદીન્યુત્તમદેવાદિલોકપ્રાપ્તિહેતુત્વેન શાસ્ત્રવિહિતત્વાત્ કામ્યાનિ, પાપપરિહારાય વિહિતત્વાત્પ્રાયશ્ચિત્તરૂપાણ્યપિ । યથાશ્વમેધક્રતુર્બ્રહ્મહત્યાદિપાપં નિવર્તયતિ, સ્વર્ગાદિકામ્યફલં ચ

પ્રયચ્છતીત્યુભયાત્મકઃ, એવં ગઙ્ગાસ્નાનેશ્વરનામોચ્ચારણાદીન્યપિ પાપપરિહારહેતુત્વાત્ પ્રાયશ્ચિત્તાત્મકાનિ, ઉત્તમલોકપ્રાપ્તિહેતુત્વાચ્ચ કામ્યાનીત્યુભયાત્મકાન્યુચ્યન્તે । ગઙ્ગાસ્નાના દિકં કામિનાં પાપપરિહારદ્વારોત્તમલોકઞ્ચ પ્રયચ્છતિ । ઉત્તમલોકપ્રાપ્તિમનિચ્છતો મુમુક્ષોસ્તુ પાપપરિહારમાત્રં કરોતિ । તસ્માત્સકામેન કૃતગઙ્ગાસ્નાનાદિ પ્રાયશ્ચિત્તરૂપં કામ્યં ચ ભવતિ, મુમુક્ષુણા કૃતં તુ કેવલપ્રાયશ્ચિત્તરૂપમ્ । યથા વેદાન્તિનાં મતે સર્વાણ્યપિ કર્માણિ સકામસ્ય સંસારકારણાનિ, નિષ્કામસ્યાન્તઃકરણશુદ્ધિદ્વારા મોક્ષકારણાનિ ચ ભવન્તિ; તથા ગઙ્ગાસ્નાનેશ્વરનામોચ્ચારણાદિકં કર્મ સકામસ્ય કામ્યં પ્રાયશ્ચિત્તરૂપં ચ ભવતિ, નિષ્કામસ્ય તુ મુમુક્ષોઃ કેવલપ્રાયશ્ચિત્તરૂપમ્ । તસ્માન્મુમુક્ષુણા સાધારણપ્રાયશ્ચિત્તમનુષ્ઠેયમ્ । ઇત્થમેવ જન્માન્તરસઞ્ચિતં સર્વમપિ પાપં જ્ઞાનં વિનૈવ નશ્યતિ ।

## (૭૯)

મુમુક્ષોઃ સઞ્ચિતં કામ્યકર્મ ન ફલહેતુઃ - કિઞ્ચ મુમુક્ષોર્જન્માન્તરાનુષ્ઠિતાનિ કામ્યકર્માણિ વન્ધ્યાવત્ ફલં ન પ્રસુવતે । યથા વેદાન્તસિદ્ધાન્તે કર્માનુષ્ઠાનકાલે સત્યામેવ ફલેચ્છાયાં તત્કર્મ સ્વર્ગાદિલોકપ્રાપ્તિહેતુર્ભવતિ, ફલેચ્છાભાવે તુ સ્વર્ગાદિફલપ્રાપ્તિહેતુર્ન ભવતિ; તથૈકભવિકવા- દેઽપિ કર્મણઃ સિદ્ધ્યનન્તરમપિ પુરુષેચ્છૈવ ફલહેતુઃ । યદ્યપિ જન્માન્તરે ફલેચ્છયા કામ્યં કર્માનુષ્ઠિતં, તથાપીદાનીં તસ્યૈવ પુરુષસ્ય મુમુક્ષુત્વેન ફલેચ્છાનિવૃત્તૌ તદીયસઞ્ચિતં કામ્યં ન ફલહેતુર્ભવતિ । યથા કશ્ચન દરિદ્રઃ કઞ્ચન ધનવન્તં ધનેચ્છયા આરાધયતિ, પશ્ચાત્કતિપયકાલાનન્તરં યેન કેનચિદ્ધેતુના ભાગ્યોદયે ધનેચ્છયા તસ્ય વ્યપગચ્છતિ, તદાનીં ન તસ્ય ધનિકાદ્ધનપ્રાપ્તિરૂપમારાધનફલં જાયતે; તથા જન્માન્તરીકર્મભ્યઃ કામ્યેભ્યઃ ફલેચ્છાવિરહાન્મુમુક્ષોર્ન ફલં જાયતે । તસ્માત્ કેવલકર્મણો મોક્ષો જાયેતૈવ ।

## (૮૦)

મુમુક્ષોઃ પ્રારબ્ધં ભોગેન નશ્યતિ - વર્તમાનજન્મનિ કામ્યનિષિદ્ધકર્માનનુષ્ઠાનાદૂર્ધ્વાધોલોકપ્રાપ્તિર્ન સમ્ભવતિ । જન્માન્તરીયાણાં પ્રારબ્ધફલાનાં નિષિદ્ધકામ્યકર્મણાં ભોગેનૈવ ક્ષયઃ । નિત્યનૈમિત્તિકકર્માનનુષ્ઠાનજન્યપ્રત્યવાયરૂપપાપં તદનુષ્ઠાનેન મુમુક્ષોર્ન જાયતે । જન્માન્તરસઞ્ચિતનિષિદ્ધકર્માણિ સાધારણપ્રાયશ્ચિત્તેન નિવર્તન્તે । જન્માન્તરસઞ્ચિતકામ્યકર્માણિ તુ મુમુક્ષોરિચ્છાભાવાદેવ ફલં ન પ્રયચ્છન્તિ । તસ્માન્મુમુક્ષુણા નિત્યનૈમિત્તિકસાધારણપ્રાયશ્ચિત્તરૂપાણિ કર્માણ્યનુષ્ઠેયાનિ । વર્તમાનજન્મનિ બુદ્ધિપૂર્વમાચરિતપાપકર્મક્ષયાર્થમસાધારણપ્રાયશ્ચિ
।

## (૮૧)

મુમુક્ષોઃ પ્રાયશ્ચિત્તમપ્યનાવશ્યકં - અથવા મુમુક્ષુણા નિત્યનૈમિત્તિકકર્મમાત્રમનુષ્ઠેયમ્, પ્રાયશ્ચિત્તરૂપં કર્મ ત્યક્તું શક્યતે । તથા હિ, (૧) મુમુક્ષોઃ સઞ્ચિતનિષિદ્ધકામ્યકર્માણિ નિષ્ફલાનિ ભવન્તિ । યથા વેદાન્તિનાં મતે જ્ઞાનિનઃ સઞ્ચિતકર્માણિ નશ્યન્તીત્યુચ્યન્તે, તથૈતન્મતેઽપિ નિષિદ્ધાનિ કામ્યાનિ ચ

વર્જયિત્વા નિત્યનૈમિત્તિકાન્યનુતિષ્ઠતોઽસ્ય મુમુક્ષોઃ સઞ્ચિતાનિ સકલાન્યપિ કર્માણિ ક્ષીયન્તે । (૨) અથવા સઞ્ચિતાનિ કામ્યનિષિદ્ધાનિ કર્માણિ સકલાન્યપિ સમ્ભૂયૈકમેવાન્યજ્જન્મ પ્રયચ્છેયુર્મુમુક્ષોઃ । અતો મુમુક્ષુણા વર્તમાનજન્મનોઽન્યદેકમેવ જન્મ પ્રતિપત્તવ્યં ભવેત્ । (૩) અથવા યોગી કાયવ્યૂહેનેવ, મુમુક્ષુરપિ ભાવિજન્મન્યેકસ્મિન્નેવ સકલસઞ્ચિતકર્મભિર્યુગપદારબ્ધાનન્તશરીરૈર્જન્માન્તરસઞ્ચિતાશેષકર્મણાં ફલમનુભવિતું શક્નુયાત્ । (૪) અથવા નિત્યનૈમિત્તિકાનુષ્ઠાનજનિતક્લેશ એવ જન્માન્તરસઞ્ચિતનિષિદ્ધકર્મણાં ફલં ભવતિ । અતો ન જન્માન્તરસઞ્ચિતનિષિદ્ધં કર્મ પુનર્જન્મહેતુર્ભવતિ । સઞ્ચિતકામ્યકર્મ નિખિલમપિ ભાવ્યેકસ્મિન્નેવ જન્મનિ નાનાશરીરારમ્ભદ્વારા સ્વફલં સર્વં દાસ્યતિ । તજ્જન્મનિ મુમુક્ષોઃ ક્લેશલેશોઽપિ ન ભવેત્, તસ્ય જન્મનઃ પુણ્યફલત્વાત્સુખમેવ જાયેત; અતો જન્માન્તરસઞ્ચિતેન નિખિલેન વિહિતેન કર્મણા તજ્જન્મ લબ્ધમ્ । સઞ્ચિતં સર્વમપિ નિષિદ્ધં કર્મ નિત્યનૈમિત્તિકાનુષ્ઠાનજનિતક્લેશેનૈવ પ્રકૃતે જન્મન્યેકસ્મિન્નેવ નશ્યતિ । ઇત્થં વિનૈવ પ્રાયશ્ચિત્તં નિત્યનૈમિત્તિકકર્માણિ મોક્ષં પ્રદાસ્યન્તિ । તસ્માત્ સદા નિત્યકર્માણિ, નિમિત્તે સતિ નૈમિત્તિકાનિ ચાવશ્ય૧. સાધારણાસાધારણપ્રાયશ્ચિત્તાનુષ્ઠાનેઽત્યન્તં શ્રમમુપલભ્ય સ્વમતે મુમુક્ષુર્ન પ્રવિશેદિતિ મત્વા મોક્ષાર્થમુપાયાન્તરં લઘુતયા કલ્પયતિ ।

૩. અનેકપરસ્પરવિલક્ષણજન્મપ્રયોજકાનેકકર્મણાં ફલમેકસ્મિઞ્જન્મન્યસમ્ભાવિતમિતિ શઙ્કાયાં સદૃષ્ટાન્તમાહ - અથવેતિ ।

૪. યદ્યનેકજન્માર્જિતસુકૃતકર્મફલં સુખરૂપં યુગપદેકજન્મન્યુપભુજ્યેત, તર્હિ દુષ્કૃતકર્મફલં દુઃખમપિ ભાવિજન્મનિ ભોક્તવ્યં ભવેદિતિ મત્વા મુમુક્ષુઃ સ્વમતે ન પ્રવિશેદિતિ તત્ર પ્રવર્તયિતું લાઘવાદયં પક્ષ ઉપન્યસ્યતે - અથવેતિ । મનુષ્ઠેયમેવ । શાસ્ત્રીયપ્રસિદ્ધ્યા ત્વસ્ય મતસ્ય ઐકભવિકવાદ ઇતિ વ્યપદેશઃ ।

(૮૨)

કર્મણૈવ બન્ધનિવૃત્તિસિદ્ધેરયં ગ્રન્થો વિફલઃ - યદુક્તં અયં ગ્રન્થો જ્ઞાનદ્વારા બન્ધનિવૃત્તિહેતુરિતિ, નાયં સમીચીનઃ સિદ્ધાન્તઃ । યદ્યેન જાયતે નાન્યેન, તત્તસ્ય ફલમિત્યુચ્યતે । યથા રૂપજ્ઞાનં નેત્રં વિના નાન્યેન કેનચિદપિ જાયતે; તસ્માદ્રૂપજ્ઞાનં નેત્રસ્યૈવ પ્રાતિસ્વિકં ફલમ્ । બન્ધનિવૃત્તિસ્તુ એતદ્ગ્રન્થજનિતજ્ઞાનમન્તરા કર્મણૈવ જાયેતેતિ નાસ્ય ગ્રન્થસ્ય પ્રયોજનમ્ । એવઞ્ચાસ્ય ગ્રન્થસ્ય પ્રયોજનં ન સિદ્ધ્યતીતિ નાસ્યારમ્ભો યુક્તઃ ।

## (A. 83-106) પ્રયોજનવિષયકાક્ષેપાણાં સમાધાનાનિ

## (A. 83-98) “બન્ધઃ સત્યઃ, સ ચ જ્ઞાનેન ન નિવર્ત્યેત” ઇત્યાક્ષેપસ્ય સમાધાનાનિ-

(૮૩)

બન્ધો મિથ્યા - “બન્ધઃ સત્યઃ, ન સ જ્ઞાનેન નિવર્ત્યેત” ઇત્યાક્ષેપોઽસઙ્ગતઃ । બન્ધસ્ય મિથ્યાત્વેન જ્ઞાનૈકનિવર્ત્યત્વાત્ ।

(૮૪)

સત્યવસ્તુજ્ઞાનમધ્યાસહેતુરિતિ ન નિયમઃ - યદુક્તં “પરમાર્થસત્યવસ્તુજ્ઞાનં સંસ્કારદ્વારાધ્યાસહેતુઃ । યથા પરમાર્થસર્પજ્ઞાનં સંસ્કારદ્વારા પ્રાતિભાસિકસર્પાધ્યાસહેતુઃ । યદિ બન્ધોઽપ્યેવં સત્યઃ સ્યાત્તદા સત્યબન્ધજ્ઞાનં સ્યાત્, તચ્ચ સંસ્કારદ્વારાધ્યાસહેતુઃ સ્યાત્ । ન તથાદ્વૈતસિદ્ધાન્તઃ, સિદ્ધાન્તે આત્મનોઽન્યસ્યાનાત્મમાત્રસ્યાસત્યત્વાત્ । તસ્માત્સંસ્કારદ્વારાધ્યાસસામગ્રીભૂતસત્યબન્ધજ્ઞાનસ્યાસિદ્ધેર્ન બન્ધોઽધ્યસ્ત ઇતિ વક્તું શક્યતે । કિન્તુ સત્ય ઇતિ - તદયુક્તમ્ । ન હિ સત્યવસ્તુજ્ઞાનમેવ સંસ્કારદ્વારાધ્યાસહેતુઃ, કિન્તુ વસ્તુજ્ઞાનમાત્રમ્ । જ્ઞાનસ્ય વિષયીભૂતં વસ્તુ સત્યં વા મિથ્યા વાસ્તુ, ન તત્રાદરઃ । યદિ નિયમેન સંસ્કારદ્વારા સત્યવસ્તુજ્ઞાનમેવાધ્યાસહેતુરિત્યભ્યુપગમ્યેત, તર્હિ વક્ષ્યમાણોઽધ્યાસો ન ઘટેત । તથા હિ, કશ્ચિત્પુરુષઃ પરમાર્થામ્રવૃક્ષમજાનાન ઐન્દ્રજાલિકપ્રદર્શિતમિથ્યામ્રવૃક્ષમેવ ભૃશમનુભૂય, “અયમામ્રવૃક્ષઃ” ઇતિ તદ્વચઃ શ્રુત્વા ચ મિથ્યામ્રવૃક્ષજ્ઞાનસંસ્કારસંસ્કૃતો ભવતિ । તસ્ય કદાચિદપિ કેનચિદપિ પ્રમાણેન મધૂકવૃક્ષવિષયકદર્શનશ્રવણાદિરૂપજ્ઞાનમપિ નાસ્તિ । સ પુરુષો યદૃચ્છયા માર્ગમધ્ય મધૂકવૃક્ષં કઞ્ચન દૃષ્ટ્વા તસ્મિન્ “આમ્રવૃક્ષોઽયમ્” ઇત્યામ્રવૃક્ષાધ્યાસં

૧. ઐકભવિકં નામ = એકમેવ જન્મ, કર્મૈવ વા,
મોક્ષસાધનમિતિ વાદઃ = કથનમ્ । કર્મૈવ મોક્ષસાધનમિતિ
પ્રતિપાદકમતસ્ય શાસ્ત્ર ઐકભવિકવાદ ઇતિ પ્રસિદ્ધિઃ । કરોત્યેવ ।
સોઽધ્યાસઃ પૂર્વવાદિમતરીત્યા ન સમ્ભાવ્યેત, તસ્ય પુરુષસ્ય
સત્યામ્રવૃક્ષવિષયકપ્રમાહિતસંસ્કારાભાવાત્ । સિદ્ધાન્તે તુ, તસ્ય
પુરુષસ્યૈન્દ્રજાલિકપ્રદર્શિતમિથ્યામ્રવૃક્ષજ્ઞાનજસંસ્કારસ્ય
સત્ત્વાન્મધૂકવૃક્ષે આમ્રવૃક્ષાધ્યાસો ભવિતુમર્હતિ ।
તસ્માત્પૂર્વપૂર્વસજાતીયવસ્તુજ્ઞાનજન્યસંસ્કાર
એવોત્તરોત્તરાધ્યાસહેતુઃ । ઈદૃક્સંસ્કારજનકં જ્ઞાનં તદ્વિષયશ્ચ
સત્યો વાસ્તુ મિથ્યા વા, નાદરસ્તત્ર । સંસ્કારદ્વારા જ્ઞાનમેવ હેતુઃ ।
જ્ઞાનજન્યસંસ્કારો હેતુરિતિ પક્ષેઽપિ નાર્થતોઽસ્તિ ભેદઃ । યતો
જ્ઞાનં સંસ્કારહેતુઃ, સ ચ સંસ્કારોઽધ્યાસહેતુરિત્યવસિતમ્ ।
તસ્માત્સંસ્કારદ્વારા જ્ઞાનં હેતુરિત્યુક્તેઽપિ જ્ઞાનજન્યસંસ્કાર

એવાધ્યાસહેતુરિતિ સિદ્ધ્યતિ ।

(૮૫)

કારણસ્ય કાર્યાવ્યવહિતપૂર્વકાલવર્તિત્વનિયમાત્સંસ્કાર એવાધ્યાસહેતુઃ - વસ્તુજ્ઞાનમાત્રમધ્યાસહેતુરિતિ તુ ન યુક્તમેવ । કારણસ્ય કાર્યાવ્યવહિતપૂર્વકાલવર્તિત્વનિયમાત્ । તથા હિ, ઘટકારણદણ્ડચક્રાદો યથા નિયમેન ઘટોત્પત્ત્યવ્યહિતપૂર્વકાલવર્તિનો ભવન્તિ, તથા વસ્તુજ્ઞાનમાત્રસ્યાધ્યાસહેતુત્વે તેનાપિ નિયમેનાધ્યાસાવ્યવહિતપૂર્વકાલવર્તિના ભાવ્યમ્ । ન તુ તથાસ્તિ, સર્પજ્ઞાનાત્પરં માસાનન્તરમપિ રજ્જૌ સર્પાધ્યાસોત્પત્તિદર્શનાત્ । વસ્તુજ્ઞાનજન્યસંસ્કારસ્ય હેતુત્વે તુ ન દોષઃ । સર્પજ્ઞાનસ્ય માસાત્પૂર્વં નષ્ટત્વેઽપિ તજ્જ્ઞાનજન્યસંસ્કારસ્ય રજ્જૌ સર્પાધ્યાસવ્યવહિતપૂર્વકાલવર્તિત્વાત્ । તસ્માત્ જ્ઞાનજન્યસંસ્કાર એવાધ્યાસહેતુઃ । ન વસ્તુજ્ઞાનમાત્રમ્ ।

(૮૬)

અત્રૈવમાક્ષેપઃ - કારણેન કાર્યાવ્યહિતપૂર્વકાલવર્તિના ભાવ્યમિતિ નિયમો માસ્તુ । કિન્તુ કાર્યનિયતપૂર્વકાલવર્તિત્વમાત્રં કારણવિશેષણમસ્તુ । સ ચ પૂર્વકાલો વ્યવહિતો વાસ્ત્વવ્યવહિતો વા । કિઞ્ચ, યદ્યૈકાન્તતઃ કાર્યાવ્યવહિતપૂર્વકાલવર્ત્યેવ કારણમિતિ નિયમોઽભ્યુપગમ્યેત, તર્હિ વિહિતં કર્મ સ્વર્ગપ્રાપ્તયે, નિષિદ્ધઞ્ચ કર્મ નરકપ્રાપ્તયે હેતુરિતિ વેદચ્છાસ્ત્રમપ્રમાણં સ્યાત્ । કાયિકવાચિકમાનસિકચેષ્ટારૂપક્રિયાણામેવ કર્મેતિ નામ । તાશ્ચ ક્રિયાઃ અનુષ્ઠાનોત્તરક્ષણે નશ્યન્તિ, સ્વર્ગનરકાદિતત્તત્ફલં તુ કાલાન્તરે ભવિષ્યતિ । તસ્માત્સ્વર્ગનરકાદિફલપ્રાપ્તેરવ્યવહિતપૂર્વકાલે તત્કારણીભૂતવિહિતપ્રતિષિદ્ધકર્માણિ ન સન્તિ । યથૈવૈતાનિ વ્યવહિતપૂર્વકાલવર્તીન્યપિ શુભાશુભકાર્માણિ સ્વર્ગનરકાદિપ્રાપ્તિકારણાનિ ભવન્ત્યેવમેવ વ્યવહિતપૂર્વકાલવર્તિ સર્પજ્ઞાનમપિ રજ્જૌ જાયમાનસર્પાધ્યાસહેતુર્ભવેદેવ ।

૧. માસેત્યુપલક્ષણમધિકકાલદ્યોતનાર્થમ્ ।

(૮૭)

તત્ર સમાધાનં - નૈવાયં સાધુરાક્ષેપઃ । તથા હિ, નષ્ટજ્ઞાનકર્માદિકં યદિ ક્રમેણાધ્યાસસ્વર્ગનરકાદિહેતુર્ભવેત્તદા મૃતકુલાલનષ્ટદણ્ડચક્રાદયોઽપિ ઘટાદિકાર્યં જનયેયુઃ । યથા રજ્જુસર્પાધ્યાસસ્ય વ્યવહિતપૂર્વકાલવર્તિ સર્પજ્ઞાનં કારણમ્, તથા ચ સ્વર્ગનરકાદિપ્રાપ્તેઃ વ્યવહિતપૂર્વકાલવર્તિશુભાશુભકર્માણિ કારણાનિ, તથા ઘટસ્યાપિ વ્યવહિતપૂર્વકાલે, ઇદાનીંવિનષ્ટકુલાલદણ્ડચક્રાદયોઽપ્યભૂવન્નેવેતિ તૈરપિ ઘટાદ્યુત્પદ્યેતૈવ । ન તુ તથા વિનષ્ટૈઃ કુલાલાદિભિઃ ઘટ ઉત્પદ્યમાનો દૃષ્ટઃ । તસ્માદ્વ્યવહિતપૂર્વકાલવર્તિ કારણં ન કાર્યં જનયેત્, કિન્ત્વવ્યહિતપૂર્વકાલવર્ત્યેવ કારણં કાર્યોત્પાદનક્ષમમિતિ યુક્તમ્ ।

## (૮૮)

અપૂર્વસ્ય કારણસ્ય કાર્યાવ્યવહિતપૂર્વકાલવર્તિત્વનિયમઃ સ્વર્ગાદિવિષયેઽપ્યસ્તિ - તથા હિ શુભાશભકર્માણ્યપિ ન સ્વતઃ કાલાન્તરભાવિસ્વર્ગનરકાદિપ્રાપ્તિહેતવો ભવન્તિ, ક્ષણિકત્વાત્ । કિન્તુ તાનિ કર્માણિ સ્વનાશોત્તરક્ષણે ધર્માધર્માખ્યાપૂર્વરૂપસંસ્કારમુત્પાદયન્તિ । તૌ ચ ધર્માધર્માવન્તઃ- કરણમાશ્રિત્ય તિષ્ઠતઃ । તેન ધર્માધર્માદિના કાર્યાવ્યહિતપૂર્વકાલવર્તિના સ્વર્ગનરકાદિફલં કાલાન્તરે સિદ્ધ્યતિ । તતો ધર્માધર્માદિ નશ્યતિ । એતદભિપ્રાયેણૈવ શાસ્ત્રે શુભાશુભકર્માણ્યપૂર્વદ્વારા ફલહેતવો, ન સાક્ષાદિત્યુચ્યતે । ધર્માધર્મયોરેવ અપૂર્વઃ, અદૃષ્ટમ્, પુણ્યાપુણ્યે ઇત્યાદિશબ્દા વાચકાઃ । કેચન ધર્માધર્મહેતુભૂતશુભાશુભકર્માણ્યપિ ધર્માધર્મશબ્દેન વદન્તિ, કાર્યકારણયોરભેદાત્ । લોકોઽપિ શુભકર્મકારિણં “અયં ધર્મં ચરતિ મહાત્મા” ઇતિ, અશુભકર્મકારિણં “અયમધર્મં ચરતિ દુષ્ટઃ” ઇતિ ચાચષ્ટે । વસ્તુતસ્તુ, શુભાશુભકર્મણોર્ન સાક્ષાદ્ધર્માધર્મશબ્દવાચ્યત્વમુચિતમ્ । અપિ તુ શુભાશુભકર્મણી ધર્માધર્મૌ જનયતઃ, તસ્માચ્છુભાશુભકર્મણોર્ધર્માધર્મત્વપ્રસિદ્ધિઃ । “આયુર્વૈ ઘૃતમ્” ઇત્યાયુર્વર્ધકઘૃતે આયુઃશબ્દઃ શાસ્ત્રેણ યથા પ્રયુજ્યતે, તદ્વત્ । તસ્માદવ્યવહિતપૂર્વકાલે હેતુના ભાવ્યમેવ ।

## (૮૯)

સંસ્કારસ્યૈવ સર્વત્રાધ્યાસહેતુત્વં - રજ્જ્વાદૌ જાયમાનસર્પાધ્યાસં પ્રતિ નિયમેનાવ્યવહિતપૂર્વકાલે સર્પાદિજ્ઞાનં નાસ્તિ, તસ્માત્સર્પાદિજ્ઞાનં ન રજ્જુસર્પાદ્યધ્યાસહેતુઃ, કિન્તુ સર્પાદ્યનુભવજન્યસંસ્કાર એવ નિયમેન સર્પાદ્યધ્યાસહેતુરિતિ પર્યવસ્યતિ । એવમેવ શુક્તિરજતાદ્યધ્યાસં પ્રત્યપિ રજતાદ્યનુભવજન્યસંસ્કાર એવ હેતુઃ । સર્વત્ર હિ તત્તદનુભવાહિતસંસ્કાર એવાધ્યાસત્વાવચ્છિન્નં પ્રતિ નિયમેન કારણં ભવતિ ।

## (૯૦)

સજાતીયવસ્તુજ્ઞાનજન્યસંસ્કાર એવાધ્યાસહેતુઃ - વસ્તુજ્ઞાનં સંસ્કારહેતુઃ । શુભાશુભકર્મજન્યધર્માધર્માખ્યાપૂર્વો યથાન્તઃકરણે સૂક્ષ્મરૂપેણ વર્તતે, તથા તત્તદ્વસ્તુજ્ઞાનજન્યસંસ્કારોઽપ્યન્તઃકરણે એવ વર્તતે । યસ્ય હિ પૂર્વાનુભવઃ સર્પવિષયો નાભૂત્, તસ્યાન્યવસ્તુજ્ઞાનજન્યસંસ્કારે સત્યપિ રજ્જૌ સર્પાધ્યાસો ન જાયેતૈવ । યસ્ય વસ્તુનોઽધ્યાસો ભવતિ તત્સજાતીયવસ્ત્વનુભવાહિતસંસ્કારોઽધ્યાસહેતુઃ, ન તુ વિજાતયીવસ્ત્વનુભવાહિતસંસ્કારઃ । સર્પસ્ય સર્પ એવ સજાતીયો નાન્યઃ । યસ્ય પુનઃ સર્પવિષયકજ્ઞાનમેવ નાભૂત્તસ્ય સત્યપ્યન્યવિષયકજ્ઞાને, સજાતીયવસ્તુજ્ઞાનજન્યસંસ્કારાભાવાન્ન રજ્જૌ સર્પાધ્યાસો જાયેત । સંસ્કારો હિ નામ સૂક્ષ્માવસ્થૈવ । એવઞ્ચાધ્યાસાત્પૂર્વભાવિસજાતીયવસ્તુજ્ઞાનજન્યસંસ્કાર એવાધ્યાસહેતુઃ । “સત્યવસ્તુજ્ઞાનજન્યસંસ્કાર એવાધ્યાસહેતુર્ન મિથ્યાવસ્તુજ્ઞાનજન્યસંસ્કારઃ” ઇતિ પરોક્તનિયમસ્યાપવાદઃ પ્રાગૈન્દ્રજાલિકામ્રવૃક્ષદૃષ્ટાન્તેનોક્તઃ । તસ્માન્મિથ્યાર્થાનુભવજન્યસંસ્કારોઽપ્યધ્યાસહેતુઃ, ન પ્રમાહિતસંસ્કાર એવેતિ નિયમઃ ।

## (૯૧)

સ ચ સંસ્કારો બન્ધાધ્યાસેઽપિ ઘટતે - અહઙ્કારાદિનિખિલાનાત્મવસ્તુજાતં તજ્જ્ઞાનઞ્ચ બન્ધ ઇત્યુચ્યતે । ઇદઞ્ચ પ્રત્યગાત્મવિલક્ષણં બન્ધરૂપમનાત્મવસ્તુજાતમ્, રજ્જુસર્પસ્વપ્નેન્દ્રજાલાદિવત્ યદા પ્રતીયતે તદૈવાસ્તિ; અપ્રતીતિદશાયાં તસ્ય સત્તા નાસ્ત્યેવેતિ વેદાન્તસિદ્ધાન્તઃ । અત એવ "ન કઞ્ચન કામં કામયતે ન કઞ્ચન સ્વપ્નં પશ્યતિ તત્સુષુપ્તમ્" (મા. આ. ૫) "ન તુ તદ્દ્વિતીયમસ્તિ તતોઽન્યદ્વિભક્તં યત્પશ્યેત્" (બૃ. ૪.૩.૨૩) "સ યદા તેજસાભિભૂતો ભવતિ અત્રૈષ દેવઃ સ્વપ્નાન્ન પશ્યતિ" (પ્ર. ૪.૬) "એવં હ વૈ તત્સર્વં પર આત્મનિ સમ્પ્રતિષ્ઠતે" (પ્ર. ૪.૭) "પૃથિવી ચ પૃથિવીમાત્રા ચ" (પ્ર. ૪.૮) ઇત્યાદિવેદાન્તેષુ સુષુપ્તૌ નિખિલદ્વૈતદૃશ્યપ્રપઞ્ચસ્ય નિઃશેષાભાવઃ પ્રતિપાદિતઃ । યસ્માન્ન કિઞ્ચિદપિ દ્વૈતં સુષુપ્તાવુપલભ્યતે તસ્માત્સુષુપ્તૌ નિખિલદ્વૈતપ્રપઞ્ચઃ પ્રવિલીયતે, પ્રબોધે ચ પુનરેવોત્પદ્યતે । "યદા સુપ્તઃ સ્વપ્નં ન કઞ્ચન પશ્યત્યથાસ્મિન્ પ્રાણ એવૈકધા ભવતિ, તથૈનં વાક્ સર્વૈર્નામભિઃ સહાપ્યેતિ, ચક્ષુઃ સર્વૈ રૂપૈઃ સહાપ્યેતિ, શ્રોત્રં સર્વૈઃ શબ્દૈઃ સહાપ્યેતિ, મનઃ સર્વૈર્ધ્યાનૈઃ સહાપ્યેતિ । સ યદા પ્રતિબુદ્ધ્યતે યથાગ્નેર્જ્વલતો વિસ્ફુલિઙ્ગા વિપ્રતિષ્ઠેરન્નેવમેવૈતસ્માદાત્મનઃ પ્રાણા યથાયતનં વિપ્રતિષ્ઠન્તે પ્રાણેભ્યો દેવા દેવેભ્યો લોકાઃ" (કૌ. ૪.૧૯) "સુષુપ્તિકાલે સકલે વિલીને તમોઽભિભૂતઃ સુખરૂપમેતિ" (કૈ. ૧૩) "પુરત્રયે ક્રીડતિ યશ્ચ જીવસ્તતસ્તુ જાતં સકલં વિચિત્રમ્" (કૈ. ૧૪) "અથ યદા સુષુપ્તો ભવતિ યદા ન કસ્યચન વેદ" (બૃ. ૨.૧.૧૯) "સ યથોર્ણનાભિસ્તન્તુનોચ્ચરેદ્યથાગ્નેઃ ક્ષુદ્રા વિસ્ફુલિઙ્ગા વ્યુચ્ચરન્ત્યેવમેવાસ્માદાત્મનઃ સર્વે પ્રાણા સર્વે લોકા સર્વે દેવાઃ સર્વાણિ ભૂતાનિ વ્યુચ્ચરન્તિ" (બૃ. ૨.૧.૨૦) ઇત્યેવમાદિશ્રુતિભિરયમર્થઃ પ્રતિપાદિતઃ । અયમેવ દૃષ્ટિસૃષ્ટિવાદ ઇતિ વેદાન્તશાસ્ત્રે પ્રસિદ્ધઃ । ઉત્તરત્ર ચૈષઃ પ્રપઞ્ચ્યતે । ઇત્થમેવાહઙ્કારાદિદેહાન્તા વિષયાસ્તજ્જ્ઞાનાનિ ચાસઙ્ખ્યેયતયા પ્રતિ ક્ષણમુત્પદ્ય વિનશ્યન્તિ । જ્ઞાતૈકસત્તાકત્વેનાજ્ઞાતસત્તાભાવાદેવ સ્વપ્નહસ્તિશુક્તિરજતાદિવત્ જાગ્રત્યહઙ્કારાદયોઽપિ યદા પ્રતીયન્તે તદાનીમેવોત્પદ્યન્તે, અપ્રતીતિદશાયાં પ્રલીયન્તે ચ । અહઙ્કારાદીનાં તજ્જ્ઞાનાનાઞ્ચાધ્યાસત્વમનિર્વચનીયખ્યાતિપ્રસ્તાવે નિરૂપયિષ્યતે । અહઙ્કારઃ કેવલસાક્ષિભાસ્ય ઇતિ વિષયપ્રસ્તાવે નિરૂપિતત્વાદહઙ્કારપ્રતીતિઃ કેવલસાક્ષિરૂપૈવ । સાક્ષિણશ્ચોત્પત્તિલયાદયો ન સન્તિ । તથાપિ સાક્ષી અહઙ્કારાદીન્ સ્વવિષયાન્ વૃત્તિદ્વારૈવ પ્રકાશયતિ, ન તુ સાક્ષાત્ । સાક્ષ્યવિષયકવૃત્તેરુત્પત્તિલયસત્ત્વાદેવાહઙ્કારપ્રતીતેરપ્યુત્પત્તિલયાદયોઽભ્યુપગમ્યતે । ઇત્થમેવોત્તરોત્તરાહઙ્કારાદીનાં તદ્વિષયકજ્ઞાનાનાં ચોત્પત્તિં પ્રતિ પૂર્વપૂર્વમિથ્યાહઙ્કારાદ્યનુભવજન્યસંસ્કાર એવ કારણમ્ ।

## (૯૨)

પ્રાથમિકાધ્યાસે સંસ્કારસ્ય હેતુત્વાસમ્ભવ ઇત્યાક્ષેપઃ સ્યાદેતત્ - યદ્યપ્યુત્તરોત્તરાહઙ્કારાદ્યધ્યાસં પ્રતિ પૂર્વપૂર્વાધ્યાસાનુભવજન્યસંસ્કારઃ
કારણમિતિ યુક્તં, તથાપિ પ્રાથમિકાહઙ્કારસ્ય તજ્જ્ઞાનસ્ય ચોત્પત્તૌ સંસ્કારો
હેતુરિતિ ન યુજ્યતે, તતઃ પૂર્વં સંસ્કારાભાવાત્ । યદિ પ્રાથમિકાહઙ્કારોત્પત્તેઃ પૂર્વમહઙ્કારાન્તરં સ્યાત્તદા તદ્વિષયકજ્ઞાનેન સંસ્કારો જાયેત । ન તુ

પ્રાથમિકાહઙ્કારાત્પૂર્વમહઙ્કારાન્તરમસ્તીત્યભ્યુપગમ્યતે । એવમેવ સકલવસ્તૂનાં પ્રાથમિકાધ્યાસસ્ય હેતુઃ સંસ્કાર ઇતિ વક્તું ન શક્યતે ।

(૯૩)

તત્ર સમાધિઃ - સિદ્ધાન્તાનભિજ્ઞતયાયમાક્ષેપઃ । વેદાન્તસિદ્ધાન્તસ્ત્વયમ્જીવ ઈશો વિશુદ્ધા ચિત્ તથા જીવેશયોર્ભિદા । અવિદ્યા તચ્ચિતોર્યોગઃ ષડસ્માકમનાદયઃ ॥ ઇતિ ।

૧. દૃષ્ટિર્નામ અવિદ્યાવૃત્તિરૂપં જ્ઞાનમ્ । તાદૃશજ્ઞાનકાલ એવ વિષયાણામુત્પત્તિરિતિ યો વાદઃ સ એવ દૃષ્ટિસૃષ્ટિવાદ ઇતિ શાસ્ત્રેષુ કથિતઃ ।

(૧) જીવઃ, (૨) ઈશ્વરઃ, (૩) બ્રહ્મ, (૪), અનાદિવસ્તૂનાં પરસ્પરં ભેદઃ, જીવેશયોશ્ચ ભેદઃ, (૫) અવિદ્યા, (૬) અવિદ્યાચૈતન્યયોઃ સમ્બન્ધઃ (સ એવ કાલ ઇત્યુચ્યતે) ષડેતાનિ સ્વરૂપતઃ અનાદિવસ્તૂનિ । ઉત્પત્તિશૂન્યત્વં સ્વરૂપતોઽનાદિત્વમ્ । ષડપ્યેતાન્યનાદીનિ ભવન્તિ, ઉત્પત્તિશુન્યત્વાત્, સમ્મતવત્ । અથવા અહઙ્કારાદીનાં શ્રુતાવુત્પત્તેઃ શ્રૂયમાણત્વાત્તેષાં સ્વરૂપતોઽનાદિત્વાભાવેઽપિ પ્રવાહતોઽનાદિત્વમેષ્ટવ્યમ્ । એવમેવ સકલવસ્તૂનામપિ સિદ્ધમેવાનાદિત્વમ્, "ઘટાદિકં વસ્તુ નાસ્તિ" ઇતિ વ્યવહારયોગ્યકાલસ્યૈવાભાવાત્ । તસ્માત્ ઘટાદીનાં પ્રવાહોઽનાદિરેવ । એવમાત્માતિરિક્તસર્વ- વસ્તુપ્રવાહોઽપ્યનાદિઃ । પ્રલયકાલેઽપિ સુષુપ્તાવિવ સર્વં જગત્ સંસ્કારરૂપેણ સ્વકારણે વર્તતે । તસ્માત્પ્રપઞ્ચપ્રવાહસ્ય અનાદિકાલસિદ્ધત્વાત્ પ્રપઞ્ચોનાદિઃ । ઈદૃગ્જ્ઞાનશૂન્યસ્યૈવ "પ્રથમાધ્યાસહેતુભૂતસંસ્કારો ન યુજ્યતે"

૧. (૧) અવિદ્યાયા અપ્યધિષ્ઠાનત્વાન્નાવિદ્યાતો બ્રહ્મ જાયતે । અન્તરેણ બ્રહ્મ જીવેશ્વરાદયો ન સિદ્ધ્યન્તીતિ ન તેભ્યશ્ચતુર્ભ્યોઽપિ બ્રહ્મ જાયતે । તસ્માદનાદિસિદ્ધં બ્રહ્મ ।

(૨) બ્રહ્મણો નિર્વિકારત્વાન્ન તતોઽવિદ્યા જાયતે । ઈશ્વરાદિચતુષ્ટયસિદ્ધેરવિદ્યાસિદ્ધ્યધીનત્વાન્ન તતોઽપ્યવિદ્યા જાયતે । ઇત્યવિદ્યાપ્યનાદિરેવ ।

(૩, ૪) જીવેશ્વરૌ ન કેવલબ્રહ્મણો વા કેવલમાયાયા વા ઉત્પદ્યેતે । નાપીશ્વરાજ્જીવો વા જીવાદ્વેશ્વરો જાયતે ।

જીવેશ્વરભેદસ્ય ચ જીવેશ્વરસિદ્ધ્યધીનત્વાન્ન તતોઽપિ
જીવેશ્વરોત્પત્તિઃ । અવિદ્યાચિત્સમ્બન્ધસિદ્ધ્યધીના
જીવેશ્વરસિદ્ધિઃ । અવિદ્યાચિત્સમ્બન્ધશ્ચાનાદિરેવ ।
અનાદ્યવિદ્યાચિત્સમ્બન્ધાધીનજીવેશ્વરાવપ્યનાદી એવ ।
(૫) અવિદ્યાચિતોરનાદિત્વાત્ તયોસ્તાદાત્મ્યરૂપસમ્બન્ધોઽપ્યનાદિરેવ ।
તસ્માત્ બ્રહ્મણો વાવિદ્યાતો વા ન તસ્યોત્પત્તિઃ ।
ઈશ્વરાદિત્રયસિદ્ધિશ્ચાવિદ્યાચિત્સમ્બન્ધાધીના । અતસ્તેભ્યોઽપિ ન્
તસ્યોત્પત્તિઃ । અતઽવિદ્યાચિત્સમ્બન્ધોઽપ્યનાદિઃ ।
(૬) એતેષામન્યોન્યભેદોઽપ્યનાદિરેવ, ષણ્ણામપ્યેતેષામુત્પત્ત્યભાવાત્ ।
સ્વરૂપતોઽનાદીનિ ષડેતાનિ । તત્ર કાલત્રયાબાધ્યત્વાત્ અનાદ્યનન્તં ચ
કૂટસ્થનિત્યં બ્રહ્મ । જ્ઞાનબાધ્યત્વાત્ત્વિતરાણિ પઞ્ચ અનાદિસાન્તાનીતિ
વિવેકઃ ।
૨. અનાદિકાલસિદ્ધત્વાત્ ચિરકાલાવસ્થાયિત્વાચ્ચ
પ્રપઞ્ચઃ સત્યં ઇત્યાક્ષેપસ્યૈવં સમાધાનં -
રજ્જુસર્પાદિભ્રમઃ સ્વપ્નભ્રમશ્ચ સર્વજનસાધારણઃ
। સ ચાનિયમેનૈકઘટિકાપ્રભૃત્યનેકયામાવસ્થાયી
ભવતિ, પૂર્વસિદ્ધત્વેન અનાદિસિદ્ધત્વેન ચ ભાતિ ।
તથાપિ રજ્જુતત્ત્વસાક્ષાત્કારે જાગ્રત્પ્રબોધે ચ સતિ,
સર્પસ્વપ્નાદીનાં ત્રૈકાલિકનિષેધપ્રતિયોગિત્વનિશ્ચયો જાયતે ।
એવમેવ પ્રપઞ્ચાધ્યાસોઽપિ ભ્રમદશાયામનાદિરેવ સત્ય ઇવ
ભાતિ, તત્ત્વાવબોધે તુ કાલત્રયેઽપિ નાસ્તીતિ નિશ્ચયો જાયતે ।
તસ્માત્પ્રપઞ્ચો મિથ્યા । ઇતિ શઙ્કા જાયેત । વેદાન્તસિદ્ધાન્તે ન
કોઽપ્યધ્યાસઃ “અયમેવ પ્રથમાધ્યાસઃ” ઇતિ વક્તું શક્યતે,
કિન્તુ સર્વોઽપ્યુત્તરોત્તરાધ્યાસઃ સ્વપૂર્વપૂર્વાધ્યાસકાર્યમેવ ।
તસ્માદિયં શઙ્કૈવ ન યુક્તા । તથા ચ પૂર્વોક્તરીત્યૈવ
સજાતીયવસ્તુનઃ પૂર્વાનુભવજન્યસંસ્કારમાત્રેણાહઙ્કારાદિબન્ધાધ્યાસઃ
સમ્ભવતિ ।

(૯૪)

સાદૃશ્યદોષો નાવશ્યમધ્યાસહેતુઃ - યદુક્તમધ્યાસહેતુભૂતા દોષાસ્ત્રયઃ, તેષુ બન્ધાધ્યાસે હેતુતયાન્યતમસ્યાપ્યુપલમ્ભાભાવાત્ બન્ધઃ સત્ય ઇતિ; તન્ન । યથા તુરીતન્તુવેમાદ્યભાવે પટો નોત્પદ્યતે, તથા દોષાભાવેઽધ્યાસો યદિ નોત્પદ્યેત

તદા દોષોઽધ્યાસહેતુઃ સ્યાત્ । ન તુ તથા ભવતિ, સાદૃશ્યદોષં વિનૈવાત્મનિ જાત્યધ્યાસ્ય જાયમાનત્વાત્ । બ્રાહ્મણ્યાદિજાતિઃ સ્થૂલદેહધર્મો નાત્મનો નાપિ સૂક્ષ્મશરીરસ્ય । યતઃ પૂર્વશરીરસ્થિત એવાત્મા, સૂક્ષ્મશરીરં ચ શરીરાન્તરપ્રાપ્તાવપ્યનુવર્તતે, ન તુ પૂર્વશરીરસ્થિતા જાતિઃ । સા તુ ભિદ્યતે । પૂર્વશરીરસ્થિતજાતિરેવ શરીરાન્તરેઽપ્યનુવર્તનીયેતિ ન નિયમઃ । આત્મનો વા સૂક્ષ્મશરીરસ્ય વા યદિ જાતિર્ધર્મઃ સ્યાત્તર્હિ જન્માન્તરીયશરીરે વિલક્ષણા જાતિર્ન સ્યાત્ । અતો જન્માન્તરે જાત્યન્તરવિશિષ્ટશરીરસ્યપ્યુપલબ્ધેર્ન જાતિરાત્મનો વા સૂક્ષ્મશરીરસ્ય વા ધર્મો ભવતિ, કિન્તુ સ્થૂલશરીરસ્યૈવ । તથાપિ “અહં દ્વિજઃ” ઇત્યહમર્થે બ્રાહ્મણત્વક્ષત્રિત્વવૈશ્યત્વાદિજાતિપ્રતીત્યન્યથાનુપપત્ત્યા આત્મનિ બ્રાહ્મણત્વાદિજાત્યધ્યાસોઽભ્યપેયઃ । યથા રજ્જૌ પરમાર્થતઃ કાલત્રયેઽપ્યવિદ્યમાનોઽપિ સર્પઃ પ્રતીત્યન્યથાનુપપત્ત્યાધ્યસ્ત ઇત્યભ્યુપગમ્યતે, તથૈવાત્મનિ પરમાર્થતઃ કાલત્રેઽપ્યવિદ્યમાનાપિ બ્રાહ્મણત્વાદિજાતિઃ પ્રતીયમાનત્વાદધ્યસ્યતે ઇત્યઙ્ગીકાર્યમ્ । પરન્તુ જાત્યાત્મનોર્ન કિઞ્ચિદપિ સાદૃશ્યમસ્તિ । આત્મા વ્યાપકઃ પ્રત્યક્ વિષયી ચિદ્રૂપઃ । જાતિસ્તુ પરિચ્છિન્ના પરાચીના વિષયાત્મિકા જડા ચ । તથાપ્યાત્મનિ તદ્વિલક્ષણજાત્યધ્યાસો જાયતે । યથા સાદૃશ્યમન્તરાત્મનિ જાત્યધ્યાસઃ સમ્ભવતિ તથા વિનૈવ સાદૃશ્યમહઙ્કારાદિબન્ધાધ્યાસોઽપ્યાત્મનિ સમ્ભવત્યેવ । તસ્માત્સાદૃશ્યદોષો નાધ્યાસહેતુઃ । કિઞ્ચ, સાદૃશ્યસ્યાધ્યાસહેતુત્વાભ્યુપગમે શઙ્ખે પીતિમાધ્યાસઃ, ગુડે તિક્તતાધ્યાસશ્ચ ન સ્યાત્;

૧. “નિત્યમેકમનેકાનુગતં સામાન્યમ્”
ઇતિ ન્યાયમતેઽનેકપદાર્થસમવેતા એકા નિત્યા ચ
જાતિરિત્યઙ્ગીકારાજ્જાત્યાત્મનોર્લક્ષણસાદૃશ્યાત્મકપ્રમેયદોષસિદ્ધેરાત્મનિ
જાત્યાધ્યાસો જાયેત । અતઃ પ્રમેયદોષોઽધ્યાસહેતુરિતિ કશ્ચન
મન્યેતેતિ મનસિ નિધાય શઙ્ખે પીતત્વાધ્યાસો દૃષ્ટાન્તત્વેનોચ્યતે ।

૨. નનુ શઙ્ખે પીતિમા નાધ્યસ્યતે । કિન્તુ,
કાચકામલાદિદોષદૂષિતનેત્રસ્થપીતવર્ણેન ॥ સાદૃશ્યાભાવાત્ ।
પ્રત્યુત શ્વૈત્યપીતિમ્નોઃ માધુર્યતિક્તત્વયોશ્ચ
વિરુદ્ધયોરપ્યધ્યાસોઽનુભૂયતે । તસ્માદધિષ્ઠાને મિથ્યાવસ્તુનઃ
સાદૃશ્યરૂપદોષો નાધ્યાસહેતુઃ ।

## (૯૫)

પ્રમાતૃદોષોઽપિ નાવશ્યમધ્યાસહેતુઃ - પ્રમાતુર્લોભભાયાદિદોષા નાધ્યાસહેતવઃ, લોભાદિશૂન્યવિરક્તાનામપિ શુક્તિકાદૌ રજતાદ્યધ્યાસદર્શનાત્ । પરપક્ષરીત્યા દોષરૂપહેત્વભાવાન્નાધ્યાસો જાયેત । તસ્માન્ન પ્રમાતૃદોષોઽધ્યાસહેતુઃ ।

(૯૬)

પ્રમાણદોષોઽપિ નાવશ્યમધ્યાસહેતુઃ - પ્રમાણદોષોઽપિ નાધ્યાસહેતુઃ । તથા હિ, સર્વેષામેવ નીરૂપે આકાશે નૈલ્યમિન્દ્રનીલકટાહાકારશ્ચ ભાતિ । તતઃ સર્વેષામાકાશે સમતયા નૈલ્યાદ્યધ્યાસસ્ય જાયમાનત્વાત્સર્વેષાં નેત્રેન્દ્રિયપ્રમાણે પિત્તાદિદોષસદ્ભાવકલ્પના વાચ્યા; સા ચ નાઽઽજસી । તસ્માત્ પ્રમાણદોષોઽપિ નાધ્યાસહેતુઃ । આકાશે નૈલ્યાદ્યધ્યાસવિષયે ન કેવલં પ્રમાણદોષાભાવઃ, કિન્તુ સર્વદોષાભાવોઽપિ । સાદૃશ્યાભાવઃ પ્રમાતૃદોષાભાવશ્ચ તત્ર સિદ્ધ એવ । યથા સકલદોષાભાવેઽપ્યાકાશે નૈલ્યાદ્યધ્યાસો જાયતે તથાત્મન્યપિ બન્ધાધ્યાસો દોષં વિનૈવ જાયતે । તસ્માત્ "દોષાભાવાત્ બન્ધોઽધ્યાસરૂપો ન ભવતિ" ઇતીયં શઙ્કા ન યુક્તા । યતઃ સર્વદોષવિરહે સત્યપ્યાકાશે નૈલ્યાદ્યધ્યાસો જાયતે સકલપુરુષાણાં તસ્માદ્દોષો નાધ્યાસહેતુઃ । પિત્તાદિદોષશૂન્યનેત્રસ્યાપ્યાકાશે ઇન્દ્રનીલકટાહાદ્યાકારો ભાસતે । તસ્માત્પ્રમાણદોષો નાધ્યાસહેતુઃ । લિપ્તત્વાચ્છઙ્ખઃ પીતો ભાતીતિ ચેન્ન - ઘટે ખચિતં રત્નં, સુવર્ણાદિલેપો વા તત્કર્તુઃ સુવર્ણકારાદેરન્યસ્યાપિ યથા સમમેવ પ્રતીયતે, તથા ન સર્વેષાં શઙ્ખે પીતવર્ણઃ પ્રતીયતે । કિન્તુ કાચાદિદોષદૂષિતનેત્રસ્યૈવ ભાતિ, નાન્યસ્ય । તસ્માત્ દોષદૂષિતનેત્રાત્ પીતવર્ણો બહિર્નિર્ગત્ય શઙ્ખેન નૈવ સંસૃજ્યતે । અપિ તુ શઙ્ખે પીતિમપ્રતીતિર્ભ્રમ એવ । નન્વાકાશે પરિપતન્ પક્ષી યસ્ય નેત્રવૃત્તિસંયુક્તદેશાદૂર્ધ્વમુડ્ડીય ગતઃ, તસ્યૈવ કેવલં બહુદૂરગમનપર્યન્તમનુસૃત્ય પશ્યતો વિષયીભવતિ, નાન્યસ્ય । એવં યસ્ય નેત્રસ્થપીતિવર્ણો લિપ્તઃ શઙ્ખે, તસ્યૈવ પરમુપલભ્યતે સઃ, નાન્યસ્યેતિ ચેન્ન । આકાશે પરિપતન્ પક્ષી યસ્ય નેત્રગોચરીભૂતાદ્દેશેદૂર્ધ્વમુડ્ડીય ગતઃ, સ એવાન્યસ્મૈ તમઙ્ગુલ્યા નિર્દિશ્ય દર્શયતિ ચેત્પરોઽપિ તં પક્ષિણં પશ્યત્યેવ । ન ત્વેવં શઙ્ખપીતિમવર્ણોઽઙ્ગુલ્યા નિર્દિશ્ય પ્રદર્શિતોઽપિ પરસ્યોપલભ્યતે । તસ્માન્ન શઙ્ખે પીતવર્ણઃ સત્યઃ, કિન્ત્વધ્યસ્ત એવ । ઇત્થં શઙ્ખપીતિમાધ્યાસોઽન્તરેણૈવ સાદૃશ્યમુત્પદ્યમાનોઽપિ, સ દૃષ્ટાન્તઃ શઙ્કાસમાધાનાભ્યામેવ સિદ્ધ્યતીત્યતો નિર્વિવાદદૃષ્ટાન્તં દર્શયતિ - ગુડે તિક્તતેતિ । ઇત્થં દોષો નાધ્યાસહેતુઃ । અતો બન્ધાધ્યાસે ન દોષાપેક્ષાસ્તિ । સઙ્ક્ષેપશારીરકે બન્ધાધ્યાસપ્રસ્તાવે દોષોઽપિ કારણત્વેનોક્તઃ । ગ્રન્થવિસ્તરભયાન્નેહ સ નિરૂપિતઃ । દોષો યદ્યધ્યાસહેતુર્ભવેત્તદા તદ્વિશેષવિચારો યુજ્યેત ।
તદસમ્ભવાદેવ નેહ સ પ્રપઞ્ચ્યતે ।

## (A. 97-98) કારણાધ્યાસનિરૂપણમ્-

(૯૭)

સ્વયમ્પ્રકાશેઽપિ બ્રહ્મણ્યજ્ઞાનોપપત્તિઃ - વિશેષતોઽનવગતે વસ્તુન્યધ્યાસો જાયેત । સ્વયમ્પ્રકાશસ્વરૂપત્વાદાત્મન્યજ્ઞાનમેવ ન ઘટેત, તયોરન્યોન્યં તમઃપ્રકાશયોરિવ વિરોધાત્ । પ્રૌઢપ્રકાશે સતિ સર્પાદ્યધ્યાસો રજ્જ્વાદૌ યથા ન જાયેત, તથા સદા સ્વયમ્પ્રકાશસ્વરૂપે આત્મનિ બન્ધાધ્યાસોઽપિ ન જાયેતેતિ કૃતાક્ષેપોઽપિ ન સાધુઃ । યદ્યપ્યાત્માલુપ્તસ્વયમ્પ્રકાશસ્વરૂપસ્તથાપિ તસ્ય સ્વરૂપપ્રકાશો નાજ્ઞાન૧. અત્રેદમવગન્તવ્યં - નિખિલદોષસમવાયે સત્યેવાધ્યાસો જાયેતેતિ નિયમાભાવેઽપિ યત્કિઞ્ચિદ્દોષે સત્યેવાધ્યાસઃ સમ્ભવતીતિ વક્તવ્યમ્ । યદપિ આકાશે નૈલ્યાદ્યધ્યાસે ન કાઽપિ દોષો દૃશ્યત ઇત્યુક્તમ્, તત્રાપ્યયમાશયઃ - યસ્મિન્નધ્યાસે હેતુત્વેન સાદૃશ્યાદિરૂપવિશેષદોષઃ

કોઽપિ નાપેક્ષ્યતે તત્રાપ્યવિદ્યાખ્યો દોષોઽપેક્ષ્યત એવ । સર્વથા દોષાભાવે અધ્યાસ એવ ન સમ્ભવેત્ । આકાશે નૈલ્યાદ્યધ્યાસેઽપિ વિશેષદોષત્રયાનપેક્ષાયામપ્યવિદ્યાખ્યદોષોઽપેક્ષ્યત એવ । યસ્ય કસ્યાપિ દોષલેશસ્યાપ્યભાવેઽધ્યાસસ્યાસમ્ભવાદેવાદ્વૈતસિદ્ધૌ મધુસૂદનસરસ્વતીભિઃ "દોષજન્યત્વં ભ્રમસ્ય લક્ષણમ્" ઇતિ કથિતમ્ । દોષં વિનાધ્યાસો જાયેતેતિ મૂલોક્તિઃ પ્રૌઢવાદેન । પ્રૌઢ્યર્થં = સ્વવિદ્યાતિશયખ્યાપનાર્થં, વાદઃ = કથનં, તેનેત્યર્થઃ ।

૨. અન્તઃકરણસ્થાજ્ઞાનસ્ય વિક્ષેપહેતુભૂતશક્તિનિષ્ઠશુભાશુભકર્મજન્યસંસ્કારરૂપાદૃષ્ટં પ્રમાતૃદોષઃ । ચૈતન્યે સ્વાતિરિક્તપ્રમાણાભાવાત્ સ્વસ્વરૂપમેવ પ્રમાણમ્ । તદાશ્રિતાવિદ્યા પ્રમાણદોષઃ । નિરપેક્ષાન્તરત્વં (પ્રત્યક્ત્વં) ચૈતન્યેઽસ્તિ, પ્રપઞ્ચે તદ્વિપરીતં સાપેક્ષાન્તરત્વમસ્તિ । ચૈતન્યં પરમાર્થવસ્તુ, પ્રપઞ્ચોઽનિર્વચનીયવસ્તુ । તસ્માત્ આન્તરત્વવસ્તુત્વરૂપધર્માભ્યાં ચૈતન્યપ્રપઞ્ચયોઃ સાદૃશ્યં સિદ્ધમ્ । અયં ચ પ્રમેયદોષઃ । ઇત્થં દોષા અધ્યાસકારણત્વેન સઙ્ક્ષેપશારીરકાદિગ્રન્થેષુ નિરૂપિતાઃ ।

૩. નનુ પ્રપઞ્ચકારણમધિષ્ઠાનસ્ય વિશેષાંશાજ્ઞાનમ્ । તસ્યાધ્યાસ એવ કારણાધ્યાસ ઇત્યુચ્યતે । તત્ર પ્રપઞ્ચાધ્યાસકારણમજ્ઞાનમ્, અજ્ઞાનાધ્યાસસ્ય તુ ન કિઞ્ચિત્કારણાન્તરમસ્તિ । તસ્માદજ્ઞાનાધ્યાસો ન સ્યાદિતિ યસ્ય કસ્યચિદાક્ષેપે સતિ તન્નિરાસ એવમ્દીપો યથા સ્વયમેવ પ્રકાશમાનઃ સન્ સ્વસમ્બદ્ધાનિતરાંશ્ચ પદાર્થાન્ સ્વપરનિર્વાહકત્વાદિતરાનપેક્ષં પ્રકાશયતિ તથાજ્ઞાનમપિ સ્વસ્ય સ્વકાર્યપ્રપઞ્ચસ્ય ચાધ્યાસકારણં ભવતીતિ । વિરોધી । યદ્યાત્મનઃ સ્વપ્રકાશોઽજ્ઞાનવિરોધી ભવેત્તદા સુષુપ્તૌ સ્વયમ્પ્રકાશાત્મનિ નાજ્ઞાનમુપલભ્યેત । અપિ તુ ગાઢં સુપ્તોત્થિતઃ "સુખમહમસ્વાપ્સં ન કિઞ્ચિદવેદિષમ્" ઇતિ સુષુપ્તૌ સ્વાનુભવસિદ્ધમજ્ઞાનં પરામૃશતિ । સુષુપ્ત્યનુભવસ્ય વિષયઃ સુખમજ્ઞાનઞ્ચ । સુપ્તોત્થિતસ્ય જાગ્રદ્દશાયાં જાયમાનમિદં સુખાજ્ઞાનવિષયકં જ્ઞાનં ન પ્રત્યક્ષમ્ । અપરોક્ષવિષયકં હિ જ્ઞાનં પ્રત્યક્ષમિત્યુચ્યતે । જાગ્રત્કાલે સૌષુપ્તિસુખસ્ય તદજ્ઞાનસ્ય ચાભાવાત્તદુભયવિષયકં જાગ્રત્કાલીનં જ્ઞાનં ન પ્રત્યક્ષમ્, કિન્તુ સ્મૃતિઃ । સા ચ સ્મૃતિરનનુભૂતવિષયિણી ન

સ્યાત્ । અતઃ સુષુપ્તૌ સુખાજ્ઞાનયોરપરોક્ષજ્ઞાનમભ્યુપગન્તવ્યમ્
। સુષુપ્તૌ તદ્વિષયકં જ્ઞાનં નૈવાન્તઃકરણેનેન્દ્રિયૈશ્ચ
જાયતે તદાન્તઃકરણસ્યેન્દ્રિયાણાં ચ સર્વેષાં કારણે
પ્રલીનાનામભાવાત્ । તસ્માત્સુષુપ્તૌ સુખાજ્ઞાનયોરવભાસકં
જ્ઞાનં સ્વયમ્પ્રકાશાત્મસ્વરૂપચૈતન્યમેવ । પ્રકાશો જ્ઞાનં
ચૈતન્યમિત્યર્થાન્તરમ્ । ઇત્થં સુષુપ્તૌ સ્વયમ્પ્રકાશસ્વરૂપે આત્મનિ
ભાસમાને એવ તસ્મિન્ સ્વરૂપસુખમજ્ઞાનઞ્ચ પ્રતીયતે । યદ્યાત્મનઃ
સ્વરૂપપ્રકાશ એવ સાક્ષાદજ્ઞાનવિરોધી સ્યાત્તર્હ્યજ્ઞાનમેવ
સુષુપ્તૌ નાનુભૂયેત । સુષુપ્તાવાત્મા સ્વયમ્પ્રકાશસ્વરૂપ
એવાસ્તે, તથાપ્યાત્મનઃ સ્વરૂપપ્રકાશો નાજ્ઞાનવિરોધી ભવતિ ।
પ્રત્યુત આત્મનઃ સ્વરૂપપ્રકાશઃ સર્વાધિષ્ઠાનત્વાદજ્ઞાનસ્યાપિ
સત્તાસ્ફૂર્તિપ્રદત્વેન સાધક એવ ભવતિ । એતદેવાભિપ્રેત્યોક્તં
વેદાન્તેષુ સામાન્યરૂપં સ્વરૂપચૈતન્યં નાજ્ઞાનવિરોધિ,
કિન્તૂપાધ્યભિવ્યક્તવિશેષાત્મકં ચૈતન્યમજ્ઞાનવિરોધીતિ
। સર્વત્ર વ્યાપ્ય વર્તમાનમખણ્ડચૈતન્યં સામાન્યમ્ ।
અન્તઃકરણવૃત્ત્યારૂઢચૈતન્યં વિશેષાત્મકમિતિ વિવેકઃ । અરણ્યાં
વ્યાપ્ય વર્તમાનોઽગ્નિઃ સામાન્યઃ, સોઽનભિવ્યક્તત્વાન્નાન્ધકારવિરોધી
। સ એવ કાષ્ઠમથનેનોદ્ભૂતરૂપોઽભિવ્યક્તો દીપવર્ત્યારોપિતો
વિશેષાત્મકઃ સન્નન્ધકારવિરોધી ભવતિ । એવં વ્યાપકં
સામાન્યં બ્રહ્મચૈતન્યમવિરોધ્યપ્યજ્ઞાનસ્ય, તદેવ ચૈતન્યં
વિચારિતવેદાન્તપ્રમાણજનિતસાક્ષાત્કારાત્મકાખણ્ડબ્રહ્માકારાન્તઃકરણવૃત્ત્યારૂઢં
સન્નિઃશેષતયા અજ્ઞાનનાશહેતુત્વાત્તદ્વિરોધિ ભવતિ ।
ઇત્થં ચ કેવલચૈતન્યં નાજ્ઞાનવિરોધિ, કિન્તુ વૃત્ત્યારૂઢં
ચૈતન્યં, ચૈતન્યવિશિષ્ટા વૃત્તિર્વાજ્ઞાનવિરોધિતયોચ્યતે ।
આદ્યપક્ષેઽજ્ઞાનનાશસ્ય ચૈતન્યં હેતુર્વૃત્તિઃ સહકારિણી;
દ્વિતીયે તુ તન્નાશે વૃત્તિઃ સાક્ષાદ્ધેતુશ્ચૈતન્યં સાધકમ્
। ઇદં ત્વવચ્છેદવાદરીત્યોક્તમ્ । ૧. અવચ્છેદવાદે
વૃત્તિવિશિષ્ટચૈતન્યં, ચૈતન્યવિશિષ્ટા વૃત્તિર્વા
વિશેષચૈતન્યમિત્યુચ્યતે । એતદેવાજ્ઞાનવિરોધિ ભવતિ ।
આવરણનિવૃત્તૌ વૃત્તેરેવ નિયામકત્વાત્ દ્વિતીયઃ પક્ષઃ શ્રેયાન્
। આભાસવાદરીત્યા તુ સામાન્યચૈતન્યવદ્વિશેષચૈતન્યમપિ
નાજ્ઞાનવિરોધિ, કિન્તુ વૃત્તિસહિતાભાસો વા આભાસસહિતા

વૃત્તિર્વાજ્ઞાનવિરોધિતયોચ્યતે । ઇત્થં શુદ્ધં
સ્વયમ્પ્રકાશસ્વરૂપચૈતન્યં નાજ્ઞાનવિરોધિ । તતશ્ચાજ્ઞાનં
સ્વરૂપચૈતન્યમેવાશ્રિત્ય વર્તતે । તેનાજ્ઞાનેનાવૃતે આત્મનિ
બન્ધાધ્યાસો યુજ્યત એવ ।

## (૯૮)

આત્મા સામાન્યતો જ્ઞાતો વિશેષતોઽજ્ઞાતશ્ચ - યત્તૂક્તં સામાન્યતો જ્ઞાતે વિશેષતોઽજ્ઞાત એવ વસ્તુન્યધ્યાસો જાયેત । સામાન્યવિશેષધર્માભાવાન્નિર્વિશેષે આત્મનિ જ્ઞાતત્વાજ્ઞાતત્વવ્યપદેશોઽધ્યાસશ્ચ નૈવ સમ્ભવતીતિ; તન્નિરસ્યતે - “અયમહમસ્મિ” ઇત્યાત્માસ્તિત્વાનુભવસ્તાવત્સર્વલોકપ્રસિદ્ધઃ । આત્મા હિ નામ સ્વસ્વરૂપમેવ । ન “નાહમસ્મિ” ઇતિ કોઽપિ પ્રત્યેતિ । કિન્તુ “અહમસ્મિ” ઇત્યેવ સર્વઃ પ્રત્યેતિ । અત આત્માનં સદ્રૂપેણ સામાન્યતો વિજાનાતિ લોકઃ । પરન્તુ ન કોઽપિ “પ્રજ્ઞાનઘનોઽખણ્ડાનન્દસ્વરૂપો વ્યાપકો નિત્યશુદ્ધો નિત્યમુક્તશ્ચાહમ્” ઇતિ વિશેષરૂપેણાત્માનં જાનાતિ । તસ્માચ્ચિદાનન્દાદિલક્ષણલક્ષિતત્વેન વિશેષતો નાત્મા વિજ્ઞાયતે, કિન્તુ સામાન્યતઃ સત્સ્વરૂપેણ જ્ઞાયત એવ । ઇદઞ્ચ સર્વાનુભવસિદ્ધમ્ । ન ચેદં કેવલયુક્ત્યાપહ્નોતું શક્યતે । પામરાદિસર્વસાધારણ્યેન ભાસમાનં સદ્રૂપમાત્મનઃ સામાન્યસ્વરૂપમિત્યુચ્યતે । કેવલબ્રહ્માનુભવિસિદ્ધચિદાનન્દાદિસ્વરૂપં તુ વિશેષરૂપમ્ । અધિકદેશકાલવર્તિ યત્તત્સામાન્યસ્વરૂપમિતિ ન્યૂનદેશકાલવર્તિ યત્તદ્વિશેષસ્વરૂપમિતિ ચ લૌકિકપદાર્થાનાં વિવેકઃ । ચિદાનન્દયોરપ્યાત્મનઃ સ્વરૂપત્વાદેવ સદ્રૂપવત્ ચિદાનન્દસ્વરૂપમપિ વ્યાપકમેવ વર્તતે । અત એવાત્મનઃ સત્તાપેક્ષયાનન્દાદિકં વ્યાપ્યમિતિ વા, આનન્દાદ્યપેક્ષયા સત્તા વ્યાપિનીતિ વા ન શક્યતે વક્તુમ્ । તથા ચાત્મનઃ સદ્રૂપં સામાન્યં, ચિદાનન્દરૂપં વિશેષરૂપમિતિ યદ્યપિ ન સઙ્ગચ્છતે, તથાપ્યાત્મનઃ સત્તાસ્વરૂપસ્ય પ્રતીતિઃ સર્વલોકસાધારણ્યેનાવિદ્યાદશાયામપિ જાયતે, નૈવં ચિદાનન્દસ્વરૂપપ્રતીતિરવિદ્યાદશાયાં સર્વેષાં જાયતે । કેવલં ચિન્માત્રનિષ્ઠાનાં જ્ઞાનિનાં તુ સદા સર્વાંશપ્રતીતિરસ્તિ ।

૧. પ્રચણ્ડપ્રકાશે સૂર્યે તમોવત્
સ્વયમ્પ્રકાશાત્મચૈતન્યેઽજ્ઞાનસંસર્ગઃ કથં
ઘટેતેત્યાક્ષેપો ન યુક્તઃ । વિષમો દૃષ્ટાન્તઃ
- સૂર્યાદિજ્યોતિષિ મહાતેજસો વિશેષરૂપાણિ, ન તુ
સામાન્યરૂપાણિ । આત્મનઃ સ્વરૂપચૈતન્યં તુ સામાન્યપ્રકાશ
એવ । નૈતદજ્ઞાનવિરોધિ । તસ્માત્સૂર્યાદિદૃષ્ટાન્તોઽત્ર ન
સમઞ્જસઃ । યદ્યવિદ્યાદશાયાં ચૈતન્યાનન્દસ્વરૂપમપ્યાસ્તે
એવ, તથાપ્યવિદ્યયા ન તત્ પ્રતીયત ઇત્યવિદ્યમાનવત્કૃત્વા
ચૈતન્યાનન્દસ્વરૂપં પરિચ્છિન્નદેશકાલવર્તિ, સત્તાસ્વરૂપં
સકલદેશકાલવર્તીતિ ચોચ્યતે । પરમાર્થતો નૈવાસ્તિ

સામાન્યવિશેષભાવઃ સચ્ચિદાનન્દસ્વરૂપસ્યાત્મનઃ
। અવિદ્વત્પ્રતીત્યનુસારેણ તુ સ કલ્પ્યતે । "આત્મા
નિર્વિશેષઃ" ઇત્યસ્ય સિદ્ધાન્તસ્ય ન કાપ્યનુપપત્તિરનેન ।
યદ્યાત્મનઃ સામાન્યવિશેષભાવઃ પારમાર્થિકોઽભ્યુપગમ્યેત તદા
"આત્મા નિર્વિશેષઃ" ઇત્યાદિવેદાન્તસિદ્ધાન્તો બાધ્યેતૈવ ।
પરન્તુ નૈવ તથાભ્યુપગમ્યતે । કિન્તુ સામાન્યવિશેષભાવવાન્
ઇવાવિદ્યયા આત્મનો વિભાવ્યમાનત્વાદેવાજ્ઞજનબોધાર્થં
સામાન્યવિશેષવ્યવહારઃ કલ્પ્યતે । ઇત્થં સત્તારૂપસામાન્યસ્વરૂપેણ
વિદિતે નિત્યશુદ્ધબુદ્ધમુક્તાખણ્ડચિદાનન્દાદ્વિતીયબ્રહ્માત્મના
ચાવિદિતે આત્મનિ બન્ધાધ્યાસઃ સમ્ભવત્યેવ । આધ્યાસિકસ્ય ચ
બન્ધસ્ય જ્ઞાનાન્નિવૃત્તિરપિ યુજ્યત એવ । અત એવ ગ્રન્થસ્ય
પ્રયોજનમપિ સમ્ભવત્યેવ ।

## (A. 99-106) કર્મણા મોક્ષો ન સિદ્ધ્યતિ-

### (૯૯)

પૂર્વપક્ષસઙ્ગ્રહઃ - મુમુક્ષુણા નિષિદ્ધાનિ કામ્યાનિ ચ વર્જયિત્વા નિત્યનૈમિત્તિકાનિ કર્માણિ પ્રાયશ્ચિત્તરૂપાણિ ચ કર્માણ્યવશ્યમનુષ્ઠેયાનિ । નિષિદ્ધકર્માભાવાન્ન હીનલોકપ્રાપ્તિઃ । કામ્યકર્માભાવાન્નાપ્યુત્તમલોકપ્રાપ્તિઃ । નિત્યનૈમિત્તિકકર્માનનુષ્ઠાનજન્યપ્રત્યવાયરૂપપાપં તદનુષ્ઠાનેન નૈવોત્પદ્યતે । ઇહ જન્મનિ જન્માન્તરે વા પ્રાગનુષ્ઠિતાનિ પાપાનિ સર્વાણ્યપિ સાધારણાસાધારણપ્રાયશ્ચિત્તાભ્યાં નિઃશેષં વિનશ્યન્તિ । નિત્યનૈમિત્તિકકર્માનુષ્ઠાનજક્લેશૈરપિ સઞ્ચિતાનિ નિષિદ્ધકર્માણિ વિનશ્યન્તિ । સઞ્ચિતકામ્યકર્માણ્યપિ મુમુક્ષોરિદાનીં તત્ફલેચ્છાયા નિવૃત્તત્વાત્સ્વફલં ન પ્રયચ્છન્તિ । તસ્માન્મુમુક્ષોરનાયાસેન વિનૈવ જ્ઞાનં જન્માભાવરૂપમોક્ષઃ સિદ્ધ્યતીતિ ।

### (૧૦૦)

નિત્યનૈમિત્તિકાભ્યાં સ્વર્ગફલં સ્યાદેવ - વિના જ્ઞાનં કર્મણૈવ મોક્ષ ઇત્યેતન્ન યુજ્યતે । નિત્યનૈમિત્તિકકર્મણામપિ ફલાવશ્યંભાવનિયમસ્ય તત્ર તત્ર ભાષ્યેષુ યુક્ત્યા પ્રમાણેન ચ સમ્યઙ્નિરૂપિતત્વાત્ । અતો નિત્યનૈમિત્તિકકર્મણાં ફલાનભ્યુપગમે તદ્બાધકવેદો નિષ્ફલો ભવેત્ । યદિ નિત્યનૈમિત્તિકકર્માનનુષ્ઠાનાત્પાપં જાયેત, તદા તદનુષ્ઠાનાત્પાપાનુત્પત્તિસ્તત્ફલત્વેનેષ્યતે । ન ચ નિત્યનૈમિત્તિકકર્માનનુષ્ઠાનાત્પાપં જાયત ઇતિ વક્તું યુક્તમ્, અભાવાદ્ભાવોત્પત્ત્યદર્શનાત્ । તેષામનનુષ્ઠાનમભાવઃ, પાપઞ્ચ ભાવરૂપમ્, ન હ્યભાવાદ્ભાવ ઉત્પદ્યેત । તસ્માન્નિત્યનૈમિત્તિકકર્માનનુષ્ઠાનાત્પાપોત્પત્તિવચનમસઙ્ગતમેવ । નિત્યનૈમિત્તિકકર્માનનુષ્ઠાનાત્

પાપોત્પત્ત્યભ્યુપગમે “કથમસતઃ સજ્જાયેત” (છા. ૬.૨.૨) “નાસતો વિદ્યતે ભાવો નાભાવો વિદ્યતે સતઃ” (ભ. ગી. ૨.૧૬) ઇત્યાદિશ્રુતેર્ભગવદ્વચનસ્ય ચ વિરોધઃ સ્યાત્ । તસ્માન્નિત્યનૈમિત્તિકકર્માનનુષ્ઠાનરૂપાભાવાદ્ભાવરૂપપાપોત્પત્તિરનુપપન્નૈવ । ઇત્થં ચ નિત્યનૈમિત્તિકકર્મણાં પ્રત્યવાયાનુત્પત્તિરેવ ફલમિતિ વચનમસઙ્ગતમ્, વિનાપિ નિત્યનૈમિત્તિકકર્માણિ પાપાનુત્પત્તેઃ સિદ્ધેઃ । કિઞ્ચ, નિત્યનૈમિત્તિકકર્મણાં સ્વર્ગાદિફલાનઙ્ગીકારે નિષ્ફલાનિ તાનિ સ્યુઃ, નિષ્ફલં કર્મ વિદધચ્છાસ્ત્રમપિ વિફલં ભવેત્ । તસ્માન્નિત્યનૈમિત્તિકકર્મણાં સ્વર્ગાદિફલમવશ્યમભ્યુપગન્તવ્યમેવેતિ સિદ્ધમ્ ।

## (૧૦૧)

પ્રાયશ્ચત્તાદખિલસઞ્ચિતપાપક્ષયાસમ્ભવઃ - યદુક્તં સાધારણાસાધારણપ્રાયશ્ચિત્તાત્સકલાશુભકર્મક્ષયો ભવતીતિ, તન્ન સમ્ભવતિ । વિચિત્રાણ્યનેકકલ્પાનુષ્ઠિતાશુભકર્માણ્યેકસ્મિન્નેવ જન્મનિ ન યુગપત્ પ્રાયશ્ચિત્તેન વિનશ્યેયુઃ । સકલપાપક્ષયકરત્વેનોક્તગઙ્ગાસ્નાનેશ્વરનામોચ્ચારણાદિસાધારણ- પ્રાયશ્ચિત્તમપિ ચિત્તશુદ્ધ્યાદિદ્વારા સકલપાપક્ષયકરજ્ઞાનોત્પત્તિહેતુત્વાદ્ગૌણ્યા વૃત્તયા પાપક્ષયકરમિત્યુચ્યતે, ન તુ સાક્ષાત્ । સકલપાપાનાં યુગપત્ સાક્ષાન્નાશકં તુ બ્રહ્મજ્ઞાનમેવ । “ક્ષીયન્તે ચાસ્ય કર્માણિ તસ્મિન્ દૃષ્ટે પરાવરે” (મુ. ૨.૨.૮) “જ્ઞાનાગ્નિઃ સર્વકર્માણિ ભસ્મસાત્કુરુતે તથા” (ભ. ગી. ૪.૩૭) ઇત્યાદિશ્રુતિસ્મૃતિભ્યઃ ।

## (૧૦૨)

સઞ્ચિતકામ્યકર્માણ્યજ્ઞસ્યાવશ્યં ફલં પ્રદદ્યુઃ - યચ્ચોક્તં જન્માન્તરસઞ્ચિતકામ્યકર્માણિ, ઇદાનીં મુમુક્ષોસ્તત્ફલેચ્છાભાવમાત્રેણ ન ફલાય કલ્પન્ત ઇતિ, તદપ્યસઙ્ગતમેવ । તથા હિ, કર્મરૂપબીજાદઙ્કુરદ્વયં જાયતે, અદૃષ્ટં વાસના ચેતિ । ધર્માધર્મયોરદૃષ્ટમિતિ નામ । શુભકર્મણઃ શુભવાસના ધર્મરૂપોઽઙ્કુરશ્ચ જાયતે । અશુભકર્મણોઽશુભવાસના અધર્મરૂપોઽઙ્કુરશ્ચ જાયતે । શુભવાસનયા પુનરપિ શુભકર્મણિ પ્રવૃત્તિર્જાયતે । તાદૃશશુભકર્મજન્યેન ધર્મેણ સુખોપભોગો જાયતે । એવમેવાશુભવાસનયા પુનરપ્યશુભકર્મણિ પ્રવૃત્તિઃ, તાદૃશાશુભકર્મજન્યેનાધર્મેણ દુઃખોપભોગશ્ચ જાયતે । ઇત્થં વાસના ચાદૃષ્ટશ્ચેત્યઙ્કુરદ્વયં કર્મરૂપબીજાજ્જાયતે । તત્ર વાસનારૂપોઽઙ્કુર ઉપાયેન નશ્યતિ । અદૃષ્ટરૂપોઽઙ્કુરસ્તુ નાદત્વા ફલં વિનશ્યતિ કેનચિદપ્યુપાયેન । અયમેવ શાસ્ત્રસિદ્ધાન્તઃ । અશુભકર્મણો જાયમાનાશુભવાસનારૂપઽઙ્કુરઃ સત્સઙ્ગાદ્યુપાયૈર્વિનશ્યતિ । શુભકર્મણો જાયમાનશુભવાસનારૂપોઽઙ્કુરો દુઃસઙ્ગાદિના વિનશ્યતિ । અતઃ પુરુષાર્થસાધનાનુષ્ઠાનમપિ સફલમેવ । ભોગહેત્વદૃષ્ટં તુ ભોગં વિના ન વિનશ્યતિ । તસ્માત્ “સ્વં ફલમદત્વા નૈવ કર્મ ક્ષીયતે” ઇતિ શાસ્ત્રોક્તં ન વિરુદ્ધ્યતે । ઇત્થમજ્ઞાનાં ફલભોગમન્તરા ન વિનશ્યતિ કર્મ । જ્ઞાનિનાં ત્વન્તરાપિ ફલભોગં કર્મ નિઃશેષં સમૂલં વિનશ્યતિ । યસ્માત્ કર્તા કર્મ ફલઞ્ચેત્યેતત્ ત્રયમપિ ન પરમાર્થતોઽસ્તિ । અપિ ત્વવિદ્યયા સ્વપ્નવત્કલ્પ્યતે । અસ્યા અવિદ્યાયા જ્ઞાનં વિરોધિ । તસ્માદવિદ્યાકલ્પિતાનિ કર્માદીન્યપિ જ્ઞાનેન નશ્યન્ત્યેવ । યથા નિદ્રયા કલ્પિતસ્વપ્નોપલબ્ધપદાર્થા જાગ્રતિ નિદ્રાક્ષયે નોપલભ્યન્તે, તથાવિદ્યારૂપનિદ્રયા પ્રતિભાસમાનકર્મકર્તૃફલાત્મકત્રિપુટ્યપિ જ્ઞાનાત્મકજાગ્રદ્દશાયામવિદ્યાનિવૃત્તાવભાવીભવતિ । ન હ્યેતેષાં જ્ઞાનમન્તરા નિઃશેષતો નાશઃ કદાપિ સમ્ભવતિ । કિઞ્ચેદાનીં ભોક્તુરિચ્છાભાવમાત્રેણ સઞ્ચિતકર્મફલભોગો

યદિ ન જાયેત, તદેશ્વરસઙ્કલ્પો મિથ્યા ભવેત્ । “ફલોપભોગમન્તરાજ્ઞાનાં કર્મ ન નશ્યતિ” ઇતીશ્વરસઙ્કલ્પઃ । ભોક્તુરિચ્છાભાવમાત્રેણ કર્મફલનાશાભ્યુપગમે ઈશ્વરસઙ્કલ્પો મિથ્યૈવ સ્યાત્ । ઈશ્વરઃ “સત્યકામઃ સત્યસઙ્કલ્પઃ” (છા. ૮.૧.૫, ૮.૭.૧) ઇતિ હિ શ્રુતિઃ । તસ્માદિચ્છાભાવમાત્રેણ સઞ્ચિતં કામ્યકર્મ ન ફલિષ્યતીતિ વિરુદ્ધમેવોચ્યતે । અપિ ચેચ્છાભાવમાત્રેણ સઞ્ચિતં કામ્યકર્મ ન ફલાય કલ્પત ઇતિ ચેત્ તર્હ્યશુભકર્મણોઽપિ ફલં ન કસ્યચિદપિ સમ્ભવેત્, અશુભકર્મફલે દુઃખે કસ્યાપીચ્છાનુદયાત્ । તસ્માજ્જ્ઞાનાભાવે કર્મફલાભાવો ન કેનચિદપ્યુપાયેન સમ્ભવતિ । અવશ્યં ચ કૃતં કર્મ સ્વફલં દદ્યાદેવ ।

## (૧૦૩)

જ્ઞાનં વિના કર્મફલં ન નશ્યેત્ - કર્માનુષ્ઠાનકાલે નિષ્કામસ્ય પુરુષસ્ય ફલેચ્છાભાવાત્કર્મ ફલાય ન કલ્પત ઇતિ વેદાન્તનિશ્ચયો યથા, તથૈવૈકભવિકવાદે કર્માનુષ્ઠાનાનન્તરમપિ યસ્ય પુરુષસ્ય સઞ્ચિતકર્મફલેચ્છા નિવર્તતે તસ્ય મુમુક્ષોઃ કર્મફલં ન જાયતે ઇતિ યદુક્તં પૂર્વં, તદ્વેદાન્તસિદ્ધાન્તાનભિજ્ઞતયૈવોક્તમ્ । ફલાભિસન્ધ્યનભિસન્ધિપૂર્વકં કૃતવતોરુભયોરપિ કર્માવશ્યં ફલં દદાત્યેવ । તત્ર નિષ્કામનયાનુષ્ઠિતં કર્મ મુમુક્ષોશ્ચિત્તશુદ્ધિમાત્રં ફલં જનયેત્ । ફલાભિસન્ધિપૂર્વકમનુષ્ઠિતં સકામસ્ય કર્મ ભોગરૂપમેવ ફલં પ્રયચ્છતિ, ન તુ ચિત્તશુદ્ધિમ્ । નિષ્કામનયાનુષ્ઠિતં કર્મ મુમુક્ષોઃ સત્ત્વશુદ્ધિશ્રવણાદિદ્વારા અપરોક્ષજ્ઞાનં જનયતિ, ન તુ કામ્યફલમ્ । નિષ્કામનયા કૃતમપિ કર્મ શ્રવણાદ્યભાવાદ્વા, કારણાન્તરાદ્વાનુત્પતન્નજ્ઞાનસ્યાનિચ્છતોઽપિ ભોગરૂપફલં પ્રયચ્છત્યેવેતિ વેદાન્તસિદ્ધાન્તઃ । તસ્માજ્જ્ઞાનાભાવે ફલમદત્વા નૈવ કર્મ ક્ષીયતે ।

## (૧૦૪)

નિત્યનૈમિત્તિકાનુષ્ઠાનજક્લેશઃ સઞ્ચિતપાપફલમિતિ ન - નિત્યનૈમિત્તિકકર્માનુષ્ઠાનજનિતક્લેશસ્ય પૂર્વસઞ્ચિતનિષિદ્ધકર્મફલરૂપત્વાત્ તેષાં ન પૃથક્ ફલમસ્તીતિ યદુક્તં, તન્ન । સઞ્ચિતનિષિદ્ધકર્મણામનેકપ્રકારત્વાત્ તત્ફલસ્ય દુઃખસ્યાપ્યનેકવિધત્વનિયમાત્કર્માનુષ્ઠાનજનિતક્લેશ એવ તેષાં ફલમિતિ વક્તું ન શક્યતે ।

## (૧૦૫)

સઞ્ચિતસકલકામ્યકર્મફલં નૈકેન શરીરેણાનુભવિતું શક્યં - કિઞ્ચ, સકલસઞ્ચિતકામ્યકર્મણાં ફલત્વેન સમુચ્ચિત્યૈકમેવ શરીરં જાયતે ઇતિ યત્પૂર્વમુક્તં, તન્ન સમ્ભવતિ । સઞ્ચિતનાનાકામ્યકર્મણામનેકવિરુદ્ધફલત્વાત્તેષં ફલમેકેનૈવ જન્મનાનુભવિતું ન શક્યતે । એકસ્મિન્નેવ જન્મનિ યુગપદેવ નાનાશરીરૈઃ સકલભોગાનનુભવતીતિ તુ સિદ્ધયોગિવિષયે ઘટતે, ન ત્વિતરસ્ય વિષયે । સિદ્ધયોગિનોઽપિ હ્યષ્ટૈશ્વર્યાદિસર્વસિદ્ધિસામર્થ્યે સત્યપિ વિના જ્ઞાનં ન મોક્ષઃ સિદ્ધ્યતીતિ વેદાન્તસિદ્ધાન્તઃ ।

(૧૦૬)

નિષ્કૃષ્ટાર્થસ્તુ - ઇત્થં ચ કામ્યકર્માણિ નિષિદ્ધકર્માણિ ચ વિહાય નિત્યનૈમિત્તિકકર્માણ્યનુતિષ્ઠતોઽજ્ઞસ્ય તત્તન્નિત્યનૈમિત્તિકકર્મણાં ફલાનુભાવાય, જન્માન્તરાર્જિતશુભાશુભકર્મણાં ફલાનુભવાય ચ પ્રત્યેકમનેકશરીરાણ્યુત્પદ્યેરન્નેવ, ન તુ મોક્ષઃ સમ્ભવેત્ । તસ્માજ્જ્ઞાનદ્વારા બન્ધનિવૃત્તિરેવાસ્ય ગ્રન્થસ્ય પ્રયોજનમિતિ યુક્તમેવોક્તમ્ । યથા સ્વપ્ને ઉપલભ્યમાનમિથ્યાવસ્તુ જાગ્રત્પ્રબોધમન્તરા ન નિવર્તતે, તથાવિદ્યાદશાયામુપલભ્યમાનમિથ્યાપ્રપઞ્ચોઽપિ જ્ઞાનાત્મકજાગરણમન્તરા ન નિવર્તતેતિ સિદ્ધમ્ ।

## (A. 107-108) સમ્બન્ધવિષયાક્ષેપઃ સમાધાનણ ચ-

(૧૦૭)

આક્ષેપઃ - અધિકાર્યાદ્યસિદ્ધેર્ન સમ્બન્ધોઽપિ સિદ્ધ્યતિ । તથા હિ, (૧) વિષયાસિદ્ધ્યા ગ્રન્થવિષયયોઃ પ્રતિપાદ્યપ્રતિપાદકભાવરૂપઃ સમ્બન્ધો ન સિદ્ધ્યતિ । (૨) અધિકારિફલયોરભાવાચ્ચાનયોઃ પ્રાપ્યપ્રાપકભાવરૂપસમ્બન્ધો ન સિદ્ધ્યતિ । (૩) અધિકાર્યસિદ્ધ્યા અધિકારિવિચારયોઃ કર્તૃકર્તવ્યભાવરૂપસમ્બન્ધો ન સિદ્ધ્યતિ । (૪) નિષ્ફલત્વાજ્જ્ઞાનસ્ય ગ્રન્થજ્ઞાનયોર્જન્યજનકભાવઃ સમ્બન્ધોઽપિ ન સિદ્ધ્યતિ । સફલં ચ વસ્તૂત્પદ્યેત ન નિષ્ફલં, જ્ઞાનં તુ પૂર્વોક્તરીત્યા ન સફલમ્ । (૫) કિઞ્ચ જ્ઞાનસ્ય સ્વરૂપાસિદ્ધ્યૈવ ન જ્ઞાનગ્રન્થયોઃ સમ્બન્ધો ઘટતે । સિદ્ધાન્તે હિ જીવબ્રહ્માભેદનિશ્ચય એવ જ્ઞાનમિત્યુચ્યતે । જીવબ્રહ્માભેદાસમ્ભવાદેવ સ ચ નિશ્ચયો મૃષેતિ પ્રાગ્વિષયપ્રસ્તાવે આક્ષિપ્તત્વાદભેદનિશ્ચયરૂપં જ્ઞાનં ન સિદ્ધ્યતિ । ઇત્થમધિકાર્યાદ્યનુબન્ધચતુષ્ટયાસિદ્ધ્યાસ્ય ગ્રન્થસ્યારમ્ભો વિફલ ઇતિ ।

(૧૦૮)

સમાધાનં - પૂર્વોક્તપ્રકારેણ ગ્રન્થસ્યાધિકારિવિષયપ્રયોજનાનાં શ્રુતિયુક્ત્યનુભવૈઃ પ્રસાધિતત્વાદેષાં સમ્બન્ધોઽપિ સમ્ભવતિ । તસ્માદસ્ય ગ્રન્થસ્યારમ્ભઃ શક્યત એવ કર્તુમ્ ।

ઇતિ શ્રીવાસુદેવબ્રહ્મેન્દ્રસરસ્વતીવિરચિતે સંસ્કૃતવિચારસાગરે અનુબન્ધાનાં વિશેષતો નિરૂપણં નામ દ્વિતીયસ્તરઙ્ગઃ ॥

## (A. 109-121)

# વિચારસાગરઃ

## Chapter 3 સંસ્કૃતવિચારસાગરે ગુરુશિષ્યસ્વરૂપનિરૂપણં નામ તૃતીયસ્તરઙ્ગઃ ।

(૧૦૯)

ગ્રન્થારમ્ભપ્રતિજ્ઞા - યસ્ત્વનુબન્ધચતુષ્ટયં સમ્યક્ વિજ્ઞાય વેદાન્તવિજ્ઞાનસુનિશ્ચિતાર્થં સ્થિતપ્રજ્ઞં વરિષ્ઠં શ્રોત્રિયં સદ્ગુરુમાસાદ્ય તત્પ્રસાદાદ્વેદાન્તગ્રન્થં પઠતિ, શૃણોતિ ચાત્યાદરેણ શ્રદ્ધયા ભક્ત્યા ચ, સ એવ મોક્ષસાધનં જ્ઞાનં પ્રાપ્નોતિ । ગુરુશિષ્યસંવાદરૂપેણાર્થનિરૂપણે કૃતે શ્રોતૃણાં સુખાવબોધો ભવેદિતિ ગુરુશિષ્યપ્રશ્નપ્રતિવચનરૂપેણ ગ્રન્થ આરભ્યતે ।

(૧૧૦)

ગુરુલક્ષણં - યઃ સાઙ્ગવેદાધ્યાયી તદર્થજ્ઞો જીવબ્રહ્મૈક્યવિષયકદૃઢતરનિશ્ચયાત્પરિનિષ્ઠિતાત્મસાક્ષાત્કારવાન્ સ એવ ગુરુઃ । ન હિ વેદાધ્યયનવત્ત્વમાત્રેણાત્મજ્ઞાનશૂન્યો ગુરુર્ભવતિ । આત્મજ્ઞોઽપિ વેદાધ્યયનશૂન્યઃ, સ્વયં મુક્તોઽપિ પરોપદેશયોગ્યગુરુર્ન સ્યાત્; યતો જિજ્ઞાસુશિષ્યહૃદ્ગતસન્દેહનિવર્તનક્ષમાણાં યુક્તીનાં પ્રતિભાનં વેદાધ્યયનશૂન્યસ્ય ન જાયતે । સન્દેહશૂન્યસ્યોત્તમસંસ્કારવતશ્ચરમજન્મનો જિજ્ઞાસોરુપદેશે સમર્થોઽપ્યયમ્, સાધારણ્યેન સર્વમુમુક્ષુજનોપદેશસામર્થ્યાભાવાન્નાચાર્યો ભવિતુમર્હતિ । તસ્માદ્વેદાધ્યયનસમ્પન્ન આત્મજ્ઞશ્ચૈવાચાર્ય ઇત્યુચ્યતે । સ હિ શિષ્યબુદ્ધિગતપઞ્ચવિધભેદાન્નાનાયુક્તિભિર્નિવર્તયિતું સમર્થઃ સ્યાત્ । તે ચ ભેદાઃ - (૧) જીવેશ્વરભેદઃ, (૨) જીવાનાં પરસ્પરભેદઃ, (૩) જીવજડભેદઃ, (૪) ઈશ્વરજડભેદઃ, (૫) જડાનાં પરસ્પરભેદ ઇતિ । સર્વાનેતાન્ ભેદાન્ ખણ્ડયિતું સ એવ સમર્થઃ । ભેદશ્ચ

૧. યથા સ્વયં માર્ગજ્ઞો માર્ગોપદેશં સમર્થસ્તથા બ્રહ્મસ્વરૂપજ્ઞ એવ બ્રહ્મોપદેશયોગ્યો ભવતિ ।

૨. પઞ્ચભેદખણ્ડનયુક્તયઃ-

(૧) ઘટાકાશમઠાકાશભેદવત્
જીવેશ્વરભેદોઽવિદ્યામાયારૂપોપાધિજનિતત્વાત્
કલ્પિતઃ ।

(૨) નાનાઘટાકાશભેદવત્ જીવાનાં પરસ્પરભેદ
આભાસસહિતાન્તઃકરણરૂપોપાધિજનિતત્વાત્ કલ્પિતઃ ।

(૩) જીવજડભેદઃ સાભાસાન્તઃકરણનિરાભાસનામરૂપમાયોપાધિજનિતત્વાત્ કલ્પિતઃ ।
(૪) ઈશ્વરજડભેદઃ સાભાસમાયાનામરૂપમાયોપાધિજનિતત્વાત્ કલ્પિતઃ ।
(૫) રજ્જ્વારોપિતસર્પદણ્ડાદિભેદવત્ જડાનાં પરસ્પરભેદો
નામરૂપમાયોપાધિજનિ૦ તત્વાત્ કલ્પિતઃ । ભયહેતુઃ ।
"ઉદરમન્તરં કુરુતે" (તૈ. બ્ર. ૭) "દ્વિતીયાદ્વૈ
ભયં ભવતિ" (બૃ. ૧.૪.૨) ઇત્યાદિશ્રુતિભ્યઃ ।
તસ્માદ્ભેદોઽવશ્યં ખણ્ડનીયઃ । ઉક્તલક્ષણ એવાચાર્યઃ સ્વશિષ્યં
"અવિદ્યાદિસર્વમલશૂન્યાદ્વિતીયબ્રહ્મૈવાહમસ્મિ"
ઇતિ સાક્ષાદપરોક્ષાનુભવવન્તં કર્તું શક્નુયાત્ ।
તાદૃશસાક્ષાત્કારવાનેવ શિષ્યઃ, "સર્વોઽપિ
સંસારો દૃશ્યપ્રપઞ્ચો દ્વૈતઃ સ્વપ્નાદિવન્મયિ ચિન્માત્રે
સ્વાજ્ઞાનવશાન્મિથ્યા પ્રતિભાસતે" ઇતિ સાક્ષાજ્જાનીયાત્ ।
ઈદૃશાદ્ભુતદુર્દર્શસ્વાત્મતત્ત્વોપદેષ્ટૈવ આચાર્ય ઇત્યુચ્યતે ।
સંસારમહાગ્રાહગ્રસ્તં શિષ્યં તન્મુખાજ્જીવબ્રહ્માદ્વૈતોપદેશેન યો
મોચયતિ સ એવ ગુરુઃ । બહવો ગુરવઃ સન્તિ શિષ્યવિત્તાપહારકાઃ ।
દુર્લભોઽયં ગુરુર્દેવિ શિષ્યહૃત્તાપહારકઃ ॥ (ગુ. ગી. ૧૬૦)
ઇતિ સ્મૃતેઃ ।

## (૧૧૧)

શિષ્યલક્ષણં - વેદાન્તગ્રન્થપ્રવૃત્તિસમ્પાદકં પ્રથમતરઙ્ગે યદધિકારિવિશેષણમુક્તં સાધનચતુષ્ટયરૂપં તત્સમ્પત્તિરેવ શિષ્યસ્ય લક્ષણં ભવતિ ।

## (૧૧૨)

ગુરુભક્તેઃ ફલં - ઈશ્વરાપેક્ષયાપ્યધિકતયા શ્રદ્ધાભક્તિપ્રણામાદિકં ગુરૌ શિષ્યેણ કર્તવ્યમ્ । યતોઽખિલશાસ્ત્રવ્યુત્પન્નોઽપિ ગુરૂપદેશમન્તરા સ્વાત્મતત્ત્વં ન જાનીયાત્ । "નૈષા તર્કેણ મતિરાપનેયા" (ક. ૧.૨.૯) "નાયમાત્મા પ્રવચનેન લભ્યો ન મેધયા ન બહુના શ્રુતેન" (ક. ૧.૨.૨૩, મુ. ૩.૨.૩) "આચાર્યવાન્ પુરુષો વેદ" (છા. ૬.૧૪.૨) "આચાર્યાદ્ધૈવ વિદ્યા વિદિતા સાધિષ્ઠં પ્રાપત્ (છા. ૪.૯.૩) ઇતિ શ્રુતેઃ । અયમેવાર્થો વક્ષ્યમાણદૃષ્ટાન્તેન સ્ફુટીક્રિયતે । તથા હિ, વેદરૂપસમુદ્રો ગુરૂપદેશાભાવે ક્ષારો ભવતિ । ક્ષારસાગરે પતિતસ્તજ્જલં પીત્વા કેવલં દુઃખમેવાનુભવતિ યથા, તથા ગુરૂપદેશં વિનૈવ શાસ્ત્રાન્તરકુશલા અપિ સ્વાતન્ત્ર્યેણ વેદાર્થં વિચારયન્તો ગુરુસમ્પ્રદાયાભાવાદ્ભેદ એવ સર્વવેદાર્થ ઇતિ સ્વમતિવિભવાનુસારેણ નિશ્ચિત્ય ભેદરૂપક્ષારજલમેવાસ્વાદ્ય જનનમરણપ્રબન્ધાત્મકદુઃખમેવાવિશ્રમમનુભવન્તિ; ન તુ મુક્તિરૂપનિત્યનિરતિશયાનન્દં લભન્તે ।

૧. જનનમરણાત્મકં ભયમ્ ।

૨. શ્રીવાસિષ્ઠદ્વિવિધભાગવતસૂતસંહિતાદિસકલેતિહાસપુરાણાદિકેષ્વદ્વૈતમેવ પ્રતિપાદ્યતે । તથાષ્ટોત્તરશતોપનિષતસ્વપિ । અપિ ચાનધિગતાબાધિતાપૂર્વત્વાચ્ચાદ્વૈતમેવ શાસ્ત્રાર્થઃ । કિઞ્ચ "બૃહ બૃહિ વૃદ્ધૌ" ઇતિ ધાતુર્વૃદ્ધિમાચષ્ટે । સા ચ વૃદ્ધિરત્ર પ્રતિયોગિવિશેષાનુપાદાનાન્નિરતિશયૈવ વિવક્ષિતા । સતિ તુ વસ્ત્વન્તરે તેન પરિચ્છેદાદ્વૃદ્ધેર્નિરતિશયત્વં ભજ્યતે । તથા ચ વસ્ત્વન્તરકૃતપરિચ્છેદરહિતમેવ બ્રહ્મશબ્દવાચ્યમ્ । દેશકાલયોરપિ વસ્તુત્વાત્, વસ્તુમાત્રસ્ય ચ બ્રહ્મસ્વરૂપેऽધ્યસ્તત્વેન, વસ્તુકૃતપરિચ્છેદનિરાસેનૈવ બ્રહ્મણિ દેશકાલકૃતપરિચ્છેદનિરાસો બોધ્યઃ । જીવબ્રહ્મૈક્યોપદેષ્ટૈવ ગુરુરિતિ ગુરુલક્ષણં નિરૂપતિમ્; તાદૃશાદખણ્ડબ્રહ્માત્મૈકત્વવિદઃ સદ્ગુરોર્મુખાદ્યે વેદાન્તવિચારં કુર્વન્તિ, તે દેવામૃતાદપ્યધિકં નિરતિશયં બ્રહ્માનન્દમનુભવન્તિ । યથા સ્વભાવતઃ ક્ષારં સમુદ્રજલં પાત્રેણ ગૃહીત્વા પીતઞ્ચેત્તદા ક્ષારમેવ ભવતિ, તદેવ સમુદ્રજલં મેઘૈરાકૃષ્ય વૃષ્ટં સત્ પીતં ચેદતિમધુરં ભવતિ; તથા વેદાર્થોऽપિ સ્વાતન્ત્ર્યેણ ગુરુસમ્પ્રદાયં વિના વિચારિતશ્ચેજ્જનનમરણદુઃખહેતુર્ભવતિ, સ એવાદ્વૈતબ્રહ્માત્માપરોક્ષાનુભવિશ્રી સદ્ગુરુમુખાદવાપ્યતે ચેન્નિત્યનિરતિશયાપરોક્ષાખણ્ડાનન્દસ્વરૂપાત્માધિગમાય ભવતિ । તસ્માદ્ગુરુમુખાદેવ વેદાર્થો ગ્રાહ્યો વૈદિકેન ।

## (૧૧૩)

બ્રહ્મજ્ઞાદ્ગુરોરેવ વેદાર્થો ગ્રાહ્યઃ - યથા દૃતિમુખાદ્વા ઘટમુખાદ્વા ગૃહીતં સમુદ્રજલં સ્વવિલક્ષણરસાસ્વાદનહેતુર્ન ભવતિ, તથાજ્ઞપુરુષમુખાદ્ગૃહીતં વેદરૂપસમુદ્રસ્યાર્થરૂપં જલં વિલક્ષણાનન્દજનકં ન ભવતિ । તસ્માદજ્ઞઃ પાઠકગુરુર્દૃતિઘટાદિસમઃ । જ્ઞાની ગુરુર્મેઘસમ ઇતિ પ્રાગુક્તમ્ । તસ્માન્મુમુક્ષુર્દૃતિઘટાદિતુલ્યમજ્ઞપાઠકગુરું હિત્વા મેઘતુલ્યબ્રહ્મજ્ઞગુરુમુખાદ્વેદાર્થશ્રવણં કુર્યાત્ "તદ્વિજ્ઞાનાર્થં સ ગુરુમેવાભિગચ્છેત્ સમિત્પાણિઃ શ્રોત્રિયં બ્રહ્મનિષ્ઠમ્" (મુ. ૧.૨.૧૨) "ઉપદેક્ષ્યન્તિ તે જ્ઞાનં જ્ઞાનિનસ્તત્ત્વદર્શિનઃ" (ભ. ગી. ૪.૩૪) ઇત્યાદિશ્રુતિસ્મૃતિભ્યઃ ।

## (૧૧૪)

પૌરુષેયપ્રબન્ધાદપિ જ્ઞાનં જાયેત - બ્રહ્મવિન્મુખાદેવ વેદાર્થો ગ્રહીતવ્ય ઇતિ પૂર્વાવર્તે ઉક્તત્વાદ્વેદાન્તવાક્યાર્થવિચારેણૈવ જીવબ્રહ્મૈક્યજ્ઞાનં જાયેત, ન ત્વિતરૈઃ પૌરુષેયૈઃ સંસ્કૃતગ્રન્થૈર્વા ભાષાપ્રબન્ધૈર્વેતિ સિદ્ધમ્ । અસ્ય પ્રબન્ધસ્ય પૌરુષેયત્વાદારમ્ભો વ્યર્થ ઇત્યાશઙ્કાયાં ઉચ્યતે - “સ યો હ વૈ તત્ પરં બ્રહ્મ વેદ બ્રહ્મૈવ

૧. બિભેત્યલ્પશ્રુતાદ્વેદો મામયં પ્રતરિષ્યતિ ।
ઇતિહાસપુરાણાભ્યાં વેદં સમુપબૃંહયેત ॥

આચિનોતીતિ હિ શાસ્ત્રમાચારે સ્થાપયત્યપિ ।
સ્વયમાચરતે યસ્માદાચાર્યસ્તેન કથ્યતે ॥

ગુકારો હ્યન્ધકારઃ સ્યાત્ રુકારસ્તન્નિવર્તકઃ ।
બ્રહ્માન્ધકારનાશિત્વાદ્ગુરુરિત્યુચ્યતે બુધૈઃ ॥

૨. પૌરુષેયવેદાન્તપ્રકરણગ્રન્થૈર્જ્ઞાનં ન જાયેતેતિ વદન્ વાદી પ્રષ્ટવ્યઃ । (૧) કિં તાદૃશગ્રન્થૈર્વેદવચનાનુસારિત્વાભાવાન્ન જ્ઞાનં જાયેત, (૨) ઉત વેદાર્થાનુસારિત્વાભાવાદ્વેતિ । વેદવચનાનુસારિત્વાભાવાદિતિ ચેત્ - સ્મૃતીતિહાસપુરાણાદીનામપિ તથાત્વાત્તેભ્યોઽપિ જ્ઞાનાનુત્પત્તિપ્રસઙ્ગઃ । અથ વેદાર્થાનુસારિત્વાભાવાદિતિ ચેત્, તન્ન । યથા બહવઃ સ્મૃતિપુરાણાદયો ગ્રન્થા વેદાર્થસારિણ એવ તથા સંસ્કૃતપ્રાકૃતભાષાદિમયવેદાન્તપ્રકરણગ્રન્થા અપિ બહવો વેદાર્થાનુસારિણો ભવન્ત્યેવ । યથા ચાયુર્વેદાનુસારિસંસ્કૃતપ્રાકૃતાદિગ્રન્થા રોગતિન્નિવર્તકૌષધાદિજ્ઞાનં જનયન્તિ, તથા વેદાર્થાનુસારિસંસ્કૃતપ્રાકૃતાદિવેદાન્તપ્રકરણગ્રન્થા અપિ અદ્વિતીયાત્મવિજ્ઞાનં તદુપાયજ્ઞાનં ચ જનયેયુરેવ । ભવતિ” (મુ. ૩.૨.૯) ઇત્યાદિશ્રુત્યા બ્રહ્મવિત્ જ્ઞાની બ્રહ્મૈવ । અત એવ તસ્ય વાક્ વેદરૂપૈવ । સા ચ વાક્, સંસ્કૃતરૂપા વાસ્તુ ભાષાપ્રબન્ધાદિરૂપા વાસ્તુ, સર્વથા તસ્ય વચનં ભેદભ્રમં નિવર્તયતિ નિઃશેષમ્ । નનુ “વેદાન્તવિજ્ઞાનસુનિશ્ચિતાર્થાઃ” (મુ. ૩.૨.૬) “તં ત્વૌપનિષદં પુરુષમ્” (બૃ. ૩.૯.૨૬) ઇત્યાદિશ્રુતિભિર્વેદવાક્યાદેવ બ્રહ્મજ્ઞાનં જાયેત ન તુ પ્રમાણભૂતૈરપિ પ્રબન્ધાન્તરૈરિતિ ચેન્ન;

તથાદર્શનાત્ । આયુર્વેદોક્તરોગતન્નિદાનસ્થાનૌષધાદીનાં જ્ઞાનમિતરસંસ્કૃતવૈદ્યગ્રન્થૈઃ પ્રાકૃતભાષાદિગ્રન્થૈશ્ચ યથા સમમેવોત્પદ્યતે, તથા સર્વેષાં પ્રત્યક્ચૈતન્યાભિન્નાદ્વિતીયબ્રહ્મજ્ઞાનમપિ પૌરુષેયગ્રન્થૈરપિ જાયેતૈવ । અત એવ સર્વજ્ઞૈર્મુનિભિર્મહર્ષિભિર્બ્રહ્મનિષ્ઠૈઃ વેદાન્તાર્થાનુવાદકૈઃ સ્મૃતીતિહાસપુરાણાદિબહુગ્રન્થૈરદ્વિતીયબ્રહ્માત્મવિદ્યા સ્ફુટં વિવૃતા વર્તતે । વિનૌપનિષદા જ્ઞાનં ચેન્નોત્પદ્યેત, તદા તૈઃ સ્મૃત્યાદિપ્રણયનં વ્યર્થં પ્રસજ્યેત । તસ્માદુપનિષદામવિરોધેનાત્મસ્વરૂપપ્રતિપાદનપરૈર્યૈઃ કૈશ્ચિદપિ ગ્રન્થૈર્જ્ઞાનં જાયેતૈવેત્યભ્યુપગન્તવ્યમ્ । તત્પ્રતિપાદકવાક્યાનિ વૈદિકાનિ વા સન્તુ ભાષાન્તરભૂતાનિ વા, નૈવાસ્તિ વિશેષઃ । એવઞ્ચ પૌરુષેયગ્રન્થૈરપિ જ્ઞાનં જાયેતેતિ સિદ્ધમ્ ।

## (૧૧૫)

શ્રીગુરુસેવા - યસ્ય બ્રહ્મવિદો વાક્ વેદવાક્યસમા તમેવ બ્રહ્મવિદમાચાર્યબુદ્ધ્યોપાસીત જિજ્ઞાસુઃ । યદોપાસનયા ગુરુરાવર્જિતો ભવતિ તદા જિજ્ઞાસુર્નિજસ્વરૂપમપરોક્ષીકરોતિ । એતેન ગુરુસેવાભ્યધિકેશ્વરસેવાત્ ઇતિ સિદ્ધ્યતિ । ઈશ્વરસેવાદૃષ્ટફલમાત્રહેતુઃ, સદ્ગુરુસેવા તુ દૃષ્ટાદૃષ્ટોભયફલહેતુઃ । ધર્માધર્મોત્પત્તિદ્વારા ફલહેતુર્યો ભવતિ સોઽદૃષ્ટફલહેતુરિતિ, ધર્માધર્મોત્પત્તિં વિનૈવ સાક્ષાત્ફલહેતુર્યો ભવતિ સ દૃષ્ટફલહેતુરિતિ ચોચ્યતે । ઈશ્વરસેવા ધર્મોત્પત્તિદ્વારાન્તઃકરણશુદ્ધિરૂપફલહેતુર્ભવતિ; અત એવેશ્વરસેવાદૃષ્ટફલહેતુઃ । સદ્ગુરુસેવા તુ ધર્મનિરપેક્ષા આચાર્યપ્રસાદમાત્રેણોપદેશાત્મકફલહેતુર્ભવતિ । તસ્માત્ દૃષ્ટફલહેતુઃ સદ્ગુરુસેવેત્યુચ્યતે । કિઞ્ચ સદ્ગુરુસેવા ધર્મોત્પત્તિદ્વારાન્તઃકરણશુદ્ધિરૂપફલહેતુશ્ચેશ્વરસેવાવદ્ભવતિ । અતોઽદૃષ્ટફલહેતુરપિ ભવતિ । એતેનાચાર્યસેવા હીશ્વરોપાસનાતોઽધિકતરા વિજ્ઞાયતે । તસ્માત્સર્વથા જિજ્ઞાસુમુમુક્ષુભિઃ શ્રીસદ્ગુરુવરો બ્રહ્મનિષ્ઠ એવ સદા સેવ્યઃ ।

## (૧૧૬)

ગુરુસેવાક્રમઃ - શ્રીસદ્ગુરુલાભોત્તરક્ષણે તદ્દર્શનમાત્રાત્ સા૧. પદ્ભ્યાં કરાભ્યામૂરુભ્યામુરસા શિરસા ભુવિ ।
પતનં દીર્ઘતરુવત્ પ્રણામોઽષ્ટાઙ્ગ ઉચ્યતે ॥

પદ્ભ્યાં કરાભ્યાં જાનુભ્યામુરસા શિરસા દૃશા ।
વચસા મનસા ચૈવ પ્રણામોઽષ્ટાઙ્ગ ઉચ્યતે ॥

ષ્ટાઙ્ગં નમસ્કૃત્ય તચ્ચરણકમલરજાંસિ પરિશુદ્ધતમાનિ સ્વોત્તમાઙ્ગે ધારયેત્ । પશ્ચાત્ સદ્ગુરુપ્રસાદાદ્બન્ધમોચનાકાઙ્ક્ષી તીવ્રતરમુમુક્ષુર્ગુરુકુલે બ્રહ્મચારી વસેત્ । તસ્મૈ સ્વશરીરમનોવાગ્ધનાનિ સમર્પયેત્ ।

(૧૧૭)

શરીરાર્પણં - શ્રીસદ્ગુરોરભિમતશુશ્રૂષાં બહુતરં કૃત્વા મનાગપિ તદાજ્ઞાનતિલઙ્ઘનેન વર્તનમેવ શરીરાર્પણમિત્યુચ્યતે ।

(૧૧૮)

મનોઽર્પણં - બ્રહ્મવિષ્ણુશિવાત્મક એવ શ્રીસદ્ગુરુર્નાન્ય ઇતિ મનસા નિશ્ચિત્ય તસ્મિન્ પરમાં ભક્તિં પ્રેમાતિશયં ચ કૃત્વા, યથા તસ્ય કૃપાકટાક્ષઃ સ્વસ્મિન્ પતેત્તથા તમનુવર્તેત । સ્વપ્નેઽપિ તસ્મિન્ દોષદૃષ્ટિં ન કુર્યાત્ । સ એવ હરિઃ, હરઃ, બ્રહ્મા, ગઙ્ગા, સૂર્યઃ, ઇતિ વિજાનીયાત્ । નિરતિશયક્ષેમાર્થી મુમુક્ષુઃ શ્રીસદ્ગુરોઃ સ્વરૂપં હૃદિ ધારયન્ સદા તમેવ ધ્યાયેત્ । એતત્સર્વં મનોઽર્પણમુચ્યતે ।

(૧૧૯)

વાગર્પણં - "યાન્યસ્માકં સુચરિતાનિ તાનિ ત્વયોપાસ્યાનિ" (તૈ. શિ. ૧૧-૨) ઇત્યાદિશ્રુત્યુક્તપ્રકારેણ શ્રીસદ્ગુરુપ્રારબ્ધકર્માધીનશરીરાદિગતગુણગણકીર્તનમન્તરા તન્નિષ્ઠદોષાણામનુચ્ચારણમેવ વાગર્પણમુચ્યતે ।

(૧૨૦)

ધનાર્પણં - પત્નીપુત્રભૂમિપશુદાસીદાસદ્રવ્યગૃહધાન્યાનાં ધનમિતિ લોકપ્રસિદ્ધિઃ । એતત્સર્વં સન્ન્યસ્ય શરણત્વેન શ્રીસદ્ગુરોરુપસદનમેવ ધનાર્પણમુચ્યતે । સન્ન્યાસિત્વેન સર્વસઙ્ગપરિત્યાગસ્ય કૃતત્વાત્કૃતાર્થઃ શ્રીસદ્ગુરુર્ન ધનાદિકં કિઞ્ચિદપ્યપેક્ષેત શિષ્યેભ્યઃ । અત એવ સર્વપરિગ્રહત્યાગપૂર્વકં સ્વાર્પણમેવ ગુરવે ધનાર્પણમિત્યુચ્યતે । યદિ સ્યાદ્ગુરુર્ગૃહાશ્રમી તદા સર્વં ધનં તસ્મા એવ સમર્પયેત્ । "ઇમે વિદેહાઃ અયમહમસ્મિ" (બૃ. ૪.૨.૪)

૧. સા ચ ભક્તિર્નવવિધા - (૧) શ્રવણં (૨) કીર્તનં (૩) સ્મરણં
(૪) પાદસેવનં (૫) અર્ચનં (૬) વન્દનં (૭) દાસ્યં (૮) સખ્યં
(૯) આત્મનિવેદનમ્, ઇતિ તથા ચોક્તમન્યત્રશ્રવણં કીર્તનં ચૈવ
સ્મરણં પાદસેવનમ્ । અર્ચનં વન્દનં દાસ્યં સખ્યમાત્મનિવેદનમ્ ॥

ઇતિ ।

૨. શ્રીસદ્ગુરુર્યદા શિષ્યે પ્રસન્નો ભવતિ તદા સ વિષ્ણુરૂપેણ
વર્તતે । યદા ક્રુદ્ધસ્તદા શિવરૂપેણ, યદા રાજસવ્યાપારેણ

યુક્તસ્તદા બ્રહ્મરૂપેણ, યદા પ્રશાન્તસ્તદા ગઙ્ગારૂપેણ, યદા
વેદાન્તવાક્યકરણૈઃ શિષ્યભ્રમસંશયાદિસહિતાજ્ઞાનં નિઃશેષં
નિવર્તયતિ તદા સૂર્યરૂપેણ ચ વર્તત ઇતિ વિજ્ઞેયમ્ । ઇત્થં
બ્રહ્મનિષ્ઠે શ્રીસદ્ગુરૌ શિષ્યેણ સાક્ષાદીશ્વરબુદ્ધિઃ કાર્યા ।
સ્વપ્નેઽપિ તદ્દોષગ્રાહિણા ન ભાવ્યમ્ । જ્ઞાનલાભાય જ્ઞાનાવાપ્તેઃ
પ્રાક્ ગુરુઃ સેવ્યઃ । પરમપિ કૃતઘ્નતાદોષનિવૃત્તયે
ગુરુઃ સેવ્યઃ । તથા ચોક્તમાદૌ જ્ઞાનાપ્તયે પશ્ચાત્
કૃતઘ્નત્વનિવૃત્તયે । યાવજ્જીવં ત્રયો વન્દ્યા વેદાન્તો
ગુરુરીશ્વરઃ ॥ ઇતિ । ઇતિવત્ । અયમપરો ધનાર્પણપ્રકારઃ । ન
ચ બ્રહ્મવિચ્ચેદ્ગુરુઃ સ કથં ગૃહાશ્રમી સ્યાદિતિ શઙ્ક્યમ્ ।
વસિષ્ઠવિશ્વામિત્રવ્યાસયાજ્ઞવલ્ક્યોદ્દાલકરામકૃષ્ણાદયોઽપિ
શ્રીસદ્ગુરુવો ગૃહાશ્રમ એવાવર્તન્ત ઇતિ
શ્રુતિસ્મૃતિશતેભ્યોઽવગમ્યતે । તસ્માદ્ગૃહાશ્રમે વર્તમાના અપિ
બ્રહ્મનિષ્ઠા ગુરવો ભવેયુઃ ।

## (૧૨૧)

શ્રીસદ્ગુરુલાભાનન્તરં શિષ્યાચરણપ્રકારઃ - નિઃશ્રેયસાર્થિના મુમુક્ષુણા પૂર્વોક્તપ્રકારેણ શરીરાદીન્ શ્રીસદ્ગુરવે સમર્પ્ય, તદ્વસતાવન્યત્ર વા ગુરોઃ સમીપે વસતા, દૃઢતરાત્માપરોક્ષસાક્ષાત્કારપર્યન્તં ભિક્ષાશિના ચ ભાવ્યમ્ । તાઞ્ચ ભિક્ષાં સ્વાતન્ત્ર્યેણ ન ભુઞ્જીત, શ્રીસદ્ગુરુસન્નિધૌ સમર્પયેત્ । શ્રીસદ્ગુરોરનુજ્ઞા સ્યાચ્ચેત્ તદાશ્નીયાદ્ભિક્ષામ્ । યદિ ગુરોઃ શિષ્યભક્ત્યતિશયપરીક્ષણાય નાનુમન્યેત તદા તૂષ્ણીમેવોપવસેત્ । ન ચૈકસ્મિન્દિવસે દ્વિર્ભિક્ષાર્થં ગ્રામં પ્રવિશેત્ । તતઃ પરેદ્યુર્યથાવિધિ ભિક્ષાચર્યં ચરેત્ । એવં ગુરું સેવમાનો ન મનાગપિ મનોવિકૃતિમાદધેત । યદા ચિરકાલમેવં સેવ્યમાનો ગુરુઃ પ્રસીદતિ તદા તત્સમયં પ્રતીક્ષ્ય સ્વજિજ્ઞાસાં તસ્મૈ નિવેદયેત્ ।

સ્વામિન્નમસ્તે નતલોકબન્ધો કારુણ્યસિન્ધો પતિતં ભવાબ્ધૌ ।
મામુદ્ધરાત્મીયકટાક્ષદૃષ્ટ્યા ઋજ્વ્યાતિકારુણ્યસુધાભિવૃષ્ટ્યા ॥ (વિ. ચૂ. ૩૭)

ઇત્યાદિસ્તુતિપૂર્વકં પ્રશ્નેચ્છાં નિવેદયેત્ । યદિ પૃચ્છેત્યનુમતિં દદ્યાત્તદા સ્વસંશયો નિવેદનીયઃ । શિષ્યસ્યાનન્તજન્માન્તરાર્જિતપુણ્યપુઞ્જવશાત્ શ્રીસદ્ગુરુઃ કૃપયા કેવલં ધનાદ્યનપેક્ષયા યદ્યુપદિશેત્, તદોત્તમાધિકારિણસ્તસ્ય નિરતિશયકલ્યાણં જાયેત્ । તત્રોત્તમોત્તમબ્રહ્મનિષ્ઠશ્રીસદ્ગુરુસેવાયાઃ ફલં દ્વિવિધમ્; શ્રીસદ્ગુરોર્નિરતિશયપ્રસાદલાભઃ પ્રથમં ફલમ્, દ્વિતીયં ફલં તુ કામક્રોધાદિસર્વમલનિવૃત્તિદ્વારાન્તઃકરણશુદ્ધિઃ । એતદ્દ્વયમપ્યુત્તમાધિકારિણઃ શિષ્યસ્ય સિદ્ધમેવ ભવતિ ।

ગુરવે યો મનોવાચૌ કાયાર્થાદિ સમર્પ્ય તમ્ ।
સેવતે ભવતિ બ્રહ્મ પ્રસાદાતિશયાદ્ગુરોઃ ॥

યસ્તુ મનોવાક્કાયાદિકં શ્રીસદ્ગુરવે સમર્પ્યાહોરાત્રં તં શુશ્રૂષતે સ હિ બ્રહ્મૈવ ભવતિ । સદ્ગુરુશ્ચાસ્મૈ સાહાય્યં કરોતિ ।

ઇતિ શ્રીવાસુદેવબ્રહ્મેન્દ્રસરસ્વતીવિરચિતે સંસ્કૃતવિચારસાગરે ગુરુશિષ્યસ્વરૂપનિરૂપણં નામ તૃતીયસ્તરઙ્ગઃ ॥

૧. અયં ચ નિયમો બ્રહ્મચારિસન્ન્યાસિનામ્, ન ગૃહસ્થસ્ય ।

# વિચારસાગરઃ

## Chapter 4 સંસ્કૃતવિચારસાગરે ઉત્તમાધિકારિણ ઉપદેશનિરૂપણં નામ ચતુર્થસ્તરઙ્ગઃ ।

ઇદાનીં ગુરુશિષ્યસંવાદાત્મિકા કાચન અપૂર્વાખ્યાયિકા વિરચ્યતે । એતચ્છ્રવણમાત્રેણ જિજ્ઞાસુર્મુમુક્ષુરાત્મવિચારે ભૃશં સમર્થો ભવેત્ ।

### (A. 122-125) શુભસન્તતેઃ રાજ્ઞઃ, તત્ત્વદૃષ્ટિરિતિ, અદૃષ્ટિરિતિ, તર્કદૃષ્ટિરિતિ સમાખ્યાતાનાં તત્પુત્રાણાં ચ કથા-

(૧૨૨)

શુભસન્તતેસ્ત્રૈલોક્યાધિપત્યં - શુભસન્તતિર્નામ કશ્ચન રાજા લોકત્રયમનુશશાસ । તસ્યાસંસ્ત્રયઃ પુત્રાઃ - તત્ત્વદૃષ્ટિઃ, અદૃષ્ટિઃ, તર્કદૃષ્ટિરિતિ ચ વિખ્યાતાઃ, ચતુઃશાસ્ત્રપ્રવીણાશ્ચ । તે ચ ક્રમેણાસ્મિન્ ગ્રન્થે ચતુર્થપઞ્ચમષષ્ઠતરઙ્ગેષૂત્તમમધ્યમકનિષ્ઠાધિકારિત્વેન વર્ણ્યન્તે । રાજા તુ શુભસન્તતિઃ શૈશવં ક્રીડાયામ્, યૌવનં ચ સ્ત્રીભોગે વિનિયુઞ્જાનોઽપિ સ્વભુજબલેન લોકત્રયમપિ ન્યાય્યેન માર્ગેણાપાલયત્ ।

(૧૨૩)

પુત્રેષુ રાજ્યં સમર્પ્ય શુભસન્તતેઃ પ્રવ્રજનં - તસ્ય રાજ્ઞઃ કદાચિત્સ્વપૂર્વપુણ્યવશાત્ "આત્મા અજો નિત્યો નિરતિશયાનન્દસ્વરૂપશ્ચ; તતોઽન્યત્ સર્વં દુઃખાત્મકમ્" ઇતિ વિવેક ઉદિયાય । તદા સોઽચિન્તયત્ - "અહમાત્મવિચારં કુર્યામ્, ત્રયઃ પુત્રા મમ લોકત્રયં પાલયન્તુ" ઇતિ । તતો મન્ત્રિદ્વારા પુત્રાન્ સ્વસમીપમાનાય્ય સ્વસ્ય ભોગે વૈરાગ્યમેકાન્તે રતિં ચ તેભ્યો નિવેદ્ય રાજ્યાધિકારમઙ્ગીકર્તું તાનાજ્ઞાપયન્નેકૈકસ્મૈ એકૈકં લોકં વિભજ્યાદાત્ । વિભજ્ય રાજ્યાદાને પુત્રાણાં મિથઃ કલહઃ, તન્મૂલકતયા પ્રજાનાં દુઃખં ચ ભવેદિતિ મન્વાનો રાજા સ્વયમેવ સ્વરાજ્યં પુત્રેભ્યો વિભજ્યાદાત્ । યત્ર માનવો મૃતઃ સન્ પરમેશ્વરાત્તારકમન્ત્રોપદેશં લબ્ધ્વાનાયાસેન મુક્તિં લભેત, યત્ર ચ સર્વાન્તર્યામી વિશ્વેશ્વરઃ સદા સન્નિહિતઃ, યત્ર ચાતિગભીરા ગઙ્ગા "ઉત્તરવાહિની" ઇતિ પ્રથિતા પ્રવહતિ, તત્ર કાશીનગરે સ્થિત્વા સ્વસ્વ૧. શ્રુત્યાદિષૂપલભ્યમાનજનકયાજ્ઞવલ્ક્યાદ્યાખ્યાયિકાવદિયં

ગુરુશિષ્યસંવાદાત્મિકા કથા પુરાણાદ્યપ્રસિદ્ધાપિ સ્વબુદ્ધિમાત્રેણાપૂર્વતયા કલ્પ્યતે ।

૨. કાશ્યાં હિ જન્તોઃ પ્રાણેષૂત્ક્રમમાણેષુ રુદ્રસ્તારકં બ્રહ્મ વ્યાચષ્ટે, યેનાસાવમૃતો ભૂત્વા મોક્ષં લભતે । યત્ર કુત્રાપિ વા કાશ્યાં મરણે સ મહેશ્વરઃ । જન્તોર્દક્ષિણકર્ણે તુ મત્તારં સમુપાદિશેત્ ॥ ઇતિ શ્રુત્યભિપ્રાયોઽત્ર દર્શિતઃ । રાજ્યં પાલયિતું પુત્રાનાદિદેશ સ રાજા । પુનરપિ સ પુત્રાનવોચત્ - “અયમપારઃ સંસારો દુઃખરૂપઃ । પામરાસ્તુ તં સુખરૂપં મત્વા સાંસારિકભોગાય ધનમેવાત્યાદરેણોપાર્જયન્તિ । ન તુ મુક્ત્યર્થમાત્મવિચારં કુર્વન્તિ । ઈદૃશપામરજનૈઃ સહ વાસં વિહાયૈકાન્તે નિજસુખલાભાયાહં યતિષ્યે” ઇતિ ।

## (૧૨૪)

પુત્રાણામપિ રાજ્યજિહાસા - પિતૃવાક્યમિદં શ્રુત્વા સદ્યુક્તિબુદ્ધિયુક્તાસ્ત્રયોઽપિ પુત્રા એકાન્તે સમ્ભૂયૈવં સમાલોચયન્ - “પિતાસ્માન્ સંસારસાગરે દુઃખોદર્કે પાતયિત્વા સ્વયં બ્રહ્માનન્દં પ્રતિપિત્સતિ । યસ્માદાત્મવિચારાસક્તોઽપારદુઃખરૂપત્વાદખણ્ડમસપત્નમપિ રાજ્યં પિતા જિહાસતિ, તસ્માદ્વયમપીદં રાજ્યમત્યન્તદુઃખરૂપં પરિત્યજેમ” ઇતિ ।

## (૧૨૫)

સ્વગૃહાન્નિર્ગત્ય ત્રયાણાં ગુરૂપસદનં - એવં નિર્ણીય તે ત્રયોઽપિ પુત્રા મુમુક્ષવઃ શુભસન્તતિરિતિ પિતુર્નામાન્વર્થીકુર્વન્તઃ સદ્ગુરુમન્વેષ્ટું રાજગૃહાન્નિર્યયુઃ । અનેકદેશાનટિત્વાન્તતસ્તે ગઙ્ગાતટમેવ પ્રાપ્ય તત્ર વિવિક્તે દેશેઽત્યુન્નતશાખાસ્કન્ધફલપલાશશાલિભિર્વૃક્ષૈર્નિબિડિતે વને કસ્યચિદ્વટતરોર્મૂલે ચિન્મુદ્રયા જીવબ્રહ્મૈક્યં સ્વશિષ્યેભ્યો નિર્દુષ્ટેભ્ય ઉપદિશન્તં ગુણાતીતં શ્રીસદ્ગુરું દદૃશુઃ । કૈલાસે મહાભાણ્ડીરવટમૂલે સનકાદિભ્યસ્તત્ત્વમુપદિશન્તં પરમશિવં શ્રીદક્ષિણામૂર્તિમિવ તે તં વિભાવ્ય, સાષ્ટાઙ્ગં પ્રણિપત્ય, મોક્ષેચ્છયા યથાવિધિ તં શરણં ગતાસ્તન્નિકટે ષણ્માસાન્ બ્રહ્મચર્યમૂષુઃ । તતઃ શ્રીસદ્ગુરુઃ પ્રસન્નો ભૂત્વા મધુરયા ગિરા કેન પ્રયોજનેનાગતા યૂયમ્, કે યૂયમ્, કુતો વાત્રાગમનમ્, ઇતિ તાન્ પપ્રચ્છ । તદા તત્ત્વદૃષ્ટિર્ભ્રાત્રોરિઙ્ગિતજ્ઞઃ સાઞ્જલિપુટઃ સવિનયં પ્રત્યબ્રવીત્ ।

## (૧૨૬)

તત્ત્વદૃષ્ટિર્ગુરોરનુમતિં પ્રાર્થયતે - “હે ભગવન્ । વયં ત્રયોઽપિ ભ્રાતરઃ શુભસન્તતેઃ રાજ્ઞઃ કુમારાઃ અજ્ઞાઃ અત્યન્તં શોચ્યાઃ નિજસ્વરૂપજિજ્ઞાસવો ભવન્તં શરણં ગતાઃ । ભવાન્ હિ કૃપાસમુદ્રઃ કલ્પતરુચિન્તામણિકામધેનુવચ્ચ

વિરાજતે । વયં તુ દુઃખવશંવદાઃ । યથાજ્ઞા દીયતે
૧. અઙ્ગુષ્ઠતર્જનીયોગશ્ચિન્મુદ્રેતિ કીર્ત્યતે । ઇયં ભદ્રામુદ્રા,
લોપામુદ્રા, તર્કમુદ્રા, જ્ઞાનમુદ્રા ચેતિ કીર્ત્યતે ।
૨. સ્તેયમ્, હિંસા, અબ્રહ્મચર્યમિત્યેતે ત્રયઃ શરીરદોષાઃ ।
અનૃતમ્, પરનિન્દા, કટુભાષણમ્, વૃથાલાપઃ, ઇત્યેતે ચત્વારો
વાગ્દોષાઃ । ઇચ્છા, ચિન્તા, બુદ્ધિમાન્દ્યમિત્યેતે ત્રયો મનોદોષાઃ ।
નૃસિંહતાપિન્યુપનિષત્પ્રસિદ્ધા એતે દશ દોષાઃ ।
૩. તૃતીયતરઙ્ગોક્તવિધાનેન । તર્હ્યસ્મદભિપ્રાયં
નિવેદયામઃ" ઇતિ તત્ત્વદૃષ્ટિઃ પ્રાહ । "હે શિષ્ય ।
શ઼ૃણુ મે વચઃ । તચ્છ્રવણેન ત્વદ્ધૃદયગ્રન્થયઃ સંશયાશ્ચ
સમૂલમુન્મૂલિતા ભવેયુઃ, ત્વં ચ પરમાનન્દં પ્રાપ્નુયાઃ" ઇતિ ગુરુરવોચત્ ।

## (૧૨૭)

મુમુક્ષાભિવ્યઞ્જકસ્તત્ત્વદૃષ્ટિપ્રશ્નઃ - શ્રીગુરોઃ કારુણ્યં જ્ઞાત્વા હૃદયાનન્દસન્દોહતુન્દિલઃ સંસ્તત્ત્વદૃષ્ટિઃ સ્વાભિલષિતકાર્યં સિદ્ધમિતિ નિશ્ચિત્ય સવિનયં પપ્રચ્છ - હે ભગવન્ । ભવાન્ કૃપાનિધિઃ શ્રીસદાશિવદક્ષિણામૂર્તિસમઃ સર્વજ્ઞઃ । વયં તુ સર્વેઽજ્ઞાઃ જનનમરણાદિદુઃખરૂપસંસારાદ્બિભીમઃ । અસ્માકં તન્નિવૃત્તેઃ પરમાનન્દપ્રાપ્તેશ્ચોપાયો વક્તવ્યઃ । નાનાપ્રકારોપાસનાનિ કર્માણિ ચાનુષ્ઠિતાનિ । નૈવાસ્મદભિલષિતાર્થસિદ્ધિરભૂત્, પ્રત્યુત સંસારાત્મકબન્ધ એવ દૃઢીભવતિ । તસ્માત્ યેનોપાયાન્તરેણ વયં કૃતાર્થા ભવેમ તમુપાયમસ્માન્ શાધિ ભોઃ ।

# (A. 128-168) જ્ઞાનોપદેશઃ-

## (૧૨૮)

શિષ્યસ્ય મોક્ષેચ્છા ભ્રાન્તિજન્યેત્યુપપાદનપૂર્વકં મહાવાક્યોપદેશઃ - આત્યન્તિકદુઃખનિવૃત્તિઃ પરમાનન્દપ્રાપ્તિશ્ચ મોક્ષ ઇતિ કથ્યતે । શિષ્યસ્ય મોક્ષેચ્છાં જ્ઞાત્વા ગુરુસ્તદુપાયભૂતં વેદાન્તૈકસમધિગમ્યં જ્ઞાનમુપદિશતિ । જ્ઞાનસ્વરૂપસ્ય નાનાશાસ્ત્રેષુ નાનાપ્રકારેણોક્તત્વેઽપિ જીવબ્રહ્મભેદનિવર્તકજ્ઞાનસ્યૈવ મોક્ષસાધનત્વેન વેદેષુ પ્રતિપાદિતત્વાત્તાદૃશમેવ જ્ઞાનમુપદિશતિ - હે શિષ્ય । પરમાનન્દાવાપ્તૌ જનનમરણાદિદુઃખરૂપસંસારનિવૃત્તૌ ચ તવોત્પન્નેચ્છા ભ્રાન્તિજન્યેત્યવેહિ । યતસ્ત્વં નિસર્ગત એવ નિરતિશયપરમાનન્દસ્વરૂપોઽસિ તસ્માત્સદા પરમાનન્દસ્વરૂપેણૈવ સતસ્તવ પુનસ્તત્પ્રાપ્તીચ્છા ન યુજ્યતે । યન્ન પ્રાપ્તં તલ્લાભાયૈવોચિતેચ્છા । ત્વત્સ્વરૂપં તુ ત્વયા સર્વદા પ્રાપ્તમેવેત્યતસ્તત્પ્રાપ્તયે તવ જાયમાનેચ્છા ભ્રમમન્તરા ન સઙ્ગચ્છતે । કિઞ્ચ જનનમરણાદિરૂપઃ

સંસારો યદિ કદાચિત્ ત્વય્યભૂત્તદા તવ તન્નિવૃત્તયે ઇચ્છોચિતા ભવેત્ । વસ્તુતસ્તુ સ સંસાર ઈષદપિ કાલત્રયેઽપિ નાસ્ત્યેવ ત્વયિ । તસ્માત્કાલત્રયેઽપ્યવિદ્યમાનસ્ય સંસારદુઃખસ્ય નિવિવૃત્સા તે ભ્રમમન્તરા ન ઘટતે । હે શિષ્ય ત્વં તુ જનનમરણાદિસર્વસંસારશૂન્યચિન્માત્રસ્વરૂપબ્રહ્મૈવાસિ । તસ્માન્મા સ્મર કદાપિ જનનમરણાદિદુઃખરૂપં સંસારમ્ ।

## (A. 129-168) અત્રાક્ષેપસમાધાનાનિ

## (A. 129-132) સુખવિષયકાક્ષેપસમાધાનાનિ-

### (૧૨૯)

આત્મન આનન્દરૂપત્વે વિષયસમ્બન્ધાદાનન્દભાનં નોચિતમિત્યાક્ષેપઃ - હે સ્વામિન્ । મમાત્મા યદિ નિત્યનિરતિશયપરમાનન્દરૂપ એવ ભવતિ, તદા વિષયેન્દ્રિયસમ્બન્ધાધીનતયા આત્મન્યાનન્દાનુભવો નોપપદ્યેત । અનુભૂયત એવ તુ વિષયસમ્બન્ધાદાત્મન્યાનન્દઃ । તસ્માન્નૈવાનન્દરૂપ આત્મા । કિન્તુ વિષયસમ્બન્ધાદેવાત્મન્યાનન્દો જાયતે ।

### (૧૩૦)

અજ્ઞસ્ય વિષયપ્રવૃત્તૌ સત્યાં તદીયાન્તર્મુખવૃત્તૌ આત્માનન્દો ભાતિ; વિષયેષુ નાસ્ત્યાનન્દ ઇતિ સમાધાનં - હે શિષ્ય । યસ્ય બુદ્ધિરાત્મસ્વરૂપં ન જાનાતિ તસ્ય વિષયેચ્છા જાયતે । ભોગસાધનાનાં સ્ત્રીધનપુત્રાદીનામત્ર વિષયશબ્દેન ગ્રહણમ્ । વિષયેચ્છસ્ય પુંસો બુદ્ધિશ્ચઞ્ચલા ભવતિ । ચઞ્ચલાયાં બુદ્ધાવાત્મસ્વરૂપાનન્દપ્રતિબિમ્બો ન ભાસતે । અભિલષિતવિષયલાભે તુ ક્ષણમાત્રં બુદ્ધિઃ સ્થિરીભવતિ । તદા બુદ્ધિવૃત્તિરન્તર્મુખા ભવતિ । તસ્યામન્તર્મુખાયાં વૃત્તાવાત્મસ્વરૂપાનન્દઃ પ્રતિફલતિ । તાદૃશાત્મસ્વરૂપાનન્દપ્રતિબિમ્બમનુભવિતુઃ પુંસો "વિષયેભ્યો મમાનન્દોઽજાયત" ઇતિ ભ્રાન્તિરુત્પદ્યતે । વસ્તુતસ્તુ નૈવાસ્તિ જડે વિષયે આનન્દલેશોઽપિ । કિઞ્ચ આનન્દોત્પત્તેર્વિષયાધીનત્વે યત્કિઞ્ચિદ્વિષયજન્યાનન્દમનુભવતઃ પુંસો વિષયાન્તરે ઇચ્છોત્પત્તિદશાયામપિ પ્રાચીનવિષયાનન્દોઽનુવર્તિતુમર્હતિ; ન તુ તથાસ્ત્યનુભવઃ । અસ્મત્સિદ્ધાન્તે તુ વિષયાન્તરાસક્ત્યા પુનરપિ બુદ્ધિચાઞ્ચલ્યે સતિ તસ્યાં ચઞ્ચલબુદ્ધૌ ન સ્વરૂપાનન્દપ્રતિબિમ્બો ભાતીતિ સમાધાનં જ્ઞેયમ્ । ૧. આત્મા સ્વભાવત એવાનન્દસ્વરૂપઃ । મનસો વ્યાકુલતાયાં સન્નિહિતોઽપિ પદાર્થો યથા ન ચક્ષુર્ગોચરો ભવતિ, તથા યાવદ્રજોગુણસમ્પર્કાદ્બુદ્ધિશ્ચઞ્ચલા ભવતિ તાવદાત્મન આનન્દાંશો ન બુદ્ધૌ પ્રતિભાસતે । યથા દર્પણે પ્રચલતિ સતિ તસ્મિન્નુપલભ્યમાનોઽપિ મુખાદિપ્રતિબિમ્બો નૈવ સ્ફુટસ્તથા રજોગુણસમ્પર્કાચ્ચલન્ત્યાં બુદ્ધાવાત્મનઃ સચ્ચિદંશયોઃ પ્રતિબિમ્બે ભાસમાનેઽપિ નાનન્દાંશપ્રતિબિમ્બો ભાસતે । ઇષ્ટવસ્તુલાભે સતિ તદ્વિષયકેચ્છાયાઃ, રજોગુણહેતુકબુદ્ધિચાઞ્ચલ્યસ્ય ચ નિવૃત્તૌ સત્યાં પ્રાપ્તેષ્ટવસ્તુવિષયકજ્ઞાનરૂપયા સાત્ત્વિકવૃત્ત્યા

વિષયોપહિતચૈતન્યસ્વરૂપાનન્દો વિભાવ્યતે । અથવા ઇષ્ટવસ્તુલાભમાત્રેણ તદ્વિષયકેચ્છારૂપવૃત્તિર્નિવર્તતે । તેનૈવ હેતુનાન્યા કાચિદન્તર્મુખા સાત્ત્વિકી વૃત્તિરુદેતિ । તથા અન્તઃકરણોપહિતાત્માનન્દઃ પ્રકાશતે । ઈદૃશાન્તર્મુખાન્તઃકરણવૃત્તિપ્રતિફલિતાત્મસ્વરૂપાનન્દપ્રતિબિમ્બો વિષયાનન્દઃ, પ્રતિબિમ્બાનન્દઃ, લેશાનન્દ ઇતિ ચ કથ્યતે । ૨. દુઃખાત્મકવિષયાનુભવકાલીનસુખસ્ય વસ્તુત આત્મસ્વરૂપસુખત્વેઽપિ, વિષયનિષ્ઠતયા તજ્જન્યત્વેન ચ તત્સુખસ્ય ભાનં ભ્રમાદ્ભવતિ । યથા શુનઃ શુષ્કાસ્થિખાદનકાલે સ્વતાલુજન્યરક્તે અસ્થિજન્યત્વભ્રમસ્તદ્વત્ । કિઞ્ચાન્યત્, યદિ વિષયાદેવાનન્દો નિયમેન જાયેત તદા પ્રવાસાદાગતપુત્રદર્શનજન્યાનન્દઃ સદાનુવર્તિતુમર્હતિ; ન તુ તથા ભવતિ । તથા હિકસ્યચિત્ પ્રિયતરઃ પુત્રશ્ચિરપ્રવાસી કાલાન્તરે પ્રત્યાગમત્ । તદ્દર્શનક્ષણે જાયમાનઃ પિતુરાનન્દઃ ચિરકાલમવિચ્છિન્નતયાનુવર્તિતુમર્હતિ, આનન્દહેતોઃ પુત્રસ્ય સદા સન્નિહિતત્વાત્ । ન તુ તથાનુભૂયતે । સિદ્ધાન્તે તુ પુત્રદર્શનાદિતત્તદ્વિષયજન્યાનન્દસ્ય ચિરમનનુવૃત્તિરેવમુપપદ્યતે - તત્તદ્વિષયલાભક્ષણે બુદ્ધિર્નિશ્ચલીભવતિ । તદા નિશ્ચલાયાં બુદ્ધિવૃત્તાવાત્મસ્વરૂપાનન્દઃ પ્રતિબિમ્બિતો ભવતિ । સ એવાનન્દોઽનુભૂયતે । તતો વિષયાન્તરેચ્છયા પુનરપિ બુદ્ધેશ્ચાઞ્ચલ્યે સતિ તસ્યાં બુદ્ધૌ સ્વરૂપાનન્દપ્રતિફલનસ્ય વિચ્છેદાત્, પુરત એવ સત્યપિ પ્રાચીનવિષયે, નાનન્દાનુવૃત્તિઃ । તસ્માન્ન વિષયેઽસ્ત્યાનન્દઃ । કિઞ્ચ યદિ નિયમેન વિષયાધીન એવાનન્દો ભવેત્તદા સમાધૌ યોગાનન્દો ન પ્રકાશેત । તથા સુષુપ્તાવપિ નાનન્દભાનં સ્યાત્ । સુષુપ્તિસમાધ્યોર્દૃશ્યરૂપવિષયસમ્બન્ધસ્યાભાવાત્ । તસ્માન્ન વિષયે આનન્દલેશોઽપ્યસ્તિ । કિન્ત્વાત્મસ્વરૂપાનન્દ એવ સર્વાત્મના સર્વત્રાવભાસતે । "રસો વૈ સઃ, રસઁ હ્યેવાયં લબ્ધ્વાનન્દી ભવતિ" (તૈ. બ્ર. ૭) "એતસ્યૈવાનન્દસ્યાન્યાનિ ભૂતાનિ માત્રામુપજીવન્તિ" (બૃ. ૪.૩.૩૨) ઇત્યાદિશ્રુતેઃ । હે શિષ્ય । નિરતિશયાનન્દસ્વરૂપ એવાત્મેતિ વિષયસમ્બન્ધાચ્ચ સ આનન્દોઽભિવ્યજ્યતે ઇતિ જાનીહિઅદૃશ્યો દૃશ્યતે રાહુર્ગૃહીતેન યથેન્દુના । તથાનુભવમાત્રાત્મા દૃશ્યેનાત્માવલોક્યતે ॥ ઇતિ સ્મૃતેઃ । અયમેવ સમીચીનઃ સિદ્ધાન્તઃ । યદ્યસ્ત્યત્ર તે સંશયો નિર્વ્યલીકમેવ પૃચ્છ । પુનઃ સુસ્ફુટમેવ ત્વાં બોધયેયમિતિ ગુરુરાહ ।

## (૧૩૧)

જ્ઞાનિનોઽપિ વિષયેષ્વિચ્છા, વિષયસમ્બન્ધાદાત્માનન્દાવભાસશ્ચ ભવતિ ન વેતિ તત્ત્વદૃષ્ટિઃ પૃચ્છતિ - હે સદ્ગુરો । વિષયસમ્બન્ધાદાત્માનન્દાવભાસક્રમોઽજ્ઞાનિવિષયે પ્રતિપાદિતો ભવદ્ભિઃ, ન જ્ઞાનિવિષયે । યતો યસ્ય બુદ્ધિરાત્મસ્વરૂપવિમુખા, તમધિકૃત્ય પ્રસ્તાવઃ કૃતઃ પૂર્વં ભવદ્ભિઃ । તાદૃશ્ચાજ્ઞાન્યેવ, ન જ્ઞાની । તસ્માદિદાનીં જ્ઞાનિનોઽપિ વિષયેષ્વિચ્છા

૧. ચિત્તૈકાગ્રતારૂપયોગાભિવ્યઙ્ગ્ય આનન્દઃ ।

૨. સુષુપ્તિદૃષ્ટાન્તસ્તુ સર્વજનપ્રસિદ્ધ્યર્થમ્ । તસ્યાપિ વિષયસમ્બન્ધાત્પૂર્વોક્તક્રમેણ સુખાભિવ્યક્તિશ્ચ જાયતે ન વેતિ બોધયિતુમર્હન્તિ ભવન્તઃ, ઇતિ ।

## (૧૩૨)

વ્યવહારકાલે જ્ઞાન્યપ્યાત્મવિમુખ એવ; સ વિષયાનન્દસ્ય સ્વરૂપાનન્દાદભિન્નતાં મન્યતે - હે શિષ્ય । શ‍ૃણુ સાવધાનમનાઃ । યદુક્તમાત્મસ્વરૂપવૈમુખ્યમેવ વિષયેચ્છાદિકારણમિતિ, તત્ ન કેવલમજ્ઞસ્યૈવ, કિન્તુ જ્ઞાનિનોઽપિ તુલ્યમેવ તત્ । જ્ઞાની ચ યદા વ્યવહારે પ્રવર્તતે તદા સ તત્ત્વવિસ્મરણપૂર્વકમેવ પ્રવર્તતે । વિષયપ્રવૃત્તિકાલેઽજ્ઞવદાસ્તે જ્ઞાન્યપિ । જ્ઞાનિનો હિ ચિત્તં સદૈવાત્માકારમેવ યદિ સ્યાત્તદા તસ્ય જીવનાદિનિમિત્તભોજનાદિવ્યવહારોઽપિ ન સિદ્ધ્યેત્ । તસ્માદાત્મવિમુખા બુદ્ધિરુભયોઃ સમા । અજ્ઞસ્ય બુદ્ધિઃ સદા વિષયાસક્તત્વાદાત્મવિમુખૈવ તિષ્ઠતિ । જ્ઞાનિનસ્તુ બુદ્ધિર્યદાત્મનો વિમુખા ભવતિ, તદા વિષયેચ્છા તત્સમ્પર્કાદાત્મસ્વરૂપાનન્દાભિવ્યક્તિશ્ચાજ્ઞસ્યેવ તસ્યાપિ જાયતે । તથાપ્યસ્ત્યત્ર વિશેષઃ - વિષયસમ્પર્કાદ્ભાસમાનોઽપ્યાનન્દઃ સ્વસ્વરૂપાનન્દાન્નાતિરિચ્યતે, કિન્તુ તદાભાસ એવેતિ વિજાનાતિ બ્રહ્મવિત્ । તથા ચ વિષયોપભોગેઽપિ જ્ઞાનિનઃ સમાધિરેવ સિદ્ધ્યતિ । અજ્ઞસ્તુ "અયમાનન્દઃ સ્વરૂપાનન્દ એવ" ઇતિ નૈવ વેદ । પરમાર્થતસ્તુ જ્ઞાની અજ્ઞાની ચેત્યુભયોરપિ સ્વરૂપમાનન્દ એવ; અજ્ઞસ્ય વિષયે આનન્દપ્રતીતિર્ભ્રાન્તિરેવ ।

# (A. 133-168) દુઃખવિષયકપ્રશ્નપ્રત્યુક્તયઃ-

## (૧૩૩)

સાંસારિકદુઃખસ્યાશ્રયપ્રશ્નઃ - હે સદ્ગુરો સ્વામિન્ ।

૧. જાગ્રદાકારવૃત્ત્યુદ્ભવે ન સ્વપ્નાકારવૃત્તિર્જાયતે,
સ્વપ્નાકારવૃત્ત્યુદ્ભવે ચ ન જાગ્રદાકારવૃત્તિર્જાયતે ।
એવમેવ જ્ઞાનિનો બુદ્ધિઃ યદા આત્માકારા તદા નાનાત્માકારા
ભવતિ, યદા અનાત્માકારા તદા નાત્માકારા ભવતિ ।
યદ્યપ્યેકાન્તઃકરણાધિકરણકભિન્નવિષયકસામાન્યવિશેષરૂપવૃત્તિદ્વયં
યુગપજ્જાયેત, તથાપિ વિશેષરૂપવૃત્તિદ્વયં તુ નૈવ
જાયેત । યથા વ્યવહારાન્તરાસક્તઃ પુરુષઃ પેટિકાસ્થધનં
હસ્તેન સ્પૃશન્નપિ ન સ્મરતિ તત્ ધનમ્, વ્યવહારાવસાને
તુ તદ્ધનં સ્મરતિ; એવમેવ જ્ઞાન્યપિ વ્યવહારદશાયાં યદા
વિષયાભિમુખો ભવતિ તદા તસ્ય તત્ત્વવિસ્મરણં ભવતિ,
વ્યવહારસમાપ્તૌ પુનરપિ તત્ત્વનિષ્ઠ એવ સ ભવતિ । અત
એવોક્તં ભાષ્યકારૈઃ શ્રીભગવત્પૂજ્યપાદૈરધ્યાસપ્રકરણે -
"પશ્વાદિભિશ્ચાવિશેષાત્ । અતઃ સમાનઃ પશ્વાદિભિઃ પુરુષાણાં
પ્રમાણપ્રમેયવ્યવહારઃ" ઇતિ ।

૨. જ્ઞાનિનો વિષયોપભોગકાલેઽપિ, વિષયે દોષદર્શનરૂપવિવેકસ્ય,

વિષયમિથ્યાત્વનિશ્ચયપૂર્વકવૈરાગ્યસ્ય, વિષયભોગાનાં
પરિણામે દુઃખપર્યવસાયિત્વાવધારણસ્ય વિષયા નન્દસ્ય
સ્વરૂપાનન્દાવ્યતિરિક્તત્વનિશ્ચયસ્ય ચ જાગરૂકત્વાત્,
સ્વરૂપાનુસન્ધાનરૂપસમાધિસદૃશત્વાચ્ચ "સિંહો
માણવકઃ" ઇતિવત્ જ્ઞાનિનો વિષયોપભોગે સમાધિત્વોક્તિરૌપચારિકી ।
"ત્વં પરમાનન્દસ્વરૂપોઽસિ" ઇતિ ભવતા યદુક્તં પ્રાક્,
તદહં સમ્યગ્જાનામિ । "જનનમરણાદિસંસારરૂપમહાદુઃખં
કાલત્રયેઽપિ ત્વયિ નાસ્ત્યેવ; અતસ્તન્નિવૃત્તયે
તવેચ્છાત્યન્તાસઙ્ગતેતિ" ભવદુક્તવિષયે તુ કશ્ચન સંશયો
ભવતિ । યદ્યનુભૂયમાનમિદં જનનમરણાદિદુઃખં મયિ નાસ્તિ,
તર્હિ મદન્યં કમાશ્રિત્ય તદવતિષ્ઠતે ઇતિ દયયા મે વદ ભોઃ ।
સંસારદુઃખસ્યાશ્રયાન્તરાવગમે હિ મયિ તન્નાસ્તીતિ મમ દૃઢા
પ્રતીતિઃ સ્યાદિતિ શિષ્યઃ પૃચ્છતિ ।

## (૧૩૪)

ન કસ્યાપિ સંસારોઽસ્તીતિ ગુરોરુત્તરં - હે શિષ્ય । શ઼ૃણુ મે વચનમ્, તેન તે સર્વસંશયનિવૃત્તિઃ સ્યાત્ । જનનમરણાદિસંસારદુઃખં ન કુત્રચિદપ્યસ્તિ । અનુભૂયમાનમપીદં દૃશ્યં જગત્ કાલત્રયેઽપિ ત્વયિ મયિ અન્યત્ર વા કુત્રચિદપ્યણુમાત્રમપિ નાસ્ત્યેવ । અત એવાસ્ય જગતઃ અત્યન્તનાશઃ ન કુત્રચિદપિ સમ્ભવતિ । ઇતિ ।

## (૧૩૫)

અસતઃ સંસારસ્ય કથં પ્રતીતિરિતિ પ્રશ્નઃ - હે કૃપાલો સદ્ગુરો । જનનમરણાદિસંસારદુઃખં મયિ વાન્યત્ર વા કુત્રચિદપિ ન સ્યાચ્ચેત્, કથં તર્હિ તત્પ્રત્યક્ષીભવતિ । ન હ્યત્યન્તાસદ્વસ્તુ કદાચિદપ્યુપલભ્યતે । વન્ધ્યાપુત્રગગનારવિન્દાદ્યસદ્વસ્તુવત્ સંસારોઽપ્યત્યન્તાસંશ્ચેન્ન કદાચિદપ્યુપલભ્યેત, ઉપલભ્યતે તુ, તસ્માજ્જન્મમરણાદિદુઃખરૂપઃ સંસારો નાસ્તીત્યુક્તિર્ન યુજ્યતે; ઇતિ શિષ્યઃ પૃચ્છતિ ।

## (૧૩૬)

સંસારપ્રતીતિર્મિથ્યેતિ ગુરોરુત્તરં - જનનમરણાદિપ્રવાહરૂપં જગત્ પરમાર્થતઃ કાલત્રયેઽપ્યસદપિ, પ્રત્યગાત્મૈવ બ્રહ્મેત્યજાનતાં કેવલં મિથ્યાભૂતમવભાસતે । યથા સ્વપ્ને અનુભૂયમાનપદાર્થાઃ, આકાશે નૈલ્યં, રજ્જૌ સર્પાદયશ્ચ પરમાર્થતઃ કાલત્રયેઽપિ અસન્તોઽપિ મિથ્યૈવાવભાસન્તે, તદ્વજ્જગત્ પરમાર્થતોઽસદપિ મિથ્યારૂપેણાવભાસતે ।
૧. યથા રજ્જૌ કલ્પિતસર્પસ્ય વ્યાવહારિકસત્તયાત્યન્તાભાવોઽસ્તિ,

તથા બ્રહ્મણિ કલ્પિતસ્ય જગતઃ પારમાર્થિકસત્તયાત્યન્તાભાવોઽસ્તિ ।
તથા ચ પારમાર્થિકસત્તયા જગતોઽત્યન્તાભાવ એવ તસ્ય
નિત્યનિવૃત્તિરિત્યુચ્યતે ।
૨. અર્થે હ્યવિદ્યમાનેઽપિ સંસૃતિર્ન નિવર્તતે ।
ધ્યાયતો વિષયાનસ્ય સ્વપ્નેઽનર્થાગમો યથા ॥ ભા. પુ. ૩.૨૭.૪॥

અવિદ્યમાનોઽપ્યવભાસતે દ્વયો ધ્યાતુર્ધિયા સ્વપ્નમનોરથૌ યથા ।
તત્કર્મ સઙ્કલ્પવિકલ્પકં મનો બુધો નિરુન્ધ્યાદભયં તતઃ સ્યાત્ ॥ ભા. પુ. ૧૧.૨.૩૮॥

ઇતિ ભાગવતે ॥

(૧૩૭)

રજ્જૌ સર્પપ્રતીતિઃ કથમિતિ પ્રશ્નઃ - રજ્જૌ પ્રતીયમાનસર્પાદયો યથા મિથ્યા તથૈવ પ્રત્યગાત્મનિ પ્રતીયમાનસંસારદુઃખમપિ મિથ્યેતિ યદુક્તમ્, તત્ર દૃષ્ટાન્તજ્ઞાનમન્તરા દાર્ષ્ટાન્તિકજ્ઞાનાસમ્ભવાદ્રજ્જૌ સર્પઃ કથમવભાસત ઇતિ પ્રથમતસ્તાવન્માં બોધયન્તુ ભવન્ત ઇતિ શિષ્યો દૃષ્ટાન્તવિષયે પૃચ્છતિ ।

## (A. 138-143) શિષ્યઃ સ્વપ્રશ્નસ્યાશયં વર્ણયતિ-

(૧૩૮)

ખ્યાતિચતુષ્ટયં - રજ્જુસર્પશુક્તિરજતાદિભ્રમવિષયે મતચતુષ્ટયં શ્રૂયતે । તત્ર (૧) શૂન્યવાદી અસત્ખ્યાતિમાહ । (૨) ક્ષણિકવિજ્ઞાનવાદી આત્મખ્યાતિમાચષ્ટે । (3) નૈયાયિકા વૈશેષિકાશ્ચાન્યથાખ્યાતિમાતિષ્ઠન્તે । (૪) સાઙ્ખ્યાઃ પ્રાભાકરાશ્ચાખ્યાતિં વદન્તિ ।

(૧૩૯)

અસત્ખ્યાતિઃ - તત્રાસત્ખ્યાતિમઙ્ગીકુર્વતાં શૂન્યવાદિનામેવમાશયઃ - રજ્જૌ તાવત્સર્પોઽત્યન્તમસન્ । તથૈવાન્યાત્રાપિ (વલ્મીકાદાવપિ) સર્પોઽત્યન્તમસન્નેવ । એવમત્યન્તાસતઃ સર્પસ્ય પ્રતીતી રજ્જૌ ભવતિ । ઇમામેવાસત્ખ્યાતિમાહુઃ શૂન્યવાદિનઃ । અત્યન્તાસતઃ સર્પસ્ય ખ્યાતિઃ = સ્ફુરણમભિવદનં ચાસત્ખ્યાતિરિતિ ।

(૧૪૦)

આત્મખ્યાતિઃ - વિજ્ઞાનવાદિનોઽભિપ્રાયસ્તુ - રજ્જૌ વાન્યત્ર વા બુદ્ધેર્બહિઃ કુત્રચિદપિ ન સર્પોઽસ્તિ । એવં સકલપદાર્થા અપિ ન બુદ્ધેર્બહિર્વર્તન્તે । બુદ્ધિરેવ સકલપદાર્થાનામાકારાન્ ધત્તે । સા ચ બુદ્ધિઃ ક્ષણિકવિજ્ઞાનરૂપા

। પ્રતિક્ષણમુત્પત્તિવિનાશશાલિ યદ્વિજ્ઞાનં તદેવ સર્પાત્મના અવભાસતે । ઇયમાત્મખ્યાતિરિતિ વર્ણ્યતે । આત્મા = ક્ષણિકવિજ્ઞાનરૂપા બુદ્ધિઃ, તસ્યાઃ ખ્યાતિઃ = સ્ફુરણમભિવદનઞ્ચાત્મખ્યાતિરિતિ ।

## (A. 141-142) અન્યથાખ્યાતિઃ-

### (૧૪૧)

તત્ર નૈયાયિકવૈશેષિકાણાં મતં - વલ્મીકાદૌ પારમાર્થિકસર્પોઽસ્તિ । વ્યવહિતોઽપિ સ સર્પશ્ચક્ષુષા ગૃહ્યતે । ચક્ષુર્ગતદોષબલાત્ વ્યવહિતોઽપિ સર્પઃ પુરતશ્ચક્ષુઃસન્નિકૃષ્ટો ભાતિ । પારમાર્થિકસર્પસ્ય ચક્ષુષશ્ચ મધ્યે કુડ્યાદિરૂપવ્યવધાનસત્ત્વેઽપિ દોષસચિવચક્ષુષા વ્યવહિતસર્પોઽપિ ગૃહ્યત એવ ।

અસ્તિ પ્રતીત્યવસરે ન પુર ન પશ્ચાત્
આશ્ચર્યમેતદવભાતિ તથાપિ વિશ્વમ્ ।
યદ્વા કિમદ્ભુતમિવેહ મહેન્દ્રજાલં
માયાવિકલ્પિતમપિ પ્રતિભાસતે હિ ॥

નનુ દોષસમવધાનેન વસ્તુનઃ સામર્થ્યહાનિરેવ દૃશ્યતે, ન વૃદ્ધિઃ । યથા વાતપિત્તકફાદિદોષૈર્જાઠરાગ્નેરશિતપીતપચનશક્તિઃ કુણ્ઠિતા ભવતિ, તથા તિમિરાદિદોષૈશ્ચક્ષુષઃ શક્તિરપિ કુણ્ઠિતૈવ ભવેત્ । કિઞ્ચ, તદિ વલ્મીકસ્થઃ સર્પો દોષસિહતચક્ષુષા ગૃહ્યતે, તર્હિ શુદ્ધનેત્રેણ વ્યવહિતવસ્તુપ્રત્યક્ષં ન ભવતિ, કિન્તુ દુષ્ટનેત્રેણૈવેતિ વક્તવ્યમ્ । તસ્માદ્દોષસહિતચક્ષુષઃ સામર્થ્યં વર્ધત ઇત્યત્ર દૃષ્ટાન્તો નાસ્તીતિ ચેત્ । નાયં દોષઃ, દૃષ્ટાન્તસદ્ભાવાત્ । તથા હિ, પિત્તાધિક્યપ્રયુક્તભસ્મકરોગાભિભૂતસ્ય કસ્યચિચ્ચતુર્ગુણિતમપ્યન્નં ક્ષુધાં શમયિતું નાલં ભવતિ । તત્ર પિત્તદોષેણ યથા જાઠરાગ્નેઃ પાચનશક્તિર્વર્ધતે, તથા ચક્ષુષોઽપિ દોષૈર્વ્યવહિતસર્પાદિપ્રત્યક્ષીકરણશક્તિર્વર્ધત ઇતિ વક્તું યુક્તમ્ । ઇત્થં ચ વલ્મીકાદિપ્રદેશાન્તરે સ્થિતસર્પસ્ય, અન્યથા = પ્રકારાન્તેણ = પુરોઽવસ્થિતરજ્જુદેશે ખ્યાતિઃ = સ્ફુરણમભિવદનં ચ અન્યથાખ્યાતિરિતિ કથ્યતે ।

### (૧૪૨)

અત્ર નવ્યનૈયાયિકચિન્તામણિકારમતં - દોષસહિતચક્ષુષા વલ્મીકગતઃ સર્પો યદિ દૃશ્યેત તર્હિ મધ્યસ્થપદાર્થાન્તરદર્શનમપ્યાપદ્યતે । તસ્માદ્વ્યવહિતં વસ્તુ ન નેત્રેણ ગૃહ્યતે । કિન્તુ દુષ્ટનેત્રસ્ય રજ્જુર્ન સ્વસ્વરૂપેણ ભાસતે, ભાસતે તુ સર્પાદ્યાકારેણ । તસ્માત્ રજ્જોઃ, અન્યથા = પ્રકારાન્તરેણ = સર્પાદ્યાકારેણ ખ્યાતિઃ = સ્ફુરણમભિવદનં ચાન્યથાખ્યાતિરિતિ ।

## (૧૪૩)

અખ્યાતિમતમ્, પૂર્વોક્તમતત્રયખણ્ડનં ચ - તત્રાખ્યાતિવાદિનોઽયમાશયઃ - અસત્ખ્યાતિમતરીત્યા યદ્યસદપિ પ્રતીયેત તર્હિ વન્ધ્યાપુત્રશશશૃઙ્ગાદયોઽપિ પ્રતીયેરન્ । તથા પ્રતીત્યભાવાદસઙ્ગતમેવાસત્ખ્યાતિમતમ્ । યદિ ક્ષણિકવિજ્ઞાનવાદિમતરીત્યા પ્રતિક્ષણમન્યથા ભવન્તી બુદ્ધિઃ સર્પાદ્યાકારતાં પ્રાપ્નુયાત્તદા ક્ષણાદૂર્ધ્વં તસ્ય સર્પસ્ય પ્રતીતિર્ન સ્યાત્ । પરન્તુ યાવદ્ભ્રમકાલં સર્પપ્રતીતિરનુવર્તતે । તસ્માદાત્મખ્યાતિમતમપ્યનુપાદેયમેવ ।

૧. વ્યવહિતં વસ્તુ શુદ્ધનેત્રેણ નોપલભ્યતે, કિન્તુ દુષ્ટનેત્રેણોપલભ્યત ઇત્યુક્તિર્લોકવિરુદ્ધા ।

૨. ઇદં પ્રાચીનમતમ્ । અસ્મિન્મતે દેશાન્તરસ્થવસ્તુનો દેશાન્તરે ભાનમેવ ભ્રાન્તિરિત્યુચ્યતે । સિદ્ધાન્તોક્તાર્થાધ્યાસજ્ઞાનાધ્યાસરૂપભ્રાન્તિર્નાસ્મિન્ મતેઽભ્યુપગમ્યતે ।

૩. ચિન્તામણિકારમતે એકસ્ય વસ્તુનો રૂપાન્તરેણ ભાસમાનતા ભ્રાન્તિરિતિ કથ્યતે । અયમેવ જ્ઞાનાધ્યાસઃ ।

૪. દોષબલાદટ્ટસ્થરજતં યદિ શુક્તૌ ભ્રાન્તિદેશે ભાસેત, તદા આપણં તત્સ્થસુવર્ણાદિનિખિલં વસ્તુ દોષવશાદુપલભ્યેત । ન ચૈવમુપલભ્યતે । અન્યથાખ્યાતેઃ પ્રથમઃ પ્રકારઃ ચિન્તામણિકારમતેન ખણ્ડિતઃ । ચિન્તામણિકારપ્રદર્શિતાન્યથાખ્યાતિપ્રકારોઽપ્યસઙ્ગત એવ । “જ્ઞેયાધીનં જ્ઞાનમ્” ઇતિ હિ પ્રસિદ્ધિઃ । અત્ર તુ જ્ઞેયા રજ્જુઃ, જ્ઞાનં તુ સર્પવિષયકમિતિ સુતરાં વિરુદ્ધમુચ્યતે । તસ્માચ્ચિન્તામણિકારાભિમતાન્યથાખ્યાતેરાદરાનર્હત્વાત્, અખ્યાતિરેવ શરણમિતિ સાઙ્ખ્યાઃ પ્રાભાકરાશ્ચાહુઃ ।

અખ્યાતિમતં - રજ્જૌ સર્પાદિભ્રમદશાયાં નેત્રં સ્વવૃત્તિદ્વારા રજ્જ્વા સહ સંયુજ્ય “અયમ્” ઇતિ રજ્જોઃ સામાન્યજ્ઞાનં જનયતિ । તદા સર્પસ્મરણં ચ જાયતે । તતઃ “અયં સર્પઃ” ઇતિ જ્ઞાનં જાયતે । તત્ર ગ્રહણસ્મરણાત્મકજ્ઞાનદ્વયમસ્તિ । “અયમ્” ઇતિ રજ્જોઃ સામાન્યાંશપ્રત્યક્ષજ્ઞાનમ્ । “સર્પઃ” ઇતિ તુ પૂર્વાનુભૂતસર્પસ્ય સ્મરણરૂપમપરં જ્ઞાનમ્ । ઇત્થં “અયં સર્પઃ” ઇત્યત્ર જ્ઞાનદ્વયમસ્તિ । અત્ર “અયમ્” ઇતિ રજ્જોઃ સામાન્યાંશજ્ઞાનસ્ય પૂર્વાનુભૂતસર્પસ્મરણરૂપજ્ઞાનસ્ય ચ પરમાર્થત્વેઽપિ ભયરૂપપ્રમાતૃદોષેણ તિમિરરૂપપ્રમાણદોષેણ ચ, મમ જ્ઞાનદ્વયમભૂત્ તત્રૈકં રજ્જુસામાન્યાંશપ્રત્યક્ષં સર્પસ્મરણરૂપજ્ઞાનમપરમિતિ, વિવેકઃ પુરુષસ્ય નોત્પદ્યતે । એતજ્જ્ઞાનદ્વયાવિવેક એવ ભ્રમ ઇતિ સાઙ્ખ્યાઃ પ્રાભાકરાશ્ચ વદન્તિ । ભ્રમોત્પત્તિસ્થલે ચ સર્વત્રૈવમેવ બોદ્ધ્યમિતિ ચાહુઃ । એવં રજ્જ્વાદૌ સર્પાદિભ્રમોત્પત્તિવિષયે મતચતુષ્ટયં પૂર્વોક્તપ્રકારેણ શ્રૂયતે । તત્ર ભવદભિમતમુત્તમં મતં યત્, તદ્ભવદુપદેશાદ્વિજિજ્ઞાસે ઇતિ તત્ત્વદૃષ્ટિઃ પૃચ્છતિ ।

# (A. 144-145) અખ્યાતિમતખણ્ડનમ્-

## (૧૪૪)

ભયપલાયનાદ્યનુપપત્ત્યા રજ્જૌ સર્પાનુભવો વાચ્યઃહે સોમ્ય । ભ્રમસ્થલે અસત્ખ્યાતિઃ, આત્મખ્યાતિઃ, અન્યથાખ્યાતિઃ, અખ્યાતિઃ ઇત્યેતન્મચતુષ્ટયમપિ યુક્તિવિરહિતમ્ । પૂર્વોક્તમતચતુષ્ટયવિલક્ષણમનિર્વચનીયખ્યાતિનામકં મતાન્તરમસ્તિ પઞ્ચમમ્; તદેવોપાદેયમ્ । પૂર્વોક્તાસત્ખ્યાત્યાદિમ૧. પૂર્વોક્તમતચતુષ્ટયાતિરિક્તં “સત્ખ્યાતિઃ” ઇતિ પઞ્ચમં પૂર્વપક્ષિમતમસ્તિ । તન્મતરીત્યા, શુક્તૌ શુક્ત્યવયવૈઃ સહ રજતાવયવોઽપિ સદા વર્તતે । શુક્ત્યવયવવદ્રજતાવયવોઽપિ સત્યઃ, ન મિથ્યા । યથા શુક્તૌ દુષ્ટનેત્રેન્દ્રિયસમ્પ્રયોગવશાત્ સિદ્ધાન્તેઽવિદ્યાપરિણામરૂપાનિર્વચનીયરજતં તત્કાલે જાયતે, તથાત્ર મતે દુષ્ટનેત્રેન્દ્રિયસમ્પ્રયોગવશાદ્રજતાવયવેભ્યઃ સત્યરજતમપિ શુક્તૌ જાયતે । સિદ્ધાન્તે અધિષ્ઠાનસાક્ષાત્કારાદનિર્વચનીયરજતનિવૃત્તિવત્, અત્ર મતે શુક્તિજ્ઞાનાત્ સત્યરજતમપિ સ્વાવયવેષુ લીયત ઇતિ વદન્તિ । ઇદમપિ મતં હેયમેવ । શુક્તિરજતદૃષ્ટાન્તેન હિ પ્રપઞ્ચમિથ્યાત્વાનુમિતિર્જાયતે । સત્ખ્યાતિવાદે તુ શુક્તિરજતસ્ય સત્યત્વાત્ તદ્દૃષ્ટાન્તેન ન પ્રપઞ્ચમિથ્યાત્વં સાધયિતું શક્યતે । એતન્મતખણ્ડનપરયુક્ત્યન્તરાણિ બાલાનાં દુર્બોધત્વાન્નેહ લિખ્યન્તે । તત્રયં નોપાદેયમિત્યખ્યાતિવાદિના દર્શિતઃ; અખ્યાતિમતમપિ નોપાદાનમર્હતીતિ પ્રદર્શ્યતેઽધુના । અખ્યાતિમતરીત્યા “અયં સર્પઃ” ઇતિ જ્ઞાને “અયમ્” ઇતિ રજ્જ્વાત્મકાધિષ્ઠાનસામાન્યાંશપ્રત્યક્ષજ્ઞાનમ્ । “સર્પઃ” ઇતિ ત્વન્યત્ર પૂર્વદૃષ્ટસર્પસ્ય સ્મરણાત્મકજ્ઞાનમિતિ સ્થિતિઃ । તત્ર પૂર્વદૃષ્ટસર્પસ્મરણમેવાઙ્ગીકૃત્ય પુરોવર્તિરજ્જૌ સર્પજ્ઞાનાનઙ્ગીકારે, પુરોઽવસ્થિતરજ્જું દૃષ્ટ્વા પુરુષો ભીત્યા ન પલાયેત, રજ્જું દૃષ્ટ્વા પુરુષઃ પલાયત ઇતિ તુ સર્વજનીનમ્ । તસ્માત્પુરોઽવસ્થિતરજ્જ્વામેવ સર્પઃ પ્રત્યક્ષતયા ભાસતે ઇતિ, ન તુ પૂર્વદૃષ્ટસર્પસ્મરણમાત્રમિતિ ચ વાચ્યમ્ । અન્યથા રજ્જૌ સર્પજ્ઞાનાભાવેન પુરુષસ્ય પલાયનાદિ નોપપદ્યેત ।

## (૧૪૫)

બાધજ્ઞાનબલાદપિ રજ્જૌ સર્પાનુભવો વાચ્યઃ - કિઞ્ચ રજ્જુયાથાત્મ્યજ્ઞાનાનન્તરં “મમ મિથ્યાસર્પો રજ્જ્વામભાત્” ઇતિ બાધરૂપાનુભવબલાદપિ પુરુષસ્ય રજ્જાવેવ સર્પઃ સ્વરૂપતઃ પ્રતીતઃ, ન તુ પૂર્વાનુભૂતસર્પસ્મરણમાત્રમભવદિતિ વક્તવ્યં ભવતિ । અપિ ચ “અયં સર્પઃ” ઇત્યત્ર જાયમાનં જ્ઞાનમેકમેવ, ન તુ જ્ઞાનદ્વયમ્ । ન હ્યેકસ્મિન્ ક્ષણે એકાન્તઃકરણવૃત્તિત્વેન સ્મરણા- ત્મકમનુભવાત્મકં ચ જ્ઞાનદ્વયં જાયેત । તસ્માદખ્યાતિમતમપ્યસઙ્ગતત્વાદનુપાદેયમેવ । પૂર્વોક્તમતચતુષ્ટયલક્ષણં તત્ખણ્ડનાદિકં ચ વિવરણસ્વારાજ્યસિદ્ધ્યાદિગ્રન્થેષુ વિસ્તરતો વર્ણિતમ્ । તેષાં મતાનાં સ્વરૂપમાત્રજિજ્ઞાસૂનાં જ્ઞાનસૌકર્યાર્થં તત્ સઙ્ક્ષિપ્યોક્તમત્ર ।

# (A. 146-149) સિદ્ધાન્તિનોऽનિર્વચનીયખ્યાતિનિરૂપણમ્-

## (૧૪૬)

અનિર્વચનીયખ્યાતિલક્ષણં - અન્તઃકરણવૃત્તિશ્ચક્ષુરાદિકરણદ્વારા બહિર્નિર્ગત્ય વિષયસમાનાકારા ભવતિ । તયા વૃત્ત્યા વિષયાવરણભઙ્ગે સતિ વિષય ઉપલભ્યતે । તસ્યા વૃત્તેઃ સૌરાદ્યાલોકોऽપિ સાધકો ભવતિ । આલોકં વિના પદાર્થો ન પ્રકાશતે, તસ્માદાલોકઃ સહકારી; ઇતિ ક્રમઃ । રજ્જ્વાદૌ સર્પાદિભ્રમોત્પત્તિદશાયામન્તઃકરણવૃત્તિશ્ચક્ષુર્દ્વારા બહિર્નિર્ગત્ય રજ્જ્વા સહ સંયુજ્યતે । તથાપિ સા તમાદિદોષૈઃ પ્રતિબદ્ધા સતી ન રજ્જુ૧. તમઃશબ્દેન મન્દાન્ધકારો ગૃહ્યતે । તથા હિ, પ્રૌઢપ્રકાશે રજ્જ્વાદ્યધિષ્ઠાનસ્ય વિશેષાંશાજ્ઞાનં ન જાયેત । ગાઢતમસિ અધિષ્ઠાનસ્ય સામાન્યાંશજ્ઞાનમપિ ન જાયેત । અધિષ્ઠાનસ્ય સામાન્યાંશજ્ઞાનમ્, વિશેષાંશાજ્ઞાનં ચ વિના અધ્યાસો નૈવ જાયેતેતિ દ્વિતીયતરઙ્ગે (૬૭) આવર્તેऽભિહિતમ્ । મન્દાન્ધકારે અધિષ્ઠાનસામાન્યાંશજ્ઞાનતદ્વિશેષાંશાજ્ઞાનયોઃ સમ્ભવાત્તમઃશબ્દેન મન્દાન્ધકારગ્રહણમેવ ન્યાય્યમ્ । નેત્રમાન્ધ્યરૂપતિમિરદોષોऽપિ તમઃશબ્દેન ગૃહ્યતે । આદિશબ્દેન કાચકામલાદિનેત્રરોગાશ્ચ ગૃહ્યન્તે । સમાનાકારા ભવતિ । તતો ન રજ્જોરાવરણભઙ્ગો જાયતે । ઇત્થમાવરણભઞ્જકવૃત્તિસંસર્ગે સત્યપિ યદા દોષૈઃ રજ્જ્વામાવરણભઙ્ગો ન જાયતે તદા અધિષ્ઠાનભૂતરજ્જ્વવચ્છિન્નચૈતન્યનિષ્ઠાવિદ્યાયાં કશ્ચન વિક્ષેપો જાયતે । તદા સાવિદ્યા સર્પાકારેણ પરિણમતે । સ ચાવિદ્યાકાર્યભૂતઃ સર્પો યદિ સન્ સ્યાત્, ન સ રજ્જુસાક્ષાત્કારેણ નિવર્તેત; નિવૃત્તિશ્ચાનુભૂયતે । તસ્માન્નૈવ સન્ સ સર્પઃ । અત્યન્તાસંશ્ચેત્સ્યાત્સ સર્પો વન્ધ્યાપુત્રાદિવન્નોપલભ્યેત, ઉપલભ્યતે તુ । તસ્માન્નાપ્યસન્ સ સર્પઃ । કિન્તુ સદસદ્વિલક્ષણોऽનિર્વચનીયઃ । એવમેવ શુક્ત્યાદ્યધિકરણેષ્વપિ આરોપિતરજતાદયસ્તાત્કાલિકતયા અનિર્વચનીયતયોત્પન્નાઃ સન્તઃ પ્રતિભાન્તિ । અસ્યનિર્વચનીયસ્ય સર્પાદેઃ ખ્યાતિઃ = પ્રસિદ્ધિઃ = પ્રતીતિઃ = સ્ફુરણમભિવદનઞ્ચાનિર્વચનીયખ્યાતિરિત્યુચ્યતે ।

## (૧૪૭)

ભ્રમસ્થલે સર્પજ્ઞાનમપ્યવિદ્યાપરિણામઃ; સર્પતજ્જ્ઞાનયોર્યુગપદેવોત્પત્તિલયૌ; સર્પઃ સાક્ષિભાસ્યશ્ચ - યથા સર્પાદિરવિદ્યાપરિણામસ્તથા તાદૃશસર્પાદિજ્ઞાનરૂપવૃત્તિરપ્યવિદ્યાપરિણામ એવ, ન ત્વન્તઃકરણપરિણામઃ । અત એવાધિષ્ઠાનરજ્જ્વાદિસાક્ષાત્કારેણ આરોપિતસર્પા- દિરિવારોપિતસર્પાદિજ્ઞાનમપિ બાધ્યતે । તસ્યાન્તઃકરણપરિણામત્વે તુ ન બાધો યુજ્યતે । અતઃ આરોપિતસર્પાદિવત્ તજ્જ્ઞાનમપ્યવિદ્યાકાર્યત્વાત્ સદસદ્વિલક્ષણમનિર્વચનીયં ભવતિ । અપિ ત્વયં વિશેષઃ - પ્રાતિભાસિકસર્પાદિઃ રજ્જ્વાદ્યુપહિતાધિષ્ઠાનચૈતન્યસ્થતમોગુણપ્રધા । તદ્વિષયકવૃત્તિજ્ઞાનન્તુ ઇદમાકારવૃત્ત્યભિવ્યઞ્જકસાક્ષિચૈતન્યસ્થસત્ત્વગુણપ્રધાનાવિદ્યાંશપરિણામ ઇતિ વિવેકઃ । રજ્જ્વાદ્યુપહિતચૈતન્યસ્થાવિદ્યા યદા સર્પાદ્યાકારેણ પરિણમતે, તદૈવ તદ્વૃત્ત્યુપહિતસાક્ષિચૈતન્યસ્થાપ્યવિદ્યા સર્પાદિજ્ઞાનાકારેણ પરિણમતે । યેન કારણેન રજ્જ્વાદ્યુપહિતચૈતન્યસ્થાવિદ્યાયાં ક્ષોભો જાયતે તેનૈવ કારણેન સાક્ષિચૈતન્યસ્થાવિદ્યાયામપિ ક્ષોભો જાયતે । તસ્માદ્ભ્રમસ્થલે સર્પાદિ૧. નનુ સદ્વિલક્ષણમસત્ । અતઃ સદ્વિલક્ષણસ્યાનિર્વચનીયસ્યાસદ્વિલક્ષણત્વોક્તિર્વિરુધ્યતે । તથાસતો

વિલક્ષણં સદેવ । અતોઽસતો વિલક્ષણસ્યાનિર્વચનીયસ્ય સદ્વિલક્ષણત્વોક્તિરપ્યસઙ્ગતૈવ । તસ્માત્સદસદ્વિલક્ષણતૃતીયપદાર્થસ્યૈવાભાવાદનિર્વચનીયપદાત્ શાબ્ધબોધ એવ નોદેષ્યતીતિ ચેન્ન । ત્રિકાલાબાધ્યત્વસ્યૈવ સત્ત્વાત્, તદ્વિલક્ષણમિત્યસ્ય કાલત્રયેઽપિ બાધ્યમિત્યર્થઃ સિદ્ધ્યતિ । નિઃસ્વરૂપવન્ધ્યાપુત્રાદિ અસદિત્યુચ્યતે । તતો વિલક્ષણમિત્યસ્ય સ્વરૂપવદિત્યર્થઃ । તસ્માદ્બાધ્યત્વે સતિ સ્વરૂપવત્ત્વમનિર્વચનીયપદસ્યાર્થઃ । તથા ચ રજ્જુસર્પાદિરિવ પ્રપઞ્ચસ્યાપ્યનિર્વચનીયતયૈવ ભાનં વેદાન્તનિપુણાનાં ભવતિ । ૨. ઉપાદાનસ્ય કાર્યાભિમુખત્વં ક્ષોભઃ । વિષયાસ્તજ્જ્ઞાનાનિ ચ યુગપદેવોત્પદ્યન્તે, રજ્જ્વાદ્યધિષ્ઠાનસાક્ષાત્કારેણ યુગપદેવ પ્રલીયન્તે ચ । ઇત્થં ચ ભ્રમસ્થલે બાહ્યચૈતન્યસ્થાવિદ્યાંશઃ સર્પાદિવિષયોપાદાનાકારણં ભવતિ । અન્તઃસાક્ષિચૈતન્યસ્થાવિદ્યાંશઃ સર્પાદિવિષયકજ્ઞાનરૂપવૃત્ત્યુપાદાનકારણં ભવતિ । સ્વપ્ને ત્વન્તઃસાક્ષ્યાશ્રયાવિદ્યાગતતમોગુણાંશો વિષયાકારેણ પરિણમતે, તાદૃશાવિદ્યાગતસત્ત્વગુણાંશસ્તજ્જ્ઞાનાકારેણ પરિણમતે । અત એવ સ્વપ્નેઽન્તઃસ્થાવિદ્યૈવ વિષયતજ્જ્ઞાનયોરુભયોરુપાદાનકારણં ભવતિ । અનેનૈવ હેતુના બાહ્યરજ્જુસર્પાદયઃ આન્તરસ્વાપ્નિકપદાર્થાશ્ચ સાક્ષિભાસ્યા ઇત્યુચ્યન્તે । અવિદ્યાવૃત્તિદ્વારા યદ્યત્ સાક્ષી પ્રકાશયતિ તત્તત્ સાક્ષિભાસ્યમિત્યુચ્યતે ।

## (૧૪૮)

રજ્જુસર્પઃ તજ્જ્ઞાનં ચાવિદ્યાયાઃ પરિણામશ્ચેતનસ્ય વિવર્તશ્ચ - અનિર્વચનીયરજ્જુસર્પાદિસ્તજ્જ્ઞાનં ચ ભ્રમ ઇતિ અધ્યાસ ઇતિ ચોચ્યતે । અયં ચ ભ્રમોઽવિદ્યાયાઃ પરિણામશ્ચૈતન્યસ્ય વિવર્તશ્ચ ભવતિ । ઉપાદાનકારણસમસ્વભાવકોઽન્યથાભાવઃ પરિણામઃ, અધિષ્ઠાનવિષમસ્વભાવકોઽન્યથાભાવો વિવર્ત ઇતિ ચ વિવેકઃ । ઉપાદાનકારણમવિદ્યા, સ ચાનિર્વચનીયા । તથા રજ્જુસર્પાદિ તજ્જ્ઞાનઞ્ચાનિર્વચનીયમેવ । તસ્માદ્રજ્જુસર્પાદિ તજ્જ્ઞાનઞ્ચાવિદ્યાસમસ્વભાવકતદન્યથાભાવરૂપત્વાદવિદ્યાપરિણામો ભવતિ । રજ્જ્વાદ્યવચ્છિન્નાધિષ્ઠાનચૈતન્યં તુ સત્સ્વરૂપમાસ્તે । રજ્જુસર્પાદિ તજ્જ્ઞાનં હિ સદ્વિલક્ષણં ભવતિ । તસ્માદ્રજ્જુસર્પાદિ તજ્જ્ઞાનં ચ સ્વાધિષ્ઠાનચૈતન્યાદ્વિરુદ્ધસ્વભાવકતદન્યથાભાવરૂપત્વાચ્ચૈતન્યવિવર્તો ભવતિ । તતો રજ્જુસર્પાદિ તજ્જ્ઞાનઞ્ચાવિદ્યાપરિણામઃ, ચૈતન્યસ્ય વિવર્તશ્ચેતિ સિદ્ધમ્ ।

## (૧૪૯)

રજ્જુસર્પતજ્જ્ઞાનયોઃ ક્રમેણ રજ્જૂપહિતચૈતન્યમન્તઃકરણોપહિતચૈતન્યં ચાધિષ્ઠાનમ્ । રજ્જુતત્ત્વજ્ઞાનં તયોર્નિવર્તકમ્મિથ્યાભૂતસર્પાદ્યધિષ્ઠાનં રજ્જ્વાદ્યુપહિતચૈતન્યમેવ, ન તુ રજ્જ્વાદ્યચેતનમ્; રજ્જ્વાદેરપિ સર્પાદિવત્કલ્પિતત્વાત્ । ન હ્યેકં કલ્પિતં વસ્તુ કલ્પિતવસ્ત્વન્તરસ્યા ધિષ્ઠાનં ભવેત્ । અતો રજ્જ્વાદ્યુપહિતચૈતન્યમેવ સર્પાદ્યધિષ્ઠાનમ્, ન રજ્જ્વાદ્યચેતનમ્ । રજ્જુવિશિષ્ટચૈતન્યસ્યાધિષ્ઠાનત્વાઙ્ગીકારે, ઉભયોઃ રજ્જોશ્ચૈતન્યસ્ય ચાધિષ્ઠાનત્વં ભવેત્ । તત્ર રજ્જોરધિષ્ઠાનત્વસ્ય બાધિતત્વાત્, રજ્જૂપહિતચૈતન્યમેવાધિષ્ઠાનં ન તુ રજ્જુવિશિષ્ટચૈતન્યમ્ । તથા સર્પાદિજ્ઞાનસ્યાપિ સાક્ષિચૈત૧. ઉદાહરણં - યથા ઘટં પ્રતિ મૃદુપાદાનકારણમ્ । કુલાલાદિર્નિમિત્તકારણમ્ । ન્યમેવાધિષ્ઠાનમ્ । ઇત્થં સર્વત્ર ભ્રમસ્થલે વિષયસ્ય તજ્જ્ઞાનસ્ય ચોપાધિભેદાદધિષ્ઠાનં

ભિદ્યતે, નત્વેકમ્ । વિશેષરૂપેણ રજ્જોરજ્ઞાનં યથાવિદ્યાયાં ક્ષોભોત્પાદનદ્વારા સર્પાદિસ્તજ્જ્ઞાનસ્ય ચ કારણં તથા વિશેષરુપેણ રજ્જુજ્ઞાનં તદુભયોર્નિવૃત્તિકારણં ભવતિ ।

## (A. 150-159) અત્રાક્ષેપસમાધાનાનિ-

### (૧૫૦)

રજ્જુજ્ઞાનેન સર્પનિવૃત્તિર્ન સ્યાદિત્યાક્ષેપઃ - નનુ
રજ્જ્વાદિજ્ઞાનેન ન સર્પાદિર્નિવર્તેત । મિથ્યાવસ્તુનો યદધિષ્ઠાનમ્, તજ્જ્ઞાનેનૈવ
મિથ્યાવસ્તુ નિવર્તેતેત્યદ્વૈતસિદ્ધાન્તઃ । મિથ્યાભૂતસર્પાદ્યધિષ્ઠાનં તુ રજ્જ્વાદ્યુપહિતચૈતન્યમેવ, ન રજ્જ્વાદિરિતિ પ્રાગભિહિતમ્ । તસ્માદ્રજ્જ્વાદિજ્ઞાનેન ન સર્પાદિનિવૃત્તિર્ભવેદિતિ ચેત્-

### (૧૫૧)

રજ્જુજ્ઞાનમેવ સર્પાદ્યધિષ્ઠાનજ્ઞાનં ભવતીતિ સમાધિઃ- અત્રોચ્યતે - રજ્જ્વાદિજડપદાર્થવિષયકજ્ઞાનમન્તઃકરણવૃત્તિરૂપમ્ । વૃત્તેસ્તુ પ્રયોજનમાવરણભઙ્ગઃ । ઇદઞ્ચાવરણમજ્ઞાનસ્ય શક્તિઃ । યસ્માદાવરણં જડમનાશ્રિત્ય તદધિષ્ઠાનચૈતન્યમેવાશ્રયતિ, તસ્માદન્તઃકરણવૃત્ત્યા રજ્જ્વાદિવિષયાકારાપન્નયા રજ્જ્વાદ્યવચ્છિન્નચૈતન્યાવરણમેવ ભજ્યતે । વૃત્તિસ્થચિદાભાસસ્તુ રજ્જુમાત્રં પ્રકાશયતિ । ચૈતન્યસ્ય સ્વયમ્પ્રકાશરૂપત્વાત્તત્પ્રકાશાય નાભાસ ઉપયુજ્યતે । અયમર્થો વિસ્તરતઃ ઉપરિષ્ટાદસ્મિન્નેવ તરઙ્ગે કથયિષ્યતે । ઇત્થં ચિદાભાસવિશિષ્ટાન્તઃકરણવૃત્તિરૂપજ્ઞાનસ્ય કેવલવૃત્તિરૂપાંશશ્ચૈતન્યનિષ્ઠાવરણં નાશયતિ, ચિદાભાસરૂપાંશસ્તુ રજ્જું પ્રકાશયતીતિ પ્રયોજનદ્વયં સિદ્ધ્યતિ । તસ્માદ્વૃત્તિજ્ઞાનસ્ય ન કેવલજડાત્મકરજ્જુર્વિષયીભવતિ । કિન્ત્વધિષ્ઠાનચૈતન્યેન સહિતા રજ્જુઃ ચિદાભાસસહિવૃત્તેર્વિષયીભવતિ । અત એવ સિદ્ધાન્તગ્રન્થે “અન્તઃકરણજન્યવૃત્તિજ્ઞાનં અખણ્ડં બ્રહ્મ વિષયીકરોતિ” ઇત્યભિહિતમ્ । ઇત્થં યતો રજ્જુજ્ઞાનેન ભગ્નાવરણં સત્ સર્પાદ્યધિષ્ઠાનરજ્જ્વાદ્યવચ્છિન્નચૈતન્યં સ્વયમેવ પ્રકાશતે, તતો રજ્જુજ્ઞાનમેવ સર્પાદ્યધિષ્ઠાનજ્ઞાનરૂપમપિ ભવતિ । તતશ્ચ રજ્જુજ્ઞાનેન સર્પાદિનિવૃત્તિર્યુજ્યત એવ ।

### (૧૫૨)

રજ્જુજ્ઞાનેન સર્પજ્ઞાનં ન નિવર્તેતેત્યાક્ષેપઃ - નનૂક્તપ્રકારેણ રજ્જુજ્ઞાનેન સર્પે નિવૃત્તેઽપિ સર્પવિષયકજ્ઞાનં નૈવ નિવર્તેત । સર્પસ્યાધિષ્ઠાનં રજ્જ્વવચ્છિન્નચૈતન્યમ્, સર્પજ્ઞાનસ્યાધિષ્ઠાનં તુ સાક્ષિચૈતન્યમિતિ ભેદઃ । ઉક્તરીત્યા તુ રજ્જુસાક્ષાત્કારેણ રજ્જ્વવચ્છિન્નચૈતન્યમેવ પ્રકાશેત, ન સાક્ષિચૈતન્યમ્ । અતો રજ્જુજ્ઞાને ઉત્પન્નેઽપિ સર્પજ્ઞાનાધિષ્ઠાનસાક્ષિચૈતન્યં નૈવ જ્ઞાયતે । અજ્ઞાતે ચાધિષ્ઠાને તદારોપિતનિવૃત્તિર્ન દૃષ્ટા, કિન્તુ જ્ઞાતે એવાધિષ્ઠાને । તસ્માદ્રજ્જુજ્ઞાનેન સર્પજ્ઞાનસ્ય નિવૃત્તિર્નોપપદ્યત ઇતિ ચેત્

## (A. 153-155) સર્પાભાવાત્સર્પજ્ઞાનસ્ય કારણે લયરૂપનિવૃત્તિરિતિ સમાધિઃ-

### (૧૫૩)

સર્પાભાવાત્સર્પજ્ઞાનાભાવઃ - અત્રોચ્યતે । વિષયાધીનં હિ જ્ઞાનં ભવતિ । રજ્જુસાક્ષાત્કારેણોક્તરીત્યા રજ્જ્વવચ્છિન્નચૈતન્યારોપિતસર્પરૂપવિષયનિવૃત્ત્યા સર્પજ્ઞાનમપિ સ્વવિષયાભાવાન્નિવર્તત એવ ।

### (૧૫૪)

સાક્ષિજ્ઞાનમન્તરા સર્પજ્ઞાનં ન નિવર્તેતેત્યાક્ષેપઃ - નનુ કથમધિષ્ઠાનજ્ઞાનમન્તરા તદારોપિતભ્રમો નિવર્તેત । સર્પજ્ઞાનમપિ કલ્પિતમ્ । તસ્ય હ્યધિષ્ઠાનં સાક્ષિચૈતન્યમ્ । તજ્જ્ઞાનમન્તરા તત્ર કલ્પિતસર્પજ્ઞાનં ન નિવર્તેતેતિ ચેત્-

### (૧૫૫)

સાક્ષિજ્ઞાનમન્તરાપિ સર્પજ્ઞાનં નિવર્તેતેતિ સમાધાનમત્રાપ્યુચ્યતે । નિવૃત્તિર્દ્વિવિધા - આત્યન્તિકનિવૃત્તિઃ, કારણાત્મનાવસ્થિતિરૂપા નિવૃત્તિશ્ચેતિ । સ્વકારણેન સહૈવ કાર્યસ્ય નિવૃત્તિરાત્યન્તિકી નિવૃત્તિરિત્યુચ્યતે । કલ્પિતવસ્તૂનાં સર્વેષાં કારણં તુ તદધિષ્ઠાનચૈતન્યાશ્રિતતદાવારકાજ્ઞાનમેવ । તસ્માદધિષ્ઠાનચૈતન્યાપરોક્ષજ્ઞાનેનૈવાજ્ઞાનં તત્કાર્યઞ્ચ સર્વમારોપિતં નિઃશેષં નિવર્તતે । કાર્યસ્ય કારણે લયરૂપનિવૃત્તિસ્તુ વિનાપ્યધિષ્ઠાનજ્ઞાનં જાયેત । સુષુપ્તૌ પ્રલયે ચ સકલપદાર્થાનાં વિનૈવાધિષ્ઠાનજ્ઞાનમજ્ઞાને સ્વકારણે લયો ભવતિ । તદા સર્વદૃશ્યપદાર્થલયહેતુસ્તત્તદ્ભોગપ્રદકર્મોપરમ એવ । એવમેવાન્તરાપ્યધિષ્ઠાનસાક્ષિજ્ઞાનમ્, સર્પજ્ઞાનં નિવર્તતે । તત્ર સર્પજ્ઞાનવિષયીભૂતસર્પાભાવ એવ સર્પજ્ઞાનનિવૃત્તેઃ કારણં ભવતિ । ઇત્થં ચ રજ્જુજ્ઞાનેન સર્પો નિવર્તતે, તતશ્ચ સર્પજ્ઞાનવિષયીભૂતસર્પાભાવ એવ સર્પજ્ઞાનસ્ય લયરૂપનિવૃત્તૌ નિમિત્તં ભવતિ ।

### (૧૫૬)

રજ્જુજ્ઞાનસમયે સર્પજ્ઞાનાધિષ્ઠાનભૂતસાક્ષિભાનમપિ સમ્ભવતીતિ સમાધાનં - અથવા સર્પસ્તજ્જ્ઞાનં ચેત્યુભયમપિ રજ્જુજ્ઞાનેનૈવ નિવર્તતે । તથા હિ, રજ્જુસાક્ષાત્કારસમયેઽન્તઃકરણં નેત્રદ્વારા બહિર્નિર્ગત્ય રજ્જુદેશં પ્રાપ્ય તત્સમાનાકારં ભવતિ । અતો રજ્જુસાક્ષાત્કારસમયે વૃત્ત્યુપહિતચૈતન્યં રજ્જૂપહિતચૈતન્યઞ્ચેત્યુભયમપ્યેકીભવતિ । ન તયોરસ્તિ ભેદઃ ।

૧. પટસ્ય સ્વોપાદાનભૂતતન્તુભિઃ સહ દાહઃ આત્યન્તિકનિવૃત્તિઃ ।
ઘટસ્ય ધ્વંસે મૃદ્ભાવાપત્તૌ લયરૂપનિવૃત્તિઃ । અત્રાયં
હેતુઃ - ન હિ ક્વચિદપિ ચૈતન્યસ્યાસ્તિ ભેદઃ સ્વરૂપતઃ,

કિન્તૂપાધિનિ બન્ધન એવ સઃ । વૃત્ત્યુપહિતચૈતન્યસ્ય
રજ્જૂપહિતચૈતન્યસ્ય ચ ભેદપ્રયોજકોપાધિર્વૃત્તી રજ્જુશ્ચ ।
યદા વૃત્તી રજ્જુશ્ચેત્યુપધિદ્વયં વિભિન્નદેશસ્થં
તદા તદુપહિતચૈતન્યયોર્ભેદઃ સિદ્ધ્યતિ । યદા
તૂપાધ્યોરેકદેશસ્થત્વં ભવતિ તદા નોપહિતચૈતન્યયોર્ભેદઃ ।
અયમર્થો વેદાન્તપરિભાષાદિગ્રન્થેષુ પ્રસિદ્ધઃ ।
વિભિન્નદેશ- સ્થોપાધિભ્યામેવોપહિતચૈતન્યયોર્ભેદઃ
કલ્પ્યતે । દ્વયોરપ્યુપાધ્યોરેકદેશસ્થત્વે તુ
તાભ્યામુપહિતં ચૈતન્યમપ્યેકમેવેતિ સિદ્ધ્યતિ ।
ઉક્તરીત્યા રજ્જુસાક્ષાત્કારદશાયાં રજ્જૂપહિતચૈતન્યં
વૃત્ત્યુપહિતચૈતન્યઞ્ચેત્યેતદુભયમેકીભવતિ । તત્ર
સાક્ષિચૈતન્યમેવ વૃત્ત્યુપહિતચૈતન્યમિત્યુચ્યતે, અન્તઃકરણે
તદ્વૃત્તૌ ચ સ્થિત્વાપ્યસઙ્ગતયા તયોરવભાસકચૈતન્યમાત્રસ્ય
સાક્ષિત્વાભિધાનાત્ । ઉક્તરીત્યા રજ્જુસાક્ષાત્કારસમયે સાક્ષિચૈતન્યસ્ય
રજ્જૂપહિતચૈતન્યસ્ય ચાભેદઃ સિદ્ધઃ । રજ્જૂપહિતચૈતન્યં
ચ રજ્જુજ્ઞાનેનાવભાસતે । રજ્જૂપહિતચૈતન્યાદપૃથગ્ભૂતં
સાક્ષિચૈતન્યમપિ રજ્જુજ્ઞાનેનૈવાવભાસતે । એવં
રજ્જુસાક્ષાત્કારસમયે સર્પજ્ઞાનાધિષ્ઠાનભૂતસાક્ષિચૈતન્યસ્ય
ભાનસત્ત્વાત્, તત્ર કલ્પિતસર્પજ્ઞાનસ્યાપિ નિવૃત્તિઃ સમ્ભવતિ ।

## (૧૫૭)

સકલત્રિપુટીભાનસમયે સાક્ષિભાનમવશ્યં ભવતીતિ નિરૂપણં - અથવા કૂટસ્થદીપે વિદ્યારણ્યમુનિભિરિત્થમુક્તં - "અન્તઃકરણસ્ય વૃત્તિશ્ચિદાભાસસહિતા ચક્ષુરાદિકરણદ્વારા બહિર્નિર્ગત્ય ઘટાદિવિષયાન્ પ્રકાશયતિ । તત્ર ઘટાદિરૂપો વિષયઃ, ચિદાભાસસહિતવૃત્તિરૂપં ઘટાદિવિષયકં જ્ઞાનમ્, ચિદાભાસસહિતાન્તઃકરણરૂપો જ્ઞાતા; એતત્ત્રયમપિ સાક્ષી પ્રકાશયતિ" ઇતિ । અસ્યાયમર્થઃ - "અયં ઘટઃ" ઇતિ જ્ઞાને સાભાસાન્તઃકરણવૃત્ત્યા ઘટમાત્રં પ્રકાશતે । "ઘટમહં જાનામિ" ઇત્યત્ર તુ "અહમ્" ઇતિ શબ્દસ્યાર્થો યો જ્ઞાતા, "ઘટ" ઇતિ યો જ્ઞેયઃ, "જાનામિ" ઇતિ યત્ ઘટવિષયકં જ્ઞાનમ્, ઇત્યેતત્ ત્રયમપિ ત્રિપુટીરૂપં સાક્ષી પ્રકાશયતીતિ । જ્ઞાતા, જ્ઞેયમ્, જ્ઞાનં ચેત્યેતત્ ત્રયમપિ ત્રિપુટીત્યુચ્યતે । ઇત્થમેવ સર્વત્ર નિખિલત્રિપુટીપ્રકાશકઃ સાક્ષ્યેવ । યદિ સાક્ષી સ્વયમજ્ઞાતઃ સ્યાત્ તદા ત્રિપુટીજ્ઞાનં ન સાક્ષિણા જ્ઞાયેત । તસ્માત્સકલત્રિપુટીજ્ઞાનદશાયાં સાક્ષિજ્ઞાનમપ્યવશ્યં જાયત એવ સ્વયમ્પ્રકાશત્વાત્સાક્ષિણઃ, ઇત્યભ્યુપેયમ્ । અનેન ચ સાક્ષિજ્ઞાનેન સર્પજ્ઞાનં નિવર્તતે । ઉક્તરીત્યા સર્પાદિમિથ્યાવિષયસ્ય તજ્જ્ઞાનસ્ય ચ પૃથગેવાધિષ્ઠાનમિત્યભ્યુપગમપક્ષે ઇયન્ત્યાક્ષેપસમાધાનાનિ સમભવન્ ।

## (૧૫૮)

મિથ્યાસર્પસ્ય તજ્જ્ઞાનસ્ય ચાધિષ્ઠાનં સાક્ષ્યેવેતિ નિરૂપણં - મિથ્યાસર્પસ્ય તજ્જ્ઞાનસ્ય ચ પૃથગધિષ્ઠાનત્વપક્ષે દોષાત્તયોરેકમેવાધિષ્ઠાનમિતીદાનીં નિરૂપ્યતે । તત્ર ન હિ બાહ્યરજ્જ્વવચ્છિન્નચૈતન્યં સર્પસ્ય તજ્જ્ઞાનસ્ય ચાધિષ્ઠાનં ભવતીતિ શક્યતે વક્તુમ્ । યાવન્તિ જ્ઞાનાનિ જાયન્તે તાનિ સર્વાણ્યપિ પ્રમાતારં સાક્ષિણં વાશ્રિત્ય જાયન્ત ઇતિ નિયમઃ । તસ્માત્ બાહ્યરજ્જ્વવચ્છિન્નચૈતન્યં ન સર્પજ્ઞાનસ્યાશ્રયો ભવિતુમર્હતિ । સર્પસ્ય તદ્વિષયકભ્રમરૂપજ્ઞાનસ્ય ચાધિષ્ઠાનમન્તઃકરણોપહિતસાક્ષિચૈતન્યમિત્યભ્યુપગમે શરીસ્યાન્તરેવાન્તઃકરણપ્રદેશે સર્પોપલબ્ધિરભ્યુપગન્તવ્યા સ્યાત્, ન તુ બાહ્યરજ્જુદેશે । અન્તરેવોત્પન્નઃ સર્પો માયાબલેન બહિરવભાસતે ઇત્યઙ્ગીકારે આત્મખ્યાતિમતસિદ્ધિઃ પ્રસજ્યતે । તચ્ચ પ્રાગેવ ખણ્ડિતમ્ । ઇત્થં રજ્જૂપહિતચૈતન્યસ્ય સર્પજ્ઞાનાધિષ્ઠાનત્વાસમ્ભવાત્, અન્તઃકરણોપહિતચૈતન્યસ્ય સર્પાધિષ્ઠાનત્વાસમ્ભવાચ્ચ મિથ્યાસર્પતજ્જ્ઞાનયોરેકાધિષ્ઠાનત્વપક્ષો યદ્યપ્યસઙ્ગત ઇતિ ભાતિ, તથાપિ વક્ષ્યમાણરીત્યા અન્તઃકરણવૃત્ત્યુપહિતચૈતન્યસ્યોભયાધિષ્ઠાનત્વસમ્ભવાન્ન દોષઃ । તથા હિ, ચક્ષુર્દ્વારા રજ્જુદેશં ગતસ્યાન્તઃકરણસ્યેદમાકારવૃત્ત્યુપહિતચૈતન્યાશ્રિતાવિદ્યા સર્પાકારેણ તજ્જ્ઞાનાકારેણ ચ પરિણમતે । વૃત્ત્યુપહિતચૈતન્યસ્થાવિદ્યાયાસ્તમોગુણાંશઃ સર્પસ્યોપાદાનકારણમ્; તસ્યા એવ સત્ત્વગુણાંશઃ સર્પજ્ઞાનસ્યોપાદાનકારણમ્ । એવં સર્પતજ્જ્ઞાનયોર્વૃત્ત્યુપહિચૈતન્યમેવાધિષ્ઠાનમ્ । અન્તઃકરણવૃત્તેર્બાહ્યરજ્જુદેશસ્થત્વાત્તદ્વૃત્ત્યુપહિતચૈતન્યમપિ બહિરેવાસ્તે । અતસ્તદેવ સર્પસ્યાશ્રયઃ । અન્તઃકરણસ્ય સ્વરૂપં યાવત્તાવદેવ સાક્ષિસ્વરૂપમપિ । શરીરાન્તઃસ્થાન્તઃકરણમેવ વૃત્તિરૂપેણ પરિણતમ્ । તસ્માદ્વૃત્ત્યુપહિતચૈતન્યં સાક્ષી ભવતિ । અતસ્તદેવ સર્પજ્ઞાનસ્યાશ્રયઃ । રજ્જુપ્રત્યક્ષકાલે રજ્જૂપહિતચૈતન્યવૃત્ત્યુપહિતચૈતન્યયોરેકીભાવાત્ રજ્જુજ્ઞાનેનૈવ મિથ્યાસર્પતજ્જ્ઞાનયોર્નિવૃત્તિરુપપદ્યતે ।

## (૧૫૯)

એકસ્યામેવ રજ્જૌ નાનાપુરુષાણાં ભિન્નભિન્નભ્રમાદપિ સાક્ષિચૈતન્યમેવ ભ્રમાધિષ્ઠાનં - કિઞ્ચૈકસ્યામેવ રજ્જ્વાં નાનાપુરુષાણાં ભિન્નભિન્નાઃ ભ્રમાઃ ભવન્તિ - યથા કસ્યચિત્ સર્પ ઇતિ, અન્યસ્ય દણ્ડ ઇતિ, અપરસ્ય માલેતિ, એકસ્ય ભૂચ્છિદ્રમિતિ, ઇતરસ્ય તૈલધારેતિ ચ । અથવા સર્વેષાં સર્પ ઇત્યેકરીત્યૈવ ભ્રમો જાયતામ્ । તત્ર યસ્ય પુરુષસ્ય રજ્જુસાક્ષાત્કારો જાયતે તસ્યૈવ તદીયવૃત્ત્યવચ્છિન્નચૈતન્યે કલ્પિતોઽધ્યાસો નિવર્તતે । યસ્ય તુ રજ્જુસાક્ષાત્કારો ન ભવતિ તસ્યાધ્યાસનિવૃત્તિર્નાસ્તિ । તસ્માત્ વૃત્ત્યવચ્છિન્નચૈતન્યમેવ કલ્પિતાનાં સર્વેષામધિષ્ઠાનમ્, ન તુ રજ્જ્વાદિવિષયોપહિતચૈતન્યમ્ । રજ્જૂપહિતચૈતન્યસ્ય સર્પદણ્ડાદ્યધિષ્ઠાનત્વે નાનાપુરુષાણાં ભિન્નભિન્નતયા પ્રતીયમાનાનિ સર્પદણ્ડાદીનિ વસ્તૂનિ સર્વાણ્યપિ, એકૈકસ્યાપિ પુરુષસ્ય પ્રતીયેરન્; ન તુ તથા પ્રતીયતે । વૃત્ત્યુપહિતચૈતન્યસ્ય મિથ્યાસર્પાદ્યધિષ્ઠાનત્વવાદિમતરીત્યા તુ ન દોષઃ । યસ્ય પુરુષસ્ય વૃત્ત્યુપહિતચૈતન્યે યદ્વસ્તુ કલ્પિતં તદ્વસ્તુ તસ્યૈવ પ્રતીયતે, નાન્યસ્યેતિ વક્તું શક્યત્વાત્ । ઇત્થં બાહ્યભ્રમવિષયસર્પાદીનાં તજ્જ્ઞાનાનાં ચ વૃત્ત્યુપહિતસાક્ષિચૈતન્યમેવાધિષ્ઠાનમ્ । સ્વપ્નોપલબ્ધપદાર્થાનાં

તજ્જ્ઞાનાનાં ચાન્તઃકરણોપહિતસાક્ષ્યેવાધિષ્ઠાનમ્ । એવં ચ સદસદ્વિલક્ષણાનર્વચનીયાવિદ્યાયાઃ પરિણામભૂતાનિર્વચનીયસર્પાદીનાં ખ્યાતિઃ = પ્રતીતિઃ = પ્રસિદ્ધિઃ = સ્ફુરણમભિવદનઞ્ચ અનિર્વચનીયખ્યાતિઃ ઇત્યુચ્યતે ।

## (૧૬૦)

મિથ્યાજગત આધારાધિષ્ઠાનવિષયકપ્રશ્નઃ - હે સ્વામિન્ । પ્રતીયમાનસ્યાપારસ્ય મિથ્યાભૂતસ્યાસ્ય જગત આધારઃ કઃ । અધિષ્ઠાનં ચ કિમ્ । કૃપયા વદ મે પ્રભો । ઇતિ તત્ત્વદૃષ્ટિઃ પૃચ્છતિ ।

# (A. 161-162) પૂર્વપ્રશ્નસ્યોત્તરમ્-

## (૧૬૧)

મિથ્યાજગત આત્મૈવાધારોઽધિષ્ઠાનં ચ - હે શિષ્ય । ત્વન્નિજસ્વરૂપાજ્ઞાનાત્ (આત્મનો બ્રહ્મરૂપેણાજ્ઞાનાત્) તવેદં મિથ્યાજગત્ પ્રતિભાસતે । અતસ્ત્વમેવાસ્ય જગત આધારોઽધિષ્ઠાનં ચ । રજ્જ્વજ્ઞાનાન્મિથ્યાભૂતઃ સર્પઃ પ્રતિભાસતે । તત્ર મિથ્યાભૂતસર્પાદીનાં રજ્જુરાધારોઽધિષ્ઠાનં ચ ભવતિ । યદ્યપિ મુખ્યસિદ્ધાન્તભૂતદ્વિતીયપક્ષે મિથ્યાસર્પાદ્યધિષ્ઠાનં વૃત્ત્યુપહિતચૈતન્યમિતિ પ્રથમપક્ષે રજ્જૂપહિતચૈતન્યમિતિ ચોક્તત્વાન્ન કસ્મિંશ્ચિદપિ પક્ષે રજ્જ્વાદિ જડમધિષ્ઠાનં ભવતિ, તથાપિ પ્રથમપક્ષે ચૈતન્યનિષ્ઠાધિષ્ઠાનત્વે રજ્જુરુપાધિર્ભવતીત્યતઃ સ્થૂલદૃષ્ટ્યા રજ્જુરેવાધિષ્ઠાનમિત્યુચ્યતે । મિથ્યાભૂતસર્પાદેર્યથા રજ્જુરધિષ્ઠાનમાધારશ્ચ ભવતિ તથા મિથ્યાજગતસ્ત્વમેવાધિષ્ઠાનમાધારશ્ચ ભવસિ ।

## (૧૬૨)

આત્મનઃ સામાન્યરૂપમાધારઃ, વિશેષરૂપમધિષ્ઠાનમત્રેદમાકૂતં - રજ્જોઃ સ્વરૂપદ્વયમસ્તિ, એકં સામાન્યરૂપમ્, અપરં વિશેષરૂપમિતિ ચ । તત્ર "ઇયમ્" ઇતિ સામાન્યરૂપમ્; "રજ્જુઃ" ઇતિ વિશેષરૂપમ્ । "અયં સર્પઃ" ઇતિ ભ્રાન્તિદશાયાં મિથ્યાભૂતસર્પેણ તાદાત્મ્યાપન્નં સદ્ભાસમાનં "અયમ્" ઇતિ યત્સ્વરૂપં તત્ સામાન્યરૂપમ્ । ભ્રાન્તિદશાયાં યત્સ્વરૂપં ન ભાસતે, યસ્ય સ્વરૂપસ્ય સાક્ષાત્કારમાત્રેણ ભ્રમો નિવર્તતે તદેવ રજ્જોઃ વિશેષરૂપમ્ । એવં આત્મનોઽપ્યેકઃ સામાન્યરૂપમપરં વિશેષરૂપમિતિ રૂપદ્વયયમસ્તિ । તત્ર સદ્રૂપં સામાન્યરૂપમ્, અસઙ્ગત્વકૂટસ્થત્વનિત્યત્વશુદ્ધત્વમુક્તત્વાદિ વિશેષરૂપમ્ । તથા હિ, "સ્થૂલસૂક્ષ્મશરીરસઙ્ઘાતોઽસ્તિ" ઇતિ કાર્યકરણસઙ્ઘાતભ્રાન્તિદશાયામપિ મિથ્યાભૂતકાર્યકરણસઙ્ઘાતાદભિન્નતયા સદ્રૂપં પ્રકાશતે । અત એવ સદ્રૂપમાત્મનઃ સામાન્યરૂપં ઇત્યુચ્યતે । કાર્યકરણસઙ્ઘાતભ્રમસમયે આત્મનોઽસઙ્ગત્વકૂટસ્થત્વનિત્યત્વશુદ્ધત્વમુક્તત્વાદિસ્વ ન પ્રતિભાતિ । આત્મનોઽસઙ્ગત્વાદિસ્વરૂપેણ ભાને તુ શરીરાદિસઙ્ઘાતભ્રમો નિઃશેષં નિવર્તતે । તસ્માદસઙ્ગત્વકૂટસ્થત્વનિત્યત્વશુદ્ધત્વમુક્તત્વાદ્વિતીયત્વવ્યાપકત્વાદિકમાત્મનો વિશેષરૂપમ્ । સમસ્તભ્રમેષુ

સામાન્યસ્વરૂં આધારઃ ઇતિ વિશેષરૂપં અધિષ્ઠાનં ઇતિ ચોચ્યતે । મિથ્યાસર્પાશ્રયભૂતરજ્જોઃ “ઇયમ્” ઇતિ સામાન્યરૂપં સર્પસ્યાધારઃ, “રજ્જુઃ” ઇતિ વિશેષરૂપં અધિષ્ઠાનં ચ યથા ભવતિ, તથા મિથ્યાપ્રપઞ્ચાશ્રયભૂતાત્મનઃ સામાન્યાત્મકસદ્રૂપં પ્રપઞ્ચસ્યાધારઃ, અસઙ્ગત્વાદ્વિતીયત્વાદિવિશેષરૂપં અધિષ્ઠાનં ચ ભવતિ । અયં ચ વિભાગ આધારાધિષ્ઠાનયોઃ શ્રીમચ્છઙ્કરભગવત્પાદાચાર્યપ્રશિષ્યભૂતસર્વજ્ઞાત્મમુનીન્દ્રેણ સઙ્ક્ષેપશારીરકાખ્યગ્રન્થે પ્રદર્શિતઃ ।

## (૧૬૩)

મિથ્યાજગત આત્મનોઽન્ય દ્રષ્ટા વક્તવ્ય ઇતિ પ્રશ્નઃહે સ્વામિન્ શ્રીસદ્ગુરો । કો વાસ્ય મિથ્યાભૂતજગતો દ્રષ્ટા ભવેત્ । ન હ્યસ્ય મિથ્યાજગત આધારાધિષ્ઠાનોભયાત્મક આત્મૈવ દ્રષ્ટા ભવિતુમર્હતિ । તથા અદૃષ્ટત્વાત્ । તસ્માત્ સર્વજગત આધારાધિષ્ઠાનભાવેન સ્થિતત્વાદાત્મનસ્તદન્યેનૈવ કેનચિત્ તદ્દ્રષ્ટ્રા ભાવ્યમ્ । સર્પાદ્યાધારાધિષ્ઠાનભૂતરજ્જ્વાદેરન્ય એવ તદ્દ્રષ્ટા પુરુષો યથા ભવતિ, તદ્વત્ । કો વાસ્તિ જગતોઽસ્ય દ્રષ્ટા પ્રત્યગાત્મનોઽન્ય ઇતિ શિષ્યઃ પૃચ્છતિ ।

## (૧૬૪)

તત્ર સમાધાનં - લોકે યદ્યન્મિથ્યાવસ્તુ, તત્સર્વં સ્વાધિષ્ઠાને કલ્પિતં ભવતિ । અધિષ્ઠાનં ચ દ્વિવિધમ્, એકં ચેતનાત્મકમપરં જડાત્મકમિતિ । યત્રાધિષ્ઠાનં જડમિત્યઙ્ગીક્રિયતે, તત્રાધિષ્ઠાનાદન્ય એવ દ્રષ્ટા ભવતિ । યત્ર ચેતનમધિષ્ઠાનમ્, તત્ર સ્વસ્મિન્નારોપિતસ્ય સર્વસ્યાધિષ્ઠાનમેવ દ્રષ્ટૃ, નાન્યત્ । યથા સ્વપ્નપ્રચઞ્ચસ્યાધિષ્ઠાનં સાક્ષિચૈતન્યમ્; તદેવ તદ્દ્રષ્ટૃ ચ ભવતિ । એવમેવાસ્ય જાગ્રજ્જગતોઽપ્યાત્મૈવાધિષ્ઠાનમ્; સ એવ તસ્ય દ્રષ્ટા ચ । મન્દાધિકારિસમાધાનાર્થં સ્થૂલદૃષ્ટ્યા રજ્જ્વાદિકં સર્પાદ્યધ્યાસાધિષ્ઠાનમિત્યાશ્રિત્યૈતાદૃશશઙ્કાસમાધાને કૃતે । પરમાર્થતસ્ત્વદ્વૈતસિદ્ધાન્તે સર્પાદ્યધ્યાસાધિષ્ઠાનં સાક્ષિચૈતન્યમેવ, દ્રષ્ટૃ ચ તદેવ । તસ્માત્ કલ્પિતસકલદૃશ્યાણ્ડકોટિસહસ્રાણામધિષ્ઠાનભૂતાત્મૈવ દ્રષ્ટા । નાસ્મિન્ પક્ષે શઙ્કાસમાધાનાદિકં પ્રસજ્યત ઇતિ ગુરુરાહ ।

## (૧૬૫)

મિથ્યાસંસારનિવર્તનેચ્છા નોચિતા - હે સોમ્ય । ઇત્થં મિથ્યાભૂતં સંસારદુઃખં ભ્રાન્ત્યા ત્વયિ પ્રતિભાસતે । તસ્માન્મિથ્યાસંસારદુઃખનિવિવૃત્સા તવ ન યુજ્યતે । તત્રાયં દૃષ્ટાન્તઃ - યદિ કશ્ચન માન્ત્રિકઃ કસ્મૈચિત્ પુરુષાય સ્વમન્ત્રપ્રભાવાન્મિથ્યાભૂતં શત્રું પ્રદર્શયતિ, તદા તચ્છત્રુવિનાશાય ન સ પુરુષો યતતે; તદ્વન્મિથ્યાભૂતસંસારનિવૃત્તયે તવેચ્છા ન યુજ્યતે । તથા ચોક્તં ગૌડપાદૈર્માણ્ડૂક્યોપનિષત્કારિકાયામ્પ્રપઞ્ચો યદિ વિદ્યેત નિવર્તેત ન સંશયઃ । માયામાત્રમિદં દ્વૈતમદ્વૈતં પરમાર્થતઃ ॥ (મા. આ. ૧૭) ઇતિ । તથા વરાહોપનિષદિ ચોક્તમ્-

અજ્ઞાનમેવ ન કુતો જગતઃ પ્રસઙ્ગો
જીવેશદેશિકવિકલ્પકથાતિદૂરે ।

એકાન્તનિર્મલચિદેકરસસ્વરૂપં
બ્રહ્મૈવ કેવલમહં પરિપૂર્ણમસ્મિ ॥ ઇતિ ।

## (૧૬૬)

મિથ્યાસંસારસ્યાપિ દુઃખહેતુત્વાત્તન્નિવૃત્ત્યુપાયપ્રશ્નઃ - હે સ્વામિન્ । "જગત્ ત્વયિ મિથ્યૈવ સ્વપ્નાદિવત્ પ્રતિભાતિ, ન ચાસ્તિ તત્ પરમાર્થસદ્રૂપેણ" ઇતિ યદુક્તં તત્સત્યમેવ । તથાપિ, યથા મયિ મિથ્યારૂપેણ વા રૂપાન્તરેણ વા સ જનનમરણાદિરૂપઃ સંસારો ન પ્રતિભાસેત, તથા ઉપાયઃ કૃપયોપદિશ્યતાં મહ્યમ્ । "મિથ્યાભૂતસંસારનિવૃત્તયે સાધનાન્વેષણં તવ ન યુજ્યતે" ઇતિ ભવદુક્તં યદ્યપિ સત્યમેવ તથાપિ યસ્ય મિથ્યાપદાર્થો દુઃખહેતુર્ભવતિ તેન સ મિથ્યાપદાર્થસ્તન્નિવૃત્તિસાધનૈર્નિવર્તનીય એવ ભવતિ । તથા હિ, કસ્યચિત્ પ્રતિદિનં ભયઙ્કરદુઃસ્વપ્નદર્શનં જાયતે । સ ચ મિથ્યાભૂતસ્યાપિ તસ્ય સ્વપ્નસ્ય નિવૃત્તયે જપપાદપ્રક્ષાલનાદ્યનેકોપાયાનનુતિષ્ઠતિ । તથા મિથ્યાભૂતોઽપ્યયં સંસારો જન્માદિદુઃખહેતુત્વેન મે પ્રતિભાતિ । અતસ્તન્નિવર્તનમિચ્છામિ । તસ્માત્તન્નિવૃત્ત્યુપાયં કૃપયા વદ ભોઃ ઇતિ શિષ્યપ્રશ્નઃ ।

## (A. 167-168) ગુરુઓરુત્તરમ્-

## (૧૬૭)

આત્માજ્ઞાનહેતુકસંસારનિવૃત્તાવાત્મજ્ઞાનમેવોપાયઃ - હે
શિષ્ય । જગદ્રૂપદુઃખસ્યાત્યન્તનિવૃત્તયે પૃષ્ટ ઉપાયઃ પ્રાગેવ નિરૂપિતઃ । શ્રદ્ધાભક્તિપુરઃસરં તત્ર દૃઢનિશ્ચયઃ ક્રિયતામ્ । તતો જગદ્રૂપદુઃખમણુમાત્રમપિ
ત્વયિ ન દૃશ્યેત । હે સોમ્ય । અદ્વિતીયાસઙ્ગચિન્માત્રરૂપસ્વાત્મસ્વરૂપસ્યાપરિજ્ઞાનાજ્જગદ્રૂપદુઃખં તવ પ્રતિભાતિ । તચ્ચ તવાત્મસ્વરૂપપરિજ્ઞાનમાત્રાન્નિવર્તેત ।
યદ્વસ્તુ યસ્યાજ્ઞાનાદ્ભવતિ તદ્વસ્તુ તસ્ય જ્ઞાનમાત્રાન્નિવર્તત ઇતિ નિયમઃ । રજ્જ્વજ્ઞાનાત્પ્રતીયમાનઃ સર્પઃ "રજ્જુરેવેયમ્" ઇતિ રજ્જુજ્ઞાનમાત્રાદ્યથા નિવર્તતે, તથા
આત્મજ્ઞાનાત્પ્રતીયમાનં જગદપ્યાત્મતત્ત્વસાક્ષાત્કારમાત્રેણ નિવર્તેત ।
તચ્ચાત્મતત્ત્વજ્ઞાનમુપદિષ્ટપૂર્વમપિ ભૂયોઽનુવ્યાખ્યાસ્યામિ - કાલત્રયેઽપિ મયિ જગદણુમાત્રમપિ નાસ્તિ; મિથ્યાત્વાત્, સ્વપ્નવત્ । યન્મિથ્યા તદધિષ્ઠાનં ન દૂષયેત્ । ન હિ મરીચ્યુદકમૂષરદેશમાર્દ્રીકરોતિ । તથા મયિ પ્રતીયમાનમપીદં જગત્ મિથ્યાત્વાન્ન મે કામપિ હાનિં કર્તું પ્રભવતિ । અહં સચ્ચિદાન-
ન્દાનન્તાદ્વિતીયાસઙ્ગબ્રહ્મસ્વરૂપ એવાસ્મિ, ઇત્યેવં નિશ્ચય એવ જ્ઞાનં ઇત્યુચ્યતે ।
એતદેવ જ્ઞાનમાસુમેરામૃતેશ્ચ નિરન્તરમભ્યસ્યમાનં મોક્ષસાધનમ્, નાન્યત્ કિઞ્ચિદપિ । તદિદં જ્ઞાનં પૂર્વમેવોપદિષ્ટવાનસ્મીતિ ગુરુરાહ ।

(૧૬૮)

જ્ઞાનમેવાજ્ઞાનનાશકમ્, ન કર્મોપાસનાદિ - હે સોમ્ય । અસ્ય જગત ઉપાદાનકારણમજ્ઞાનમ્ । અસ્યાજ્ઞાનસ્ય નાશમનુ તત્કાર્યં સર્વં દૃશ્યં જગત્ સ્વયમેવ વિનશ્યતિ, ઉપાદાનનાશાનન્તરં તત્કાર્યસ્ય સ્થિત્યયોગાત્ । તસ્યાજ્ઞાનસ્ય નાશસ્તુ જ્ઞાનમાત્રેણ જાયતે, ન તુ કર્મોપાસનાદિભિઃ સાધનાન્તરૈઃ; યતો જ્ઞાનમેવ સાક્ષાદજ્ઞાનવિરોધિ ન કર્મોપાસનાદિકમ્ । યથા ગૃહાન્તર્વિદ્યમાનં તમઃ કેનાપિ વ્યાપારેણાનિવર્ત્યમપિ કેવલપ્રકાશેન નિવર્ત્યતે તથાજ્ઞાનરૂપં નિબિડં તમો જ્ઞાનાત્મકપ્રચણ્ડપ્રકાશેનૈવ નિવર્ત્યેત, ન તુ કેનચિદપિ સાધનાન્તરેણ । હે સોમ્ય । દ્વૈતરૂપં જગત્ યથા નિઃશેષં નિવર્તેત તથાહં તે સાધનમુપાદિશમ્ । તદેતન્મનસિ ધારયન્ પુનઃપુનર્યુક્તિભિરનુચિન્તય । તતોઽપિ સંશયો યદિ સ્યાદ્યથેચ્છં પૃચ્છેતિ ગુરુરાહ ।

## (A. 169-225) પૂર્વોપદિષ્ટવિષયે આક્ષેપસમાધાનાનિ

## (A. 169-188) જીવબ્રહ્મણોરભેદનિરૂપણમ્

## (A. 169-171) જીવબ્રહ્માભેદવિષયે તત્ત્વદૃષ્ટિપ્રશ્નઃ-

(૧૬૯)

ગુરુપદેશં સઙ્ગ્રહેણાનૂદ્ય શિષ્યઃ સ્વશઙ્કાં સૂચયતિ- હે સ્વામિન્ । જગત્કારણમજ્ઞાનમ્, તસ્યાજ્ઞાનસ્ય તત્પ્રયુક્તજગતશ્ચ નાશો જ્ઞાનેનૈવ જાયતે" ઇતિ ભવદુપદિષ્ટં સમ્યગવગચ્છામિ । પરન્તુ "જગન્મિથ્યા, જીવ આનન્દસ્વરૂપઃ, અતશ્ચ સ જીવો બ્રહ્મણો ન ભિન્નઃ" ઇતિ ભવતોપદિષ્ટેઽર્થે જગન્મિથ્યાત્વમ્, જીવસ્યાનન્દરૂપત્વં ચાવગચ્છામિ । "જીવો બ્રહ્માભિન્નઃ" ઇત્યંશં તુ નાવધારયામિ, તયોર્ભેદશઙ્કૈવ મે મનસિ પરિવર્તતે, ઇતિ તત્ત્વદૃષ્ટિઃ પૃચ્છતિ ।

(૧૭૦)

જીવબ્રહ્મણોઃ સ્વરૂપભેદાત્તયોરૈક્યમસઙ્ગતમિતિ શઙ્કાહે સ્વામિન્ । અહં હિ પુણ્યપાપયોઃ કર્તા, તત્ફલભૂતજનનમરણસુખદુઃખાદીન્યનુભવામિ । વિચિત્રરચનાવિશિષ્ટં જગન્મયિ પ્રતિભાતિ । જગત્કારણીભૂતમૂલાજ્ઞાનનિવૃત્તયેઽહં બ્રહ્મ વિજિજ્ઞાસે । બ્રહ્મણસ્તુ પુણ્યપાપે ન સ્તઃ । જન્મ-મરણસુખદુઃખાદિક્લેશલેશોઽપિ બ્રહ્મણો ન સમ્ભવતિ । અત એવ તસ્ય ન જ્ઞાનેચ્છાપિ । તસ્માન્મમ બ્રહ્મણશ્ચ મિથઃ સ્વરૂપતો ભેદ એવ વર્તતે । તતો દ્વયોરૈક્યં નૈવ ઘટેત । યદ્યપિ જન્માદિસંસારઃ પરમાર્થતો મય્યપિ

નાસ્ત્યેવ, તથાપિ મિથ્યાભૂતો જન્મમરણાત્મકઃ સંસારો મયિ સ્વપ્નવત્ ભ્રાન્ત્યા પ્રતિભાતિ । બ્રહ્મણિ તુ તન્નૈવ પ્રતિભાતિ । જીવબ્રહ્મણોરિત્થં ભેદસદ્ભાવાદૈક્યં ન સમ્ભવતિ । અયં ચ પ્રમેયગતસંશયઃ ।

## (૧૭૧)

શ્રુત્યાકર્મોપાસનવિધિબલાચ્ચ જીવબ્રહ્મભેદશઙ્કાહે સ્વામિન્ । મમ સંશયાન્તરમપિ જાયતે । શ્રુત્યૈવ વક્ષ્યમાણપ્રકારેણ જીવબ્રહ્મણોર્ભેદઃ પ્રતિપાદ્યતે - "દ્વા સુપર્ણા સયુજા સખાયા સમાનં વૃક્ષં પરિષસ્વજાયે । તયોરન્યઃ પિપ્પલં સ્વાદ્વત્ત્યનશ્નન્નન્યોઽભિચાકશીતિ" (મુ. ૩.૧.૧, શ્વે. ૪.૬) ઇતિ હિ શ્રુતિઃ । અયમર્થઃ - બુદ્ધિરૂપે એકસ્મિન્ વૃક્ષે દ્વૌ પક્ષિણૌ વસતઃ । તાવુભાવપિ સમાનસ્વભાવૌ । તત્રૈકઃ કર્મફલભોક્તા અપરઃ શુદ્ધો ભોગરહિતોઽસઙ્ગઃ સન્ કર્મફલભોક્તારં પ્રકાશયતિ । અનયોઃ કર્મફલભોક્તા જીવ ઇતિ, અપરઃ પરમાત્મેતિ ચ પ્રતીયતે । ઇત્યેવં શ્રુત્યૈવ જીવબ્રહ્મણોર્ભેદપ્રતિપાદનાન્ન તયોરૈક્યં યુક્તમ્ । કિઞ્ચ, વેદે નાનાપ્રકારાણિ કર્માણ્યુપાસનાનિ ચ તત્ર તત્ર કથિતાનિ । તાનિ નિરર્થકાનિ સ્યુર્જીવબ્રહ્મણોરેકત્વાભ્યુપગમે । તથા હિ - જીવબ્રહ્મણોરેકત્વમ્, કિં બ્રહ્મણિ જીવસ્વરૂપાન્તર્ભાવાત્, કિં વા જીવે બ્રહ્મસ્વરૂપાન્તર્ભાવાત્ । નોભયથાપિ સમ્ભવતિ । બ્રહ્મણિ જીવસ્વરૂપાન્તર્ભાવાભ્યુપગમે જીવસ્યૈવ બ્રહ્મરૂપત્વાત્ કર્મોપાસનાદ્યધિકાર્યભાવપ્રસઙ્ગાત્ કર્મોપાસનાદીનિ નિરર્થકાનિ સ્યુઃ । જીવે ચ બ્રહ્મસ્વરૂપાન્તર્ભાવાભ્યુપગમે જીવભાવાપન્નત્વાદ્બ્રહ્મણ ઉપાસ્યાભાવપ્રસઙ્ગ ઇત્યુપાસનાવાક્યાનિ નિષ્ફલાનિ સ્યુઃ । અપિ ચ કર્મફલદાતુરીશ્વરસ્યાભાવાત્ કર્માનુષ્ઠાનમપિ નિષ્ફલં સ્યાત્ । "કર્માતિરિક્ત ઈશ્વરો નાસ્તિ, સ્વતન્ત્રં કર્મૈવ ફલં દદાતિ" ઇતિ મીમાંસકોક્તિરપિ ન યુજ્યતે; જડત્વાત્કર્મણઃ । ન હિ જડસ્ય કર્મણઃ ફલદાતૃત્વરૂપસામર્થ્યં ઘટતે । અતઃ સર્વજ્ઞાદેવેશ્વરાત્ કર્મફલસિદ્ધિર્વાચ્યા । તસ્માજ્જીવાત્મપરમાત્મનોરેકત્વં ન યુજ્યતે ઇતિ । અયઞ્ચ પ્રમાણગતસંશયઃ ।

## (A. 172-185) સ્વરૂપભેદાજ્જીવબ્રહ્મણોરૈક્યાસઙ્ગતિરિતિ શઙ્કાયાઃ

સમાધાનમ્-

## (૧૭૨)

આકશસ્યેવ ચૈતન્યસ્યાપિ ચતુર્વિધો ભેદઃહે સોમ્ય । ત્વત્સન્દેહનિવર્તકવિચારરૂપમુપદેશં શ‍ૃણુ - યથા એકસ્યૈવાકાશસ્ય (૧) ઘટાકાશઃ, (૨) જલાકાશઃ, (૩) મેઘાકાશઃ, (૪) મહાકાશ ઇતિ ચતુર્વિધભેદોઽસ્તિ તથા એકસ્યૈવ ચૈતન્યસ્ય (૧) કૂટસ્થઃ, (૨) જીવઃ, (૩) ઈશ્વરઃ, (૪) બ્રહ્મ ચેતિ ભેદચતુષ્ટયં અસ્તિ । એષાં સ્વરૂપં વિચારપૂર્વકં યદા સમ્યગ્વિજાનાસિ તદા ત્વદીયસન્દેહાનાં સમાધાનં ત્વં સવયમેવ જાનીયાઃ । અતસ્તેષાં સ્વરૂપં મયાભિધીયમાનમવધારય । તદધિગમેન તવ નિઃસંશયજ્ઞાનોદયદ્વારા જન્માદિદુઃખં નિઃશેષં વિનશ્યેત્ ।

## (A. 173-176) ચતુર્વિધાકાશવર્ણનમ્-

### (૧૭૩)

ઘટાકાશઃ - જલપૂરિતઘટાવસ્થાનાય યાવાનાકશોઽવકાશં દદાતિ તાવાનાકાશઃ ઘટાકાશ ઇતિ પણ્ડિતૈરુચ્યતે ।

૧. નનુ ઘટાત્ બહિઃ સ્થિત આકાશો મહાકાશઃ, તસ્માદ્ભિન્નો ઘટાન્તર્વર્ત્યાકાશો ઘટાકાશ ઇતિ ચ પ્રસિદ્ધિઃ । તત્ર ઘટાકાશસ્ય પ્રસિદ્ધં લક્ષણં વિહાય લક્ષણાન્તરકરણે કિં પ્રયોજનમિતિ ચેદત્રોચ્યતે । “ઘટાન્તર્વર્ત્યાકાશો ઘટાકાશઃ” ઇતિ પ્રસિદ્ધલક્ષણસ્વીકારે ઘટો યત્ર વર્તતે સ આકાશઃ પઞ્ચમઃ કપાલાકાશ ઇતિ વક્તવ્યં ભવેત્ । સ ચ પઞ્ચમપ્રકાર આકાશઃ શાસ્ત્રાપ્રસિદ્ધઃ; [સિદ્ધાન્તે આરમ્ભવાદાનઙ્ગીકારાત્] । તસ્માદિદં દ્વિતીયં લક્ષણમાશ્રિતં સાધુઃ ।

### (૧૭૪)

જલાકાશઃ - જલપૂર્ણે ઘટે નક્ષત્રાદિસહિતાકાશઃ પ્રતિબિમ્બતિ । તાદૃશાકાશપ્રતિબિમ્બો ઘટાકાશશ્ચેત્યુભયં મિલિત્વા જલાકાશ ઇત્યુચ્યતે । નન્વાકાશસ્ય પ્રતિબિમ્બો ન યુજ્યતે, કિન્તુ કેવલનક્ષત્રાદીનામેવ સ યુજ્યતે । રૂપાભાવાન્નાકાશસ્ય પ્રતિબિમ્બઃ સમ્ભવતિ । રૂપવતો હિ પ્રતિબિમ્બઃ સ્યાત્ । તસ્માન્નાકાશસ્ય પ્રતિબિમ્બો યુજ્યત ઇતિ ચેન્ન । જલે આકાશપ્રતિબિમ્બાનભ્યુપગમે ગોષ્પદપરિમાણકસ્વલ્પજલે મહાગજાદિપરિમાણકગભીરતાયાઃ પ્રતિબિમ્બો ન સ્યાત્ । તથોપલભ્યમાનત્વાદાકાશપ્રતિબિમ્બોઽઙ્ગીકાર્ય એવ । ન ચ નીરૂપપદાર્થપ્રતિબિમ્બો નાસ્તીતિ વાચ્યમ્ । નીરૂપસ્યાપિ શબ્દસ્ય પ્રતિધ્વનિદર્શનાત્ । સ ચ પ્રતિધ્વનિઃ શબ્દસ્ય પ્રતિબિમ્બ એવ । તસ્માન્નીરૂપસ્યાપ્યાકાશસ્ય પ્રિતબિમ્બો યુજ્યત એવ ।

### (૧૭૫)

મેઘાકાશઃ - મેઘસ્થિતયે યાવાનાકાશોઽવકાશં દદાતિ
તાવાનાકાશઃ, મેઘજલે પ્રતિબિમ્બિતાકાશશ્ચેત્યુભયં મિલિત્વા મેઘાકાશ ઇત્યભિધીયતે । નન્વાકાશેઽસ્તિ મેઘઃ । તત્ર મેઘે જલમાકાશપ્રતિબિમ્બશ્ચાસ્તીત્યત્ર કિં માનમિતિ ચેન્ન । યદ્યપિ મેઘે જલસ્યાકાશપ્રતિબિમ્બસ્ય ચ ન પ્રત્યક્ષતો ગ્રહણમથાપ્યનુમાનેન ગ્રહણં સમ્ભવત્યેવ । તથા હિ, મેઘાજ્જલવૃષ્ટેર્દર્શનાત્તત્ર જલમસ્તીત્યનુમીયતે । યદિ મેઘે જલં ન સ્યાત્તર્હિ તતો જલવૃષ્ટિર્ન સ્યાત્ । કિઞ્ચ, “મેઘસ્થં જલમાકાશપ્રતિબિમ્બવિશિષ્ટમ્, સ્વચ્છદ્રવ્યત્વાત્, દર્પણાદિવત્” ઇત્યનુમાનેન મેઘસ્થજલે આકાશપ્રતિબિમ્બાનુમાનં ચ સિદ્ધ્યતિ । યદ્યસ્તિ જલં

તર્હિ તજ્જલમાકાશપ્રતિબિમ્બેન વિના ન સ્યાદિતિ હિ નિયમઃ । એવં મેઘે જલમ્, તત્રાકાશપ્રતિબિમ્બશ્ચાનુમાનેન પ્રસિદ્ધ્યતિ ।

(૧૭૬)

મહાકાશઃ - બ્રહ્માણ્ડસ્યાન્તર્બહિશ્ચ વ્યાપ્યૈકરૂપેણ વર્તમાન આકાશો મહાકાશ ઇત્યુચ્યતે વિદ્વદ્ભિઃ ।

## (A. 177-185) ચૈતન્યસ્ય ચાતુર્વિધ્યવર્ણનમ્-

(૧૭૭)

ઉપોદ્ઘાતઃ - હે સોમ્ય । ચતુર્વિધાકાશલક્ષણમુક્તમ્ ।

૧. જલપૂરિતઘટે દૃશ્યમાનાકાશપ્રતિબિમ્બો
ઘટાન્તર્વર્ત્યાકાશપ્રતિબિમ્બ ઇતિ શઙ્કાવ્યાવૃત્તયે
નક્ષત્રાદિસહિતેત્યાકાશવિશેષણમ્ । અપિ ચ જલં વિના
પ્રતિબિમ્બાસમ્ભવાત્ “આકાશપ્રતિબિમ્બઃ” ઇત્યનેન
ઘટસ્થજલસહિતાકાશપ્રતિબિમ્બો ગ્રાહ્યઃ ।

૨. ગુણો ગુણમાશ્રિત્ય ન તિષ્ઠતિ, કિન્તુ દ્રવ્યમેવેતિ નિયમઃ ।
અતશ્ચ ગુણત્વેનાભિમતાનિ નીલપીતાદિવર્ણાનિ નીરૂપાણ્યેવ ।
તથાપિ તેષાં સ્વચ્છદર્પણાદૌ પ્રતિબિમ્બો દૃષ્ટઃ । એવમેવ
રૂપરહિતયોરાકાશચૈતન્યયોશ્ચ પ્રતિબિમ્બઃ સમ્ભવેદેવ ।
ચતુર્વિધચૈતન્યલક્ષણમપ્યુચ્યમાનં શ‍ૃણુ । તસ્ય
શ્રવણમાત્રેણ વિચારસ્ય મહાફલં બ્રહ્મજ્ઞાનમવાપ્યેત ।

(૧૭૮)

કૂટસ્થવર્ણનં - બુદ્ધેર્વ્યષ્ટ્યજ્ઞાનસ્ય વા અધિષ્ઠાનભૂતચૈતન્યસ્ય કૂટસ્થઃ ઇત્યભિધા । યન્મતે બુદ્ધિવિશિષ્ટશ્ચેતનો જીવસ્તન્મતે બુદ્ધ્યધિષ્ઠાનચેતનઃ કૂટસ્થ ઇત્યુચ્યતે । યત્ર તુ મતે વ્યષ્ટ્યજ્ઞાનવિશિષ્ટચેતનો જીવ ઇતિ કીર્ત્યતે તન્મતે વ્યષ્ટ્યજ્ઞાનાધિષ્ઠાનચેતનઃ કૂટસ્થ ઇતિ વર્ણ્યતે । અત્રાયં સિદ્ધાન્તઃ - જીવત્વાપાદકં વિશેષણં યત્ તદધિષ્ઠાનસ્ય કૂટસ્થ ઇતિ નામ । અયં કૂટસ્થ ઉત્પત્ત્યાદિરહિતઃ । અસ્યાયમભિપ્રાયઃ - બ્રહ્મણો વ્યતિરિક્તતયા ચિદાભાસો યથોત્પદ્યતે, ન તથા કૂટસ્થ ઉત્પદ્યતે; કિન્તુ બ્રહ્મરૂપ એવ સ ભવતિ । યથા ઘટાકાશો મહાકાશાન્ન વ્યતિરિક્તઃ, કિન્તુ માહાકાશરૂપ એવ ભવતિ, તદ્વત્ । અયં ચ કૂટસ્થ આત્મપદલક્ષ્યાર્થઃ । કૂટસ્થસ્યૈવ પ્રત્યગિતિ, નિજસ્વરૂપમિતિ, જીવસાક્ષીતિ ચ વ્યપદેશઃ । કૂટસ્થો ઘટાકાશસ્થાનીયઃ ।

## (A. 179-183) જીવસ્વરૂપવર્ણનમ્

### (A. 179-182) બુદ્ધિપ્રતિબિમ્બિતચૈતન્યં જીવઃ-

(૧૭૯)

જીવસ્વરૂપં - અનન્તકોટિકામકર્મવાસનાવાસિતબુદ્ધૌ પ્રતિફલિતચૈતન્યપ્રતિબિમ્બો જીવ ઇતિ વિદ્વદ્ભિરુચ્યતે । ન હિ તત્ પ્રતિબિમ્બમાત્રં જીવ ઇત્યુચ્યતે; કિન્તુ યથા ઘટાકાશસહિતાકાશપ્રતિબિમ્બો જલાકાશ ઇતિ કથ્યતે, એવં કૂટસ્થસહિતચિદાભાસો જીવ ઇતિ કીર્ત્યતે । તસ્માદ્બુદ્ધિસ્થચિદાભાસો બુદ્ધ્યધિષ્ઠાનચૈતન્યં ચેત્યુભયં મિલિત્વા જીવ ઇતિ સિદ્ધ્યતિ ।

૧. કેષુચિદદ્વૈતગ્રન્થેષુ જીવ ઈશો બ્રહ્મેતિ ચિત્ત્રૈવિધ્યપ્રક્રિયાશ્રિતા । અનાદિપદાર્થષટ્કનિરૂપણે ચૈતન્યત્રૈવિધ્યમેવોક્તમ્ । તત્ર કૂટસ્થપરિત્યાગાન્ન કોઽપિ દોષઃ સ્યાત્ । કૂટસ્થબ્રહ્મણોર્ન નામમાત્રભેદાદૃતેઽન્યઃ કશ્ચન ભેદોઽસ્તિ । કિઞ્ચ વિદ્યારણ્યમુનિકૃતદૃગ્દૃશ્યવિવેકાખ્યગ્રન્થે કૂટસ્થઃ પારમાર્થિકજીવઃ, જાગ્રત્કાલિકાન્તઃકરણપ્રતિબિમ્બો વ્યાવહારિકજીવઃ, સ્વપ્નદૃક્ પ્રાતિભાસિકજીવ ઇતિ ચ નિરૂપતિમ્ । અનેન કૂટસ્થો જીવકોટાવન્તર્ભાવિતઃ ।

૨. જીવો બુદ્ધિપ્રતિબિમ્બ ઇતિ, અવિદ્યાપ્રતિબિમ્બ ઇતિ ચ વક્ષ્યમાણત્વાદત્ર પક્ષદ્વયં સૂચિતમ્ ।

3. અત્ર ચિદાભાસશબ્દેન બુદ્ધ્યા (અન્તઃકરણેન) સહિતશ્ચિદાભાસો ગ્રાહ્યઃ । તથા ચાન્તઃકરણમથવાવિદ્યા, તત્સ્થચિદાભાસઃ, તદુભયાધિષ્ઠાનકૂટસ્થચૈતન્યં ચેત્યેતત્ત્રયં મિલિત્વા જીવ ઇત્યુચ્યતે । (૧) કેવલાન્તઃકરણસ્ય જીવત્વોક્તૌ ઘટાદેર્જડસ્યાપિ તદા-॥

(૧૮૦)

આભાસસ્વરૂપવિવેચનં - પ્રાગ્ બિમ્બરૂપકૂટસ્થસહિતચિદાભાસો જીવ ઇતિ પ્રપઞ્ચિતમ્ । અત ઇદં પ્રતીયતે - બુદ્ધૌ પ્રતિફલિતો યઃ પ્રતિબિમ્બઃ સ કૂટસ્થસ્યૈવ, ન તુ બાહ્યબ્રહ્મચૈતનસ્યસ્ય । યસ્ય પ્રતિબિમ્બોઽન્યત્ર પ્રતીયતે, સ એવ બિમ્બ ઇત્યુચ્યતે । પ્રકૃતે કૂટસ્થસ્ય બિમ્બત્વાઙ્ગીકારાત્ જીવસ્તત્પ્રતિબિમ્બ ઇત્યેવ

પ્રતીયતે । તથા હિ, અત્યન્તરક્તજપાકુસુમાદ્યુપાધ્યુપરિસ્થસ્વચ્છસ્ફટિકે તત્પુષ્પાદિરક્તિમા પ્રતીયતે । સ ચ સ્ફટિકાદિગતરક્તિમા તત્પુષ્પાદિપ્રતિબિમ્બ એવ । તથા કૂટસ્થાશ્રિતબુદ્ધૌ કૂટસ્થસ્ય પ્રકાશઃ પ્રતિફલતિ । સ પ્રકાશ એવ ચિદાભાસ ઇત્યુચ્યતે । અત્યન્તસ્વચ્છસ્ફટિકવત્ બુદ્ધિરપ્યત્યન્તનિર્મલા; સત્ત્વગુણકાર્યત્વાત્તસ્યાઃ । તત્ર પ્રતિફલિતકૂટસ્થપ્રકાશસ્યૈવ પ્રતિબિમ્બ ઇતિ સમાખ્યા । બુદ્ધેઃ કૂટસ્થાધિષ્ઠિતત્વાદ્બુદ્ધૌ કૂટસ્થસ્યૈવ પ્રતિબિમ્બ ઉચિત ઇતિ જીવઃ કૂટસ્થપ્રતિબિમ્બ ઇતિ પક્ષઃ પ્રદર્શિતઃ । ॥પત્તિઃ । અસ્વચ્છત્વાદ્ઘટાદેસ્તન્ન સમ્ભવતીતિ ચેત્ - સ્વચ્છદર્પણાદેસ્તદાપત્તિઃ । દર્પણાદેર્બાહ્યત્વાન્નેતિ ચેત્તર્હ્યન્તઃસ્થાનામિન્દ્રિયાણાં તદાપત્તિઃ । ઇન્દ્રિયાપેક્ષયા આન્તરત્વાદન્તઃકરણસ્યૈવ તન્ન્યાય્યમિતિ ચેત્, તતોઽપ્યાન્તરસ્યાજ્ઞાનસ્ય તદાપત્તિઃ । કિઞ્ચ, જીવસ્ય ચેતનત્વાદેવ નાચેતનસ્યાન્તઃકરણસ્ય જીવત્વં ઘટતે । (૨) કેવલપ્રતિબિમ્બસ્યાપિ ન જીવત્વં સમ્ભવતિ; અન્તઃકરણરૂપોપાધિમન્તરા પ્રતિબિમ્બાયોગાત્ । (૩) અધિષ્ઠાનચૈતન્યસ્ય જીવત્વોક્તિરસઙ્ગતા; નિર્વિકારત્વાત્તસ્ય વિકારાત્મકજીવત્વં ન યુજ્યતે । (૪) પ્રતિબિમ્બવિશિષ્ટાન્તઃકરણં જીવોઽસ્ત્વિતિ ચેન્ન - ઉભયોઃ કલ્પિતત્વાવિશેષાજ્જીવસ્ય નિત્યત્વાસિદ્ધૌ મુક્તાભાવપ્રસઙ્ગાત્ । કિઞ્ચ ભાગત્યાગલક્ષણાસમ્ભવાન્નિખિલવાચ્યભાગત્યાગરૂપજહલ્લક્ષણૈવ સિદ્ધ્યેત્; ન ચૈતદ્ભાષ્યકારાભિમતમ્ । અપિ ચાધિષ્ઠાનાદપૃથગ્ભૂતં સત્ યદધિષ્ઠાનમાવૃણોતિ તદેવારોપ્યમિત્યુચ્યતે । ન હ્યધિષ્ઠાનમન્તરા પૃથગારોપ્યં કુત્રાપ્યવભાસતે । અનેનાનુમાનેન “બુદ્ધિસહિતચિદાભાસો જીવઃ” ઇત્યેતદપાસ્તમ્ । (૫) અધિષ્ઠાનચૈતન્યં પ્રતિબિમ્બચૈતન્યં ચેત્યુભયં મિલિત્વા જીવ ઇતિ ચેન્ન; કેવલચૈતન્યસ્ય નિર્વિકારતયા કર્તૃત્વભોક્તૃત્વાદિવિકારોપેતજીવત્વાસમ્ભવાત્ । (૬) અધિષ્ઠાનચૈતન્યમન્તઃ- કરણં ચેત્યુભયં મિલિત્વા જીવ ઇતિ ચેત્ - દર્પણં દર્પણાધિષ્ઠાનચૈતન્યં ચ મિલિત્વા તર્હિ જીવઃ સ્યાત્ । તયોર્જીવત્વં ન સમ્ભવતિ । તસ્માદન્તઃકરણમ્, તત્પ્રતિફલિતચૈતન્યાભાસઃ, તદુભયાધિષ્ઠાનચૈતન્યં ચેત્યેતત્ત્રયમપિ મિલિત્વૈવ જીવ ઇત્યુચ્યતે । તત્ર કૂટસ્થસ્ય સંસારાસમ્ભવાજ્જીવ એવ સંસારીત્યેષ્ટવ્યં ભવતિ । તથા પઞ્ચદશ્યામુક્તમ્ચૈતન્યં યદધિષ્ઠાનં લિઙ્ગદેહશ્ચ યઃ પુનઃ । ચિચ્છાયા લિઙ્ગદેહસ્થા તત્સઙ્ઘો જીવ ઉચ્યતે ॥ (દ્વૈ. ૧૧) ઇતિ ।

૧. પટવિલક્ષણત્વે સતિ પટવદ્ભાસમાનત્વં પટાભાસત્વં યથા,
તથા ચિદ્વિલક્ષણત્વે સતિ ચિદ્વદ્ભાસમાનત્વં ચિદાભાસત્વમ્ ।

અથવા બ્રહ્મચૈતન્યસ્ય બુદ્ધૌ પ્રતિબિમ્બ ઇતિ પક્ષોઽપિ સમ્ભાવ્યત એવ । તથા હિ - ઘટાન્તઃસ્થજલે બાહ્યમહાકાશપ્રતિબિમ્બ એવ ભવતિ, ન તુ ઘટાન્તઃસ્થસ્યાકાશસ્ય પ્રતિબિમ્બઃ । ઘટસ્થજલે યાવાન્ વિસ્તાર ઉપલભ્યતે તાવાન્ વિસ્તારો ઘટાન્તઃસ્થાકાશસ્ય નાસ્તિ । ઘટસ્થજલે ઉપલભ્યમાનવિસ્તારઃ આકાશસ્ય પ્રતિબિમ્બ એવ । તસ્માદ્બાહ્યમહાકાશસ્યૈવ ઘટસ્થજલે પ્રતિબિમ્બો વાચ્યઃ । એવં બુદ્ધૌ વ્યાપકબ્રહ્મચૈતન્યસ્યાપિ પ્રતિબિમ્બો ભવિતુમર્હતિ । વ્યાપકસ્ય બ્રહ્મચૈતન્યસ્ય પ્રતિબિમ્બો ન યુજ્યત ઇતીયમાશઙ્કા આકાશદૃષ્ટાન્તેનૈવ નિરાકાર્યા । યથા આકાશસ્ય વ્યાપકસ્યાપિ પ્રતિબિમ્બઃ સમ્ભવતિ, તથા વ્યાપકચૈતન્યસ્યાપિ પ્રતિબિમ્બઃ સમ્ભવેત્ । રૂપવત એવ પદાર્થસ્ય રૂપવિશિષ્ટે એવ પદાર્થાન્તરે પ્રતિબિમ્બોદય ઇતિ નિયમોઽપિ નાસ્તિ । નીરૂપસ્યાપિ શબ્દસ્ય નીરૂપાકાશે પ્રતિબિમ્બો દૃશ્યત એવેતિ પ્રાગુક્તત્વાત્ । તસ્માત્સમ્ભવત્યેવ વ્યાપકનીરૂપબ્રહ્મચૈતન્યસ્યાપિ પ્રતિબિમ્બઃ । ઇત્થં બુદ્ધિસ્થચિદાભાસો બુદ્ધ્યધિષ્ઠાનચૈતન્યં ચેત્યુભયં મિલિત્વા જીવ ઇત્યુચ્યતે । સોઽયં જીવઃ ત્વમ્પદવાચ્યોઽર્થઃ । જીવસ્થચિદાભાસં વિહાય પરિશિષ્ટઃ

કેવલકૂટસ્થ એવ ત્વમ્પદલક્ષ્યાર્થઃ । અહંશબ્દસ્ય વાચ્યાર્થો જીવઃ, લક્ષ્યાર્થસ્તુ કેવલકૂટસ્થ ઇતિ વિવેકઃ ।

## (૧૮૧)

ચિદાભાસ એવ પુણ્યપાપાદ્યાશ્રયઃ, ન કૂટસ્થઃઉભયોઃ કૂટસ્થચિદાભાસયોર્મિલિતયોર્જીવત્વવ્યવહારેઽપિ કર્તૃત્વાદયો જીવધર્માઃ સર્વે ચિદાભાસમેવાશ્રયન્તિ । પુણ્યમ્, પાપમ્, તત્ફલભૂતસુખદુઃખાદ્યનુભવઃ, લોકાન્તરં પ્રતિ ગમનમ્, તત ઇહાગમનમિત્યાદિ સર્વં ચિદાભાસવિશિષ્ટબુદ્ધિરેવ કરોતિ, ન તુ કૂટસ્થઃ । કૂટો નામાયોઘનવિશેષઃ અયસ્કારાદિપ્રસિદ્ધઃ । તદ્વન્નિર્વિકારતયા તિષ્ઠતીતિ કૂટસ્થ ઉચ્યતે । અથવા મિથ્યાભૂતબુદ્ધિચિદાભાસયોઃ કૂટ ઇત્યાખ્યા । તત્રાસઙ્ગતયાસ્તે ઇતિ કૂટસ્થ ઇષ્યતે । અતઃ કૂટસ્થે કર્તૃત્વાદયો ન સમ્ભવન્તિ, કિન્તુ ચિદાભાસસ્ય । ભ્રાન્ત્યા તે ધર્માઃ કૂટસ્થે પ્રતીયન્તે ।

## (૧૮૨)

વસ્તુતઃ પુણ્યપાપાદયો ન ચિદાભાસસ્યાપિ ધર્માઃ, કિન્તુ બુદ્ધેરેવ - વિચાર્યમાણે તુ પુણ્યપાપતત્ફલસુખદુઃખલોકાન્તરગમનાગમન-

૧. પૂર્વં પ્રતિબિમ્બઃ કૂટસ્થસ્યૈવેતિ સાધિતમ્ । અધુના સ બ્રહ્મચૈતન્યસ્યાપીત્યુચ્યતે । સર્વં બુદ્ધેરેવ, ન તુ ચિદાભાસસ્ય અપિ । બુદ્ધિતાદાત્મ્યાદાભાસે તત્સર્વં ભાતિ । યથા જલપૂર્ણે ઘટે ઋજુવક્રાદિસ્વરૂપે સતિ, તસ્મિન્ ઘટેઽન્યેન નીયમાને વા આનીયમાને વા સતિ, તાદૃશઘટસમ્બન્ધાદેવ તત્સ્થાકાશાભાસસ્તાઃ ક્રિયાઃ કરોતિ, ન તુ સ્વતઃ કિઞ્ચિદપિ કરોતિ; તથા કામકર્માત્મકજલપૂરિતબુદ્ધિરૂપઘટઃ પુણ્યપાપાદિસકલવિક્રિયાશ્રયો ભવતિ । તત્સમ્બન્ધાચ્ચિદાભાસોઽપિ વિક્રિયાશ્રયો ભવતિ । કૂટસ્થસ્તુ સર્વવિકારશૂન્યઃ । યથા ઘટાકાશો જલપૂર્ણઘટગતસર્વવિકારરહિતસ્તથા કૂટસ્થોઽપ્યસઙ્ગ ઇતિ વિદ્ધિ । અતો જીવત્વપ્રયુક્તનિખિલધર્માશ્ચિદાભાસે ભવન્તિ । કૂટસ્થે ત્વજ્ઞાનાત્પ્રતીયન્તે । અતઃ કૂટસ્થબુદ્ધિતત્સ્થચિદાભાસસમુદાયો જીવ ઇત્યુચ્યતે ।

## (૧૮૩)

અજ્ઞાનપ્રતિબિમ્બિતચૈતન્યં જીવઃ - પ્રાગુક્તજીવસ્વરૂપેઽઙ્ગીક્રિયમાણે પ્રાજ્ઞસ્ય હાનિરુપજાયતે । તથા હિ - સુષુપ્ત્યભિમાનિનો જીવસ્ય પ્રાજ્ઞ ઇતિ નામ । સુષુપ્તૌ બુદ્ધેરભાવાત્તત્સ્થચિદાભાસોઽપિ ન સિદ્ધ્યતિ । તતશ્ચ પ્રાજ્ઞસ્વરૂપપ્રતિપાદકશાસ્ત્રં નિર્વિષયં ભવેત્ । અતઃ પ્રકારાન્તરેણ જીવ૧. જલગતશૈત્યં તત્ર

પ્રતિબિમ્બિતાદિત્યાદીન્ યથા ન સ્પૃશતિ તથાન્તઃકરણગતા વિકારા અપિ તત્ર પ્રતિબિમ્બિતચિદાભાસં ન કદાચિદપિ સ્પૃશન્તિ; કિમુ વક્તવ્યં તદન્તઃકરણાધિષ્ઠાનભૂતં પ્રત્યગાત્માનં ન સ્પૃશન્તીત્યત્ર । યથા પૃથિવ્યાદિગતાઃ તત્કાર્યગતાશ્ચ વિક્રિયાઃ પૃથિવ્યાદ્યાધારભૂતમાકાશં ન સ્પૃશન્તિ; તદ્વદેવાનાત્મભૂતાજ્ઞાનં તત્કાર્યાહઙ્કારદેહેન્દ્રિયાદિપ્રપઞ્ચધર્માશ્ચ અજ્ઞાનતત્કાર્યનિખિલદૃશ્યાધિષ્ઠાનભૂતચિદ્રૂપપ્રત્યગાત્માનં ન સ્પૃશન્ત્યેવ । અજ્ઞાનાત્તુ તે ધર્માઃ કૂટસ્થં સ્પૃશન્તીવ ભ્રાન્તિર્ભવતિ ।

૨. વસ્તુતસ્તુ સુખદુઃખાદિસંસારો ન બુદ્ધેરપિ સમ્ભવતિ । તથા ચોક્તં ગુહાધિકરણભાષ્યે (બ્ર. સૂ. ૧.૨.૧૨) “ઇદં હિ કર્તૃત્વં ભોક્તૃત્વં ચ સત્ત્વક્ષેત્રજ્ઞયોરિતરેતરસ્વભાવાવિવેકકૃતં કલ્પ્યતે । પરમાર્થતસ્તુ નાન્યતરસ્યાપિ સમ્ભવતિ; અચેતનત્વાત્ સત્ત્વસ્ય, અવિક્રિયત્વાચ્ચ ક્ષેત્રજ્ઞસ્ય । અવિદ્યાપ્રત્યુપસ્થાપિતસ્વભાવત્વાચ્ચ સત્ત્વસ્ય સુતરાં ન સમ્ભવતિ । તથા ચ શ્રુતિઃ - “યત્ર વાન્યદિવ સ્યાત્તત્રાન્યોઽન્યત્ પશ્યેત્” (બૃ. ૪.૩.૩૧) ઇત્યાદિના સ્વપ્નદૃષ્ટહસ્ત્યાદિવ્યવહારવદવિદ્યાવિષય એવ કર્તૃત્વાદિવ્યવહારં દર્શયતિ । “યત્ર ત્વસ્ય સર્વમાત્મૈવાભૂત્ તત્ કેન કં પશ્યેત્” (બૃ. ૪.૫.૧૫) ઇત્યાદિના ચ વિવેકિનઃ કર્તૃત્વાદિવ્યવહારાભાવં દર્શયતિ” ઇતિ ।

૩. યથા ચન્દ્રસ્ય સ્વતો નિર્વિકારતયા સદૈકરૂપત્વેઽપિ તિથિપક્ષાભ્યાં ચન્દ્રસ્ય કલાયામેવ વૃદ્ધિક્ષયાદિકં ભવતિ; યથા વા સદા વૃક્ષસ્યૈકરૂપત્વેઽપિ તત્ફલાદીનામેવ જન્માદિવિકારો જાયતે; તથા સ્વયં નિર્વિકારેઽપિ કૂટસ્થચિન્માત્રે પ્રત્યગાત્મનિ દેહાદીનામેવ જન્માદિષડ્વિકારરૂપપરિણામો જાયતે । યદિ કૂટસ્થ એવ પરિણમેત્, તર્હિ સ જડઃ સ્યાત્ । પરિણામઃ = વિકારઃ = પ્રકૃતેરન્યથાભાવઃ । તસ્માત્કૂટસ્થસ્ય વિકારો ન કથઞ્ચનોપપદ્યતે । સ્વરૂપનિરૂપણં ક્રિયતે । અજ્ઞાનસ્યૈકદેશો વ્યષ્ટ્યજ્ઞાનં ઇતિ, સમ્પૂર્ણાજ્ઞાનં તુ સમષ્ટ્યજ્ઞાનં ઇતિ ચોચ્યતે । તત્રાજ્ઞાનૈકદેશપ્રતિબિમ્બિતચિદાભાસઃ, તદજ્ઞાનાંશાધિષ્ઠાનભૂતકૂટસ્થચૈતન્યં ચ મિલિત્વા જીવ ઇત્યુચ્યતે । ન ચૈતસ્મિન્ જીવસ્વરૂપે પ્રાજ્ઞસ્યાભાવઃ સમ્ભવતિ, સુષુપ્તાવજ્ઞાનસ્ય સત્ત્વાત્ । સુષુપ્તૌ યઃ ચૈતન્યપ્રતિબિમ્બવિશિષ્ટાજ્ઞાનાંશઃ સ બુદ્ધ્યાત્મના પરિણમતે । તત્ર ચૈતન્યપ્રતિબિમ્બોઽપિ સહૈવ વર્તતે । અસ્યાં

ચિદાભાસયુક્તાયાં બુદ્ધૌ પુણ્યાપુણ્યાદિરૂપઃ સંસારઃ પ્રતીયતે ।
અનેનાભિપ્રાયેણ બુદ્ધિરેવ શાસ્ત્રેષ્વપિ ક્વચિજ્જીવોપાધિતયા વર્ણ્યતે ।
વિચારદૃષ્ટ્યા તુ જીવસ્યોપાધિરજ્ઞાનમેવ ।

## (૧૮૪)

ઈશ્વરસ્વરૂપવર્ણનં - માયાયાં પ્રતિબિમ્બિતચિદાભાસઃ
૧. ઈશ્વરસ્વરૂપં તુ બહુધાનેકૈર્વર્ણ્યતે । તથા હિ
(૧) યોગમતાનુસારિણ સ્ત્વેવમાહુઃ - ચૈતન્યસમીપસ્થપ્રકૃતિપ્રેરકો
જીવવિલક્ષણઃ પુરુષ ઈશ્વરઃ । સ ચેશ્વરઃ
ક્લેશકર્મતત્ફલાદિભિરસંસ્પૃષ્ટો જીવવદસઙ્ગશ્ચિન્માત્રઃ ।
જીવસ્યાપિ ક્લેશાદ્યભાવેષ્વવિવેકવશાત્ તત્સત્ત્વં પ્રતીયતે ।
અયમેવ જીવેશ્વરયોર્ભેદહેતુઃ ।
(૨) ન્યાયમતાનુસારિણસ્તુ અસઙ્ગસ્યેશ્વરસ્ય નિયામકત્વાસમ્ભવાત્
યોગમતમાક્ષિપ્ય, ઈશ્વરસ્ય જ્ઞાનેચ્છાપ્રયત્નાદિગુણા નિત્યાઃ; અતો
જીવાદ્વિલક્ષણો ભિન્નશ્ચેશ્વર ઇત્યાહુઃ ।
(૩) હિરણ્યગર્ભોપાસકાસ્તુ ઈશ્વરજ્ઞાનાદીનાં નિત્યત્વે
“સોઽકામયત” (તૈ. બ્ર. ૬) ઇત્યાદિશ્રુતિવાક્યાનાં
સૃષ્ટ્યારમ્ભસમયે ઈશ્વરજ્ઞાનાદીનામુત્પત્તિપ્રતિપાદકાનાં
વિરોધઃ સ્યાત્; સદા સૃષ્ટિપ્રસઙ્ગશ્ચ સ્યાત્ ।
અતોઽસઙ્ગતં ન્યાયમતમ્ । હિરણ્યગર્ભ એવેશ્વરઃ । અસ્ય
લિઙ્ગશરીરસત્ત્વેઽપ્યવિદ્યાકામકર્માદ્યભાવાત્ જીવવિલક્ષણઃ સ
ઇત્યાચક્ષતે ।
(૪) વિરાડુપાસકાસ્તુ વિના સ્થૂલદેહં લિઙ્ગદેહમાત્રસ્ય
કુત્રાપ્યનનુભૂતત્વાદ્વિરાટ્પુરુષ એવેશ્વર ઇત્યાહુઃ ।
(૫) પ્રજાપત્યુપાસકાસ્તુ પ્રજાકામાઃ સન્તઃ
પાણિપાદાદિયુક્તપ્રાકૃતશરીરવત ઈશ્વરત્વે
ક્રિમ્યાદેરપીશ્વરત્વપ્રસઙ્ગાત્ હિરણ્યગર્ભોપાસકમતમસઙ્ગતમ્,
તથા વિરાડુપાસકમતમપ્યસઙ્ગતમ્ । કિન્તુ ચતુર્મુખો બ્રહ્મૈવેશ્વર
ઇતિ પ્રાહુઃ ।
(૬) વૈષ્ણવાસ્તુ વિષ્ણોર્નાભિકમલોત્પન્નત્વાચ્ચતુર્મુખસ્ય
બ્રાહ્મણસ્તત્કારણીભૂતો વિષ્ણુરેવેશ્વર ઇતિ કથયન્તિ ।

(૭) શૈવાસ્તુ શિવસ્ય પદાન્વેષણેऽશક્તત્વાદ્વિષ્ણોઃ, શિવ એવેશ્વર ઇતિ વદન્તિ ।

(૮) ગણપત્યુપાસકાસ્તુ ત્રિપુરાસુરજયાર્થમીશ્વરેણાપ્યુપાસિતો ગણપતિરેવેશ્વર ઇતિ મન્યન્તે ।

(૯) ભૈરવમૈરાલાદ્યુપાસકાસ્તુ
મારણોચ્ચાટનવશીકરણસ્તમ્ભનાદિસિદ્ધિહેતુભૂતભૈરવાદિમન્ત્રાન્,
તત્તત્સ્તોત્રાણિ,
તદ્ધવનતર્પણપુરશ્ચરણાદિપ્રતિપાદકતન્ત્રગ્રન્થાંશ્ચ
પ્રમાણીકૃત્ય ભૈરવાદિદેવતા ઈશ્વરત્વેન વર્ણયન્તિ ॥

માયાધિષ્ઠાનચૈતન્યં ચેત્યુભયં મિલિત્વા ઈશ્વર ઇત્યુચ્યતે ।
અયં ચેશ્વરો મેઘાકાશતુલ્યો ભવતિ । અયમેવ અન્તર્યામી ઇત્યુચ્યતે ।
સર્વેષામન્તઃસ્થઃ સન્ નિયન્તૃત્વાત્ = પ્રેરકત્વાદન્તર્યામી ।
અયં નિત્યમુક્તઃ, સ્વસ્વરૂપાવારકાજ્ઞાનાભાવાત્તસ્ય ।
અત એવ જન્મમરણાદિબન્ધપ્રતીતિરસ્ય નાસ્તિ, તત એવ
ઈશ્વરો નિત્યમુક્ત ઇત્યુચ્યતે । કિઞ્ચેશ્વરઃ સર્વજ્ઞઃ,
તસ્યોપાધિભૂતમાયાયાઃ શુદ્ધસત્ત્વગુણપ્રધાનત્વાદસ્ય
સર્વજ્ઞત્વસિદ્ધિઃ । સ્વપ્રતિબન્ધકીભૂતરજસ્તમસૌ
અભિભૂય સ્વયં તાભ્યામનભિભૂતો યઃ સત્ત્વગુણસ્તસ્ય
શુદ્ધસત્ત્વં ઇત્યાખ્યા । સત્ત્વગુણાદેવ જ્ઞાનમુત્પદ્યતે । અતઃ
સત્ત્વગુણઃ પ્રકાશસ્વભાવઃ । એવમ્ભૂતસત્ત્વગુણપ્રધાનમાયાયાં
પ્રતિફલિતચૈતન્યાભાસરૂપેશ્વરસ્ય સ્વવિષયે વિષયાન્તરે વા
નૈવાવરણં સમ્ભવતિ । તસ્માદીશ્વરો નિત્યમુક્તઃ સર્વજ્ઞશ્ચ
ભવતિ । જીવેશ્વરયોરધિષ્ઠાનભૂતં શુદ્ધચૈતન્યં
બન્ધમોક્ષાદિનિખિલભેદશૂન્યં સદાકાશવદેકરસસ્વભાવં
તયોરુભયોરપિ વર્તતે । બન્ધમોક્ષાદિસ્તુ આભાસાંશે એવ । અધિષ્ઠાને
ચૈતન્યે ત્વાભાસસ્ય ભ્રાન્ત્યા પ્રતીયતે । તસ્માત્ કેવલાભાસે એવ
બન્ધમોક્ષાદિવ્યવહારઃ ।

ઇત્થમનન્તમતાનિ સ્વસ્વમતિવિલસિતાનિ પરસ્પરવિલક્ષણાન્યન્યોન્યવિરુદ્ધાનિ ચોપલભ્યન્તે । સકલમતાવિરોધેનૈતદ્ગ્રન્થોક્તેશ્વરસ્વરૂપમેવ શ્રુત્યભિપ્રેતમ્ । તથા ચોક્તં પઞ્ચદશ્યામ્-

એવમન્યે સ્વસ્વપક્ષાભિમાનેનાન્યથાન્યથા ।
મન્ત્રાર્થવાદકલ્પાદીનાશ્રિત્ય પ્રતિપેદિરે ॥ ચિત્રદીપે ૧૨૦॥

અન્તર્યામિણમારભ્ય સ્થાવરાન્તેશવાદિનઃ ।
સન્ત્યશ્વત્થાર્કવંશાદેઃ કુલદૈવતદર્શનાત્ ॥ ૧૨૧॥

તત્ત્વનિશ્ચયકામેન ન્યાયાગમવિચારિણામ્ ।
એકૈવ પ્રતિપત્તિઃ સ્યાત્ સાપ્યત્ર સ્ફુટમુચ્યતે ॥ ૧૨૨॥

૨. માયાસ્થબુદ્ધિવાસનાયાં પ્રતિફલિતચૈતન્યપ્રતિબિમ્બ ઈશ્વર ઇતિ વિદ્યારણ્યકૃતપઞ્ચદશ્યામભિહિતમ્ । ઈશ્વરો મેઘાકાશકલ્પ ઇત્યત્ર મેઘસદૃશી માયા, મેઘસ્થજલસમાના બુદ્ધિવાસનાઃ; તજ્જલસ્થાકાશપ્રતિબિમ્બસમાશ્ચિદાભાસાઃ । બુદ્ધિવાસનાપ્રતિફલિતપ્રતિબિમ્બસમ ઈશ્વર ઇતિ કથને ન કોઽપિ દોષઃ પ્રસજ્યતે । માયારૂપાજ્ઞાનસ્યૈવેશ્વરત્વાપાદકોપાધિત્વેઽપિ બુદ્ધિગતવાસના અજ્ઞાને અન્તર્ગતા ભવન્તિ । સર્વજ્ઞત્વસ્ય તુ કારણમજ્ઞાનગતસત્ત્વગુણ એવ । અયઞ્ચ સત્ત્વગુણો જ્ઞાનરૂપસકલબુદ્ધીનામુપાદાનકારણં ભવતિ । તસ્માત્સુષુપ્તૌ સકલબુદ્ધયઃ સ્વોપાદાનાંશે વિલીયોપાદાનાત્મનૈવ વર્તન્તે । ઉપાદાનરૂપેણાવસ્થિતિરેવ સૂક્ષ્મસંસ્કાર ઇત્યુચ્યતે । અયમેવ સંસ્કારો વાસનેત્યપિ કથ્યતે । ઇત્થમજ્ઞાનગતસત્ત્વાંશાત્ પૃથગ્વાસના નામ ન કાચનાસ્તિ । તસ્માદ્બુદ્ધિવાસનાશબ્દેનાજ્ઞાનસ્ય સત્ત્વાંશ એવ ગ્રાહ્યઃ । તત્રાપ્યસ્ત્યેતાવાન્ ભેદઃ - યસ્મિન્નાભાસે સ્વરૂપાવરણમસ્તિ તસ્મિન્નેવ બન્ધઃ । યત્ર નાસ્તિ સ તુ મુક્ત એવ । ઈશ્વરે આવરણાભાવાદેવ સ નિત્યમુક્તઃ । જીવે ત્વાવરણસત્ત્વાત્ સ બદ્ધઃ; યતો યસ્યા અવિદ્યાયા અંશે પ્રતિબિમ્બિતસ્ય ચિદાભાસસ્ય જીવત્વં ભવતિ તસ્યા અવિદ્યાયા આવારકત્વં સ્વભાવઃ । યદ્યપ્યેકસ્યૈવ વસ્તુનો માયા, અજ્ઞાનમ્, અવિદ્યા, ઇત્યાદિનામાનિ તથાપિ તસ્યૈવ શુદ્ધસત્ત્વગુણપ્રધાનત્વાત્ “માયા” ઇતિ, મલિનસત્ત્વગુણપ્રધાનત્વાચ્ચ “અજ્ઞાનમ્”, “અવિદ્યા” ઇતિ ચ વ્યવહારઃ । રજસ્તમોગુણાભ્યામભિભૂતઃ સત્ત્વગુણો મલિનસત્ત્વગુણ ઇત્યુચ્યતે । રજસ્તમોગુણાધિક્યાદેવાવિદ્યા સ્વપ્રતિબિમ્બિતજીવરૂપચિદાભાસાંશસ્યાવરણં કરોતિ । અત એવ જીવો બદ્ધો નેશ્વરઃ । સર્વાધિષ્ઠાનભૂતશુદ્ધચૈતન્યસહિતો માયાપ્રતિબિમ્બિતચિદાભાસરૂપ ઈશ્વરસ્તત્પદવાચ્યાર્થઃ । કેવલાધિષ્ઠાનશુદ્ધચૈતન્યં તત્પદલક્ષ્યાર્થઃ । ઈશ્વરો જગદુત્પત્તિસ્થિતિસંહારાન્ કરોતીતિ શાસ્ત્રોક્તેરયમભિપ્રાયઃ - અધિષ્ઠાનભૂતશુદ્ધચૈતન્યમાકાશવદસઙ્ગમ્

। માયાપ્રતિબિમ્બિતચિદાભાસાંશો જગદુત્પત્ત્યાદિકં
કરોતિ । સર્વજ્ઞત્વાદિગુણોઽપિ તસ્યૈવ ।
ભક્તાનુગ્રહાદિકર્તૃત્વમૈશ્વર્યાન્તરમપિ તસ્યૈવ ચિદાભાસાંશસ્ય
। ચૈતન્યસ્વરૂપં ત્વેકરસં સર્વસમમ્ । તસ્મિન્ સત્તાસ્ફૂર્તિપ્રદત્વં
અન્તરા અન્યદૈશ્વર્યાદિકં ન કિઞ્ચિદપ્યુપપદ્યતે । ઇતિ ।

## (૧૮૫)

બ્રહ્મસ્વરૂપવર્ણનં - મહાકાશવત્ બ્રહ્માણ્ડાનામન્તર્બહિશ્ચ વ્યાપ્ય વર્તમાનમખણ્ડપરિપૂર્ણચૈતન્યં બ્રહ્મેત્યુચ્યતે । ભાષ્યે ચોક્તં - "બ્રહ્મશબ્દસ્ય હિ વ્યુત્પાદ્યમાનસ્ય નિત્યશુદ્ધત્વાદયોઽર્થાઃ પ્રતીયન્તે, બૃહતેર્ધાતોરર્થાનુગમાત્ । સર્વસ્યાત્મત્વાચ્ચ બ્રહ્માસ્તિત્વપ્રસિદ્ધિઃ" (બ્ર. સૂ. ભા. ૧.૧.૧) ઇતિ । રત્નપ્રભાયામપ્યેવં વ્યાખ્યાતં - "સ ચાર્થો મહત્વરૂપ ઇતિ વ્યાકરણાન્નિશ્ચીયતે; "બૃહિ વૃદ્ધૌ" ઇતિ સ્મરણાત્ । સા ચ વૃદ્ધિર્નિરવધિકમહત્વમિતિ, સઙ્કોચકાભાવાત્ શ્રુતાવનન્તપદેન સહ પ્રયોગાચ્ચ જ્ઞાયતે" ઇતિ, "અતો બૃંહણાદ્બ્રહ્મેતિ વ્યુત્પત્ત્યા દેશકાલવસ્તુકૃતપરિચ્છેદાભાવરૂપં નિત્યત્વં પ્રતીયતે" ઇતિ ચ । તથા સૂતસંહિતાવ્યાખ્યાનેઽપ્યુક્તમ્ । (યજ્ઞ. બ્રહ્મગી. ૩.૩૧) "બ્રહ્મ સત્યજ્ઞાનસુખાદ્વયમ્, બૃહધાત્વર્થસ્યાનુગમાત્ । તથા હિ - "બૃહ બૃહિ વૃદ્ધૌ" ઇતિ ધાતુર્વૃદ્ધિમાચષ્ટે । સા ચ વૃદ્ધિઃ પ્રતિયોગિવિશેષાનુપાદાનાન્નિરતિશયૈવ વિવક્ષિતા । સતિ ચ વસ્ત્વન્તરે તેન પરિચ્છેદાદ્૧. સત્તાસ્ફૂર્તિપ્રદત્વં = સ્થિતિભાનપ્રદત્વમ્ । વૃદ્ધેર્નિરતિશયત્વં ભજ્યેત । તથા ચ વસ્ત્વન્તરકૃતપરિચ્છેદરહિતમેવ બ્રહ્મશબ્દવાચ્યં ભવિતુમર્હતિ । દ્વૈતપ્રપઞ્ચસ્ય તત્સ્વરૂપેઽધ્યસ્તતયૈવ પ્રતીતેર્વસ્તુતસ્તત્સ્વરૂપાનતિરિક્તત્વાત્ । તથા ચ વસ્તુકૃતપરિચ્છેદનિરાકરણેનૈવ દેશકાલકૃતપરિચ્છેદોઽપિ નિરસ્તો વેદિતવ્યઃ । દેશકાલયોરપિ પરિકલ્પિતત્વેન વસ્તુતસ્તદ્રૂપાનતિરેકાત્ । એવં દ્વૈતાપરોક્ષસ્યાધિષ્ઠાનત્વેન તદ્બાધાવધિત્વેન ચ ત્રિવિધપરિચ્છેદરહિતં યદદ્વિતીયં તત્સત્યમેવેષ્ટવ્યમ્" ઇતિ । ઇદં ચ બ્રહ્મ ન દૂરે નાપ્યન્તિકે વર્તતે । યદ્ધિ વસ્તુ સ્વસ્માદન્યત્વેનાનાત્મભૂતં દેશાદિરૂપોપાધિપરિચ્છિન્નં ચ ભવતિ તદેવ દૂરે અન્તિકે વા વર્તત ઇત્યુચ્યતે । ઇદં તુ બ્રહ્મ ન પ્રત્યગાત્મનો ભિદ્યતે; કિં તર્હિ, સર્વસ્ય પ્રત્યગાત્મભૂતં દેશાદિરૂપસર્વોપાધિશૂન્યં ચ ભવતિ । તસ્માદેવ તત્ દૂરેઽન્તિકે વા વર્તમાનતયા નોચ્યતે । બ્રહ્મશબ્દસ્ય હિ વાચ્યોઽર્થઃ સોપાધિક એવ, વ્યાપકત્વધર્મવિશિષ્ટસ્ય વસ્તુનો બ્રહ્મશબ્દાભિધેયત્વાત્ । ઇદં ચ વ્યાપકત્વં દ્વિવિધમ્, સાપેક્ષં (સાતિશયં) નિરપેક્ષં (નિરતિશયં) ચેતિ । યદ્વસ્તુ સ્વવ્યાપ્યાપેક્ષયા વ્યાપકમ્, સ્વવ્યાપકાપેક્ષયા વ્યાપ્યં ભવતિ, તદ્ આપેક્ષિકવ્યાપકં ઇત્યુચ્યતે । યથા પૃથિવ્યાદિરૂપસ્વકાર્યાપેક્ષયા વ્યાપિની માયા; ચૈતન્યાપેક્ષયા તુ ન વ્યાપિની, કિન્તુ વ્યાપ્યા । તસ્માન્માયાયામાપેક્ષિકમેવ વ્યાપકત્વમસ્તિ । યદ્વસ્તુ સર્વાપેક્ષયા વ્યાપકં ભવતિ તન્નિષ્ઠવ્યાપકત્વં નિરપેક્ષવ્યાપકત્વં ઇત્યુચ્યતે । ઇદં ચ નિરપેક્ષવ્યાપકત્વં ચૈતન્યે એવ વર્તતે । "ન તત્સમશ્ચાભ્યધિકશ્ચ દૃશ્યતે" (શ્વે. ૬.૮) ઇત્યાદિશ્રુત્યા તત્સમં વાધિકં વા ન કિઞ્ચન વ્યાપકં વસ્તુ વિદ્યતે ઇતિ સિદ્ધત્વાત્ । તસ્માચ્ચૈતન્યસ્યૈવ સર્વાપેક્ષયા વ્યાપકત્વશ્રવણાત્તદેવ નિરપેક્ષવ્યાપકમિતિ સિદ્ધ્યતિ । એતદ્વિવિધવ્યાપકત્વવિશિષ્ટં વસ્તુ બ્રહ્મશબ્દસ્ય વાચ્યાર્થઃ । માયાશબલિતચૈતન્યે દ્વિવિધમપ્યેતદ્વ્યાપકત્વં

વર્તતે । વિશિષ્ટનિષ્ઠવિશેષણીભૂતમાયારૂપાંશે આપેક્ષિકવ્યાપકત્વં વિશેષ્યભૂતચૈતન્યાંશે નિરપેક્ષવ્યાપકત્વં ચ વર્તતે । ચૈતન્યૈકદેશે માયાયાઃ સત્ત્વાત્, માયાવિશિષ્ટચૈતન્યાપેક્ષયા શુદ્ધચૈતન્યસ્યાધિકવ્યાપકત્વાચ્ચ તદેવ નિરપેક્ષવ્યાપકમ્, ન તુ માયા-

૧. ન હિ ઘટોપાદાનત્વશક્તિર્મૃત્સામાન્યે વર્તતે, કિન્તુ મૃદ્વિશેષે એવ । એવમેવ માયા ન બ્રહ્મણિ સર્વત્ર વર્તતે, કિન્ત્વેકદેશે એવ । (૫. ૬. ૨.૫૪, ૨.૮૭, ૨.૮૮) વિશિષ્ટચૈતન્યમ્ ।
તથાપિ યતો માયાવિશિષ્ટચૈતન્યં પરમાર્થદૃષ્ટ્યા શુદ્ધચૈતન્યાદનતિરિક્તં સચ્છુદ્ધરૂપમેવ ભવતિ તસ્માન્માયાવિશિષ્ટેઽપિ યશ્ચૈતન્યાંશસ્તત્ર નિરપેક્ષમેવ વ્યાપકત્વમસ્તિ । ઇત્થં માયાવિશિષ્ટચૈતન્યમેવ બ્રહ્મશબ્દસ્ય વાચ્યાર્થ ઇતિ યુક્તમેવોક્તમ્ । શુદ્ધચૈતન્યં તુ બ્રહ્મશબ્દસ્ય લક્ષ્યાર્થઃ । તસ્માદીશ્વરબ્રહ્મશબ્દયોરેક એવાર્થઃ પ્રતીયતે; ન ભિન્નાર્થતા । તથાપ્યસ્ત્યયં વિશેષઃ - બ્રહ્મશબ્દઃ સ્વરસતો લક્ષ્યાર્થમેવ પ્રાયશો બોધયતિ, કાચિત્કતયા તુ વાચ્યાર્થમપિ । ઈશ્વરશબ્દસ્તુ વાચ્યાર્થમેવ પ્રાયશો બોધયતિ, લક્ષ્યાર્થં તુ કાચિત્કતયા । ઈદૃગ્ભેદસદ્ભાવાદેવ લક્ષ્યાર્થમવલમ્બ્ય બ્રહ્મશબ્દસ્યાર્થો ભિન્નતયા નિરૂપિતઃ ।

## (A. 186-188) “દ્વા સપર્ણા” ઇતિ શ્રુત્યા જીવબ્રહ્મભેદઃ

અવગમ્યત ઇતિ, અન્યથા કર્મોપાસનાવિધિવૈયર્થ્યમિતિ ચ શઙ્કાયાઃ સમાધાનમ્-

### (૧૮૬)

ચૈતન્યાભાસો ભુઙ્ક્તે, કૂટસ્થોઽસઙ્ગઃ પ્રકાશતે - ચતુર્વિધં ચૈતન્યમુક્તમ્ । તત્ર જીવસ્વરૂપાન્તર્ગતમિથ્યાભૂતચિદાભાસાંશ એવ પુણ્યપાપે કૃત્વા તત્ફલમનુભવતિ, ન કૂટસ્થઃ । સ ત્વસઙ્ગતયા આનન્દસ્વરૂપ એવ પ્રકાશતે । યદુક્તં “બુદ્ધિરૂપવૃક્ષે જીવઃ પરમાત્મા ચેતિ દ્વૌ પક્ષિણો સ્તઃ, તયોર્જીવઃ કર્મફલં ભુઙ્ક્તે પરમાત્મા તં પ્રકાશયન્નાસ્તે ઇતિ દ્વા સુપર્ણેતિ શ્રુતેરર્થઃ;” ઇતિ, તત્રોચ્યતે - ન તત્ર જીવપરમાત્માનૌ ગ્રાહ્યૌ; કિન્ત્વાભાસઃ કર્મફલં ભુઙ્ક્તે કૂટસ્થઃ પ્રકાશમાન આસ્તે ઇતિ તસ્યાઃ શ્રુતેરર્થો જ્ઞેયઃ ।

## (૧૮૭)

ચૈતન્યાભાસ એવ કર્મકર્તા, ફલદાતા ચ; ન તુ શુદ્ધચૈતન્યં - જીવસ્વરૂપાન્તર્ગતચિચ્છાયારૂપાભાસાંશઃ કર્મ કરોતિ; કર્મ કુર્વત આભાસાંશસ્ય ઈશ્વરસ્વરૂપાન્તર્ગતચિચ્છાયારૂપાભાસાંશઃ ફલં પ્રયચ્છતિ । આભાસ એવ કર્મકર્તા, આભાસ એવ ફલદાતા ચ । અનેનાયમર્થઃ સિદ્ધઃજીવસ્વરૂપાન્તર્ગતાભાસાંશઃ પુણ્યપાપે કૃત્વા તત્ફલાનિ ભુઙ્ક્તે । ઈશ્વરનિષ્ઠાભાસાંશસ્તુ કર્મફલાનિ પ્રયચ્છતીતિ । એતદુભયાનુગતચૈતન્યાંશે ન કાપિ વાર્તાસ્તિ । જીવગતચૈતન્યાંશે કર્મકર્તૃત્વતત્ફલભોક્તૃત્વરૂપસમ્બન્ધો ન વર્તતે । ઈશ્વરગતચૈતન્યાંશેઽપિ ન કર્મફલદાતૃત્વરૂપસમ્બન્ધોઽસ્તિ । યસ્તુ તસ્મિન્ ચૈતન્યે કર્મકર્તૃત્વફલદાતૃત્વાદિકં વર્ણયતિ સ મૂર્ખ એવ । યતશ્ચૈતન્યમુભયત્રાપ્યસઙ્ગમેકરૂપં ચ વર્તતે । ચૈતન્યમાત્રે ન કોઽપિ ભેદગન્ધોઽસ્તિ । યસ્તુ જીવચૈતન્યમીશ્વરચૈતન્યાત્, ઈશ્વરચૈતન્યં વા જીવચૈતન્યાદ્ભિન્નતયા મન્યતે, સ વિગર્હ્ય એવ ભવતિ । તથા ચ શ્રુતિઃ "બ્રહ્મ તં પરાદાત્ યોઽન્તત્રાત્મનો બ્રહ્મ વેદ; સર્વં તં પરાદાત્ યોઽન્યત્રાત્મનઃ સર્વં વેદ ।" (બૃ. ૨.૪.૬, ૪.૫.૭) "મૃત્યોઃ સ મૃત્યુમાપ્નોતિ ય ઇહ નાનેવ પશ્યતિ" (ક. ૨.૧.૧૧, બૃ. ૪.૪.૧૯) "ઉદરમન્તરં કુરુતે, અથ તસ્ય ભયં ભવતિ" (તૈ. બ્ર. ૭) ઇતિ । એતેન, "જીવેશ્વરયોરૈક્યાભ્યુપગમે કર્મોપાસનપ્રતિપાદકવેદભાગોઽનુષ્ઠાત્રાભાવાન્નિરર્થકઃ સ્યાત્" ઇતીયં દ્વિતીયા શઙ્કાપીદાનીં સમાહિતા । જીવેશ્વરાનુગતચૈતન્યભાગયોરભેદઃ, આભાસભાગયોર્ભેદશ્ચાસ્તિ; તસ્માદુભયવિધયોરપિ વેદભાગયોઃ પ્રામાણ્યં સમઞ્જસમ્ ।

## (૧૮૮)

જીવબ્રહ્મણોર્લક્ષ્યાર્થાભેદસમ્ભવાત્ "અહં બ્રહ્મ" ઇતિ જાનીયાદિતિ ગુરોરુપદેશઃ - હે સોમ્ય । ત્વત્કૃતપ્રશ્નદ્વયમધ્યે "એકસ્મિન્ વૃક્ષે દ્વૌ પક્ષિણૌ સ્તઃ; તયોરેકો ભોક્તા, અપરો નિરીહઃ; અતો જીવબ્રહ્મૈક્યં ન ઘટતે;" ઇતિ હિ પ્રથમઃ પ્રશ્નઃ । તત્રૈવં સમાધાનમુક્તં - "એકવૃક્ષસ્થપક્ષિણોર્મધ્યે એકઃ કૂટસ્થોઽપરો બુદ્ધૌ પ્રતિફલિતચિદાભાસ ઇત્યેવં ગ્રાહ્યમ્, ન તુ જીવપરમાત્માનાવિતિ ગ્રાહ્યમિતિ; એતયોર્ઘટાકાશસ્ય આકાશચ્છાયાયાશ્ચ ભેદઃ" ઇતિ ચોક્તમ્ । ત્વત્કૃતદ્વિતીયપ્રશ્નરીત્યા ન જીવઃ કર્મોપાસનયોઃ કર્તા, નાપીશ્વરસ્તત્ફલદાતા । કિન્તુ તૌ ચિદાભાસાવેવ । જીવગતાભાસાંશઃ કર્મોપાસનાદિ કરોતિ, ઈશ્વરગતાભાસાંશઃ ફલં દદાતિ । જીવેશ્વરાનુગતચૈતન્યાંશસ્તુ ઘટાકાશમહાકાશવદ્ભેદશૂન્યઃ । ઇત્થં જીવબ્રહ્મણોરૈક્યં સિદ્ધ્યતિ । અતઃ "અહં બ્રહ્માસ્મિ" ઇત્યેવ ત્વં વિજાનીયાઃ । અત્રાહંશબ્દાર્થઃ કૂટસ્થ ઇતિ, બ્રહ્મશબ્દાર્થો મહાકાશસમતયોક્તલક્ષ્યાર્થભૂતશુદ્ધચૈતન્યમિતિ ચાવેહિ । અહમિતિ બ્રહ્મેતિ ચ શબ્દયોર્વાચ્યાર્થયોરૈક્યાસમ્ભવેઽપિ લક્ષ્યાર્થયોસ્તત્સિદ્ધ્યત્યેવ । હે સોમ્ય । યાવત્ "અહં બ્રહ્માસ્મિ" ઇત્યપરોક્ષસાક્ષાત્કારસ્તવ દૃઢતરો ન જાયતે, તાવદ્દુઃખદૈન્ય ભયાદિકં ત્વાં ન જહાતિ । સ્વસ્વરૂપાદ્ભિન્નતયા પરમાત્મનો જ્ઞાનમેવ તે ભયહેતુર્ભવતિ । "ઉદરમન્તરં કુરુતે, અથ તસ્ય ભયં ભવતિ" (તૈ. બ્ર. ૭) ઇત્યાદિશ્રુતેઃ । તસ્માત્ "અહં બ્રહ્માસ્મિ" ઇત્યેવ ત્વં વિજાનીયાઃ ।

# (A. 189-198) "અહં બ્રહ્મ" ઇતિ જ્ઞાનં કસ્યેતિ વિચારઃ-

(૧૮૯)

તત્ત્વદૃષ્ટિપ્રશ્નઃ - હે સ્વામિન્ । “અહં બ્રહ્મ” ઇતિ જ્ઞાનં કસ્ય જાયતે । કૃપયૈતન્મે વક્તુમર્હસીતિ । પ્રશ્નસ્યાયમભિપ્રાયઃ - “અહં બ્રહ્મ” ઇતિ જ્ઞાનં કિં કૂટસ્થસ્ય જાયતે, ઉત ચિદાભાસવિશિષ્ટબુદ્ધેઃ । યદિ કૂટસ્થસ્યેત્યુચ્યતે તદા વિકારી સ્યાત્કૂટસ્થઃ । યદિ ચિદાભસવિશિષ્ટબુદ્ધેરિત્યુચ્યતે તર્હિ તસ્યોત્પદ્યમાનં “અહં બ્રહ્મ” ઇતિ જ્ઞાનં ભ્રમરૂપં સ્યાત્ । “કૂટસ્થો બ્રહ્મ ચેત્યુભયમેકમેવ, આભાસસ્તુ કલ્પિતત્વાદ્બ્રહ્મણો ભિન્નઃ” ઇતિ પ્રાગભિહિતં ભવતા । તસ્માત્ બ્રહ્મણોઽન્યસ્ય ચિદાભાસસ્ય બ્રહ્મત્વેન જ્ઞાનં ભ્રમરૂપમેવ સ્યાત્; યથા સર્પાદ્વિલક્ષણાયાં રજ્જ્વાં સર્પજ્ઞાનં જાયમાનં ભ્રાન્તિરૂપમેવ, તદ્વત્ । એવં ચ ચિદાભાસસહિતબુદ્ધેર્જાયમાનં “અહં બ્રહ્મ” ઇતિ જ્ઞાનં ન યથાર્થાનુભવરૂપં ભવેત્, કિન્તુ ભ્રમરૂપમેવ સ્યાત્ । “અહં બ્રહ્મ” ઇતિ જ્ઞાનસ્ય ભ્રમત્વાઙ્ગીકારે ન તેન જ્ઞાનેન મિથ્યાભૂતં જગન્નિવર્તેત । યથાર્થજ્ઞાનાદેવ હિ મિથ્યાભ્રમનિવૃત્તિર્દૃષ્ટા; રજ્જુતત્ત્વજ્ઞાનેન મિથ્યાસર્પનિવૃત્તિવત્ । તસ્માદાભાસવિશિષ્ટબુદ્ધેઃ “અહં બ્રહ્મ” ઇતિ જ્ઞાનં જાયતે ઇત્યેતદ્વચનમનુપપન્નમેવેતિ ।

## (A. 190-196) પ્રાગુક્તપ્રશ્નસ્યોત્તરમ્

## (A. 190-191) આભાસસ્ય સપ્તાવસ્થાઃ-

(૧૯૦)

“અહં બ્રહ્મ” ઇતિ જ્ઞાનમાભાસસ્યૈવ - હે સોમ્ય, શૃણ્વિદાનીં મયોચ્યમાનાશ્ચિદાભાસસ્ય સપ્તાવસ્થાઃ । આસ્વવસ્થાસુ મધ્યે ન કાપ્યવસ્થા ચેતનસ્ય કૂટસ્થસ્ય સમ્ભવતિ । “અહં બ્રહ્મ” ઇતિ જ્ઞાનમપ્યાસુ સપ્તાવસ્થાસુ મધ્યે પઞ્ચમ્યામવસ્થાયામન્તર્ગતમ્ ।

(૧૯૧)

તાસામવસ્થાનાં નામાનિઅજ્ઞાનમાવૃતિઃ સમ્યગ્વિક્ષેપશ્ચ પરોક્ષધીઃ ।
અપરોક્ષમતિઃ શોકહતિસ્તૃપ્તિર્નિરઙ્કુશા ॥ પ. દ. ૭.૩૩॥ ઇતિ ।

(૧) અજ્ઞાનમ્, (૨) આવરણમ્, (૩) ભ્રાન્તિઃ (વિક્ષેપઃ),
(૪) પરોક્ષજ્ઞાનમ્, (૫) અપરોક્ષજ્ઞાનમ્, (૬) શોકનાશઃ (અનર્થનિવૃત્તિઃ),
(૭) અતિહર્ષઃ (નિરતિશયાનન્દપ્રાપ્તિઃ), ઇતિ ।

## (૧૯૨)

અજ્ઞાનાવરણયોઃ સ્વરૂપં - હે સોમ્ય, “અહં બ્રહ્મ ન જાને” ઇતિ વ્યવહારે કારણં અજ્ઞાનમ્ । “બ્રહ્મ નાસ્તિ, ન ભાતિ” ઇતિ વ્યવહારકારણં તુ આવરણમ્ । આવરણેન દ્વિવિધો વ્યવહારો ભવતિ, યતોઽજ્ઞાનસ્ય શક્તિદ્વયં વર્તતે । તત્રૈકા શક્તિરસત્ત્વાપાદિકા, અન્યા અભાનાપાદિકા । ઉભયોરપિ શક્ત્યોઃ આવરણં ઇતિ સાધારણં નામ । “વસ્તુ નાસ્તિ” ઇતિ પ્રતીતિહેતુભૂતા શક્તિઃ અસત્ત્વાપાદિકા ઇતિ, “વસ્તુ ન ભાતિ” ઇતિ પ્રતીતિહેતુભૂતા શક્તિઃ અભાનાપાદિકા ઇતિ ચોચ્યતે । ઇત્થં “બ્રહ્મ નાસ્તિ” ઇતિ વ્યવહારકારણમજ્ઞાનસ્યાસત્ત્વાપાદિકા શક્તિરેવ । “બ્રહ્મ ન ભાતિ” ઇતિ વ્યવહારકારણમજ્ઞાનસ્યાભાનાપાદિકા શક્તિરેવ । અનયોઃ શક્ત્યોઃ સાધારણાભિધા આવરણમિતિ ।

## (૧૯૩)

ભ્રાન્તિસ્વરૂપં - કૂટસ્થે ભાસમાનજન્માદિસંસારો વેદે ભ્રાન્તિઃ ઇત્યુચ્યતે । અયમેવ સંસારઃ શોકશબ્દેનાપ્યુચ્યતે । “તત્ર કો મોહઃ કઃ શોક એકત્વમનુપશ્યતઃ“(ઈ. ૭) “તરતિ શોકમાત્મવિત્” (છા. ૭.૧.૩) “ભિદ્યતે હૃદયગ્રન્થિઃ છિદ્યન્તે સર્વસંશયાઃ । ક્ષીયન્તે ચાસ્ય કર્માણિ તસ્મિન્ દૃષ્ટે પરાવરે” (મુ. ૨.૮) “મત્ત પરતરં નાન્યત્ કિઞ્ચિદસ્તિ ધનઞ્જય” (ભ. ગી. ૭.૭) “ન કર્તૃત્વં ન કર્માણિ લોકસ્ય સૃજતિ પ્રભુઃ” (ભ. ગી. ૫.૧૪) “અજ્ઞાનેનાવૃતં જ્ઞાનં તેન મુહ્યન્તિ જન્તવઃ” (ભ. ગી. ૫.૧૫) વાસુદેવઃ સર્વમિતિ સ મહાત્મા સુદુર્લભઃ” (ભ. ૭.૧૯) ઇત્યાદિશ્રુતિસ્મૃતિભિઃ સંસારસ્યાત્મૈકત્વજ્ઞાનમાત્રનિવર્ત્યત્વબોધિકાભિર્ભ્રમમાત્રત્વં બોધિતમ્ ।

## (૧૯૪)

પરોક્ષાપરોક્ષજ્ઞાનસ્વરૂપં - “બ્રહ્મ નાસ્તિ” ઇત્યસત્ત્વાપાદકાવરણાંશં “અસ્તિ બ્રહ્મ” ઇતિ વેદાન્તવાક્યજન્યપરોક્ષજ્ઞાનં નાશયતિ । “બ્રહ્મ સત્યજ્ઞાનાનન્તસ્વરૂપં ભવતિ” ઇતિ જ્ઞાનં પરોક્ષજ્ઞાનં ઇત્યુચ્યતે ।

૧. દેહેન્દ્રિયપ્રાણમનોહઙ્કારાદીનાં જન્માદિતદ્વિકારાણાં ચાત્મનિ પ્રત્યક્ચૈતન્યે ભાનમ્, આત્મનસ્તદ્ધર્માણાં સત્યજ્ઞાનાનન્તાનન્દાદીનાં ચાનાત્મનિ ભાનં ચાધ્યાસ ઇત્યુચ્યતે । અસ્યૈવ ભ્રાન્તિઃ, વિક્ષેપઃ, શોકઃ ઇત્યાદિવ્યપદેશાઃ ।

૨. દેશકાલવસ્તુભિર્યસ્યાન્તો (પરિચ્છેદઃ) ન ભવતિ, કિન્તુ સર્વદેશસર્વકાલસર્વવસ્તુષુ ચ વ્યાપ્ય યદ્વર્તતે તદ્ અનન્તમ્, વિભુ, ભૂમા ઇતિ ચોચ્યતે । અત્ર “અનન્તં બ્રહ્મ” ઇત્યુક્ત્યા “આનન્દરૂપં બ્રહ્મ” ઇત્યર્થાત્સિદ્ધ્યતિ । અયમેવાર્થઃ છાન્દોગ્યસપ્તમાધ્યાયે નારદાય સનત્કુમારેણોપદિષ્ટઃ । “યો વૈ ભૂમા તત્સુખમ્, નાલ્પે સુખમસ્તિ, ભુમૈવ સુખમ્, ભુમા ત્વેવ વિજિજ્ઞાસિતવ્ય ઇતિ ભૂમાનં ભગવો વિજિજ્ઞાસે

ઇતિ” (છા. ૭.૨૩.૧) । “યત્ર નાન્યત્ પશ્યતિ
નાન્યચ્છૃણોતિ નાન્યદ્વિજાનાતિ સ ભૂમા । અથ યત્રાન્યત્પશ્યતિ
અન્યચ્છૃણોત્યન્યદ્વિજાનાતિ તદલ્પમ્ । યો વૈ ભૂમા તદમૃતમથ
યદલ્પં તન્મર્ત્યમ્” (છા. ૭.૨૪.૧) । “સ એવાધસ્તાત્
સ ઉપરિષ્ટાત્ સ પશ્ચાત્ સ પુરસ્તાત્ સ દક્ષિણતઃ સ ઉત્તરતઃ
સ એવેદઁ સર્વમ્” (છા. ૭.૨૫.૧) ઇતિ । અત્ર યોઽનન્તરૂપો
ભવતિ સ ભૂમા ભવતિ, યો ભૂમા સ આનન્દરૂપો ભવતીત્યુક્તમ્ ।
અત આનન્તત્વાદેવ બ્રહ્મણ આનન્દરૂપત્વમપિ સિદ્ધમ્ । ઇદઞ્ચ
પરોક્ષજ્ઞાનં “નાસ્તિ બ્રહ્મ” ઇતિ પ્રતીતિવિરોધિ,
ન ત્વન્યસ્ય કસ્યચિદપિ વિરોધિ । “અહં બ્રહ્મ” ઇતિ
દૃઢતરનિર્વિચિકિત્સાપરોક્ષજ્ઞાનન્તુ સકલસ્યાવિદ્યાતત્કાર્યસ્ય
વિરોધિ । અત એવેદં અપરોક્ષજ્ઞાનં (૧) “અહં બ્રહ્મ
ન વેદ” ઇત્યજ્ઞાનમ્, (૨) બ્રહ્મ નાસ્તિ ન ભાતિ”
ચેત્યાવરણદ્વયમ્, (૩) “નાહં બ્રહ્મ કિન્તુ પુણ્યપાપાદિકર્તા
તત્ફલાનાં સુખદુઃખાનાં ભોક્તા ચ જીવઃ” ઇતિ ભ્રાન્તિઃ,
ચેત્યેતાવન્તમવિદ્યાસમૂહં નાશયતિ ।

## (૧૯૫)

ભ્રાન્તિનાશસ્વરૂપં - “મયિ જનનમરણાદિભાવવિકારો નાસ્તિ, મયિ સુખદુઃખાદિકં લેશતોઽપિ નાસ્તિ, સંસારધર્મગન્ધોઽપિ મયિ નાસ્તિ, કિન્ત્વહં જન્માદિવિકારશૂન્યકૂટસ્થ એવાસ્મિ” ઇત્યેવમાત્મનિ સર્વાનર્થાનાં નિષેધ એવ ભ્રાન્તિનાશસ્વરૂપં ઇત્યવધેયમ્ । અત્ર ચ કૂટસ્થે જન્મનિષેધાત્સર્વાનર્થા અપિ નિષિદ્ધા એવ ભવન્તિ, જન્માનન્તરભાવિત્વાદિતરાનર્થવ્રાતાનામ્ । આત્મનિ જન્મનિષેધાત્ ષડપિ ભાવવિકારા નિષિદ્ધા ભવન્તિ । અયમેવ ભ્રાન્તિનાશઃ શોકનાશશબ્દેનાપ્યુચ્યતે ।

## (૧૯૬)

અતિહર્ષસ્વરૂપવર્ણનં - હે શિષ્ય । “અહં અદ્વિતીયબ્રહ્મૈવાસ્મિ” ઇત્યેવં નિર્વિચિકિત્સં સ્વાત્મસ્વરૂપસાક્ષાત્કારરૂપં જ્ઞાનં યદા તવ જાયતે તદા તવ નિરતિશયાનન્દાનુભવો ભવત્યેવ । અયમેવ મહાહર્ષઃ ઇત્યુચ્યતે । પ્રદર્શિતાઃ સપ્તાવસ્થાશ્ચિદાભાસસ્યૈવ । “અહં બ્રહ્મ” ઇતિ જ્ઞાનં પઞ્ચમ્યામવસ્થાયામન્તર્ગતં ભવતિ ।

૧. મહાહર્ષરૂપોઽયમાનન્દઃ પઞ્ચદશ્યાં તૃપ્તિદીપે
વિદ્યારણ્યમુનિભિઃ “નિરઙ્કુશા તૃપ્તિઃ” ઇતિ વ્યપદિષ્ટઃ
। “સાઙ્કુશા વિષયૈસ્તૃપ્તિરિયં તૃપ્તિર્નિરઙ્કુશા”

(૨૫૨) । વિષયાનન્દસ્તુ સાતિશયત્વાદુત્તરોત્તરાનન્દેચ્છાં
જનયતીતિ હેતોઃ "સાઙ્કુશા" ઇત્યુચ્યતે ।
આત્માનન્દસ્તુ સ્વસ્માદુત્કૃષ્ટાનન્દાભાવાન્નિરઙ્કુશો ભવતિ ।
દશમપુરુષાખ્યાયિકાયાં દશમ આત્માનં વિહાયેતરાન્ નવૈવ
પુરુષાન્ ગણયન્ સ્વસ્ય દશમત્વં ન જાનાતીતિ યત્ તદેવ અજ્ઞાનમ્ ।
"દશમો નાસ્તિ ન ભાતિ" ઇત્યેતદ્ આવરણમ્ । "દશમો
મમાર" ઇતિ કલ્પયિત્વા રોદનં શોકઃ । અયમેવ ભ્રાન્તિઃ,
વિક્ષેપઃ ઇતિ ચ કથ્યતે । "દશમો ન મૃતઃ, જીવતિ સઃ"
ઇત્યાપ્તોક્ત્યા દશમસત્ત્વવેદનં પરોક્ષજ્ઞાનમ્ । "ત્વમેવ
દશમોઽસિ" ઇતિ સાક્ષાદુપદિષ્ટઃ સન્ પુનરપિ ગણનસમયે
સ્વાત્માનં દશમત્વેન ગણયિત્વા આત્માનં દશમત્વેન જાનાતીતિ યત્
તદેવ અપરોક્ષજ્ઞાનમ્ । ઈદૃશાદપરોક્ષજ્ઞાનાદ્રોદનનિવૃત્તિરેવ
ભ્રાન્તિનાશઃ । સ્વસ્યૈવ દશમત્વજ્ઞાનાત્ જાયમાનસન્તોષઃ
અતિહર્ષઃ । આસ્વવસ્થાસુ "અજ્ઞાનમ્, આવરણમ્,
વિક્ષેપઃ" ઇતીમાસ્તિસ્રોઽવસ્થા બન્ધકારણાનિ ભવન્તિ ।
અવશિષ્ટાસ્ત્વવસ્થાશ્ચતસ્રોઽપિ મોક્ષસાધનાનિ ભવન્તિ ।

## (૧૯૭)

"અહં બ્રહ્મ" ઇત્યાભાસસ્ય જાયમાનં જ્ઞાનં મિથ્યા સ્યાદિત્યાક્ષેપસ્યાશયોદ્ઘાટનં - ગૂઢાભિસન્ધિઃ શિષ્યઃ સ્વાભિસન્ધિમુદ્ઘાટયતિ । હે સ્વામિન્ સદ્ગુરો । કૂટસ્થો બ્રહ્માભિન્નઃ, આભાસો બ્રહ્મણો ભિન્ન ઇતિ ચ પ્રાગુપદિષ્ટમ્ । તત્ર બ્રહ્મણો વિભિન્નસ્યાભાસસ્ય "અહં બ્રહ્મ" ઇતિ બ્રહ્માભિન્નત્વજ્ઞાનં નૈવ ઘટેત । "મમાધિષ્ઠાનભૂતકૂટસ્થો બ્રહ્મ" ઇતિ જ્ઞાનં યદ્યાભાસસ્ય જાયેત, તદ્યથાર્થજ્ઞાનં ભવેત્, ન તુ "અહં બ્રહ્મ" ઇતિ જ્ઞાનમ્ । "અહમ્" ઇતિ શબ્દઃ સ્વકીયં નિજં સ્વરૂપમવગમયતિ । આભાસસ્ય નિજં સ્વરૂપં તુ મિથ્યૈવ । અત એવાયં બ્રહ્મણો ભિન્નઃ । તસ્માદ્બ્રહ્મણો વિભિન્નસ્યાભાસસ્ય "અહં બ્રહ્મ" ઇતિ સ્વસ્ય બ્રહ્માભિન્નત્વજ્ઞાનં મિથ્યૈવ સ્યાત્ । સર્પાદ્વિલક્ષણાયાં રજ્જ્વાં સર્પ ઇતિ જ્ઞાનં યથા મિથ્યા, તદ્વત્ । મિથ્યા નામ ભ્રાન્તિઃ । વેદાન્તપ્રમાણજન્યમિદં બ્રહ્મજ્ઞાનં ભ્રાન્તિરૂપમિતિ વદિતું ન યુજ્યતે ।

## (૧૯૮)

અહંશબ્દસ્ય દ્વાવર્થૌ; તત્ર કૂટસ્થસ્ય બ્રહ્મણા મુખ્યસામાનાધિકરણ્યમ્, ચિદાભાસસ્ય બાધાયાં સામાનાધિકરણ્યં ચહે સોમ્ય । "અહં બ્રહ્મ" ઇતિ જ્ઞાનં બુદ્ધિસહિતાભાસસ્યૈવ જાયતે, ન તુ કૂટસ્થસ્ય । તથાપિ સ આભાસઃ કૂટસ્થં સ્વસ્વરૂપં ચૈકીકૃત્ય સ્વાત્મતયા "અહં" ઇતિ જાનાતિ । તથા ચ કૂટસ્થસહિતચિદાભાસઃ

“અહમ્” ઇટિ શબ્દેન ગૃહ્યત ઇતિ, સ એવ અહંશબ્દસ્યાર્થઃ । તત્ર “અહમ્” ઇતિ શબ્દેન પ્રતીયમાન૧. અત્રૈવં શિષ્યઃ પ્રષ્ટવ્યઃ - “બ્રહ્મજ્ઞાનં મિથ્યા, મિથ્યાત્મકસંસારાન્તર્ગતચિદાભાસાશ્રિતત્વાત્; અતોઽનેન મિથ્યાજ્ઞાનેન સંસારઃ, મૃગતૃષ્ણિકામ્બુના પિપાસાવત્, કથં નિવર્તેતેતિ પૃચ્છસિ વા; અથવા બ્રહ્મજ્ઞાનં મિથ્યા, મિથ્યાભૂતજીવબ્રહ્મૈક્યવિષયકત્વાત્; રજ્જુસર્પૈક્યજ્ઞાનવત્; અતોઽનેન મિથ્યાજ્ઞાનેન કથં સંસારનિવૃત્તિઃ સ્યાદિતિ પૃચ્છસિ વા” ઇતિ । ઉભયમેવેતિ ચેત્ - ઉચ્યતે । તત્ર તાવત્ વેદાન્તપ્રમાણજન્યમનોવૃત્ત્યાત્મકબ્રહ્મજ્ઞાનં સ્વરૂપતો મિથ્યેતિ નિઃશઙ્કમસ્માભિરભ્યુપગતમેવ, બ્રહ્માતિરિક્તસ્ય સર્વસ્ય મિથ્યાત્વાત્ । તથાપિ તાદૃશમિથ્યાભૂથજ્ઞાનેન મિથ્યાત્મકસંસારનિવૃત્તિરપ્યુપપદ્યત એવ, “યક્ષાનુરૂપોઽયં બલિઃ” ઇતિ ન્યાયાત્ । યસ્માન્મિથ્યાભૂતઃ સંસારસ્તસ્માત્તન્નિવર્તકેન જ્ઞાનેનાપિ મિથ્યાભૂતેનૈવ ભાવ્યમ્ । અથવા “સમાનસત્તાકયોરેવ પદાર્થયોઃ પરસ્પરં સાધકબાધકભાવઃ” ઇતિ નિયમાદપિ મિથ્યાભૂતજ્ઞાનેનૈવ મિથ્યાભૂતસંસારનિવૃત્તિઃ સમ્ભવતિ । મૃગતૃષ્ણિકામ્બુપિપાસયોસ્તુ ન સમસત્તાકત્વમસ્તિ, તયોઃ પ્રાતિભાસિકત્વવ્યાવહારિકત્વરૂપવિષમસત્તાકત્વાત્ । અત એવ મૃગતૃષ્ણિકોદકેન પ્રાતિભાસિકેન વ્યાવહારિકપિપાસાશાન્તિર્ન સમ્ભવતિ । અયમર્થઃ પઞ્ચમતરઙ્ગે સ્પષ્ટીભવિષ્યતિ । ચિદાભાસબ્રહ્મણોરૈક્યરૂપજ્ઞાનસ્ય યો વિષયઃ સ મિથ્યૈવ । તતસ્તદ્વિષયકજ્ઞાનમપિ મિથ્યા સ્યાદિતિ દ્વિતીયપ્રશ્નસ્યોત્તરમધુનોચ્યતેઽત્રૈવ મૂલે ૧૯૮ આવર્તે । કૂટસ્થસ્ય સર્વદા બ્રહ્મણા સહાભેદઃ સિદ્ધ એવ; યથા ઘટાકાશમહાકાશયોરભેદઃ સર્વદા સિદ્ધસ્તદ્વત્ । અનેનૈવ હેતુના કૂટસ્થસ્ય બ્રહ્મણા સહ મુખ્યસામાનાધિકરણ્યં વેદાન્તશાસ્ત્રેષ્વભિધીયતે । યસ્ય વસ્તુનો યેન વસ્તુના સહ સદાભેદસમ્બન્ધોઽસ્તિ તસ્ય વસ્તુનસ્તેન વસ્તુના સહ મુખ્યસામાનાધિકરણ્યં ઉચ્યતે । યથા ઘટાકાશસ્ય મહાકાશેન સહ મુખ્યસામાનાધિકરણ્યં ભવતિ । ઇત્થં કૂટસ્થબ્રહ્મણોઃ સદાભેદસ્ય સત્ત્વાત્ કૂટસ્થસ્ય બ્રહ્મણા સહ મુખ્યસામાનાધિકરણ્યં ભવતિ । તસ્માદહમિતિશબ્દબોધ્યસ્ય કૂટસ્થસ્ય બ્રહ્મણા સહ સદાભેદ એવાસ્તે । “અહમ્” ઇતિ શબ્દેન પ્રતિભાસમાનચિદાભાસસ્ય તુ બ્રહ્મણા સહ સ્વસ્વરૂપબાધપૂર્વકમેવાભેદઃ સિદ્ધ્યતિ । તસ્માત્ વેદાન્તશાસ્ત્રેષ્વાભાસસ્ય બ્રહ્મણા સહ બાધાયાં સામાનાધિકરણ્યમેવોચ્યતે । યસ્ય હિ વસ્તુનઃ સ્વરૂપનાશપૂર્વકં યેન વસ્તુના સહાભેદો જાયતે, તસ્ય વસ્તુનસ્તેન વસ્તુના સહ બાધાયાં સામાનાધિકરણ્યં ઉચ્યતે । યથા મુખપ્રતિબિમ્બસ્ય સ્વરૂપબાધપૂર્વકં મુખરૂપબિમ્બેનાભેદસ્ય દૃષ્ટત્વાત્પ્રતિબિમ્બો મુખમેવ નાન્યત્, અતઃ પ્રતિબિમ્બસ્ય બિમ્બેન સહ બાધાયામેવ સામાનાધિકરણ્યં ભવતિ; યથા વા સ્થાણૌ પુરુષભ્રમાનન્તરં વિચારાત્ સ્થાણુત્વેન જ્ઞાને સતિ “પુરુષઃ સ્થાણુરેવ” ઇતિ પુરુષસ્ય સ્થાણુના સહ બાધાયામેવ સામાનાધિકરણ્યં જાયતે; તથાભાસસ્યાપિ બાધાનન્તરમેવ બ્રહ્મણા સહાભેદઃ સમ્ભવતિ ।

૧. સમાનવિભક્તિકત્વે સતિ એકાર્થબોધકત્વં યયોઃ પદયોરસ્તિ તે
પદે પરસ્પરં સમાનાધિકરણે ઇતિ, તયોઃ પદયોઃ પરસ્પરસમ્બન્ધઃ
સામાનાધિકરણ્યસમ્બન્ધ ઇતિ ચોચ્યતે । ઇદં ચ સામાનાધિકરણ્યં
જીવબ્રહ્મૈક્યબોધકસમાનવિભક્તિમત્પદઘટિતચતુર્વેદાન્તર્ગતચતુર્વિધમહાવાક્યેષૂપલભ્યતે
। તથાન્યત્રાપિ લૌકિકવૈદિકવાક્યેષુ બોધ્યમ્ । ઇદં ચ
સામાનાધિકરણ્યં દ્વિધોચ્યતે - મુખ્યસામાનાધિકરણ્યમ્, બાધાયાં
સામાનાધિકરણ્યમિતિ ચ । તત્ર સમાનસત્તાકત્વેન સમાનસ્વરૂપત્વેન

ચ વાસ્તવભેદશૂન્યયોરદ્વયોઃ પદાર્થયોર્બોધકવાક્યગતપદદ્વયસ્ય
મુખ્યસામાનાધિકરણ્યં ઉચ્યતે । તચ્ચ ઘટાકાશમહાકાશપદયોઃ,
કૂટસ્થબ્રહ્મશબ્દયોશ્ચાસ્તિ । ભિન્નસત્તાકયોરુભયોઃ પદાર્થયોઃ
સમાનવિભક્તિકત્વબલેનૈક્યપ્રતિપાદકવાક્યસ્થપદદ્વયસ્ય
બાધાયાં સામાનાધિકરણ્યં બોધ્યમ્ । તચ્ચ સ્થાણુપુરુષપદયોઃ
જગદ્બ્રહ્મપદયોઃ, બિમ્બપ્રતિબિમ્બપદયોશ્ચ વર્તતે । તસ્માત્
"અહમ્" ઇતિ શબ્દબોધ્યાભાસો બ્રહ્મૈવ, ન તતોઽન્યઃ ।
આભાસસ્ય બ્રહ્મણા સહેદૃશો બાધાયાં સામાનાધિકરણ્યં સમ્ભવતિ ।
હે સોમ્ય । ઇત્થમેવ "અહમ્" ઇતિ શબ્દગમ્યસ્ય કૂટસ્થસ્ય
બ્રહ્મણા સહ મુખ્યાભેદઃ, આભાસસ્ય તુ બાધાયામભેદઃ ઇતિ જાનીહિ ।

## (A. 199-218) કૂટસ્થાભાસયોઃ "અહંવૃત્તૌ" ભાનં કિં

ક્રમેણોત ક્રમં વિનેતિ વિચારઃ-

### (૧૯૯)

પ્રશ્નઃ - હે સ્વામિન્, અહંવૃત્તૌ સાક્ષિચિદાભાસયોઃ પ્રતિભાનં ભવતીતિ ભવતોક્તમ્ । તત્ર કિં તયોર્યુગપત્પ્રતીતિર્જાયતે, ઉત કાલભેદેનેતિ મે સંશયઃ । તન્મે ભવાન્ વિસ્પષ્ટં બોધયતુ ।

## (A. 200-218) પૂર્વપ્રશ્નસ્યોત્તરમ્-

### (૨૦૦)

અહંવૃત્તૌ સાક્ષિચિદાભાસયોર્યુગપદ્ભાનં - હે સોમ્ય, વિસ્પષ્ટં સારતરમુત્તરમુચ્યતે, શ ૃણુ સાવધાનમનાઃ । એતચ્છ્રવણજન્યજ્ઞાનસૂર્યપ્રકાશોદયમાત્રેણ ગાઢાજ્ઞાનરૂપતમો નિઃશેષં વિનઙ્ક્ષ્યતિ । હે શિષ્ય, સાક્ષ્યાભાસાવુભાવપ્યહંવૃત્તૌ યુગપદેવ પ્રતીયેતે । વેદાન્તપ્રકરણેષુ સર્વત્ર "આભાસઃ" ઇતિ શબ્દેનાન્તઃકરણસહિતચિદાભાસ એવ ગ્રાહ્યઃ । અન્તઃકરણસહિતચિદાભાસઃ સાક્ષિણો વિષયતયા ભાતિ । સાક્ષી તુ સ્વયમ્પ્રકાશતયા ભાતિ । ચિદાભાસસહિતાન્તઃકરણવૃત્ત્યા ન સાક્ષી વિષયીક્રિયતે । ઘટાદિબાહ્યપદાર્થજ્ઞાનોત્પત્તિક્રમસ્ત્વેવં - ઇન્દ્રિયાણાં ઘટાદિવિષયૈઃ સહ સંયોગદશાયામિન્દ્રિયદ્વારા બહિર્નિર્ગતાન્તઃકરણં ઘટાદિવિષયસમાનાકારતાં પ્રાપ્નોતિ । યથાયસા મૃદા વા નિર્મિતમૂષાયાં નિષિક્તદ્રુતતામ્રાદિર્મૂષાસમાનાકારતાં ભજતે; એવમન્તઃકરણવૃત્તિરપિ ઘટાદિસમાનાકારતાં ભજતે । ઇયચ્ચ વૃત્તિશ્ચૈતન્યાભાસસહિતૈવ જાયતે, નાભાસં વિનોદેતિ । વૃત્તિરન્તઃકરણસ્ય પરિણામઃ । અન્તઃકરણપરિણામસ્ય વૃત્તિઃ ઇતિ સંજ્ઞા । અન્તઃકરણં હિ સત્ત્વગુણકાર્યત્વાત્ સ્વચ્છમ્ । અતસ્તત્ર

ચૈતન્યાભાસો જાયતે । તથૈવ વૃત્તેરપિ સ્વચ્છાન્તઃકરણકાર્યત્વાત્ તત્રાપિ ચૈતન્યાભાસો જાયતે । ઉત્પદ્યમાના સા વૃત્તિઃ સાભાસાન્તઃકરણાદેવોત્પદ્યતે । અતોઽપિ કારણાત્ વૃત્તિરાભાસવિશિષ્ટૈવોદેતિ ।

## (૨૦૧)

ચૈતન્યમેવાજ્ઞાનસ્યાશ્રયો વિષયશ્ચ - ઘટાદિર્વિષયસ્તમોગુણકાર્યત્વાત્સ્વરૂપતો જડઃ । તસ્માદજ્ઞાનં તત્કાર્યમાવરણં ચ જડે ઘટાદિવિષયેઽસ્તીત્યાહુઃ કેચન । તદિદમાપાતરમણીયમ્ । વિચારદૃષ્ટ્યા તુ ચૈતન્યે એવાજ્ઞાનતત્પ્રયુક્તાવરણે સ્તઃ, ન તુ ઘટાદૌ વિષયે । અજ્ઞાનં ચૈતન્યમેવાશ્રિત્ય તદેવ વિષયીકરોતીતિ વેદાન્તસિદ્ધાન્તઃ ।

આશ્રયત્વવિષયત્વભાગિની નિર્વિભાગચિતિરેવ કેવલા ।
પૂર્વસિદ્ધતમસો હિ પશ્ચિમો નાશ્રયો ભવતિ નાપિ ગોચરઃ ॥

(સં। શા. ૧.૩૧૯) ઇતિ વૃદ્ધોક્તેઃ ।

પ્રાક્ સપ્તાવસ્થાનિરૂપણપ્રસઙ્ગે અજ્ઞાનાશ્રયોઽન્તઃકરણવિશિષ્ટચિદાભાસ ઇત્યુક્તમ્ । સ ચાજ્ઞાનસ્યાભિમાની આશ્રયઃ । “અહમજ્ઞઃ” ઇત્યભિમાનોઽન્તઃકરણસહિતાભાસસ્ય જાયતે ઇતિ યાવત્ । તસ્માદાભાસોઽજ્ઞાનાશ્રય ઇત્યુચ્યતે । મુખ્યાશ્રયસ્તુ ચૈતન્યમેવ, નાભાસસહિતાન્તઃકરણમ્; આભાસસહિતાન્તઃકરણસ્યાજ્ઞાનકાર્યત્વાત્ । યદ્યસ્ય કાર્યં ન તત્તસ્યાશ્રયો ભવેત્ । તસ્માદજ્ઞાનસ્ય કેવલચૈતન્યમેવાધિષ્ઠાનરૂપાશ્રયઃ । વિષયશ્ચ તસ્ય ચૈતન્યમેવ । સ્વરૂપતિરસ્કાર એવાજ્ઞાનવિષયત્વમિત્યુચ્યતે । એતદજ્ઞાનકૃત્યમાવરણં જડવસ્તુનિ ન યુજ્યતે । જડવસ્તુનઃ સ્વરૂપત એવાવૃતત્વાત્તત્રાજ્ઞાનકૃત્યાવરણસ્ય પ્રયોજનાભાવાત્ । તથાચાજ્ઞાનં સ્વાશ્રયચૈતન્યમેવ વિષયીકરોતિ । યથા ગૃહાન્તઃસ્થં તમઃ સ્વાશ્રયભૂતં ગૃહમેવાવૃણોતિ તદ્વત્ । તસ્માદ્ઘટાદૌ જડેઽજ્ઞાનાવરણે ન સમ્ભવતઃ ।

## (૨૦૨)

બાહ્યાર્થપ્રકાશે વૃત્તિચિદાભાસયોરુપયોગઃ - અત્રેદં બોધ્યં - ચૈતન્યાદ્ભિન્નં સદસદ્વિલક્ષણમજ્ઞાનં ચૈતન્યમાશ્રિત્ય વર્તતે; તેન ચ ચૈતન્યમાવૃતં ભવતિ । તદેવ ઘટાદિસ્વરૂપાદ્વિભિન્નમજ્ઞાનં ઘટાદ્યનાશ્રિતમપિ સ્વસદૃશં પ્રકાશશૂન્યં જડસ્વભાવં ઘટાદિરૂપં કાર્યં જનયતિ । તસ્માદ્ઘટાદિવસ્તુ અન્ધવત્સદા આવૃતમેવ ભવતિ । અયં ચ ઘટાદીનામાવૃતત્વસ્વભાવોઽજ્ઞાનહેતુકઃ । તથા હિ, તમોગુણપ્રધાનાદજ્ઞાનાત્ પઞ્ચભૂતોત્પત્તિદ્વારા ઘટાદયો જાયન્તે । તમોગુણશ્ચાવરણસ્વભાવકઃ । તસ્માત્ ઘટાદયઃ પ્રકાશશૂન્યા અન્ધીભૂતા એવ વર્તન્તે । એવમન્ધતારૂપમાવરણં ઘટાદાવજ્ઞાનકાર્યત્વાત્ સ્વભાવતઃ સિદ્ધમ્ । ઘટાદ્યધિષ્ઠાનચૈતન્યમાશ્રિત્ય વર્તમાનમજ્ઞાનં ચૈતન્યમાવૃત્ય, સ્વભાવત એવાવૃતં ઘટાદિકમપ્યાવૃણોતિ ।

૧. યથા ધનાદિકોશસ્ય મુખ્યાશ્રયઃ પેટિકા, “અહં ધની” ઇત્યાદૌ ધનસ્યાભિમાનિરૂપાશ્રયઃ પુરુષઃ; તથાજ્ઞાનસ્ય મુખ્યાશ્રયશ્ચૈતન્યમ્, અભિમાનિરૂપાશ્રયસ્તુ ચિદાભાસવિશિષ્ટાન્તઃકરણમ્ । સ્વભાવત એવ સંવૃતપદાર્થસ્ય

પુનઃ સંવરણે પ્રયોજનાભાવેઽપિ, આવારકઃ પદાર્થઃ
સ્વપ્રયોજનાપેક્ષાં વિનૈવાનાવૃતપદાર્થવદેવાવૃતમપિ
પદાર્થં પુનરાવૃણોત્યેવ । એતચ્ચ સર્વલોકપ્રસિદ્ધમ્ ।
તાદૃશાજ્ઞાનાવૃતઘટાદિસંયુક્તાન્તઃકરણપરિણામરૂપાયાં
ચિદાભાસસહિતઘટાદ્યાકારવૃત્તૌ યો વૃત્તિભાગઃ
સ ઘટાદીનામાવરણં નિવર્તયતિ । ચિદાભાસભાગઃ તુ
ઘટાદિવિષયં પ્રકાશયતિ । ઇત્થં બાહ્યપદાર્થપ્રકાશવિષયે
વૃત્તિતત્સ્થચિદાભાસયોરુભયોરપિ વિનિયોગો ભવતિ ।

## (૨૦૩)

અત્ર દૃષ્ટાન્તઃ - તમસિ મૃદ્ભાણ્ડેન કેનચિત્ મૃણ્મયં લોહમયં વા કિઞ્ચિદ્વસ્તુ સંવૃતમાસ્તે । તત્ર દણ્ડાદિના મૃદ્ભાણ્ડે આવરણે ભગ્નેઽપિ
વિના તુ દીપાદિપ્રકાશં તદન્તઃસ્થં વસ્તુ ન પ્રકાશતે, અપિ તુ દીપાદિનૈવ પ્રકાશતે । તથાજ્ઞાનાવૃતઘટાદેર્વિષયસ્યાવરણે વૃત્ત્યા વિનાશિતેઽપિ ન ઘટાદિરૂપવિષયઃ પ્રકાશેત । યતો ઘટાદિર્વિષયો જડઃ, વૃત્તિરપિ જડા; તસ્યાઃ વિષયાવરણનિવૃત્તિમાત્રં પ્રયોજનમ્, ન ત્વનયા વિષયપ્રકાશો જાયેત । તસ્માત્ ઘટદાઇદવિષયાવભાસકો વૃત્તિસ્થચિદાભાસ એવ । ચક્ષુરિન્દ્રિયગોચરવસ્તુપ્રત્યક્ષજ્ઞાનં પૂર્વોક્તક્રમેણ જાયતે । શ્રોત્રાદીન્દ્રિયગોચરપદાર્થપ્રત્યક્ષજ્ઞાનમપિ ઇત્થમેવ જાયત ઇતિ વિજ્ઞેયમ્ । વૃત્તિવિષયયો

૧.

(૧) શ્રોત્રેન્દ્રિયેણ શબ્દસાક્ષાત્કારસમયે શ્રોત્રેન્દ્રિયદ્વારા
બહિર્નિર્ગતાન્તઃકરણસ્ય સાભાસા વૃત્તિર્દૂરસ્થં વાન્તિકસ્થં
વા શબ્દરૂપં વિષયં પ્રાપ્ય શબ્દસમાનાકારતાં ભજતે ।
તદાન્તઃકરણવૃત્ત્યા શબ્દનિષ્ઠાવરણં નિવર્ત્યતે ।
તન્નિષ્ઠાભાસેન શબ્દઃ પ્રકાશતે ।

(૨) ત્વગિન્દ્રિયેણ સ્પર્શગુણસ્ય તદાશ્રયઘટાદિદ્રવ્યસ્ય
ચ સાક્ષાત્કારસમયે અન્તઃકરણવૃત્તિઃ શરીરાત્મકગોલકં
વિહાય ન બહિર્ગચ્છતિ । કિન્તુ શરીરાશ્રયયા અન્યાશ્રયયા વા
ક્રિયયા શરીરાત્મકગોલકેન સહ સમ્બદ્ધં ઘટાદિવિષયં
તદાશ્રિતમૃદુકઠિનાદિસ્પર્શાંશ્ચ શરીરરૂપગોલકે
એવ સ્થિત્વા સાભાસા વૃત્તિર્વિષયીકરોતિ । તદા વૃત્ત્યા
ઘટાદ્યાશ્રયસ્ય તદાશ્રિતસ્પર્શાદિગુણસ્ય ચાવરણભઙ્ગો જાયતે ।
તન્નિષ્ઠચિદાભાસેન ઘટાદિવિષયતદ્ગતસ્પર્શૌ પ્રકાશ્યેતે ।

(૩) રસનેન્દ્રિયેણ મધુરામ્લાદિરસસાક્ષાત્કારસમયે અન્તઃકરણવૃત્તિજિહ્વારૂપગોલકં વિહાય ન બહિર્ગચ્છતિ । કિન્તુ જિહ્વયા રસાત્મકવિષયસંયોગસમયે જિહ્વાગ્રવર્તિરસનેન્દ્રિયનિષ્ઠસાભાસાન્તઃકરણવૃત્તિઃ રસં વિષયીકરોતિ । તદા વૃત્ત્યા રસસ્યાવરણભઙ્ગો ભવતિ । તત્સ્થચિદાભાસેન મધુરાદિરસવિશેષઃ પ્રકાશ્યતે ।

(૪) ઘ્રાણેન્દ્રિયેણ ગન્ધસાક્ષાત્કારસમયે નાસારૂપગોલકેન સહ ગન્ધાશ્રયપુષ્પાદેઃ તત્સૂક્ષ્માવયવસ્ય વા સંયોગે નાસાગ્રવર્તિઘ્રાણેન્દ્રિયનિષ્ઠસાભાસાન્તઃકરણવૃત્તિઃ પુષ્પાદિદ્રવ્યાશ્રિતગન્ધમાત્રં વિષયીકરોતિ । તદા વૃત્ત્યા ગન્ધસ્યાવરણં ભજ્યતે । ચિદાભાસેન ગન્ધઃ પ્રકાશ્યતે । ઇત્થં શ્રોત્રાદીન્દ્રિયવિષયાણાં પ્રત્યક્ષક્રમો વિજ્ઞેયઃ । રેકદેશસ્થત્વાત્ ઘટજ્ઞાનં પ્રત્યક્ષં ઇત્યુચ્યતે । અન્તઃકરણવૃત્તિર્યદા ઘટાદિવિષયૈઃ સહ સમ્બન્ધાલાભાત્ બહિર્નિર્ગમનાભાવેનાન્તરેવ ઘટાકારા ભવતિ, તદા જાયમાનં ઘટાદિજ્ઞાનં પરોક્ષજ્ઞાનં ઇત્યુચ્યતે । “અયં ઘટઃ” ઇત્યપરોક્ષજ્ઞાનસ્યાકારઃ । “ઘટોઽસ્તિ” ઇતિ “સઃ ઘટઃ” ઇતિ વા પરોક્ષજ્ઞાનસ્યાકારઃ । સ્મૃતિરપિ પરોક્ષજ્ઞાનમેવ । તથાપિ સ્મૃતિઃ અનુભવાહિતસંસ્કારજન્યા, અનુમિત્યાદિપરોક્ષજ્ઞાનં તુ પ્રમાણજન્યમિતીયાન્ ભેદઃ ।

## (A. 204-209)
## પ્રમાણપ્રસઙ્ગાત્પ્રત્યક્ષાનુમાનશબ્દોપમાનાર્થાપત્ત્યનુપલબ્ધિપ્રમાણાનિ નિરૂપ્યન્તે-

### (૨૦૪)

પ્રત્યક્ષપ્રમાણં - ચાર્વાકમતસ્થાઃ પ્રત્યક્ષમેકમેવ પ્રમાણમિત્યઙ્ગીકુર્વન્તિ ।

### (૨૦૫)

અનુમાનપ્રમાણં - કણાદસુગતમતાનુસારિણો દ્વિતીયમનુમાનમપિ પ્રમાણત્વેનાઙ્ગીકુર્વન્તિ । પ્રત્યક્ષસ્યૈકેન પ્રમાણત્વાઙ્ગીકારે તૃપ્તિમિચ્છતો ભોજને પ્રવૃત્તિર્ન સ્યાત્; ભાવિભોજને તૃપ્તિનિરૂપિતહેતુત્વસ્ય

પ્રત્યક્ષપ્રમાણજન્યપ્રત્યક્ષજ્ઞાનાભાવાત્ । અતઃ "આગામિભોજનં તૃપ્તિકારણમ્, ભોજનત્વાત્, પૂર્વાનુભૂતભોજનવત્"; ઇત્યનુમાનેન પૂર્વભોજનેઽનુભૂતં યત્તૃપ્તિહેતુત્વં તદ્ભાવિભોજનેઽપિ જ્ઞાત્વા તૃપ્તિકામો ભોજને પ્રવર્તત ઇતિ વાચ્યમ્ । તસ્માદનુમાનમપિ પ્રમાણમ્ । ઇત્થં કણાદસુગતમતાનુસારિણઃ પ્રત્યક્ષમનુમાનં ચેતિ દ્વયમપિ પ્રમાણત્વેનાઙ્ગીકુર્વન્તિ ।

## (૨૦૬)

શબ્દપ્રમાણં - સાઙ્ખ્યશાસ્ત્રપ્રણેતૃકપિલમતાનુસારિણસ્તુ તૃતીયં શબ્દમપિ પ્રમાણત્વેનાઙ્ગીકુર્વન્તિ । તથા હિ, દેશાન્તરે કસ્યચિત્ પિતા મૃતઃ । આપ્તઃ કશ્ચિત્તં વૃત્તાન્તં તત્પુત્રાયાચખ્યૌ । આપ્તવાક્યાત્ પુત્રઃ પિતૃમરણં નિશ્ચિનોતિ । તચ્ચ ન સ્યાત્ પ્રત્યક્ષાનુમાનાત્મકપ્રમાણદ્વયમાત્રાઙ્ગીકારે; દેશાન્તરોત્પન્નપિતૃમરણજ્ઞાનસ્ય પ્રત્યક્ષાનુમાનાભ્યામસમ્ભવાત્ । તસ્માત્ કપિલમતાનુસારિણઃ પ્રત્યક્ષાનુમાનશબ્દાત્મકં ત્રયમપિ પ્રમાણત્વેનાઙ્ગીકુર્વન્તિ ।

## (૨૦૭)

ઉપમાનપ્રમાણં - ન્યાયશાસ્ત્રપ્રણેતૃગૌતમમતાનુસારિણશ્ચતુર્થમુપમાનમપિ પ્રમાણત્વેનાભ્યુપગચ્છન્તિ । તથા હિ, કશ્ચિત્ ગવયમૃગ૧. ભૂતપઞ્ચકમઙ્ગીકૃત્ય તત્કાર્યભૂતો દેહ એવાત્મેતિ વદન્તિ લોકાયતિકાઃ । આકાશં વિના ભૂતચતુષ્ટયમાત્રમઙ્ગીકૃત્ય તત્કાર્યભૂતો દેહ એવાત્મેતિ વદન્તિ ચાર્વાકાઃ ।

૨. અયમેવ વૈશેષિકશાસ્ત્રકર્તા । અયં કણભુગિતિ ચોચ્યતે ।

૩. સુગતઃ = બુદ્ધઃ ।

મજાનાનઃ કુતશ્ચિદારણ્યકપુરુષાત્ "ગવયો ગોસદૃશઃ" ઇતિ શ્રુત્વા કદાચિદરણ્યં ગત્વા યદા ગવયમૃગં પશ્યતિ, તદા આરણ્યકપુરુષોક્તં "ગોસદૃશો ગવય" ઇતિ વાક્યં તદર્થં ચ સ્મરતિ । તાદૃશસ્મરણાનન્તરં "અયં ગવયઃ" ઇતિ જ્ઞાનં તસ્ય જાયતે । તચ્ચ જ્ઞાનં ન સ્યાત્ પ્રત્યક્ષાદિપ્રમાણત્રયમાત્રમભ્યુપગમ્યોપમાનપ્રમાણસ્યાનભ્યુપગમે । તસ્માદેતાદૃશવિલક્ષણજ્ઞાનહેતુભૂતં ઉપમાનપ્રમાણં અઙ્ગીકુર્વન્તિ ગૌતમમતાનુસારિણઃ ।

## (૨૦૮)

અર્થાપત્તિપ્રમાણં - પૂર્વમીમાંસકૈકદેશી ભટ્ટશિષ્યઃ પ્રભાકરઃ પઞ્ચમીં અર્થાપત્તિમપિ પ્રમાણત્વેનાભ્યુપગચ્છતિ । દિવા અભુઞ્જાનસ્ય પુરુષસ્ય પીનત્વં દૃષ્ટ્વા "અયં રાત્રૌ ભુઙ્ક્તે" ઇતિ નિશ્ચયો જાયતે; રાત્રિભોજનમન્તરા દિવા અભુઞ્જાનસ્ય પીનત્વાનુપપત્તેઃ । ભોજનં પીનત્વહેતુરિત્યતઃ પીનત્વં રાત્રિભોજનસ્ય કાર્યમ્ । રાત્રિભોજનં પીનત્વસ્ય કારણમ્ । તત્ર પીનત્વમુપપાદ્યમ્, રાત્રિભોજનમુપપાદકમ્ । તથા ચોપપાદકરાત્રિભોજનસ્ય જ્ઞાનં પ્રતિ કારણભૂતપીનત્વરૂપોપપાદ્યજ્ઞાનં અર્થાપત્તિપ્રમાણં ઇત્યુચ્યતે ।

## (૨૦૯)

અનુપલબ્ધિપ્રમાણં - પૂર્વમીમાંસકો ભટ્ટઃ ષષ્ઠીં અનુપલબ્ધિમપિ પ્રમાણત્વેનાઙ્ગીકરોતિ । વેદાન્તિભિરપિ ષટ્ પ્રમાણાન્યેવાઙ્ગીક્રિયન્તે । “વ્યવહારે ભટ્ટનયઃ” ઇતિ ન્યાયાત્ । ગૃહાદ્યધિકરણેષુ ઘટાદેરભાવજ્ઞાનમનુપલબ્ધેઃ પ્રમાણત્વાભ્યુપગમે પ્રયોજનમ્ । યસ્ય પદાર્થસ્ય પ્રતીતિર્ન ભવતિ તત્પદાર્થવિષયકાભાવજ્ઞાનં જાયતે । અસ્યા અપ્રતીતેરનુપલબ્ધિરિતિ સંજ્ઞા । ઘટાદેરપ્રતીત્યા ઘટાદેરભાવનિશ્ચયો જાયતે । ઇત્થં પદાર્થપ્રતિયોગિકાભાવનિશ્ચયં પ્રતિ કારણીભુતપદાર્થાપ્રતીતિરેવાનુપલબ્ધિપ્રમાણં ઇત્યુચ્યતે ।

## (૨૧૦)

પ્રમાણપ્રમયોર્લક્ષણં - પ્રમારૂપજ્ઞાનકરણં પ્રમાણમ્ । સ્મૃતિભિન્નત્વે સત્યબાધિતાર્થવિષયકં જ્ઞાનં પ્રમા । સ્મૃતિરૂપં જ્ઞાનં ન પ્રમા । પ્રમાજ્ઞાનં હિ પ્રમાતારમાશ્રયતિ, સ્મૃતિસ્તુ ન પ્રમાતારમાશ્રિતા; કિન્તુ સાક્ષિણમાશ્રિતેત્યભ્યુપગમ્યતે । તથૈવ ભ્રાન્તિજ્ઞાનસંશયજ્ઞાને ચ સાક્ષ્યાશ્રિતે ઇત્યઙ્ગીકૃતમ્ । અત એવ સ્મૃતિર્ભ્રાન્તિઃ સંશયશ્ચેત્યેતત્ત્રયમપિ ચિદાભાસસહિતાવિદ્યાયા વૃત્તિરૂપમ્, નાન્તઃકરણસ્ય વૃત્તિરૂપમ્ । તતશ્ચ તત્ત્રયમપિ ન પ્રમાત્રાશ્રયં કિન્તુ સાક્ષ્યાશ્રયમ્ । યદેવાન્તઃકરણસ્ય વૃત્તિરૂપં જ્ઞાનં, તદેવ પ્રમાતારમાશ્રયતિ । અન્તઃકરણવૃત્તિરૂપં જ્ઞાનમેવ પ્રમેત્યુચ્યતે । અન્તઃકરણવૃત્તિરૂપત્વા- ભાવાદેવ ન સ્મૃતિઃ પ્રમાતારમાશ્રયતિ; પ્રમાપિ ન સા ભવતિ । અત એવ સ્મૃતિભિન્નત્વં પ્રમાલક્ષણે દેયમ્ । સ્મૃતેરબાધિતાર્થવિષયજ્ઞાનત્વેઽપિ ન સ્મૃતિભિન્નત્વમ્ । તસ્માદબાધિતાર્થવિષયકં સ્મૃતિભિન્નમેવ જ્ઞાનં પ્રમા ઇત્યુચ્યતે । નાસ્મિન્ લક્ષણે દોષગન્ધોઽપ્યસ્તિ ।

## (૨૧૧)

સ્મૃતિરપિ પ્રમેતિ વાદિનાં પક્ષઃ - અન્યે તુ સ્મૃતિરૂપજ્ઞાનમપિ પ્રમેત્યભ્યુપગચ્છન્તિ । તન્મતરીત્યા પ્રમાલક્ષણે ન “સ્મૃતિભિન્નત્વમ્” દેયમ્ । તન્મતેનાબાધિતાર્થવિષયકજ્ઞાનમેવ પ્રમેતિ વર્ણ્યતે । ભ્રાન્તિજ્ઞાનં તુ નાબાધિતાર્થવિષયકમ્, અપિ તુ બાધિતાર્થવિષયકમેવ । તસ્માત્પ્રમાલક્ષણસ્ય ન ભ્રાન્તિજ્ઞાનેઽતિવ્યાપ્તિઃ । સ્મૃતિજ્ઞાનમપિ પ્રમેત્યઙ્ગીકર્તૃમતે સ્મૃતિજ્ઞાનમન્તઃકરણસ્ય વૃત્તિરૂપં ન ત્વવિદ્યાયા વૃત્તિરૂપમ્ । નાપિ સાક્ષ્યાશ્રયમ્, અન્તઃકરણવૃત્તેઃ પ્રમાત્રાશ્રયત્વેન સાક્ષ્યાશ્રયત્વાભાવાત્ । ઇત્થં કેષાઞ્ચિન્મતે સ્મૃતિજ્ઞાનં અન્તઃકરણવૃત્તિરૂપત્વાત્ પ્રમા ભવતિ । કેષાઞ્ચિન્મતે તુ અવિદ્યાવૃત્તિરૂપત્વાન્ન પ્રમા । ભ્રાન્તિજ્ઞાનં સંશયજ્ઞાનં ચ સર્વમતસ્થૈરપ્યવિદ્યાવૃત્તિત્વેન સાક્ષ્યાશ્રિતત્વેન ચાભ્યુપગમ્યતે । ન વિવાદોઽસ્ત્યત્ર । વિચાર્યમાણે તુ સ્મૃતિજ્ઞાનમપ્યવિદ્યાવૃત્તિરૂપં સાક્ષ્યાશ્રયં ચ; ન પ્રમા । વેદાન્તસમ્પ્રદાયજ્ઞા અપિ પ્રમાજ્ઞાનં ષોઢા વિભજન્તિ । સ્મૃતેસ્તત્રાનન્તર્ભૂતત્વાત્ ન સ્મૃતિજ્ઞાનં પ્રમા । મધુસૂદનસ્વામિનોઽપિ સ્મૃતિજ્ઞાનં સાક્ષ્યાશ્રયમિત્યેવાવોચન્ ।

## (૨૧૨)

ષડ્વિધાઃ પ્રમાઃ - ઇદાનીં ષડ્વિધપ્રમા નિર્દિશ્યન્તે- (૧) પ્રત્યક્ષપ્રમા, (૨) અનુમિતિપ્રમા, (૩) ઉપમિતિપ્રમા, (૪) શાબ્દી પ્રમા, (૫) અર્થાપત્તિપ્રમા, (૬) અભાવપ્રમા ચેતિ । પૂર્વોક્તાનિ પ્રત્યક્ષાદિપ્રમાણાનિ ક્રમેણૈતાસાં ષણ્ણાં પ્રમાણાં કરણાનિ ભવન્તિ ।

૧. યથાર્થાનુભવઃ પ્રમેતિ સ્મૃતિવ્યાવૃત્તં પ્રમાલક્ષણમ્ ।

યથાર્થજ્ઞાનં પ્રમેતિ પ્રમાલક્ષણં તુ સ્મૃતિસાધારણમિતિ વિવેકઃ ।

૨. ભ્રમરૂપાનુભવજસંસ્કારજનિતસ્મૃતિર્બાધિતાર્થવિષયકત્વાદયથાર્થજ્ઞાનમ્ ।

યથાર્થાનુભવજસંસ્કારજનિતસ્મૃતિરબાધિતાર્થવિષયકત્વાદ્યથાર્થજ્ઞાનં ભવતિ । અત એવ તાદૃશસ્મૃતિજ્ઞાનમન્તઃકરણવૃત્તિરૂપમ્ નાવિદ્યાવૃત્તિરૂપમ્; પ્રમાતારમાશ્રિતમ્, ન સાક્ષિણમ્ । તથાપિ પ્રાચીના ન સ્મૃતિજ્ઞાનં પ્રમેતિ વ્યવહરન્તિ । તસ્માદ્દ્વિવિધસ્મૃતિરપ્યપ્રમૈવ । તયોરયથાર્થસ્મૃતિઃ અયથાર્થરૂપા અપ્રમા યથાર્થસ્મૃતિઃ યથાર્થરૂપા અપ્રમા ઇતીયાનેવ ભેદઃ ।

કરણલક્ષણં - તત્ર પ્રત્યક્ષપ્રમાયાઃ કરણં પ્રત્યક્ષપ્રમાણં ઇત્યુચ્યતે । અસાધારણકારણં એવ કરણમ્ । યત્ સકલકાર્યાણાં તુલ્યતયા કારણં ભવતિ, તત્ સાધારણકારણમ્ । કાર્યત્વાવિચ્છન્નનિષ્ઠકાર્યતાનિરૂપિતકારણતાશાલિ યત્ તત્ સાધારણકારણમ્ । ધર્માધર્માદિકં સકલકાર્યાણાં કારણત્વાત્ સાધારણકારણમ્ । સકલકાર્યાણાં કારણભાવમનાસાદ્ય કતિપયકાર્યાણામેવ વિશિષ્ય કારણભાવં યદ્ભજતે તદસાધારણકારણમ્ । કાર્યત્વાતિરિક્તધર્માવચ્છિન્નનિષ્ઠકાર્યતાનિરૂપિતકારણતાશાલિ યત્ તદસાધારણકારણમ્ । દણ્ડો હિ ન સકલકાર્યાણાં કારણં ભવતિ, કિન્તુ ઘટાદિરૂપકાર્યવિશેષાણામેવ કારણં ભવતિ । તસ્માદ્દણ્ડો ઘટાદીનાં અસાધારણકારણમિતિ કરણમિતિ ચોચ્યતે । એવમેવ પ્રત્યક્ષપ્રમાયાઃ ઈશ્વરસ્તદિચ્છાદયશ્ચ સાધારણકારણાનિ । યસ્માદીશ્વરાદયઃ સકલકાર્યાણિ પ્રતિ કારણાનિ ભવન્તિ, યસ્માચ્ચ ન કિઞ્ચિદપિ કાર્યમીશ્વરાદિકં વિનોત્પદ્યતે તસ્માદીશ્વરાદયઃ સાધારણકારણાનિ । ચક્ષુરાદીનીન્દ્રિયાણિ પ્રત્યક્ષપ્રમાં પ્રત્યસાધારણકારણાનિ । અતસ્તાનિ પ્રત્યક્ષપ્રમાં પ્રતિ કરણાનિ ચ ભવન્તિ । એવઞ્ચ ચક્ષુરાદીનીન્દ્રિયાણિ પ્રત્યક્ષપ્રમાણાનીત્યુચ્યન્તે ।

## (૨૧૩)

પ્રમાતૃપ્રમાણપ્રમાપ્રમેયચૈતન્યાનિ - નનુ વેદાન્તસિદ્ધાન્તે ચક્ષુરાદીન્દ્રિયાણાં પ્રત્યક્ષપ્રમાકારણત્વં ન યુજ્યતે । તથા હિ, વેદાન્તસિદ્ધાન્તે ચત્વારશ્ચૈતન્યભેદાઃ સન્તિ (૧) પ્રમાતૃચૈતન્યમ્, (૨) પ્રમાણચૈતન્યમ્, (૩) પ્રમિતિ૧.

કેવલસાધારણકારણં કરણમિત્યુક્તે યત્રાસાધારણકારણદ્વયં પ્રાપ્તં તત્રેદમેવ કરણમિતિ વિનિગમકાભાવાદેકસ્ય દ્વારરૂપકારણત્વમન્યસ્ય વ્યાપારવદસાધારણકારણત્વરૂપકરણત્વં ચાભ્યુપેયમ્ । યત્તુ દ્વારરૂપકારણં પુરસ્કૃત્ય કાર્યં જનયતિ, તદેવાસાધારણકારણરૂપં કરણં ભવતિ । તદ્યથા કપાલદ્વયં, સંયોગદ્વારા ઘટસ્યોત્પાદકત્વાત્, ઘટં પ્રતિ વ્યાપારવદસાધારણકરણરૂપં કરણમ્ । યત્તુ વ્યાપારશૂન્યં સત્ દ્વારકારણમનપેક્ષ્ય સાક્ષાદેવ કાર્યં જનયતિ, તત્ કેવલકારણમ્, ન તુ કરણમ્ । યથા કપાલદ્વયસંયોગઃ સાક્ષાદેવ ઘટોત્પાદકત્વાત્ કેવલકારણમ્, ન તુ કરણમ્ । વ્યાપારવદસાધારણકારણં કરણમિત્યસ્ય લક્ષણસ્ય પ્રત્યક્ષાનુમાનશબ્દાખ્યપ્રમાણેષુ સમ્ભવેઽપિ

ઉપમાનાર્થાપત્ત્યનુપલબ્ધ્યાખ્યપ્રમાણેષ્વસમ્ભવાદવ્યાપ્તિઃ । ઉપમિત્યાદીનાં જનને વિનૈવ વ્યાપારમુપમાનાદીનાં કારણત્વસમ્ભવાત્પૂર્વોક્તકરણલક્ષણસ્ય તત્રાવ્યાપ્તિઃ સ્યાત્ । અતો વ્યાપારભિન્નમસાધારણકારણં કરણમિત્યસ્ય લક્ષણસ્ય નિર્દુષ્ટત્વાત્તદેવ સર્વપ્રમાણાનુગતકરણલક્ષણમ્ ।

૨. આદિશબ્દેન ઈશ્વરસ્ય જ્ઞાનમ્, ઈશ્વરસ્ય પ્રયત્નઃ, કાલઃ, દિક્, અદૃષ્ટમ્, પ્રાગભાવઃ, પ્રતિબન્ધકાભાવશ્ચેતિ સપ્ત ગૃહ્યન્તે । અમી ઈશ્વરાદયો નવ સર્વકાર્યાણાં સાધારણકારણાનિ । ચૈતન્યમથવા પ્રમાચૈતન્યમ્, (૪) પ્રમેયચૈતન્યમથવા વિષયચૈતન્યમિતિ ।

વેદાન્તમતે પ્રમા નામ ચૈતન્યમેવ । તચ્ચ ચૈતન્યં નિત્યમ્, નેન્દ્રિયજન્યમ્; તસ્માન્નેન્દ્રિયં તત્કારણમિતિ ચેત્ । તન્ન, ચૈતન્યસ્ય પ્રમાત્વાપાદિકા વૃત્તિરપિ પ્રમેત્યુચ્યતે । તસ્યા વૃત્તેરિન્દ્રિયં કરણમ્ ।

(૧) પ્રમાતૃચૈતન્યં - દેહમધ્યવૃત્ત્યન્તઃકરણેનાવચ્છિન્નં ચૈતન્યં પ્રમાતૃચૈતન્યં ઇત્યુચ્યતે ।

(૨) પ્રમાણચૈતન્યં - ઇદમેવાન્તઃકરણં ચક્ષુરાદીન્દ્રિયદ્વારા બહિર્નિર્ગત્ય ઘટાદિવિષયદેશપર્યન્તં દીર્ઘીભાવરૂપપરિણામં પ્રાપ્નોતિ । તતો ઘટાદિવિષયૈઃ સંસૃજ્ય ઘટાદિતત્તદ્વિષયાકારેણ ચ પરિણમતે । યથા તડાકોદકં પ્રણાલીદ્વારા બહિર્નિર્ગત્ય કુલ્યાત્મના પરિણામં પ્રાપ્ય કેદારાન્ પ્રવિશ્ય તત્તચ્ચતુષ્કોણાદિરૂપકેદારાકારં ભવતિ, તથૈવાન્તઃકરણમપિ ચક્ષુરાદીન્દ્રિયચ્છિદ્રદ્વારા બહિર્નિર્ગત્ય વિષયરૂપકેદારં પ્રાપ્ય વિષયાકારં ભવતિ । તત્ર દેહદેશમારભ્ય ઘટાદિવિષયદેશપર્યન્તં યોઽન્તઃકરણસ્ય દીર્ઘીભાવરૂપઃ પરિણામઃ, સ એવ વૃત્તિજ્ઞાનં ઇત્યુચ્યતે । વૃત્તિજ્ઞાનરૂપો યોઽન્તઃકરણપરિણામઃ સ પ્રમાણં ઇતિ કથ્યતે । તેનાવચ્છિન્નં ચૈતન્યં પ્રમાણચૈતન્યં ઇત્યભિધીયતે ।

(3) પ્રમિતિચૈતન્યમથવા પ્રમાચૈતન્યં - કેદારં પ્રવિશ્ય યથા જલં કેદારસમાકારં ભવતિ, તથા ઘટાદિવિષયં પ્રાપ્યાન્તઃકરણવૃત્તિરપિ ઘટાદિવિષયસમાનાકારતાં ભજતે । તાદૃશવિષયસમાનાકારતયાવચ્છિન્નચૈતન્યં પ્રમાચૈતન્યં ઇત્યુચ્યતે ।

(૪) પ્રમેયચૈતન્યમથવા વિષયચૈતન્યં - જ્ઞાનવિષયીભૂતઘટાદ્યવચ્છિન્નચૈતન્યં

વિષયચૈતન્યમ્, પ્રમેયચૈતન્યં ઇતિ ચોચ્યતે । એતાઃ સર્વા
વેદાર્થસમ્પ્રદાયવિદાચાર્યકૃતપરિભાષાઃ ।

## (A. 214-217) પ્રમાતૃલક્ષણમ્-

### (૨૧૪)

અવચ્છેદવાદરીત્યા પ્રમાતૃસાક્ષિણોઃ સ્વરૂપમ્; વિશેષણલક્ષણમુપાધિલક્ષણં ચ - અવચ્છેદવાદરીત્યા અન્તઃકરણવિશિષ્ટચૈતન્યં પ્રમાતા । સ એવ કર્તા ભોક્તા ચ । અન્તઃકરણોપહિતચૈતન્યં સાક્ષી । એકમેવાન્તઃકરણં પ્રમાતુર્વિશેષણત્વેન સાક્ષિણ ઉપાધિત્વેન ચ ભવતિ । વિશેષણલક્ષણં - વસ્તુસ્વરૂપે યસ્ય પ્રવેશઃ અસ્તિ, તાદૃશં વ્યાવર્તકં

૧. પ્રવેશઃ = કાર્યેણ સહ સમ્બન્ધઃ ।

વસ્તુ વિશેષણં ઇત્યુચ્યતે । કાર્યાન્વયિત્વે સતિ વ્યાવર્તકત્વે સતિ વિદ્યમાનત્વં વિશેષણસ્ય લક્ષણમ્ । પદાર્થાન્તરેભ્યો વિવિચ્ય વસ્તુસ્વરૂપાવેદકં યત્ તત્ વ્યાવર્તકં ઇત્યુચ્યતે । ઇતરેભ્યો ભિન્નતયા યદ્બુધ્યતે તદ્વ્યાવર્ત્યં ઇત્યુચ્યતે । “નીલો ઘટઃ” ઇત્યત્ર ઘટસ્ય નીલવર્ણં વિશેષણમ્ । યતો નીલવર્ણં નીલઘટસ્વરૂપે પ્રવિષ્ટં સત્ રક્તપીતશ્વેતાદિવર્ણવિશિષ્ટઘટેભ્યો વ્યાવર્ત્ય પૃથગિમં નીલઘટં બોધયતિ, તસ્માન્નીલવર્ણં વ્યાવર્તકં વિશેષણઞ્ચ । ઘટસ્તુ પરિચ્છેદ્યઃ, યતઃ પીતાદિવર્ણવિશિષ્ટઘટાદિભ્યો વિવિચ્યાયં નીલઘટો બુદ્ધ્યતે । યસ્તુ વિવિચ્ય બુદ્ધ્યતે પદાર્થઃ, સ હિ પરિચ્છેદ્યઃ, વ્યાવર્ત્યઃ, વિશેષ્યં ઇતિ ચોચ્યતે । “દણ્ડી પુરુષઃ” ઇત્યાદાવપિ દણ્ડાદિકં પુરુષસ્ય વિશેષણમ્ । ઇત્થં પ્રમાતુરન્તઃકરણં વિશેષણં ભવતિ, તસ્ય પ્રમાતૃસ્વરૂપે પ્રવેશાત્ । તથા પ્રમેયચૈતન્યાદ્વ્યાવર્ત્ય પ્રમાતૃસ્વરૂપસ્ય બોધકત્વાદન્તઃકરણં વ્યાવર્તકં ચ ભવતિ । ઉપાધિલક્ષણં - યસ્તુ વસ્તુસ્વરૂપે અન્તરેણૈવ પ્રવેશં વ્યાવર્તકો ભવતિ સ ઉપાધિરિત્યુચ્યતે । કાર્યાનન્વયિત્વે સતિ વ્યાવર્તકત્વે સતિ વિદ્યમાનત્વમુપાધિલક્ષણમ્ । નૈયાયિકમતે “કર્ણશષ્કુલ્યવચ્છિન્નં નભઃ શ્રોત્રમ્” ઇત્યુચ્યતે । તત્ર કર્ણગોલકં શ્રોત્રસ્યોપાધિર્ભવતિ । કર્ણગોલકં શ્રોત્રેન્દ્રિયસ્વરૂપે પ્રવેશમન્તરેણૈવ બાહ્યભૂતાકાશાદ્વિવિચ્ય શ્રોત્રેન્દ્રિયં બોધયતિ । તસ્માત્ કર્ણગોલકં વ્યાવર્તકં ભવતિ । “ઘટાકાશઃ પ્રસ્થપરિમિતાન્નસ્યાવકાશં દદાતિ” ઇત્યત્ર ઘટ આકાશસ્યોપાધિરેવ । પ્રસ્થપરિમિતાન્નાવાકાશદાત્રાકાશસ્વરૂપે પ્રવેશં વિનૈવ ઘટો મહાકાશાદ્વિભજ્ય ઘટાકાશં બોધયતિ । ઘટસ્ય પૃથિવીકાર્યત્વેનાવકાશપ્રદત્વાસમ્ભવાદાકાશસ્વરૂપે પ્રવેશો ન યુજ્યતે । તસ્માદ્ઘટ આકાશસ્યોપાધિરેવ । એવમેવાન્તઃકરણોપહિતચૈતન્યં સાક્ષીત્યત્ર સાક્ષિણોઽન્તઃકરણમુપાધિઃ । ન હ્યન્તઃકરણસ્ય સાક્ષિસ્વરૂપે પ્રવેશો ભવતિ । કિન્ત્વન્તઃકરણં પ્રમેયચૈતન્યાદ્વિવિચ્ય સાક્ષિણં બોધયતિ । તસ્માદેકમેવાન્તઃકરણં સાક્ષિણ ઉપાધિત્વેન પ્રમાતુર્વિશેષણત્વેન ચ ભવતિ । અન્તઃકરણોપહિતચૈતન્યં સાક્ષી । અન્તઃકરણવિશિષ્ટચૈતન્યં પ્રમાતા । ઉપાધિના યુક્તં ઉપહિતં ઇતિ વિશેષણેન યુક્તં વિશિષ્ટં ઇતિ ચોચ્યતે । તત્રાન્તઃકરણવિશિષ્ટઃ પ્રમાતૈવ કર્તા, ભોક્તા, સુખી, દુખી, સંસારી, જીવો ભવતિ । ઇત્થં અવચ્છેદવાદરીત્યા પ્રમાત્રાદિલક્ષણં નિરૂપિતમ્ ।

## (૨૧૫)

આભાસવાદરીત્યા જીવસાક્ષિણોઃ સ્વરૂપં - આભાસવાદે આભાસસહિતાન્તઃકરણં જીવસ્ય વિશેષણમ્, સાક્ષિણ ઉપાધિશ્ચ ભવતિ । અત એવાભાસસહિતાન્તઃકરણવિશિષ્ટચૈતન્યં જીવઃ । આભાસસહિતાન્તઃકરણોપહિતચૈતન્યં સાક્ષી । યદ્યપિ પક્ષદ્વયેઽપિ વિશેષણસહિતચૈતન્યં જીવઃ, સ એવ સંસારી ચ; તથાપિ વિશેષ્યભાગે ચૈતન્યે જનનમરણાદિસંસારો ન સમ્ભવતિ । તસ્માદ્વિશેષણમાત્રે સંસારઃ પર્યવસ્યતિ; સ એવ વિશિષ્ટચૈતન્યે પ્રતીયતે । (૧) ક્વચિદ્વિશેષણગતધર્માણાં વ્યવહારો વિશિષ્ટે ભવતિ । (૨) ક્વચિદ્વિશેષ્યગતધર્માણાં વ્યવહારો વિશિષ્ટે ભવતિ । (૩) ક્વચિદ્વિશેષણવિશેષ્યોભયગતધર્માણાં વ્યવહારો વિશિષ્ટે ભવતિ । તદ્યથા - (૧) “દણ્ડેન ઘટાકાશો નશ્યતિ” ઇત્યત્ર વિશેષણીભૂતઘટ એવ દણ્ડેન નશ્યતિ, ન તુ વિશેષ્ય- ભૂતાકાશઃ । તથાપિ વિશિષ્ટે ઘટાકાશે નાશઃ પ્રતીતો ભવતિ । (૨) “કુણ્ડલી પુરુષઃ સ્વપિતિ” ઇત્યત્ર વિશેષણે કુણ્ડલે સ્વાપો નાન્વેતિ; વિશિષ્યે પુરુષે તુ સ્વાપઃ સમ્ભવતિ । તથાપિ “કુણ્ડલવિશિષ્ટઃ સ્વપિતિ” ઇતિ વિશિષ્ટે સ્વાપવ્યવહારો ભવતિ । (૩) “આયુધપાણિઃ પુરુષો યોદ્ધું યાતિ” ઇત્યત્ર વિશેષણસ્યાયુધસ્ય વિશેષ્યસ્ય પુરુષસ્ય ચ યુદ્ધાય ગમનાદુભયોરપિ ધર્મો વિશિષ્ટે વ્યવહ્રિયતે । પ્રકૃતે ત્વવચ્છેદવાદેઽન્તઃકરણં વિશેષણમ્, આભાસવાદે આભાસસહિતાન્તઃકરણં વિશેષણમ્; દ્વયોરપિ પક્ષયોશ્ચૈતન્યં વિશેષ્યમ્ । તસ્મિંશ્ચૈતન્યે જન્માદિસંસારો ન સમ્ભવતિ । કિન્તુ વિશેષણસ્યાન્તઃકરણસ્ય વા આભાસસહિતાન્તઃકરણસ્ય વા ધર્મભૂતો યો જન્માદિરૂપઃ સંસારઃ સોઽવિવેકિભિર્ભ્રાન્ત્યા વિશિષ્ટચૈતન્યે વ્યવહ્રિયતે । વ્યવહારો નામ પ્રતીતિઃ કથનઞ્ચ । અનયા રીત્યા આભાસવાદાવચ્છેદવાદયોર્ભેદોઽવગન્તવ્યઃ ।

## (૨૧૬)

આભાસવાદસ્ય જ્યાયસ્ત્વં - આભાસવાદેઽન્તઃકરણમાભાસસહિતમ્, અવચ્છેદવાદે તદ્રહિતં ચ ભવતિ । દ્વયોર્મધ્યે આભાસવાદો જ્યાયાન્ । ભાષ્યકારૈરાભાસવાદ એવ સ્વીકૃતઃ । અવચ્છેદવાદે વિદ્યારણ્યમુનયો દોષમપ્યાહુઃ । તથા હિ, આભાસરહિતાન્તઃકરણાવચ્છિન્નચૈતન્યસ્ય પ્રમાતૃત્વાભ્યુપગમે ઘટાવચ્છિન્નચૈતન્યસ્યાપિ પ્રમાતૃત્વં પ્રસજ્યેત । યતોઽન્તઃકરણવદ્ઘટોઽપિ ભૂતકાર્યમ્, અન્તઃકરણં યથા ચૈતન્યસ્યાવચ્છેદકમથવા વ્યાવર્તકં તથા ઘટોઽપિ ચૈતન્યસ્યાવચ્છેદકો વ્યાવર્તકશ્ચ; તસ્માદન્તઃકરણવિશિષ્ટચૈતન્યમિવ ઘટાવચ્છિન્નચૈતન્યમપિ પ્રમાતા ભવેદિત્યાપત્તિરપરિહાર્યા । અન્તઃકરણે આભાસસ્યાઙ્ગીકારે તુ નાસ્ય દોષસ્યાવકાશઃ । તથા હિ, અન્તઃકરણં પઞ્ચતન્માત્રસમષ્ટિસત્ત્વગુણકાર્યત્વાત્ સ્વચ્છમ્ । ઘટાદયઃ પઞ્ચીકૃતપઞ્ચભૂતતમોગુણકાર્યત્વાદસ્વચ્છાઃ । યત્ સ્વચ્છં તત્રાભાસઽથવા પ્રતિબિમ્બો જાયતે । મલિને પદાર્થે નાભાસો જાયતે । દર્પણસ્ય તત્પિધાયકકોશસ્ય ચ મૃત્કાર્યત્વાવિશેષેઽપિ સ્વચ્છે દર્પણે મુખસ્યાભાસઃ પ્રતીયતે । અસ્વચ્છે દર્પણપિધાયકકોશે ન મુખસ્યાભાસઃ પ્રતીયતે । એવમેવ સત્ત્વગુણકાર્યત્વાત્સ્વચ્છેઽન્તઃકરણે ચૈતન્યાભાસઃ પ્રતીયતે । તમોગુણકાર્યત્વાદસ્વચ્છે શરીરાદૌ ઘટાદૌ ચ ચૈતન્યાભાસો ન પ્રતીયતે ।

## (૨૧૭)

અન્તઃકરણગતદ્વિવિધપ્રકાશ એવ પ્રમાતા; નાન્યઃઇત્થમન્તઃકરણે દ્વિવિધઃ પ્રકાશોઽસ્તિ; એકો વ્યાપકચૈતન્યસ્ય પ્રકાશઃ,
અપર આભાસરૂપચૈતન્યસ્ય પ્રકાશઃ । શરીરે ઘટાદિષુ ચ વ્યાપકચૈતન્યસ્ય
પ્રકાશ એક એવાસ્તિ, દ્વિતીય આભાસસ્ય પ્રકાશો નાસ્તિ । તસ્માદ્વિવિધપ્રકાશસહિતાન્તઃકરણવિશિષ્ટચૈતન્યમેવ પ્રમાતા ઇત્યુચ્યતે, ન ત્વેકપ્રકાશમાત્રસહિતઘટાદિવિશિષ્ટચૈતન્યં પ્રમાતા ।
યેષાં મતેઽન્તઃકરણે આભાસો નાસ્તિ તેષાં મતે ઘટાદાવિવાન્તઃકરણેઽપિ દ્વિતીય આભાસસ્ય પ્રકાશો નાસ્તિ । અપિ ચ ય એકો વ્યાપકચૈતન્યસ્ય
પ્રકાશોઽન્તઃકરણેઽસ્તિ સ એવ ઘટાદાવપ્યસ્તિ । તસ્માદન્તઃકરણવિશિષ્ટચૈતન્યસ્ય પ્રમાતૃત્વાઙ્ગીકારે, ઘટવિશિષ્ટસ્ય શરીરવિશિષ્ટસ્ય કુડ્યવિશિષ્ટસ્ય ચ
ચૈતન્યસ્ય પ્રમાતૃત્વં સ્વીકર્તવ્યં ભવેત્ । ઇત્થં ઘટશરીરાદ્યપેક્ષયાન્તઃકરણે ઈદૃશં
વૈલક્ષણ્યમસ્તિ । અત્ર ચાયં હેતુઃ - સત્ત્વગુણકાર્યત્વાદન્તઃકરણં સ્વચ્છમ્; અત
એવ તચ્ચૈતન્યાભાસગ્રહણયોગ્યં ચ । ઇતરપદાર્થાસ્તુ તમોગુણકાર્યત્વાદસ્વચ્છાઃ,
અત એવ તે ચૈતન્યાભાસગ્રહણાયોગ્યાશ્ચ । આભાસગ્રહણયોગ્યાન્તઃકરણવિશિષ્ટચૈતન્યમેવ પ્રમાતેત્યભિધીયતે; ન ત્વાભાસગ્રહણાયોગ્યઘટાદિવિશિષ્ટચૈતન્યં પ્રમાતા
ભવતિ । અત એવાભાસવાદઃ શ્રેયાન્, ન ત્વવચ્છેદવાદઃ ।

૧. આભાસવાદે આભાસસ્ય સ્વરૂપમધિકતયા કલ્પનીયં ભવતિ । અવચ્છેદવાદે તુ
ન ઇત્થં યદ્યપ્યાભાસવાદે ગૌરવં અવચ્છેદવાદે લાઘવં ચ, તથાપિ મન્દજિજ્ઞાસોર્બુદ્ધાવાભાસવાદઃ સ્ફુટમારૂઢો ભવેદિત્યનેનાભિપ્રાયેણાભાસવાદઃ સ્તૂયતે । ભાષ્યકારાદીનામપ્યયમેવાશયઃ ।

## (૨૧૮)

પ્રમાત્રાદિચતુર્વિધચૈતન્યસ્વરૂપં - યથાન્તઃકરણમાભાસસહિતમેવાસ્તે તથા તદ્વૃત્તિરપ્યાભાસસહિતૈવ જાયતે । આભાસસહિતવૃત્તિવિશિષ્ટચૈતન્યં પ્રમાણચૈતન્યં ઇત્યુચ્યતે । ઘટાદિવિષયાકારાન્તઃકરણવૃત્ત્યારૂઢં ચૈતન્યં પ્રમેતિ, યથાર્થજ્ઞાનં ઇતિ વોચ્યતે । પ્રમાયાઃ સાધનમિન્દ્રિયં પ્રમાણં ઇતિ કથ્યતે । અત્રેદં જ્ઞેયં - વિષયાકારવૃત્ત્યારૂઢચૈતન્યં પ્રમેતિ કીર્ત્યતે । તત્ર ચૈતન્યસ્ય સ્વરૂપતો નિત્યત્વાન્નેન્દ્રિયજન્યત્વસમ્ભવઃ । અતશ્ચ પ્રમાચૈતન્યં પ્રતીન્દ્રિયસ્ય યદ્યપિ સાધનત્વં ન યુજ્યત એવ તથાપ્યુપચારેણેન્દ્રિયસ્ય પ્રમાસાધનત્વવ્યવહારઃ । તથા હિ, ઉપાધિશૂન્યચૈતન્યે પ્રમાવ્યવહારાભાવાત્ વિષયાકારવૃત્ત્યુપહિતચૈતન્યે એવ તદ્વ્યવહારાચ્ચ, ચૈતન્યે પ્રમાશબ્દપ્રવૃત્તૌ વિષયાકારવૃત્તેરુપાધિત્વાત્તસ્યા વૃત્તેરિન્દ્રિયજન્યત્વાત્તાદૃશવૃત્ત્યુપહિતપ્રમાં પ્રત્યપીન્દ્રિયસ્ય સાધનત્વવ્યવહારઃ । ઇત્થમેવ ઇન્દ્રિયં પ્રમાસાધનં ઇતિ વ્યવહ્રિયતે । ન હ્યન્તઃકરણપરિણામાઃ સર્વેઽપિ પ્રમાત્વેન વ્યવહ્રિયન્તે । કિન્તુ શરીરાન્તઃસ્થમન્તઃકરણં વિષયરૂપઘટાદિદેશપર્યન્તં દીર્ઘીભાવાપત્તિરૂપં પરિણામં પ્રાપ્નોતિ, સ પરિણામ એવ પ્રમાણં ઇત્યુચ્યતે । વિષયૈઃ સહ મિલિતસ્યાન્તઃકરણસ્ય વિષયસમાનાકારો યઃ પરિણામસ્તસ્ય

પ્રમેતિ વ્યપદેશઃ । શરીરાન્તઃસ્થિતાન્તઃકરણદેશમારભ્ય ઘટાદિવિષયદેશપર્યન્તં દીર્ઘીભૂતસ્યાન્તઃકરણસ્ય પરિણામઃ પ્રમારૂપતાં ધત્તે । તસ્માત્પ્રમાયાઃ પ્રમાણરૂપાન્તઃકરણવૃત્તેશ્ચ નાધિકો ભેદોઽસ્તિ । અનેન ક્રમેણ બાહ્યપદાર્થાનાં પ્રત્યક્ષજ્ઞાનોત્પત્તિદશાયામન્તઃકરણવૃત્તિર્બહિર્નિર્ગત્ય વિષયીભૂતઘટાદિસમાનાકારતાં ધત્તે । શરીરાન્તઃસ્થાત્મનઃ પ્રત્યક્ષકાલે ત્વન્તઃકરણવૃત્તિર્બહિર્નિર્ગમનં વિના શરીરસ્યાન્તરેવાત્માકારતાં ધત્તે । તયા આત્માકારયા વૃત્ત્યા આત્માશ્રિતમાવરણં નિવર્ત્યતે । આત્મા સ્વસ્ય પ્રકાશેન વૃત્તૌ પ્રકાશતે । અનેનૈવ નિમિત્તેનાત્મા વૃત્તેર્વિષય ઇત્યુચ્યતે । વૃત્તિસ્થચિદાભાસરૂપફલસ્ય ત્વાત્મા ન વિષયો ભવતિ । વર્ણિતેન પ્રકારેણ સાક્ષિરૂપ આત્મા સ્વયમ્પ્રકાશરૂપો ભાતીતિ સિદ્ધ્યતિ ।

## (A. 219-223) ઇન્દ્રિયસમ્બન્ધં વિના “અહં બ્રહ્મ” ઇતિ

જ્ઞાનસ્ય કથં પ્રત્યક્ષતેતિ તત્ત્વદૃષ્ટિપ્રશ્નઃ-

### (૨૧૯)

તત્ત્વદૃષ્ટેઃ શઙ્કા - “બ્રહ્માપરોક્ષજ્ઞાનેન સકલાવિદ્યાસમૂહો નશ્યતિ, ન તુ પરોક્ષજ્ઞાનેન” ઇતિ પ્રાગભિહિતમ્ । અત્રૈષા શઙ્કા ભવતિ“ઇન્દ્રિયજન્યમેવ જ્ઞાનં પ્રત્યક્ષમિત્યુચ્યતે, બ્રહ્મજ્ઞાનં તુ નેન્દ્રિયજન્યમવિષયત્વાદ્બ્રહ્મણઃ । “યતો વાચો નિવર્તન્તે અપ્રાપ્ય મનસા સહ” (તૈ. બ્ર. ૪.૯) ઇત્યાદિશ્રુતેઃ ।

## (A. 220-222) બ્રહ્મ ન જ્ઞાનેન્દ્રિયાણાં વિષયઃ-

### (૨૨૦)

બ્રહ્મ ન ચક્ષુષો વિષયઃ - રૂપવતઃ પદાર્થસ્ય અથવા નીલાદિવર્ણસ્યૈવ જ્ઞાનં ચક્ષુષા જન્યતે । બ્રહ્મ તુ ન તાદૃશમ્; અતો ન બ્રહ્મ નેત્રેન્દ્રિયજન્યજ્ઞાનવિષયઃ । મનુષ્યાકારેણાવતીર્ણાનાં રામકૃષ્ણાદીનાં મૂર્તયો યદ્યપિ રૂપાદિમત્યસ્તથાપિ તા મૂર્તયો માયિકત્વાન્મિથ્યા । અતો ન તા મૂર્તયો બ્રહ્મરૂપાઃ । યદ્યપિ પુરાણાદિષુ રામકૃષ્ણાદીનાં બ્રહ્મરૂપેણ વર્ણનમસ્તિ તથાપિ તદ્વચનં ન તદીયશરીરસ્ય બ્રહ્મત્વબુદ્ધ્યા પ્રવૃત્તં કિન્તુ તદીયશરીરાધિષ્ઠાનચૈતન્યસ્ય બ્રહ્મત્વબુદ્ધ્યેતિ જ્ઞેયમ્ ।

નનુ મનુષ્યપશુપક્ષ્યાદિસર્વશરીરાણામપ્યધિષ્ઠાનં બ્રહ્મચૈતન્યમેવ । અધિષ્ઠાનચૈતન્યાભિપ્રાયેણ રામકૃષ્ણાદીનાં બ્રહ્મત્વે સર્વશરીરાણામપિ બ્રહ્મચૈતન્યસ્યૈવાધિષ્ઠાનત્વાન્મનુષ્યપશુપક્ષ્યાદયોઽપિ બ્રહ્મરૂપા ભવેયુઃ । તથા ચ પશ્વાદિસમા એવ રામકૃષ્ણાદયોઽપિ ભવેયુઃ । તસ્માદ્રામકૃષ્ણાદીનાં જીવાન્તરાપેક્ષયા વૈશિષ્ટ્યસિદ્ધયે તદીયશરીરે એવ બ્રહ્મબુદ્ધિરુચિતા, ન તુ તદીયશરીરાધિષ્ઠાનચૈતન્યદૃષ્ટ્યા તેષુ બ્રહ્મબુદ્ધિરિતિ ચેત્ ।

તન્ન । શરીરં બાધિત્વા રામકૃષ્ણાદિશરીરાણાં બ્રહ્મત્વવિવક્ષણે પશ્વાદિશરીરાણામપિ બાધપૂર્વં બ્રહ્મત્વં સિદ્ધ્યેત્ । બાધાભાવે તુ જીવાન્તરાણાં શરીરવત્ કરચરણાદ્યવયવસહિતસ્ય રૂપક્રિયાદિયુક્તસ્ય રામકૃષ્ણાદેઃ

શરીરસ્ય નિરવયવત્વેન રૂપક્રિયાદિશૂન્યેન બ્રહ્મણા સહાભેદો ન ઘટેત । તસ્માત્સાવયવં રૂપક્રિયાદિયુક્તં રામકૃષ્ણાદેઃ શરીરં ન બ્રહ્મ । પરન્ત્વિયાન્ ભેદોऽસ્તિ - જીવાનાં શરીરં પુણ્યપાપાધીનં ભૂતકાર્યં ચ । કિઞ્ચ જીવાનાં દેહાદ્યનાત્મપદાર્થેષ્વવિદ્યાબલાત્ “અહમ્, મમ” ઇત્યધ્યાસો ભવતિ, સ ચાધ્યાસ આચાર્યોપદેશાન્નિવર્તતે । રામકૃષ્ણાદીનાં શરીરં તુ ન તદીયપુણ્યપાપજન્યં નાપિ ભૌતિકમ્ । પરન્તુ સૃષ્ટેઃ પ્રાક્ યદા પ્રાણિનાં કર્મફલદાનોન્મુખં ભવતિ તદા આપ્તકામસ્યાપીશ્વરસ્ય પ્રાણિનાં કર્માનુસારેણ “અહં જગત્સૃજેયમ્” ઇતિ સઙ્કલ્પો જાયતે । તેન સઙ્કલ્પેન જગદુત્પત્તિરૂપા સૃષ્ટિર્ભવતિ । તથૈવ સૃષ્ટેઃ પરમપિ “અહં જગત્પાલયેયમ્” ઇતીશ્વરસ્ય સઙ્કલ્પો જાયતે । તેન સઙ્કલ્પેન જગદ્રક્ષ્યતે । કર્માનુસારેણ સુખદુઃખાદિસમ્બન્ધ એવ પાલનં ઇત્યુચ્યતે । પાલનસઙ્કલ્પમધ્યે ઉપાસકાનામુપાસનફલત્વેન “રામકૃષ્ણાદિનામસહિતા મૂર્તયઃ સર્વેષાં પ્રતીયન્તામ્” ઇતિ ચેશ્વરસ્ય સઙ્કલ્પો ભવતિ । અનેનેશ્વરસઙ્કલ્પેન નામરૂપાદિરહિતે ઈશ્વરે રામકૃષ્ણાદિનામાનિ પીતામ્બરાદિસહિતસુન્દરવિગ્રહાશ્ચોત્પદ્યન્તે । ન તે રામકૃષ્ણાદીનાં વિગ્રહાસ્તદીયકર્માધીનાઃ । તૈશ્ચ રામકૃષ્ણાદિવિગ્રહૈઃ સાધૂનાં સુખં દુષ્ટાનાં દુઃખં ચોત્પદ્યતે । યચ્છરીરં યસ્ય સુખદુઃખાદેર્હેતુર્ભવતિ તચ્છરીરં તદીયપુણ્યપાપજન્યમિતિ ન્યાયઃ । અનેન ન્યાયેન રામકૃષ્ણાદીનાં શરીરં સાધૂનાં સુખહેતુત્વાત્સાધૂનાં પુણ્યપુઞ્જફલમ્, અસુરાદીનાં દુષ્ટાનાં દુઃખહેતુત્વાત્તેષાં પાપફલં ચ ભવતિ । એવમવતારપુરુષશરીરસ્યાપિ પુણ્યપાપાધીનત્વાત્તદનધીનત્વોક્તિરસઙ્ગતેતિ ચેત્ । અત્રેદં તત્ત્વં - જીવેન પૂર્વશરીરે કૃતપુણ્યપાપયોઃ ફલમુત્તરશરીરે તસ્યૈવ જીવસ્ય સુખદુઃખાદિરૂપં ભવતિ । તસ્માચ્છરીરાભિમાનવતો જીવસ્ય પૂર્વજન્મનિ સ્વેનૈવ કૃતપુણ્યપાપયોરધીનમુત્તરશરીરમિત્યુચ્યતે । રામકૃષ્ણાદ્યવતારપુરુષશરીરં તુ સાધ્વસાધુજનસુખદુઃખહેતુત્વાત્સાધ્વસાધુજનકૃતપુણ્યપાપાધીનમેવ, ન તુ રામકૃષ્ણાદિપુણ્યપાપાધીનમ્ । અત એવ ન તેન શરીરેણ રામકૃષ્ણાદીનાં સુખદુઃખભોગઃ । તસ્માદ્રામકૃષ્ણાદ્યવતારપુરુષશરીરં તદીયપુણ્યપાપાદ્યધીનં નેતિ સિદ્ધમ્ । કિઞ્ચ રામકૃષ્ણાદિશરીરં ન પઞ્ચભૂતપરિણામઃ, કિન્તુ ચૈતન્યાશ્રિતમાયાપરિણામઃ । પઞ્ચીકૃતભૂતપરિણામત્વે કૃષ્ણશરીરસ્ય રજ્જુકૃતબન્ધનાવિષયત્વં ભાગવતાદિષુ વર્ણિતમસઙ્ગતં ભવેત્ । યદ્યપિ પઞ્ચભૂતકાર્યયોગિશરીરસ્યાપિ બન્ધનાવિષયત્વં દૃશ્યતે, તથાપિ યોગિશરીરં પ્રથમં બન્ધનવિષયતામાપદ્યૈવ પશ્ચાદ્યોગમહિમ્ના બન્ધાદ્વિમુક્તં ભવતિ । કૃષ્ણાદિશરીરં તુ ન યોગિશરીરવદ્યોગમહિમ્ના બન્ધાવિષયતાં યાતિ; કિન્તુ સ્વભાવત એવ બન્ધાદ્યવશમ્ । તસ્માન્નાવતારપુરુષશરીરં પઞ્ચભૂતપરિણામઃ । ભગવત્પાદકૃતમાણ્ડૂક્યોપનિષદ્ભાષ્યસ્ય ટીકાયામાનન્દગિરિસ્વામિભિઃ રામાદિશરીરસ્ય ભૂતપરિણામત્વં યદુક્તં તદપિ સ્થૂલ- દૃષ્ટીનામિતરશરીરતુલ્યતયૈવાવતારપુરુષશરીરમપિ પ્રતીયતે ઇત્યભિપ્રાયેણેઇત મન્તવ્યમ્ । અત એવ ભગવત્પાદૈર્ગીતાભાષ્યોપક્રમે “સ ચ ભગવાન્ સ્વાં માયાં વશીકૃત્યાજોऽવ્યયોऽપિ સન્ સ્વમાયયા દેહવાનિવ જાત ઇવ ચ લોકાનુગ્રહં કુર્વન્નિવ લક્ષ્યતે” ઇતિ “જગતઃ સ્થિતિં પરિપિપાલયિષુઃ સ આદિકર્તા વિષ્ણુર્દેવક્યાં વસુદેવાદંશેન કૃષ્ણઃ કિલ સમ્બભૂવ” ઇતિ ચ કૃષ્ણશરીરં માયાકાર્યત્વેન વર્ણિતમ્ । તસ્માન્ન ભૂતેભ્યોऽવતારપુરુષશરીરમુત્પદ્યતે । કિન્તુ તદુપાદાનકારણં સાક્ષાન્માયૈવ । ઇતરેષાં જીવાનાં દેહે “અહમ્” ઇત્યાત્મભ્રાન્તિરસ્તિ । રામકૃષ્ણાદીનાં તુ ન સા ભ્રાન્તિરસ્તિ । જીવસ્યોપાધિભૂતા “અવિદ્યા” મલિનસત્ત્વયુક્તા; રામકૃષ્ણાદીનામુપાધિભૂતા “માયા” તુ શુદ્ધસત્ત્વયુતા । તસ્માજ્જીવસ્યાવિદ્યાકાર્યભૂતા ભ્રાન્તિઃ, રામકૃષ્ણાદેર્માયાકાર્યભૂતસર્વજ્ઞત્વં ચાસ્તિ । જીવસ્યાજ્ઞાનપ્રયુક્તાવરણભ્રાન્ત્યોર્નિવૃત્તયે આચાર્યમુખાન્મહાવાક્યોપદેશજન્યજ્ઞાનમપેક્ષિતમ્ । રામકૃષ્ણાદેરાવરણભ્રાન્ત્યોરભાવેનોપદેશજન્યજ્ઞાનં

નાપેક્ષિતમ્ । તથાપિ જીવસ્યાન્તઃકરણવૃત્તિરૂપજ્ઞાનમિવેશ્વરસ્ય માયાવૃત્તિરૂપાત્મજ્ઞાનમુપદેશં વિનૈવ જાયતે । કિન્તુ ન તેન જ્ઞાનેન પ્રયોજનમીશ્વરાણાં સિદ્ધ્યતિ । તથા હિ, જીવસ્ય ઘટાદિજ્ઞાનેનાવરણભઙ્ગો ઘટાદિરૂપવિષયસ્ય પ્રકાશશ્ચેતિ ફલં સિદ્ધ્યતિ । જીવસ્ય "અહં બ્રહ્મ" ઇતિ બ્રહ્માકારાત્મજ્ઞાનોદયે તુ તાદૃશજ્ઞાનવિષયીભૂતસ્યાત્મન આવરણભઙ્ગમાત્રં જ્ઞાનેન જન્યતે । આત્મરૂપો વિષયસ્તુ સ્વયમેવ પ્રકાશતે । તસ્માદાત્મજ્ઞાનેન વિષયો ન પ્રકાશતે । એવમીશ્વરસ્ય "અહં બ્રહ્માસ્મિ" ઇતિ માયાવૃત્તિરૂપજ્ઞાનસ્ય વિષયભૂતઃ ઈશ્વરસ્યાત્મા આવરણરહિતસ્વયમ્પ્રકાશસ્વરૂપોઽસ્તિ । તસ્માદાવરણભઙ્ગો વા વિષયપ્રકાશો વા નેશ્વરજ્ઞાનસ્ય પ્રોયોજનમ્ । યથા જીવન્મુક્તસ્ય વિદુષ આવરણરહિતમાત્માનં વિષયીકુર્વન્તી "અહં બ્રહ્માસ્મિ" ઇત્યન્તઃકરણવૃત્તિરાવરણભઙ્ગાદિપ્રયોજનશૂન્યા ભવતિ, તથૈવેશ્વરસ્યાપિ આવરણભઙ્ગાદિપ્રયોજનશૂન્યં માયાવૃત્તિરૂપં "અહં બ્રહ્માસ્મિ" ઇતિ જ્ઞાનં વિનૈવોપદેશાદિસાધનમુત્પદ્યતે । ઇત્થં રામકૃષ્ણાદીનાં જીવાદ્વૈશિષ્ટ્યસત્વેનેશ્વરત્વં સિદ્ધ્યતિ । તથાપિ તેષાં શરીરં માયાકાર્યમ્ । અત એવ ન તદ્બ્રહ્મરૂપમ્, કિન્તુ મિથ્યા । માયાકાર્યભૂતમવતારપુરુષાણાં શરીરં કરચરણાદ્યવયવોપેતં રૂપસહિતં ચોત્પાદિતમ્ । તસ્માત્તેષાં શરીરં નેત્રેન્દ્રિયવિષયતામાપદ્યતે । તથાપિ નેત્રેન્દ્રિયં ન બ્રહ્મ વિષયીકરોતિ ।

## (૨૨૧)

બ્રહ્મ ત્વગિન્દ્રિયસ્ય ન વિષયઃ - ત્વગિન્દ્રિયં તુ સ્પર્શં તદાશ્રયદ્રવ્યં ચ વિષયીકરોતિ । બ્રહ્મ તુ ન સ્પર્શરૂપં નાપિ સ્પર્શસ્યાશ્રયઃ । અતો ન બ્રહ્મણોસ્ત્વગિન્દ્રિયવિષયત્વમ્ ।

## (૨૨૨)

બ્રહ્મ ન રસનાઘ્રાણશ્રોત્રાણાં વિષયઃ - રસનેન્દ્રિયેણ રસજ્ઞાનમ્, ઘ્રાણેન્દ્રિયેણ ગન્ધજ્ઞાનમ્, શ્રોત્રેન્દ્રિયેણ શબ્દજ્ઞાનં ચ જાયતે । રસગન્ધશબ્દેભ્યો વિલક્ષણં બ્રહ્મ । તસ્માન્ન રસનાઘ્રાણશ્રોત્રૈર્બ્રહ્મણો જ્ઞાનં જાયતે । "અશબ્દમસ્પર્શમરૂપમવ્યયં તથારસં નિત્યમગન્ધવચ્ચ યત્" (ક. ૧.૩.૧૫) "પરાઞ્ચિ ખાનિ વ્યતૃણત્સ્વયમ્ભૂસ્તસ્માત્પરાઙ્પશ્યતિ નાન્તરાત્મન્" (ક. ૨.૧.૧) ઇત્યાદિના બ્રહ્મણ ઇન્દ્રિયાવિષયત્વં બોધ્યતે ।

## (૨૨૩)

બ્રહ્મ કર્મેન્દ્રિયાણામપ્યવિષયઃ - કર્મેન્દ્રિયં ન જ્ઞાનસાધનમ્, કિન્તુ વચનાદિક્રિયાસાધનમ્ । તસ્માત્કર્મેન્દ્રિયૈર્ન કસ્યચિદપિ જ્ઞાનં જાયતે । ઇત્થં ન કેનાપીન્દ્રિયેણ બ્રહ્મણો જ્ઞાનં જાયતે । ઇન્દ્રિયજન્યમેવ જ્ઞાનં પ્રત્યક્ષં ઇત્યુચ્યતે । તદેવાપરોક્ષં ઇતિ ચ કીર્ત્યતે । તસ્માદ્બ્રહ્મણોઽપરોક્ષજ્ઞાનં નૈવ સમ્ભવતિ । શબ્દેન તુ યદ્યપિ બ્રહ્મજ્ઞાનમુત્પદ્યતે તથાપિ શાબ્દજ્ઞાનસ્ય પરોક્ષત્વાચ્છબ્દજન્યબ્રહ્મજ્ઞાનં પરોક્ષં એવ ભવેત્ ।

# (A. 224-225) પૂર્વોક્તપ્રશ્નસ્યોત્તરમ્-

## (૨૨૪)

સુખદુઃખાદેઃ સાક્ષિભાસ્યત્વાદિન્દ્રિયસમ્બન્ધં વિના પ્રત્યક્ષજ્ઞાનં ન જાયતે ઇતિ નિયમો નાસ્તિ - ઇન્દ્રિયસમ્બન્ધં વિના પ્રત્યક્ષજ્ઞાનં નોદેતીતિ નિયમો નાસ્તિ । સુખદુઃખાદેર્જ્ઞાનં ન કેનાપીન્દ્રિયેણ જન્યતે, તથાપિ સુખદુઃખાદેર્જ્ઞાનં પ્રત્યક્ષમેવ । તસ્માદિન્દ્રિયસમ્બન્ધજન્યં જ્ઞાનમેવ પ્રત્યક્ષજ્ઞાનમિતિ ન નિયમઃ । કિન્તુ યદા વિષયેણ વૃત્તિઃ સમ્બદ્ધા વિષયાકારા ભવતિ તદા પ્રત્યક્ષજ્ઞાનં જાયત ઇત્યુચ્યતે । વિષયેણ સહ વૃત્તેઃ સમ્બન્ધઃ

૧. વિષયાવચ્છિન્નચૈતન્યસ્ય વૃત્ત્યવચ્છિન્નચૈતન્યેનાભેદ એવ પ્રત્યક્ષજ્ઞાનલક્ષણમ્ । સ ચાભેદઃ ક્વચિદિન્દ્રિયદ્વારા ભવતિ । ક્વચિચ્છબ્દેન ભવતિ । ક્વચિદિન્દ્રિયાદિરૂપબાહ્યનિમિત્તં વિનૈવ શરીરાન્તર્જાયમાનવૃત્તિદ્વારા ભવતિ । તત્રાપિ પ્રત્યક્ષજ્ઞાનમિતિ વ્યપદેશો ભવતિ । ચૈતન્યસ્ય સ્વરૂપતો ન કોઽપિ ભેદોઽસ્તિ । કિન્તુ વિષયવૃત્તિરૂપોભયોપાધિપ્રયુક્તભેદોઽસ્તિ । તયોરુપાધ્યોર્ભિન્નદેશસ્થત્વે તાદૃશોપાધિવિશિષ્ટચૈતન્યયોર્ભેદવ્યવહારો ભવતિ । વૃત્તેર્વિષયાકારતાકાલે દ્વયોરુપાધ્યોરેકદેશસ્થત્વં ભવતિ । તદૈકદેશસ્થોપાધિસહિતવિષયચૈતન્યવૃત્તિચૈતન્યયોરભેદો વ્યવહ્રિયતે । એવં વિષયચૈતન્યેન સહ વૃત્તિચૈતન્યસ્ય જાયમાનાભેદ એવ પ્રત્યક્ષજ્ઞાનં ઇતિ, અપરોક્ષજ્ઞાનં ઇતિ, સાક્ષાત્કાર ઇતિ ચોચ્યતે । તદિદં પ્રત્યક્ષજ્ઞાનલક્ષણં (૧) ઇન્દ્રિયજન્યબાહ્યઘટાદિપ્રત્યક્ષજ્ઞાને, (૨) મહાવાક્યજન્યબ્રહ્મપ્રત્યક્ષજ્ઞાને, (૩) બાહ્યનિમિત્તં વિનાન્તરેવોત્પદ્યમાનસુખદુઃખાદિપ્રત્યક્ષજ્ઞાને, (૪) માયાવૃત્તિરૂપેશ્વરજ્ઞાને, (૫) અવિદ્યાવૃત્તિરૂપરજ્જુસર્પાદિજ્ઞાને ચાનુગતમ્ । ક્વચિદિન્દ્રિયદ્વારા ભવતિ, ક્વચિચ્ચ શબ્દેન ભવતિ । "દશમસ્ત્વમસિ" ઇત્યત્ર શબ્દાજ્જાયમાનાન્તઃકરણવૃત્તિર્દશમેન સ્વાત્મના સમ્બદ્ધા દશમાકારા ભવતિ । તસ્માચ્છબ્દજન્યદશમજ્ઞાનમપિ પ્રત્યક્ષમેવ । તથૈવ પ્રમાતરિ સુખદુઃખાદ્યુત્પત્તિકાલેઽન્તઃકરણસ્ય વૃત્તિઃ સુખાકારા દુઃખાકારા ચ ભવતિ । તયા વૃત્ત્યા સહ સુખદુઃખાદેઃ સમ્બન્ધો જાયતે । તસ્માત્સુખદુઃખાદેર્જ્ઞાનં

પ્રત્યક્ષં ઇત્યુચ્યતે । પૂર્વોક્તોત્પન્નસુખદુઃખાદેર્નાશાનન્તરં યદા પુરુષસ્ય તાદૃશસુખદુઃખાદિજ્ઞાનં જાયતે તદા સુખદુઃખાદ્યાકારા અન્તઃકરણવૃત્તિરુદેતિ । કિન્તુ તસ્યા વૃત્તેર્નષ્ટસુખદુઃખાદિના સમ્બન્ધો નાસ્તિ । અતસ્તજ્જ્ઞાનં સ્મૃતિરૂપમ્, ન પ્રત્યક્ષરૂપમ્ । યદ્યપ્યન્તઃકરણધર્માઃ સુખદુઃખાદયઃ સાક્ષિભાસ્યાસ્તથાપિ સુખાકારદુઃખાકારાન્તઃકરણવૃત્તિદ્વારૈવ સાક્ષી સુખદુઃખાદીન્ પ્રકાશયતિ । સાક્ષિભાસ્યપદાર્થમપિ સાક્ષી વૃત્તિમપેક્ષ્યૈવ પ્રકાશયતિ । તથા હિ, શુક્તિરજતં સાક્ષિભાસ્યમેવ । તત્રાપિ સાક્ષી અવિદ્યાવૃત્તિં અપેક્ષ્યૈવ રજતં પ્રકાશયતિ । પરન્તુ સુખ- દુઃખાદિપ્રકાશને અન્તઃકરણવૃત્તિઃ સાક્ષિણઃ સહાયભૂતા । મિથ્યારજતાદિપ્રકાશને અવિદ્યાવૃત્તિઃ સાક્ષિણઃ સહાયભૂતા । ઇત્થં સાક્ષિભાસ્યપદાર્થજ્ઞાનેઽપિ વૃત્તિરાવશ્યિકી । સા વૃત્તિર્યત્રેન્દ્રિયાદિબાહ્યસાધનાજન્યા તત્ર તસ્યા વૃત્તેર્વિષયઃ સાક્ષિભાસ્ય ઇત્યુચ્યતે । સુખદુઃખાદિવિષયકવૃત્તૌ બાહ્યેન્દ્રિયાદિકં ન કારણમ્ । અપિ તુ સુખાદ્યુત્પત્તિસમયે સાધનાન્તરાપેક્ષાં વિનૈવ સુખાકારા દુઃખાકારા

૧. “અહં દશમઃ” ઇતિ દશમસ્ય સ્વસ્વરૂપાપરોક્ષજ્ઞાનં “દશમસ્ત્વમસિ” ઇતિ શબ્દપ્રમાણજન્યમ્ । નેન્દ્રિયૈર્મનસા વા દશમપ્રત્યક્ષજ્ઞાનં જાયતે । તથા હિ, યદિ શરીરરૂપો દશમ ઇન્દ્રિયવેદ્ય ઇત્યુચ્યતે તર્હિ નેત્રેન્દ્રિયમાત્રેણ વેદ્યેત । તથા સતિ નિમીલિતનયસ્યાપિ “દશમસ્ત્વમસિ” ઇતિ વાક્યાદ્દશમજ્ઞાનં જાયમાનમસઙ્ગતં ભવેત્ । તસ્માદ્દશમજ્ઞાનં નેત્રેણ ન જાયતે । મનસ્તુ ન સાક્ષાદ્બાહ્યાર્થગ્રહણસમર્થમ્ । આન્તરમેવ પદાર્થં મનઃ સાક્ષાત્ ગૃહ્ણીયાત્ । દેવદત્તયજ્ઞદત્તાદિસંજ્ઞા અપિ સૂક્ષ્મદેહસહિતસ્થૂલદેહે દૃશ્યન્તે । “ત્વમ્”, “અહમ્” ઇત્યાદિવ્યવહારોઽપિ સ્થૂલદેહે દૃશ્યતે । સ્થૂલદેહસ્ય જ્ઞાનં મનસા સાક્ષાન્ન સમ્ભવતિ । તસ્માદ્દશમજ્ઞાનં શબ્દપ્રમાણેનૈવ જાયતે । તત્ર નેત્રં મનશ્ચ સહાયતાં પ્રતિપદ્યેતે ।

૨. સુખદુઃખાદયો બુદ્ધેરેવ ધર્માઃ, નાત્મનઃ । અત એવ તે બુદ્ધેઃ સત્ત્વે જાગ્રત્સ્વપ્નયોરેવ પ્રતીયન્તે । સુષુપ્તે બુદ્ધેરભાવાત્સુખદુઃખાદિપ્રતીતિર્નાસ્તિ । તથા

ચોક્તમ્પ્રાગેચ્છાસુખદુઃખાદિ બુદ્ધૌ સત્યાં પ્રવર્તતે ।
સુષુપ્તૌ નાસ્તિ તન્નાશે તસ્માદ્બુદ્ધેસ્તુ નાત્મનઃ ॥ ઇતિ
ચાન્તઃકરણવૃત્તિર્જાયતે । તસ્યાં વૃત્તાવારૂઢઃ સાક્ષી સુખદુઃખાદીન્ પ્રકાશયતિ ।
અતઃ સુખદુઃખાદિકં સાક્ષિભાસ્યં ઇત્યુચ્યતે ।

## (૨૨૫)

બ્રહ્મજ્ઞાનસ્ય પ્રત્યક્ષત્વોપપત્તિઃ તત્ત્વદૃષ્ટેર્ભેદભ્રમનિવૃત્તિશ્ચ - બાહ્યઘટાદિભિઃ સહાન્તઃકરણવૃત્તેઃ સમ્બન્ધો નેત્રાદીન્દ્રિયદ્વારા જાયત ઇતિ ઘટાદયો ન સાક્ષિભાસ્યાઃ । અન્તઃકરણવૃત્તિર્યદા બ્રહ્માકારા ભવતિ તદા સા વૃત્તિર્ન બહિર્ગચ્છતિ, કિન્તુ શરીરસ્યાન્તરેવ વર્તતે । તયા વૃત્ત્યા સહ બ્રહ્મણઃ સમ્બન્ધોઽસ્તિ । તસ્માદ્બ્રહ્મજ્ઞાનમપિ સુખદુઃખાદિજ્ઞાનમિવ પ્રત્યક્ષરૂપં ભવતિ । પરન્તુ સુખાકારદુઃખાકારવૃત્તિષુ બાહ્યસાધનાપેક્ષા નાસ્તિ । તસ્માત્સુખદુઃખાદયઃ સાક્ષિભાસ્યાઃ । બ્રહ્માકારાન્તઃકરણવૃત્તૌ તુ ગુરુમુખાચ્છ્રુતવેદાન્તવાક્યસ્ય શ્રોત્રેન્દ્રિયસમ્બન્ધરૂપબાહ્યસાધનમપેક્ષ્યતે । તસ્માદ્બ્રહ્મ ન સાક્ષિભાસ્યમ્ । ઇત્થં યત્ર વિષયેણ સહ વૃત્તિઃ સમ્બદ્ધા ભવતિ તત્ર પ્રત્યક્ષજ્ઞાનં ભવતિ । "અહં બ્રહ્માસ્મિ" ઇતિ વૃત્તેઃ વિષયેણ બ્રહ્મણા સહ સમ્બદ્ધત્વાત્ બ્રહ્મજ્ઞાનં પ્રત્યક્ષં ભવિતુમર્હતિ । યત્ર ધૂમદર્શનેન વહ્નિજ્ઞાનં જાયતે તત્ર ધૂમજ્ઞાનં પ્રત્યક્ષમ્, વહ્નિજ્ઞાનં તુ ન પ્રત્યક્ષમ્ । ચક્ષુર્દ્વારા નિર્ગતાન્તઃકરણવૃત્તેર્ધૂમેન સહ સમ્બન્ધોઽસ્તિ; અતો ધૂમ૧. "ચક્ષોઃ સૂર્યોઽજાયત", "આદિત્યશ્ચક્ષુર્ભૂત્વા અક્ષિણી પ્રાવિશત્" (ઐ. ૧.૨) ઇત્યાદિપ્રમાણેન ચક્ષુષિ સૂર્યાભેદોઽસ્તિ । અઙ્ગુલ્યાદિરૂપાલ્પાવરણેન સૂર્યતિરોધાને બ્રહ્માણ્ડાન્તર્વર્તિસૂર્યસ્ય પ્રકાશો ન દૃશ્યતે । આવરણનિવૃત્તૌ તુ ચક્ષુર્ગતાન્તઃકરણવૃત્ત્યા બ્રહ્માણ્ડાન્તર્વર્તિસૂર્યસ્ય પ્રકાશો દૃશ્યતે । એવમેવ સાક્ષિરૂપે આત્મનિ બ્રહ્મણોઽભેદોઽસ્તિ । તસ્યાન્તઃકરણગતાજ્ઞાનાંશરૂપસ્વલ્પાવરણેનાચ્છાદને સર્વત્ર પરિપૂર્ણં બ્રહ્મ ન પ્રત્યક્ષતયા ભાસતે । યદા શરીરાન્તર્જાયમાનબ્રહ્માત્માભેદાકારવૃત્ત્યા પૂર્વોક્તાવરણસ્ય ભઙ્ગો જાયતે, તદા ગૃહાન્તર્ગતસ્યાકાશસ્યાસઙ્ગત્વાદિજ્ઞાનેન મહાકાશસ્યાસઙ્ગત્વાદિજ્ઞાનોદયવત્ સર્વત્ર પરિપૂર્ણબ્રહ્મણઃ સ્વપ્રકાશત્વરૂપેણ ભાનં ભવતિ ।

૨. યથા બ્રહ્મ ન સાક્ષિભાસ્યં તથા
ચિદાભાસસહિતાન્તઃકરણવૃત્તિરૂપપ્રમાતુરપ્યગોચરં ભવતિ
। દીપાન્તરાપેક્ષાં વિના કેવલનેત્રસ્ય યથા દીપો વિષયો
ભવતિ, તથા બ્રહ્મ કેવલાયાઃ "અહં બ્રહ્માસ્મિ"
ઇતિ બ્રહ્માકારાન્તઃકરણવૃત્તેર્વિષયતાં પ્રતિપદ્યતે ।
તસ્માદ્બ્રહ્મ ન પ્રમાતૃભાસ્યમપિ । કિન્તુ સ્વપ્રકાશં
પ્રત્યન્યપ્રકાશાપેક્ષારહિતસર્વાવભાસકસ્વયમ્પ્રકાશસ્વરૂપં
બ્રહ્મ । "મલેન મલં હન્યાત્" ઇતિ ન્યાયેન વૃત્તિર્બ્રહ્મણઃ
આવરણભઙ્ગં કરોતિ । સોઽયં વૃત્તિપ્રયુક્તાવરણભઙ્ગ એવ

વૃત્ત્યા બ્રહ્મણો વિષયીકરણમિત્યુચ્યતે । ન પ્રકારાન્તરેણ
વૃત્ત્યા બ્રહ્મણો વિષયીકરણં સમ્ભવતિ । સાક્ષી
બાહ્યસાધનાપેક્ષાં વિનૈવ “અહં બ્રહ્માસ્મિ” ઇતિ
વૃત્તિરૂપં તત્ત્વજ્ઞાનં પ્રકાશયતિ । અત એવ તત્ત્વજ્ઞાનં
સાક્ષિભાસ્યં ઇત્યભિધીયતે । જ્ઞાનં પ્રત્યક્ષં ઇત્યુચ્યતે ।
લિઙ્ગજ્ઞાનરૂપાનુમાનપ્રમાણજન્યાન્તઃકરણવૃત્તિઃ શરીરસ્યાન્તરેવ
વહ્ન્યાકારં ભજતે । ન હિ વૃત્તેર્વહ્નિના સહ સમ્બન્ધોઽસ્તિ;
તસ્માદ્વહ્નિજ્ઞાનં ન પ્રત્યક્ષમ્ । ઇત્થં યત્ર વૃત્ત્યા સહ
વિષયસ્ય સમ્બન્ધો ભવતિ તત્ર પ્રત્યક્ષજ્ઞાનં ભવતિ । યત્ર
વૃત્ત્યા સહ વિષયસ્ય સમ્બન્ધો ન ભવતિ તત્ર પરોક્ષજ્ઞાનં
ભવતિ । યત્ર વિષયો દેશાન્તરસ્થો નષ્ટો ભાવી વા, તત્રાનુમાનેન
શબ્દેન વા વિષયાકારા વૃત્તિઃ શરીરસ્યાન્તરેવ ભવતિ;
તદોત્પદ્યમાનં જ્ઞાનં પરોક્ષં ઇત્યુચ્યતે । ઇન્દ્રિયજન્યજ્ઞાનમેવ
પ્રત્યક્ષમિતિ ન નિયમઃ । સુખદુઃખાદિજ્ઞાનમિન્દ્રિયજન્યમપિ
પ્રત્યક્ષમેવ ભવતિ । દશમપુરુષજ્ઞાનં
શબ્દજન્યમપિ પ્રત્યક્ષમેવ ભવતિ । અનેન ન્યાયેન
શ્રીસદ્ગુરુમુખાચ્છ્રુતમહાવાક્યરૂપવેદશબ્દજન્યબ્રહ્મજ્ઞાનમપિ
પ્રત્યક્ષમેવ ભવતિ । શ્રીસદ્ગુરોરેવંવિધમુપદેશં શ્રુત્વા
બુદ્ધિમાનુત્તમાધિકારી તત્ત્વદૃષ્ટિઃ સ્વાત્માનં બ્રહ્મરૂપેણ વિદિત્વા
ભેદભ્રમં વિજહૌ । “અહં બ્રહ્માસ્મિ” ઇતિ વૃત્તૌ
નિરાવરણં બ્રહ્મ ભાતિ । તત્ત્વદૃષ્ટિરેવમુવાચ ।
નિરાવરણનિર્ભાસમહં બ્રહ્મેતિ બુદ્ધવાન્ ।
શ્રીસદ્ગુરોઃ પ્રસાદેન હ્યખણ્ડાકારવૃત્તિતઃ ॥

ઇતિ શ્રીવાસુદેવબ્રહ્મેન્દ્રસરસ્વતીવિરચિતે સંસ્કૃતવિચારસાગરે
ઉત્તમાધિકારિણ ઉપદેશનિરૂપણં નામ
॥ ચતુર્થસ્તરઙ્ગઃ ॥

૧. યસ્યાન્તઃકરણં પૂર્વપુણ્યપરિપાકવશાદત્યન્તં શુદ્ધમસ્તિ, યસ્ય ગુરૂપદિષ્ટમહાવાક્યરૂપશબ્દપ્રમાણેન સદૃઢો બોધો જાતઃ, યસ્ય ચ તાદૃશસુદૃઢબોધોદયાનન્તરં સંશયાદિનિવૃત્તયે શ્રવણાદિસાધનાન્તરં નાપેક્ષિતં સ એવોત્તમાધિકારી । યસ્ય ત્વન્તઃકરણં નાત્યન્તં શુદ્ધં કિન્ત્વીષન્મલવિક્ષેપાદિદોષયુક્તમ્, સ મધ્યમાધિકારી; અથવા કનિષ્ઠાધિકારી । મહાવાક્યરૂપશબ્દાદપરોક્ષજ્ઞાનોદયાનન્તરમપિ સંશયાદિનિવૃત્તયે તેન શ્રવણાદિકમનુષ્ઠેયમ્ ।

# વિચારસાગરઃ

## Chapter 5 સંસ્કૃતવિચારસાગરે મધ્યમાધિકારિણ ઉપદેશનિરૂપણં નામ પઞ્ચમસ્તરઙ્ગઃ ।

### (A. 226-251) ગુરુવેદપ્રભૃતીનાં વ્યાવહારિકસત્તાપ્રતિપાદનમ્-

(૨૨૬)

વેદેન ગુરુણા ચાદ્વૈતજ્ઞાનોદયાસમ્ભવ ઇત્યદૃષ્ટેઃ પ્રશ્નઃશ્રીસદ્ગુરુમુખાદુપદિષ્ટવેદાન્તવાક્યપ્રમાણાદદ્વૈતબ્રહ્માત્મસાક્ષાત્કારો જાયત ઇતિ પૂર્વતરઙ્ગે ઉક્તમ્ । તચ્છ્રુત્વા અદૃષ્ટિનામકદ્વિતીયશિષ્ય એવં શઙ્કતે - કિં ગુરુર્વેદાન્તાશ્ચ સત્યા ઉતાસત્યાઃ । આદ્યપક્ષે અદ્વૈતહાનિર્દ્વૈતસિદ્ધિશ્ચ । દ્વિતીયે મિથ્યાભૂતમરીચિકોદકેન પિપાસાનપગમવદસત્યભૂતગુરુવેદાન્તૈઃ સંસારદુઃખાનિવૃત્તિઃ પુરુષાર્થાસિદ્ધિશ્ચ । એવં પક્ષદ્વયેઽપ્યદ્વૈતજ્ઞાનોદયાસમ્ભવ એવેતિ શઙ્કરાચાર્યસ્થાપિતમદ્વૈતમતમપ્રામાણિ મમ શઙ્કાં કૃપયાપનેતુમર્હસીતિ શિષ્યઃ પૃચ્છતિ ।

### (A. 227-249) શ્રીસદ્ગુરોરુત્તરમ્

### (A. 227-229) શાઙ્કરમતસ્યાદ્વૈતસ્ય પ્રામાણિકત્વવર્ણનમ્-

(૨૨૭)

શાઙ્કરમતસ્ય પ્રામાણિકત્વે વ્યાસવચનં - શ્રીવ્યાસેન વાયવીયકૂર્માદિપુરાણેષુ શાઙ્કરમતમધિકૃત્યૈવમુચ્યતે
કલૌ યુગે તુ વેદાર્થો વર્ણ્યતે હ્યન્યથાન્યથા ।
શઙ્કરાચાર્યરૂપેણ શિવઃ સાક્ષાત્તદા કિલ ॥

અવતીર્યાન્યથાભૂતં જૈનબૌદ્ધાદિકં મતમ્ ।
નિર્મૂલયિષ્યત્યખિલં વેદવાક્યૈઃ સયુક્તિભિઃ ॥

ઉદ્ધૃત્ય મૂર્તિં (લિઙ્ગં) ગઙ્ગાયાઃ સ્થાપયિષ્યતિ વૈ પ્રભોઃ ।

સૂર્યાલોકેન જગતો હ્યન્ધકારવિનાશને ॥

યથાવસ્થિતભાનં તુ પદાર્થાનાં યથા ભવેત્ ।
નાશશ્ચ વિપરીતાખ્યભાવનાયા યથા ભવેત્ ॥

સર્વસંશયનાશશ્ચ ભગવત્પૂજ્યપાદભૃત્ ।
શઙ્કરોઽપિ તથૈવેહ લોકાનુગ્રહકાઙ્ક્ષયા ॥

વેદાર્થવિષયાજ્ઞાનં ભ્રાન્તિસંશયકારણમ્ ।
નિશ્શેષં નાશયિત્વાસૌ સાધયિત્વાદ્વયં પરમ્ ॥

અદ્વયબ્રહ્મવિદ્યાં ચ સ્થાપયેદવનીતલે ।
અન્યથા વર્ણયેદ્યસ્તુ વેદાર્થં સ તુ મૂઢધીઃ ॥ ઇતિ ।
મહેતિહાસે શિવરહસ્યે નવમાંશે ચ શાઙ્કરમતસ્યૌપનિષદત્વમુચ્યતેશિવે મદંશસમ્ભૂતઃ શઙ્કરઃ શઙ્કરોત્તમઃ ।
ચતુર્ભિઃ સહ શિષ્યૈશ્ચ કલાવવતરિષ્યતિ ॥

તસ્મૈ ચોપનિષદ્વિદ્યા મયા દત્તા મહેશ્વરિ ।
ભૂમૌ પાષણ્ડષણ્ડાનાં ખણ્ડનં સ કરિષ્યતિ ॥ ઇત્યાદિના ।
ઇતિહાસપુરાણાનાં ચ વેદાર્થોપબૃંહણ એવ ઉપયોગ ઇત્યભિયુક્તવચનમપિબિભેત્યલ્પશ્રુતાદ્વેદો મામયં પ્રતરિષ્યતિ । ઇતિહાસપુરાણાભ્યાં વેદં સમુપબૃંહયેત્ ॥ ઇતિ ।

## (૨૨૮)

અદ્વૈતમેવ પ્રમાણિકમિતિ વાલ્મીકેરપ્યભિપ્રાયઃશ્રીવાલ્મીકિરાદિકવિરાડખિલાર્થદર્શી મહર્ષિરુત્તરરામાયણે વાસિષ્ઠાખ્યગ્રન્થે સર્વોપનિષત્સૂત્રભૂતમાણ્ડૂક્યાર્થાવિષ્કરણપ્રધાને શ્રીરામવસિષ્ઠસંવાદરૂપેણાભિવ્યક્તવાર્તિકાત્મકે ઉપક્રમાદિષડ્વિધતાત્પર્યલિઙ્ગૈર્દૃષ્ટાન્તસહસ્રૈરિતિહાસશતૈશ્ચાદ્વૈતમેવ પ્રમાણમિતિ નિરૂપયતિ । તત્રાપ્યદ્વૈતમતસારભૂતદૃષ્ટિસૃષ્ટિ
૧. યત્સઙ્કોચવિકાસાભ્યાં જગત્પ્રલયસૃષ્ટયઃ ।
નિષ્ઠા વેદાન્તવાક્યાનામથ વાચામગોચરઃ ॥

પ્રાતીતિકત્વં વેદાન્તસિદ્ધાન્તે જગતઃ સ્ફુટમ્ ।
અતઃ સુપ્તૌ જગલ્લીનં પ્રબોધે જાયતે પુનઃ ॥

દૃષ્ટિસૃષ્ટિમિમાં બ્રહ્માનુભવી બહુમન્યતે ।
બદ્ધો મુક્તો મહાવિદ્વાન્ અજ્ઞ ઇત્યાદિભેદતઃ ॥

એક એવ સદા ભાતિ નાનેવ સ્વપ્નવત્સ્વયમ્ ।
અતઃ સ્વમુક્ત્યૈવાન્યેષામાભાસાનામપિ ધ્રુવમ્ ॥

મુક્તિં જાનાતિ હે દેવા આત્મના હ્યાત્મવિદ્વરઃ ।
સ્વસંસારદશાયાં તુ સ્વભ્રાન્ત્યા સર્વદેહિનામ્ ॥

આભાસાનાં ચ સંસારં વેદ મુક્તિં તથૈવ ચ ।
તુચ્છાનિર્વચનીયા ચ વાસ્તવી ચેત્યસૌ ત્રિધા ॥

જ્ઞેયા માયા ત્રિભિર્બોધૈઃ શ્રૌતયૌક્તિકલૌકિકૈઃ । ઇતિ ।
સત્તાવાદાન્ એવ પુનઃ પુનરત્યાદરેણાનેકેતિહાસૈઃ સમ્યક્ પ્રતિપાદયતિ ચ ।
ઇત્થં વ્યાસવાલ્મીક્યાદ્યભિપ્રાયેણોપનિષદ્ભગવદ્ગીતાબ્રહ્મસૂત્રાત્મકપ્રસ્થાનત્રયસ્ય શ્રીમચ્છઙ્કરભગવત્પાદપ્રણીતભાષ્યમેવ યથાર્થવ્યાખ્યાનમિતિ સિદ્ધ્યતિ । ઇત્થં સર્વજ્ઞવ્યાસવાલ્મીક્યાદિવચનવિરોધાદ્ભેદવાદોઽપ્રામાણિકઃ । ભેદવાદો યુક્તિવિરુદ્ધ ઇતિ ચ શ્રીહર્ષમિશ્રૈઃ ખણ્ડનગ્રન્થે નિરૂપિતમ્ । ભેદધિક્કારાદિગ્રન્થેષ્વપિ ભેદવાદસ્યાયુક્તત્વં પ્રદર્શિતમ્ । ઇત્થમનાદિસિદ્ધશ્રુતિતાત્પર્યવિષયીભૂતત્વાત્સ્મૃતિપુરાણેતિહાસૈરુપબૃંહિતત્વાતન્નારાયણાદિસદ્ગુરુસમ્પ્રદાયગતત શાઙ્કરમદ્વૈતમતમેવ સાધુ । સર્વૈઃ શ્રેયોઽર્થિભિરાદરણીયઞ્ચ ।

## (૨૨૯)

ભેદવાદતિરસ્કારઃ - જૈનાદિમતવદ્વેદબાહ્યતયા પ્રાચીનમહર્ષિવચનવિરોધાચ્ચ ભેદવાદો ન પ્રમાણમ્ । આસ્તિકવિષયે ભેદવાદખણ્ડનયુક્તીનાં પ્રદર્શનં નાપેક્ષિતમિતિ કૃત્વા, સ ભેદવાદઃ શ્રુતિવચનવિરુદ્ધ ઇત્યેવ પ્રદર્શ્યતે - કઠોપનિષિદિ ભેદવાસના ભયહેતુઃ, સર્વદુઃખનિદાનમ્, તતઃ સા વાસના દૂરીકર્તવ્યેતિ મૃત્યુના નચિકેતાઃ ઉપદિષ્ટઃ । તસ્માદ્ભેદવાસના સર્વાત્મના મનસો નિર્મૂલમુન્મથનીયા । સતતમદ્વૈતનિષ્ઠાભ્યસનીયા શ્રેયોઽર્થિના । તથા હિ શ્રુતયઃ - "મૃત્યોઃ સ મૃત્યુમાપ્નોતિ ય ઇહ નાનેવ પશ્યતિ" (ક. ૨.૧.૧, બૃ. ૪.૪.૧૯) "દ્વિતીયાદ્વૈ ભયં ભવતિ" (બૃ. ૧.૪.૨) "અન્યોઽસાવન્યોઽહમસ્મીતિ ન સ વેદ યથા પશુરેવં સ દેવાનામ્" (બૃ. ૧.૪.૧૦), "ઉદરમન્તરં કુરુતે અથ તસ્ય ભયં ભવતિ" (તૈ. બ્ર. ૭) ઇતિ । તાસાં ચાયમર્થઃ - ય ઇહ પરમાત્મનિ પ્રત્યગભિન્ને ત્રિવિધપરિચ્છેદત્રિવિધભેદશૂન્યે નાનેવ (ઇવશબ્દાદવિદ્યમાનમેવ ભેદમ્) પશ્યતિ સ મૃત્વા મૃત્વા પુનઃ પુનર્જાયતે । દ્વૈતાભિનિવિષ્ટસ્ય સદા ભયમેવ । ચિન્માત્રસ્વસ્વરૂપાત્પૃથક્ જ્ઞેયત્વેન ધ્યેયત્વેન વા વસ્ત્વન્તરમસ્તીતિ મન્વાનઃ પશુપ્રાયઃ । અણુમાત્રમપિ ભેદં પશ્યતો મહદ્ભયં ભવતિ । દુઃખનિદાનભૂતો ભેદવાદઃ શ્રેયોઽર્થિના સર્વથા વિસ્મર્તવ્યઃ । દ્વૈતવચનં યાવદનુસ્મર્યતે તાવદદ્વૈતસાક્ષાત્કારો નોદિયાત્ ઇત્યદૃષ્ટિનામકં શિષ્યં ગુરુરુપદિદેશ ।

# (A. 230-240) દૃષ્ટાન્તત્વેન રાજામાત્યભર્ચ્છુકથાપ્રસ્તાવઃ-

## (૨૩૦)

ભર્ચ્છોઃ સ્વાધિકારાદ્ભ્રંશઃ - હે સોમ્ય દ્વૈતવચનાનુસ્મરણં દૃઢતરપ્રાચીનાદ્વૈતાનુભવસંસ્કારજન્યામતિદૃઢામપ્યદ્વૈતસ્મૃતિં પ્રતિબધ્નાતિ, તત્ત્વસાક્ષાત્કારં દૂરીકરોતિ ચેત્યુપપાદયિતું કાઞ્ચન કથાં પ્રસ્તૌમીતિ ભર્ચ્છુકથાં ગુરુઃ શિષ્યં પ્રતિ

કથયતિઆસીત્કસ્યચિદ્રાજ્ઞો ભર્ચ્છુર્નામ પ્રધાનામાત્યઃ । સ ચ સ્વાયત્તીકૃતસકલરાજ્યકાર્યોઽભવત્ । તસ્ય પ્રભાવં દૃષ્ટ્વેતરે રાજોપજીવિનસ્તસ્મિન્નીર્ષ્યાલવઃ સઞ્જાતાઃ । તથાપિ રાજ્ઞો નિરતિશયપ્રેમાસ્પદીભૂતાય ભર્ચ્છવે નાપકર્તુમશકન્ । તદા તે સઙ્ઘીભૂય ભર્ચ્છુનિરસનોપાયમાલોચ્ય રહસિ તદ્રાષ્ટ્રસ્થાન્ દસ્યૂન્ લુણ્ઠનાય પ્રેરયામાસુઃ । દસ્યુભિર્લુણ્ઠિતે રાષ્ટ્રે રાજા રાષ્ટ્રસ્ય સહસોપનતમુપપ્લવં શ્રુત્વા સભાં સમ્મેલ્ય તત્રસ્થાન્ મુખ્યાધિકારિણો દસ્યુવિદ્રાવણાય નિયોજયામાસ । તે સર્વે સઙ્ઘીભૂય રાજાનમેવમવોચન્ - “સ્વામિન્ સદા ભર્ચ્છું ભવાન્ શ્લાઘતે, આપત્કાલે ચાસ્માન્ નિયોજયતિ । કિમિત્યસૌ ભર્ચ્છુરિદાનીં ન નિયુજ્યતે” ઇતિ । શ્રુત્વૈતદ્ભર્ચ્છુઃ સાઞ્જલી રાજાનમાહ - “સ્વામિન્ યદ્યાજ્ઞાપ્યતે તર્હ્યસ્મિન્નેવ ક્ષણે ગત્વા રિપૂન્ જિત્વાગમિષ્યામિ” ઇતિ । તર્હિ તથૈવ ક્રિયતામિતિ રાજા ભર્ચ્છુમાજ્ઞાપયાઞ્ચકાર । ભર્ચ્છુરપિ તત્ક્ષણમેવ શત્રૂન્ વિદ્રાવ્ય રાજ્યે સસ્યાદિકં સંરક્ષ્ય સર્વેષાં ક્ષેમમાતનોત્ । ભર્ચ્છોર્જયં શ્રુત્વેતરે રાજપુરુષાઃ યુદ્ધે ભર્ચ્છુર્મૃત ઇતિ રાજાનમાવેદયામાસુઃ । વિવેકવિકલો રાજા તેષાં વ્યલીકવચનં વિશ્વસ્ય ભર્ચ્છુસ્થાને તેષ્વન્યતમં નિયુજ્ય તસ્મૈ શિબિકછત્રચામરાદિબિરુદં ચ કલ્પયામાસ । નૂતનો મન્ત્રી યથા ભર્ચ્છુર્ન રાષ્ટ્રમાગચ્છેત્, યથા ચ રાજ્ઞઃ સ્વપ્નેઽપિ ભર્ચ્છુજ્ઞાનં ન સ્યાત્તથોપાયશતૈઃ સંવિધાનમકરોત્ ।

## (૨૩૧)

ભર્ચ્છોઃ સન્ન્યાસઃ - ભર્ચ્છુરખિલમિમં જ્ઞાત્વૈવમચિન્તયત્ । “નેદાનીં મમ રાજનિકટં ગન્તુમુચિતમ્ । યોઽહમરોગેણ દૃઢેણ ગાત્રેણાવિકલૈરિન્દ્રિયૈશ્ચ સમ્પન્નઃ સર્વભોગોપકરણભરિતેષુ રમ્યેષુ હર્મ્યેષુ નિવસન્ સ્વલાવણ્યાવધીરિતાપ્સરોભિઃ કામિનીભિરનવરતં રમમાણો દિવ્યાન્ ભોગાન્ ભુઞ્જાન એવ કાલમેતાવન્તમનયમ્ । તસ્ય મે મરણાન્તા વિપદિદાનીમાપતિતા । ધિઙ્માં મૂર્ખમિયન્તં કાલં ભઙ્ગુરેષુ ભોગેષુ નિમગ્નમ્ । મત્સમઃ કોઽન્યોઽસ્તિ મૂઢ ઇત્યેકાન્તે સ્થિત્વા યાભિર્મોહિત એતાવન્તં કાલં શ્રેયોમાર્ગાદ્દૂરીકૃતોઽભૂત્તાસામઙ્ગનાનાં પ્રત્યેકમઙ્ગાનામત્યન્તમશોભનતામતિજુગુપ્સાવહતામ્, દારાપત્યધનાદીનામનધિકદુઃખનિદાનતાં ચ ભૂયો ભૂયોઽનુચિન્તયન્ ભોગાદ્વિરતસ્તપસ્વી સમ્બભૂવ ।

## (A. 232-239) ભર્ચ્છોર્વૈરાગ્યવર્ણનમ્-

## (૨૩૨)

પરાધીના સેવા દુઃખહેતુઃ । એકાન્તે સુખં - નાનાવિચિત્રરસૈઃ સૂપાજ્યશાલ્યન્નશાકદધિઘૃતપાયસાપૂપાદ્યનેકપ્રકારૈરન્નપાનાદિભિરપિ તૃપ્તિમનાપન્નામિમાં જિહ્વામેતાવન્તં કાલં વૃથા પોષિતવાનસ્મિ । ઇતઃ પરં ન તથેમાં જિહ્વાં પુષ્ણીયામ્ । ક્ષુધાં શમયિતું કિં ન સન્તિ વને વિવિધાનિ કન્દમૂલશાકફલાદીનિ । પિપાસોપશમનાય કિં ન સન્તિ વિમલજલાઃ સરિતસ્તડાકાનિ ચ । નિવાસાય હર્મ્યતલાદપ્યતિશયિતા વાતાતપવર્ષાદ્યનુપદ્રુતા ગુહાઃ કિં ન સન્તિ । પ્રાદેશમાત્રોદરપૂરણાય કિમનયા શ્વવૃત્ત્યા રાજસેવયા । મમેદાનીમત્ર વને પૃથિવી શય્યા, બાહૂ ઉપબર્હૌ,

કન્દમૂલાદીન્યાહારઃ, નિર્મલોદકપાનપાત્રં ચાઞ્જલિરેવ । તથા ચોક્તં ભાગવતેસત્યાં ક્ષિતૌ કિં કશિપોઃ પ્રયાસૈ-
ર્બાહૌ સ્વસિદ્ધે હ્યુપબર્હણૈઃ કિમ્ ।
સત્યઞ્જલૌ કિં પુરુધાન્નપાત્ર્યા
દિગ્વલ્કલાદૌ સતિ કિં દુકૂલૈઃ ॥ ભા. ૨.૨.૪॥

ચીરાણિ કિં પથિ ન સન્તિ દિશન્તિ ભિક્ષાં
નૈવાઙ્ઘ્રિપાઃ પરભૃતઃ સરિતોઽપ્યશુષ્યન્ ।
રુદ્ધા ગુહાઃ કિમજિતોઽવતિ નોપસન્નાન્
કસ્માદ્ભજન્તિ કવયો ધનદુર્મદાન્ધાન્ ॥ ૫॥ ઇતિ ।
ઇત્થં ભર્ત્તૃહરિર્વિચારયન્ વિષયભોગેષુ નાનાદોષાન્ દૃષ્ટ્વા એકાન્તસ્થિતેરેવ
પરમાનન્દપ્રદીપકત્વં નિરચિનોત્ । સ્ત્રીપુત્રધનાદીનાં દુઃખનિદાનત્વમેકાન્તસ્થિતેઃ સુખહેતુત્વં ચ ભર્ત્તૃહરિર્યથા નિશ્ચિકાય તથેદાનીં વર્ણ્યતે ।

## (૨૩૩)

એકાન્તસેવિનઃ સાર્વભૌમાદિબ્રહ્મપર્યન્તાનન્દલાભઃતથા હિ, ઉદધિમેખલાયા વસુધાયા અધિપસ્યાપ્રતિહતપરાક્રમસ્ય નતાખિલસામન્તસ્ય નવયૌવનસ્ય સર્વવિદ્યાવિશારદસ્યાનુકૂલસકલપરિવારસ્ય સાર્વભૌમસ્યાનન્દો માનુષાનન્દ ઇત્યુચ્યતે । સોઽપ્યાનન્દઃ સાતિશય એવ । તતઃ શતગુણિ- તાનન્દો મનુષ્યગન્ધર્વસ્ય । તતોઽપિ શતગુણાનન્દો દેવગન્ધર્વસ્ય । તતો

૧. અસ્મિન્નેવ કલ્પે મનુષ્યો ભૂત્વા પુણ્યવિશેષાદ્ગન્ધર્વત્વં યઃ પ્રાપ્તઃ સ મનુષ્યગન્ધર્વઃ ।
૨. પૂર્વકલ્પાનુષ્ઠિતધર્માધિક્યાદસ્મિન્ કલ્પાદાવેવ ગન્ધર્વત્વં યઃ પ્રાપ્તઃ સઃ દેવગન્ધર્વઃ । ઽપિ શતગુણાનન્દઃ પિતૄણામ્ । તતઃ શતગુણાનન્દ આજાનદેવસ્ય । તતઃ શતગુણાનન્દઃ કર્મદેવસ્ય । તતઃ શતગુણાનન્દો મુખ્યદેવસ્ય । તતઃ શતગુણાનન્દ ઇન્દ્રસ્ય । તતઃ શતગુણાનન્દો બૃહસ્પતેઃ । તતઃ શતગુણાનન્દઃ પ્રજાપતેઃ । તતઃ શતગુણાનન્દો હિરણ્યગર્ભસ્ય બ્રહ્મણઃ । ત્રિવિધપરિચ્છેદરહિતસ્ય બ્રહ્મણસ્ત્વાનન્દો નિરતિશયસ્તારતમ્યરહિતઃ । ન તત્ર દુઃખલેશોઽપ્યસ્તિ । ઇત્થં પ્રાપ્તવ્યસ્યાનન્દસ્ય ક્રમસ્તૈત્તિરીયોપનિષદિ બ્રહ્મવલ્લ્યામષ્ટમાનુવાકે વર્ણિતઃ । સાર્વભૌમાદિબ્રહ્માન્તમાનન્દમેકાન્તવાસી અકામહતઃ શ્રોત્રિયોઽનવરતમુનભવતિ । અતઃ એકાન્તે સુખમસ્તિ ।
દારાપત્યધનાસઙ્ગસ્તુ સદા દુઃખપ્રદ એવેતિ ભર્ત્તૃહરિર્નિર્ધારયામાસ ।

## (A. 234-237) સ્ત્રીસઙ્ગજદુઃખવર્ણનમ્-

### (૨૩૪)

સ્ત્રીસઙ્ગો દુઃખહેતુઃ - યસ્ય પૂર્વપાપવશાત્કુરૂપિણી દુર્ભાષિણી ચ સ્ત્રી પ્રાપ્તા તસ્ય હૃદયં સદા દુઃખાક્રાન્તમેવાસ્તે । નિર્વિણ્ણહૃદયઃ સ એવં મન્યતે - સ્ત્રીરૂપમિદં પિણ્ડં મૂત્રપુરીષાદ્યનેકાશુચિપદાર્થપરિપૂર્ણં ભાણ્ડમ્ । ભગવન્, કસ્ય વા મમ પાપસ્ય શિક્ષણાયેયં ભવતા મે દત્તા । મહિષસ્ય મહિષ્યામિવ, પિશાચસ્ય પિશાચ્યામિવ, ઉષ્ટ્રસ્યોષ્ટ્ર્યામિવ, ગર્દભસ્ય ગર્દભ્યામિવ મનુષ્યસ્યાપિ તિર્યગાદેરિવ સર્વાશુચિનિધાનાયાં સ્ત્રિયાં મોહો જાયતે । વૈરાગ્યમન્તરા વ્યભિચારાદિદોષરહિતાયાઃ સ્ત્રિયાઃ પરિત્યાગે મહાન્ દોષઃ । અસ્યા મમ સ્ત્રિયાઃ કુત્સિતમિદં રૂપં દુર્ભાષણં ચ મમ પૂર્વકર્માનુસારેણ પ્રાપ્તમ્ । ઇત્યેવમહર્નિશં ક્લેશમનુભવતિ કુરૂપિણીપતિઃ । યદિ પુનર્ભાર્યા રૂપવતી મધુરભાષિણી ચ દૈવવશાદ્ભવતિ તદા સા કુરુપિણીમપેક્ષ્યાપ્યધિકદુઃખહેતુર્ભવતિ । કાઞ્ચનપ્રતિમાવત્કાન્તા ભાર્યા તુ પ્રેમ્ણા પુરુષં નિર્જિત્ય, તં કામૈકપરાયણમ્, ધર્માદ્યનુષ્ઠાનપરાઙ્મુખં ચ કૃત્વા પરમપુરુષાર્થાભાગિનમેવ વિદધાતિ ।

૧. પિતૃલોકેષુ ચિરકાલં યે વસન્તિ, અગ્નિષ્વાત્તાદયસ્તે પિતરઃ ।

૨. કલ્પારમ્ભ એવ યે દેવત્વં પ્રાપ્તાસ્તે આજાનદેવાઃ ।

૩. અસ્મિન્ કલ્પે અશ્વમેધાદિક્રત્વનુષ્ઠાનેન પ્રાપ્તાનન્તૈશ્વર્યા આજાનદેવૈરુપાસ્યમાના યે તે કર્મદેવાઃ ।

૪. યમાગ્નિવાયુસૂર્યચન્દ્રાદિપ્રધાનદેવા મુખ્યદેવાઃ । કેચિત્તુ યમાદિહિરણ્યગર્ભાન્તદેવાન્, અષ્ટૌ વસૂન્, દ્વાદશાદિત્યાન્, એકાદશ રુદ્રાનિત્યેવમેકત્રિંશદ્દેવાંશ્ચ મુખ્યદેવાન્ આહુઃ ।

### (૨૩૫)

સ્ત્રીસઙ્ગાદ્ધનનાશઃ - સ્ત્રિયાં કામપરાધીનઃ પુરુષઃ તસ્યાઃ વિષયસંસૃષ્ટમધુવદાપાતમધુરમાલાપં શ્રુત્વા વ્યામુગ્ધચિત્તઃ કામાન્ધઃ સ્વપ્નેઽપિ તામેવ સ્મરન્નિરુદ્યમો ન ધનાદ્યર્જનાય યતતે । ગૃહે વા બહિર્વા યદ્ધનાભરણવસ્ત્રાદિકં લભ્યતે તત્સર્વં સ્વેષ્ટદેવતાયૈ ભાર્યાયૈ સમર્પયતિ ભક્તિપૂર્વકમ્ । સન્માર્ગપ્રદર્શકમાતાપિતૃગુર્વાદીન્ ન મનસાપિ સ્મરતિ । સ્ત્રીરૂપઃ કર્ષકઃ પુરુષરૂપં લુલાયં મોહમય્યા નાસારજ્જ્વા સુદૃઢં બદ્ધ્વાકૃષ્યેતસ્તતશ્ચાલયતિ ।

### (૨૩૬)

સ્ત્રીસઙ્ગાદ્ધર્મનાશઃ - પઞ્જરબદ્ધઃ શુકો યથા વિના વિવેકં

શુભાશુભાનિ વચનાન્યનુવદતિ, તથૈવ કામી પુરુષો ધર્માધર્માવજાનન્ કાન્તોપદેશમનુ માતાપિત્રાદીન્ ગુરૂનધિક્ષિપતિ । યથા ચ બર્હી બર્હિણ્યાઃ પુરતો
બહુધા કેકાલાપપૂર્વકં તાણ્ડવં કુર્વંસ્તાં તોષયતિ, તથૈવ કામાતુરઃ કામિનીવચનમલઙ્ઘયન્ નાનાવેષધારણેન નટંસ્તામાહ્લાદયતિ । કામી વિવેકાદ્ધીયતે ।
ધર્માદ્ભ્રષ્ટો ભવતિ ચ । મદ્યપો યથા મદ્યદુર્ગન્ધમવિગણયન્ ભ્રાન્તો વીથ્યાં
નષ્ટસંજ્ઞો ભ્રમતિ, તથા કામાન્ધૌ સ્ત્રીપુમાંસૌ વિવસનૌ અત્યન્તામઙ્ગલમશુચિ
મલિનં ચ દેહમન્યોન્યં ગાઢમાલિઙ્ગ્ય નિર્લજ્જૌ લુઠતઃ । કામમદઃ સંસ્કૃતમતીનામપિ વિવેકિનામપિ બુદ્ધિં ક્ષણેન મલિનયતિ । અત એવાધીતશાસ્ત્રા અપિ
કામપરવશાઃ સ્ત્રીપુરુષાઃ સ્વકીયપરકીયત્વગમ્યાગમ્યત્વાદિવ્યવસ્થામન્તરા ધર્માધર્મવિવેકવિકલાઃ પરસ્પરં રમન્તે । એવં કામપરવશતા પુરુષં વા સ્ત્રિયં વા
ધર્માધર્મવિવેકાત્ પ્રચ્યાવ્યાનેકાનર્થપ્રદાન્યશુભાનિ કર્માણિ કારયતિ । એવં
સ્ત્રીવ્યક્તિઃ કામાભિવર્ધનેન પુરુષબુદ્ધિમોહનદ્વારા નાનાવિધદુષ્કૃતાચરણદ્વારા ચ
નાનાદુઃખનિદાનમિતિ વિચાર્ય વિવેકિનો મુનયઃ સ્ત્ર્યાદિવિષયેભ્યો વિરક્તા
એકાન્તે રમન્તે ।

## (૨૩૭)

સ્ત્રીસઙ્ગાદ્બિન્દુનાશઃ - પ્રાણિભિઃ પ્રતિદિનં ભુજ્યમાનાન્નપાનાદિરસપરિણામો બિન્દુઃ । સ એવ રેતઃ ઇતિ ચરમધાતુરિતિ ચોચ્યતે । સર્વપ્રાણિનાં સ એવ જીવનાધારઃ । વિવેકી પુરુષો વૃથા બિન્દુક્ષયમકુર્વન્ મહતે શ્રેયસે કલ્પતે । સમ્યક્ સંરક્ષિતો બિન્દુઃ પ્રાણિનામોજસ્તેજો વીર્યં બલં ચાધત્તે । યેન બિન્દુઃ સંરક્ષિતસ્તસ્ય દેહો રોગજરાદ્યનભિભૂતઃ પુષ્ટ્યા કાન્ત્યા ચ વિરાજતે । તસ્યેન્દ્રિયાણિ પટુતરાણિ વશીકૃતાનિ ચ ભવન્તિ । મનશ્ચ શોકમોહાદ્યનભિભૂતં સદા પ્રસન્નમેકાગ્રમન્તર્મુખં ચ ભવતિ । દીપસ્તૈલેનેવ પુરુષો બિન્દુના ઓજસ્વી તેજસ્વી બલિષ્ઠશ્ચ વિરાજતે । યો જિતેન્દ્રિયઃ સ્વપ્નેઽપ્યસ્ખલિતબિન્દુઃ સ બલારોગ્યાદિમાન્ પ્રસન્નેન્દ્રિયમનાઃ શુભકર્માણ્યાચરન્ ક્રમેણ લબ્ધાત્મતત્ત્વજ્ઞાનઃ સંસારભયાદ્વિમુચ્યતે । યોગિનઃ સિદ્ધાશ્ચ બિન્દુસંરક્ષણબલેનૈવ ખેચરીમુદ્રાભ્યાસાદિનાણિમાદિસિદ્ધિમૂર્ધ્વરેતસ્ત્વં શ્રૈષ્ઠ્યં ચાભજન્ત । બિન્દુક્ષય એવ સર્વાનર્થનિદાનમ્ । યોષિત એવ બિન્દુક્ષયકારણમ્ । યથા ગુડકાઙ્ક્ષિણો માનવા ઇક્ષુદણ્ડં નિષ્પીડ્ય તદ્રસં ગૃહીત્વા નિસ્સારમિક્ષુદણ્ડં દૂરે ક્ષિપન્તિ, તથૈવ રતિકાઙ્ક્ષિણ્યો મહિલાઃ કામાતુરં પુરુષં સ્વભુજાભ્યાં ભૃશમાપીડ્ય તદઙ્ગનિસ્સૃતં વીર્યં ગૃહીત્વા ક્ષીણવીર્યં તં દૂરતઃ પરિત્યજન્તિ । સર્વોત્તમમિમં બિન્દું કામપરવશા મૂઢાઃ ક્ષણમાત્રસુખલવલિપ્સયા મત્તાઙ્ગનાસુ વિનિયોજ્ય ક્રમેણ ક્ષીણબિન્દવઃ કતિપયૈરેવ દિવસૈર્લુપ્તદેહેન્દ્રિયમનોવીર્યા દુર્બલા નાનારોગાભિભૂતા નિસ્તેજસો ભવન્તિ । નિર્વીર્યઃ પુરુષો ભૃશં પરિભૂયતે ચ સ્ત્રીભિઃ । તથાપિ કામાન્ધોઽયં પુનરપિ રિરંસયા તામેવાનુધાવતિ । સા તુ તં તૃણાયાપિ ન મન્યતે । મદિરેક્ષણાઃ કામિન્યઃ પણ્ડિતમપિ વિવેકિનમપિ ધીરમપિ પુરુષં ક્ષણેન સ્વકટાક્ષવિશિખૈઃ સ્વવશતાં નયન્તિ । કામમોહિતઃ પુરષઃ પ્રજ્ઞયા વિહીનઃ કાર્યાકાર્યવિવેકવિકલઃ શ્રેયોમાર્ગાચ્ચ્યવતે

। સર્વથા સ્ત્રીષુ સઙ્ગો ધર્માદિસકલપુરુષાર્થનાશનિદાનમેવ । યસ્ય તુ જન્માન્તરીયસુકૃતપરિપાકવશાદ્વિવેક ઉદેતિ સ સામયક્ષણિકસુખલવકારણીભૂતસ્ત્ર્યાદિવિષયવિમુખઃ કાન્તાકટાક્ષવિશિખાનલદગ્ધમાત્માનં ગુરુકૃપાકટાક્ષામૃતરસેનાપ્યાયતિ । ગુર્વનુગ્રહબલાત્ક્રમેણોત્પન્નાત્મતત્ત્વસાક્ષાત્કારો નિત્યનિરતિશયાખણ્ડાત્માનન્દમનુભવતિ, દુરન્તાત્સંસારદુઃખાન્નિર્મુક્તશ્ચ ભવતિ ।

## (૨૩૮)

પુત્રસઙ્ગજદુઃખવર્ણનં - યથા ભાર્યા તથા પુત્રોઽપિ દુઃખહેતુઃ । અનુત્પન્નપુત્રસ્ય તદભાવપ્રયુક્તદુઃખમેકમેવ । ઉત્પન્નપુત્રસ્ય દુઃખં તુ નાનાપ્રકારમ્ । તથા હિ, સ્ત્રિયો ગર્ભધારણાભાવે દમ્પત્યોરહોરાત્રં તદેક

૧. કપાલકુહરે જિહ્વા પ્રવિષ્ટા વિપરીતગા ।
ભ્રુવોરન્તર્ગતા દૃષ્ટિર્મુદ્રા ભવતિ ખેચરી ॥

ન પીડ્યતે સ રોગેણ ન ચ લિપ્યેત કર્મણા ।
બાધ્યતે ન ચ કાલેન યો મુદ્રાં વેત્તિ ખેચરીમ્ ॥

ચિત્તં ચરતિ ખે યસ્માજ્જિહ્વા ચરતિ ખે ગતા ।
તેનૈષા ખેચરી નામ મુદ્રા સિદ્ધૈર્નિષેવિતા ॥

યાવદ્બિન્દુઃ સ્થિરો દેહે તાવન્મૃત્યુભયં કુતઃ ।
યાવદ્બદ્ધા ચ સા મુદ્રા તાવદ્બિન્દુર્ન ગચ્છતિ ॥ (કાશીખણ્ડે ૪૦ અધ્યાયે)

ચિન્તયા દુઃખમ્ । દૈવવશાદ્ગર્ભધારણે સતિ વિના દુરિતં પ્રસવવિષયિણી ચિન્તા । જાયમાનસ્યાપત્યસ્ય સ્ત્રીત્વપુત્રત્વવિષયિણી ચિન્તા । ગર્ભવિચ્છેદહેતોરાનન્ત્યાદસમ્પૂર્ણેષુ માસેષુ સ્ત્રાવાદિદોષં વિના દશમે માસિ સુખપ્રસૂતિવિષયિણી ચિન્તા । પ્રસૂતિસમયે માતુર્જીવિતવિષયિણી ચિન્તા । જાતસ્ય શિશોર્વિના બાલારિષ્ટાદિકં જીવનવિષયિણી ચિન્તા । જાતશિશોર્નવાનામપિ ગ્રહાણામાનુકૂલ્યસ્ય લોકે દુર્લભતરત્વાદ્વિત્રાણાં ગ્રહાણાં વિષમગતિં શ્રુત્વા દમ્પત્યોરહોરાત્રં ચિન્તા । જાતશ્ચ શિશુઃ સ્તન્યં ચેન્ન પિબતિ તદાશ્રુવૃષ્ટિરેવ દમ્પત્યોર્ભવતિ । ઈદૃક્ચિન્તયા સહૈવ કતિપયમાસેષુ ગતેષુ દન્તોત્પત્તિદશાયાં કેષાઞ્ચિચ્છિશૂનાં બાલારિષ્ટવશાન્મરણં શ્રુત્વા માતાપિતૃભ્યાં વ્યસનમનુભૂયતે । વ્યાધ્યાદિના કૃશીભૂતે શિશૌ ચતુષ્પથેષુ પીડાનિવૃત્ત્યર્થં બલિહરણં કુર્વન્તિ । તત્સૌખ્યાર્થં ચણ્ડાલો વા પુલ્કસો વાન્ત્યજો વા મ્લેચ્છો વા અત્યન્તાપશદો વા ભવતુ યઃ કશ્ચન માન્ત્રિકઃ, ભિષગ્વા તેન મન્ત્રયન્તિ ભિષજ્યન્તિ ચ । તદર્થમધીરા ભૂત્વા મ્લેચ્છાદ્યારાધિતદેવતા અપિ પ્રણમન્તિ । અસમ્ભાષ્યેણ સહ પુત્રવાત્સલ્યેન સ્નેહં કુર્વન્તિ । ભૈરવાદ્યનેકદેવતોદ્દેશેન સ્વપ્રાર્થનાસિદ્ધ્યર્થં શ્મશાનભૂમૌ બલિં નિક્ષિપન્તિ । સ્વસ્ય ગૃહે દેવતા અપિ દેવલકેન ઢક્કાં નાદયિત્વા સાઞ્જલિપુટં પૂજયન્તિ । ક્ષુદ્રરક્ષાબન્ધનયન્ત્રઘુટિકાદીન્ શિશોઃ કણ્ઠે ધારયન્તિ । પરમેશ્વરાત્ નારાયણાદ્વા પરં દૈવં સ્વપ્નેઽપ્યસ્મરન્તોઽપિ પુત્રાદ્યર્થં કુલટા સ્ત્રીવ તત્ર તત્ર નાનાદેવતા ભજન્તે । મસૂરિકાદિદર્શને માતાપિત્રાદયઃ સર્વે વૃથા મનઃ ક્લેશયન્તો મઙ્ગલસ્નાનાદિકં વર્જયન્તિ । મસૂરિકાશાન્ત્યર્થં તદ્દેવતાવાહનભૂતં ગર્દભમારાધયન્તિ દેવતાબુદ્ધ્યા । ઈત્થં મહતા પ્રયાસેન

શિશુસંરક્ષણં કુર્વન્તૌ માતાપિતરૌ શિશોર્યૌવનપર્યન્તં દુરન્તાં ચિન્તાં વહતઃ । શૈશવેઽત્યન્તં ક્રીડાસક્તાન્ બાલાંસ્તતઃ પ્રતિનિવર્ત્ય વિદ્યાયાં પ્રવર્તને પ્રતિદિનં મહદ્દુઃખં જાયતે પિત્રોઃ । પાઠશાલાયાં બાલાન્તરૈઃ કલહાયમાનાઃ સ્વયમન્યાંસ્તાડયન્તોઽન્યૈસ્તાડ્યમાનાશ્ચ પુત્રાઃ પિત્રોર્દુઃખહેતવો ભવન્તિ । પ્રાચીનસંસ્કારવશાદ્વિદ્યાગ્રહણાપાટવે, ગ્રહણપાટવે સત્યપિ પ્રવચનપટુતાભાવે, પ્રવચનપટુતાયામપિ પુત્રાણાં દ્યૂતાદિદુર્વ્યાપારાસક્તાવસહ્યં દુઃખં પિત્રોઃ । તતો યૌવનાતિક્રમાદર્વાગેવ પુત્રાણાં વિવાહસમ્પત્તિવિષયે ચિન્તા । કુલશીલાદિસમ્પન્નવધૂપ્રાપ્તિવિષયિણી મહતી ચિન્તા । પુત્રાદિવિવાહાર્થં ધનાદ્યર્જને મહાન્ ક્લેશઃ । ઇત્થં યૌવનાવધિ માતાપિત્રોઃ પુત્ર- વિષયિણ્યનવધિકા ચિન્તા । દૈવજ્ઞમુખાત્પુત્રસ્યાલ્પાયુષ્ટ્વં શ્રુત્વાપમૃત્યુપરિહારાયાનેકોપાયાનાચરન્તિ । ભાગ્યમાન્દ્યાદ્યદિ સુતો મ્રિયતે તદા માતાપિતરાવુરસિ શિરસિ ચ તાડયન્તૌ યાવજ્જીવં રુદિતઃ । બાલારિષ્ટાદિભ્ય ઉત્તીર્ણઃ પુત્રો યદા કૃતદારો ભવતિ તદા દુઃશિક્ષિતઃ પુત્રઃ સ્વદારાપત્યાદીનેવાત્યાદરેણ પોષયતિ, ન તુ મહતા ક્લેશેન સંરક્ષિતવન્તૌ પિતરૌ । ભાર્યાતદ્બન્ધુજનાધીનઃ પિતરાવધિક્ષિપતિ ચ મર્મભેદિભિર્નિન્દાવચનૈઃ । દુષ્કૃતફલભૂતોઽસત્પુત્રઃ પિત્રોપાર્જિતં પ્રભૂતં ધનં સર્વોપકરણાનિ ચ બલાદાદય, પિતરૌ શરીરમાત્રાવશેષિતૌ ગૃહેઽવસ્થાપ્ય સ્વદારાપત્યાદિભિઃ સહાન્યત્ર ગત્વા સુખં વસતિ । મહતા ક્લેશેન સંવર્ધિતવતોઃ પિત્રોરન્નપાનેઽપિ ન કલ્પયતિ । પ્રત્યુત પિત્રોરુપકુર્વન્તં દયાલું શપત્યપિ । ઇત્થં પાપિનં પુત્રં પ્રાપ્ય પિતરૌ દીર્ઘં નિશ્વસિતઃ । ઇત્થં પુત્રવતાનુભૂયમાનં મહદ્દુઃખં નાપુત્રસ્યાસ્તિ । એવં સર્વદુઃખનિદાનં જાયાપુત્રાદિકં જ્ઞાત્વા વિવેકિનો દારૈષણાયાઃ પુત્રૈષણાયાશ્ચ વ્યુત્તિષ્ઠન્તિ । મહતઃ સુકૃતસ્ય ફલભૂતઃ, પિતરૌ દેવતાબુદ્ધ્યા સમારાધયન્ સત્પુત્રસ્તુ દુર્લભતરઃ ।

## (૨૩૯)

ધનસઙ્ગજદુઃખં - દારાપત્યાદિકં પરિત્યજ્ય ધનમેવ કાઙ્ક્ષતો મહત્તરં દુઃખમ્ । ધનં હ્યર્જને, વ્યયે, રક્ષણે, હાનૌ ચ દુઃખમેવ

૧. અર્થસ્ય સાધને સિદ્ધે ઉત્કર્ષે રક્ષણે વ્યયે ।
નાશોપભોગ આયાસસ્ત્રાસશ્ચિન્તા ભ્રમો નૃણામ્ ॥ ભા. ૧૧.૨૩.૧૭॥

સ્તેયં હિંસાનૃતં દમ્ભઃ કામઃ ક્રોધઃ સ્મયો મદઃ ।
ભેદો વૈરમવિશ્વાસઃ સંસ્પર્ધા વ્યસનાનિ ચ ॥ ૧૮॥

એતે પઞ્ચદશાનર્થા હ્યર્થમૂલા મતા નૃણામ્ ।
તસ્માદર્થમનર્થાખ્યં શ્રેયોઽર્થી દૂરતસ્ત્યજેત્ ॥ ૧૯॥

ભિદ્યન્તે ભ્રાતરો દારાઃ પિતરઃ સુહૃદસ્તથા ।
એકાસ્નિગ્ધાઃ કાકણિના સદ્યઃ સર્વેઽરયઃ કૃતાઃ ॥ ૨૦॥

અર્થેનાલ્પીયસાપ્યેતે સંરબ્ધા દીપ્તમન્યવઃ ।
ત્યજન્ત્યસૂન્ મિથો ઘ્નન્તિ સહસોત્સૃજ્ય સૌહૃદમ્ ॥ ૨૧॥

લબ્ધ્વા જન્મામરપ્રાર્થ્યં માનુષ્યં તદ્દ્વિજાગ્ર્યતામ્ ।

તદનાદૃત્ય યે સ્વાર્થં ઘ્નન્તિ યાન્ત્યશુભાં ગતિમ્ ॥ ૨૨॥

સ્વર્ગાપવર્ગયોર્દ્વારં પ્રાપ્ય લોકમિમં પુમાન્ ।
દ્રવિણે કોઽનુષજ્જેત મર્ત્યોઽનર્થસ્ય ધામનિ ॥ ૨૩॥

કસ્માત્ સંક્લિષ્યતે વિદ્વાન્ વ્યર્થયાર્થેહયાસકૃત્ ।
કસ્યચિન્માયયા નૂનં લોકોઽયં સુવિમોહિતઃ ॥ ૨૬॥

ઇતિ શ્રિમદ્ભાગવતે એકાદશસ્કન્ધે ત્રયોવિંશાધ્યાયે ભિક્ષુગીતાયામુક્તમ્ ॥

વિધત્તે । અનવધિકધનાર્જનાસક્તઃ પુરુષો નિરવધિકાન્ પાપાનાચરતિ । નાનાનર્થભાજનં ચ ભવતિ । ધનસમ્પાદનપ્રવૃત્તો જાતિકુલધર્માંસ્ત્યજતિ । નાનાઘોરકર્મણા ધનાર્જને પ્રવૃત્તોઽપિ સ્વપૂર્વાદૃષ્ટાયત્તમેવ ધનં લભતે, નાધિકમ્ । વ્યયે સતિ ધનં ક્ષીયેતેતિ ભીત્યા ન સ્વભોગાયાપીષદપિ ધનવ્યયં કરોતિ । કિન્તુ મહાન્તં ક્લેશમનુભવન્નાનાકુમાર્ગૈસ્તદ્ધનં વર્ધયન્નેવ મ્રિયતે । સ્વભોગાય વા પરોપકારાય વા વિનિયોગેઽસતિ યદિ દૈવવશાદ્ધનં નશ્યતિ તદાપારે શોકસાગરે નિમજ્જતિ । ઇત્થં ધનમનન્તદુઃખકારણં ભવતિ । ઇત્થં સુનિપુણં વિચાર્ય ભર્ચ્છુર્દારાપત્યધનાદ્યભિમાનં દૂરીકૃત્ય વને એકાકી સન્ શમદમાદિસાધનાભ્યાસનિરતો બભૂવ ।

## (૨૪૦)

મૃગયાર્થં વનં ગતો રાજા ભર્ચ્છું દૃષ્ટ્વા ભીતઃ પલાયતેભર્ચ્છુસ્થાનાપન્નો મન્ત્રી ભર્ચ્છુવૃત્તાન્તં સર્વં શ્રુત્વા સ્વાનુયાયિભિઃ સહૈવં સમાલોચયત્ - યદિ રાજા "ભર્ચ્છુર્જીવતિ" ઇતિ લોકવાર્તાં શૃણોતિ, અથવા મૃગયાર્થં વનં ગત્વા સ્વયમેવ ભર્ચ્છું પશ્યતિ તદા મિથ્યાવાદિનોઽસ્માન્ સ રાજા સુતીક્ષ્ણં દણ્ડયેત્ ઇતિ । એવમાલોચ્ય સપરિવારો રાજાનમાસાદ્ય "દસ્યુભિર્યુદ્ધે મૃતો ભર્ચ્છુઃ પિશાચો ભૂત્વા ભસ્મોદ્ધૂલિતસર્વાઙ્ગો વને સઞ્ચરતિ । સ્વદૃષ્ટિગોચરાપન્નં સર્વં જનં મારયતિ । યસ્તં દૃષ્ટ્વા સુદૂરં પલાયતે સ જીવેત્" ઇતિ વિજ્ઞાપયામાસ । મન્ત્રિવાક્યશ્રવણમાત્રેણ રાજા તત્ત્વમવિચારયન્, "મૃતો ભર્ચ્છુઃ પિશાચઃ સમભવત્" ઇતિ નિશ્ચિકાય । તતઃ કદાચિદાખેટાર્થં ગતો ભર્ચ્છુવનં પ્રવિવેશ । તત્ર તરુમૂલે તપશ્ચરન્તં ભર્ચ્છું દૃષ્ટ્વા પ્રતારકમન્ત્રિવાક્યં સ્મરન્ "નૂનમયં ભર્ચ્છુઃ પિશાચઃ" ઇતિ ભયેન પલાયિતઃ । ॥અયમર્થઃ - અર્થસ્ય સમ્પાદને વર્ધને ચાતિદુઃખમ્ । રક્ષણે મહદ્દુઃખમ્ । વ્યયે ભોગે ચ મહતી ચિન્તા । નાશે ચિત્તભ્રાન્તિઃ । અર્થપ્રાપ્તયે સ્તેયાદયઃ ષડનર્થાઃ । પ્રાપ્તેઽર્થે સ્મયાદયઃ ષડનર્થાસ્ત્રિવિધવ્યસનૈઃ સહ નવાનર્થાઃ । તસ્માદેકોઽપ્યર્થઃ પઞ્ચદશાનર્થાનાં નિદાનં ભવતિ । વ્યસનાનિ = સ્ત્રીદ્યૂતમદ્યવિષયાણિ ત્રીણિ । એકાસ્નિગ્ધાઃ = એકે = એકપ્રાણાઃ, તે ચ તે આસ્નિગ્ધાશ્ચાતિપ્રિયા ઇત્યર્થઃ । કાકણિરિત્યાર્ષં પુંસ્ત્વમ્ । (કાકિણી) કાકણિઃ = વિંશતિવરાટિકાઃ । "વરાટકાનાં દશકદ્વયં યત્ સા કાકિણી" ઇતિ લીલાવત્યામ્ । સંરબ્ધાઃ = ક્ષુભિતાઃ । મિથઃ = પરસ્પરમ્ । સ્પૃધ ઇતિ પાઠે સ્પર્ધમાના ઇત્યર્થઃ । ન કેવલમિહૈવાનર્થહેતુરર્થઃ પરલોકેઽપીત્યાહ = લબ્ધ્વેત્યાદિના । તત્ માનુષ્યં જન્મેતિ સમ્બન્ધઃ । દ્વિજાગ્ર્યતાં = બ્રાહ્મણ્યમ્ । સ્વાર્થં ઘ્નન્તિ = સ્વહિતં નાચરન્તિ । લોકં = દેહમ્ ।

## (૨૪૧)

ભર્ચ્છુદૃષ્ટાન્તસ્ય પ્રકૃતેન યોજનં - પ્રતારકમન્ત્રિવાક્યં
સત્યત્વેન ગૃહ્ણન્ રાજા વને જીવન્તં ભર્ચ્છું સ્વચક્ષુષા પશ્યન્નપિ પ્રતારકસ્ય
મિથ્યાવાક્યે વિશ્વાસેન ભર્ચ્છું પિશાચમેવ મન્યમાનો યથા સુદૂરં પ્રાદ્રવત્,
તથા દ્વૈતિનાં ભેદવાદે વિશ્વસન્નપરિપક્વમતિરજ્ઞાની “તત્ત્વમસિ” ઇતિ ગુરૂપદિષ્ટમહાવાક્યજન્યસાક્ષાત્કારરૂપબ્રહ્માત્મૈક્યાકારા
ભેદવાદિનો મિથ્યાવાક્યવિશ્વાસેન મહત્તરં દુઃખમેવાનુભવેત્ । ન તસ્ય કદાપિ
બ્રહ્માત્મૈક્યસાક્ષાત્કારો ભવેત્ । ભેદવાદમસત્યતયા ગૃહ્ણતો જિજ્ઞાસોરેવ મહાવાક્યાદ્બ્રહ્માત્મૈકત્વસાક્ષાત્કારો
ભવેત્ । તસ્માદવૈદિકત્વાદ્ભેદવાદો મિથ્યા, ન
પરમપુરુષાર્થસાધક ઇતિ નિશ્ચિત્ય તત્ર વિશ્વાસો દૂરીકર્તવ્યઃ ।

## (૨૪૨)

મિથ્યાસંસારદુઃખં મિથ્યોપાયેન નિવર્તેતેત્યેતદુપપાદનાય કાચન કથા - યદુક્તં ગુરુવેદાન્તાદયો મિથ્યા । કથં તે સંસારદુઃખનિવર્તનક્ષમા ઇતિ, તત્રોચ્યતે - સંસારદુઃખં મિથ્યા । તસ્માન્મિથ્યોપાયેન તન્નિવર્તેત; સમસત્તાકયોર્નિવર્ત્યનિવર્તકભાવદર્શનાત્ । ગુરુવેદાન્તાદયો યદિ સત્યા- સ્તર્હિ તૈર્મિથ્યાસંસારદુઃખં ન નિવર્તેત । અત્ર કશ્ચન દૃષ્ટાન્તો વર્ણ્યતે - દેવેન્દ્રવત્પરાક્રમશાલી સાર્વભૌમઃ કશ્ચનાસીત્ । સ કદાચિત્ નિશિતકૃપાણપાણિભિરહર્નિશમનિદ્રૈર્જાગરૂકૈઃ રક્ષિભિર્ગુપ્તે હર્મ્યતલે પુષ્પાસ્તીર્ણે મઞ્ચે રાત્રૌ શયાનઃ સ્વપ્નમેવમપશ્યત્ - જમ્બુકઃ કશ્ચન તસ્ય પાદમેકં મુખેનાગ્રહીત્ । પાદવિધૂનનેન જમ્બુકમપસારયિતું ન રાજા શશાક । ક્રોશમાનસ્યાપિ રાજ્ઞઃ સાહાય્યાર્થં ન કશ્ચિદપિ સૌવિદલ્લ આજગામ । તતઃ સ સ્વયમેવોત્થાય લગુડેન જમ્બુકં મસ્તકેઽતાડયત્ । સ સૃગાલઃ પલાયિતઃ । પરન્તુ સ્વપ્ને જમ્બુકદષ્ટે પાદે મહતી વ્યથાભવત્ । વ્યથામસહમાનો રાજા દણ્ડાવલમ્બનો મન્દં મન્દં ભિષજઃ કસ્યચિદ્ગૃહં ગત્વા તં ક્ષતવિરોપણક્ષમમૌષધમયાચત । સ ચ ભિષક્ હસ્તગતમૌષધમિદાનીં નાસ્તિ । યદિ દીયતે ધનં તર્હ્યૌષધં સમ્પાદ્ય દદ્યામિત્યવોચત્ । વૈદ્યસ્ય વચનં શ્રુત્વા રાજા સ્વહસ્તે તદાનીં વરાટિકાયા અપ્યભાવાદ્દીનદીનઃ પ્રતિનિવર્તમાનો મનસ્યેવમચિન્તયત્ - “યદ્યહં ધની સ્યાં તદાયં ભિષક્ મમ ગૃહં પુનઃ પુનરાગચ્છેત્ । દરિદ્રોઽયમ્, ન મેઽસ્ત્યનેન પ્રયોજનમિતિ મત્વા હિ નાયં મે ઔષધમદાત્ । નાસ્ત્યપરાધોઽસ્મિન્, પ્રતિ પ્રયોજનમન્તરા ન કોઽપિ કસ્મૈચિદપ્યુપકરોતિ । માતાપિતૃદારાપત્યાદયઃ સર્વેઽપિ સ્વાત્મનઃ કામાયૈવાન્યત્ર પ્રીતિમાવહન્તિ । પ્રયોજનાભાવે ન તે ચક્ષુષાપિ વીક્ષેરન્ । યસ્ય વિયોગં ક્ષણાર્ધમપિ સોઢું યે ન શેકુઃ, યસ્ય ક્ષણમાત્રવિયોગેનાપ્યતિદુઃખમન્વભન્, વિપ્રોષ્યાગતં યં દર્શનમાત્રેણ સમાલિલિઙ્ગુઃ, સ એવ યદિ દુર્દૈવવશાત્ કુષ્ઠી ભવતિ, તદા તં ત એવ ભાર્યાપુત્રાદયઃ નાનેનેતઃ પરં પ્રયોજનમિતિ નિશ્ચિન્વન્તઃ રૂક્ષવચનૈર્વિનિન્દન્તિ । “અરે પાપ કિમદ્યાપિ જીવસિ, ન મ્રિયસે, પરિત્યજ પ્રાણાન્” ઇતિ કટુ ભાષન્તે । ચક્ષુષાપિ તં દ્રષ્ટું નેચ્છન્તિ, દૃષ્ટ્વા જુગુપ્સન્તે ચ । પતિવ્રતાપિ ભાર્યા દૂરતઃ સ્થિત્વા તદઙ્ગગતમક્ષિકાદીન્ નિસ્સારયતિ । યમુત્સઙ્ગે નિવેશ્ય લાલનપૂર્વકં પુપુષતુર્માતાપિતરૌ તાવપિ તદપેક્ષિતં દત્વા દૂરં નિસ્સરતઃ । અન્યે બાન્ધવાઃ પરાઙ્મુખા ભવન્તિ । એવં સર્વો લોકઃ સ્વાત્મપ્રયોજનાયૈવાન્યમાશ્રયન્તિ । અયમપિ ભિષક્ નિર્ધનોઽહમિતિ નિશ્ચિત્ય ન મે

ઔષધમદાત્" ઇતિ ચિન્તયન્નેવ રાજા વૈદ્યગૃહાત્પ્રતિનિવૃત્તઃ । તત્ર મધ્યે માર્ગે કઞ્ચન પરિવ્રાજકમપશ્યત્ । સ ચ રાજ્ઞે કિમપ્યૌષધમદાત્ । તદુપયોગેન રાજ્ઞો નિશ્શેષતયા વ્રણવિરોપણમભવત્ । એવં સ્વપ્નં પશ્યત એવ રાજ્ઞો નિદ્રાક્ષયોઽભૂત્ । રાજા પ્રબોધમવાપ । જાગ્રતા તેન ન સૃગાલઃ, ન તેન કૃતં પાદક્ષતમ્, ન દુઃખમ્, ન પરિવ્રાજકઃ, નૌષધં વા કિઞ્ચિદપિ દૃષ્ટમ્ । એવં દૃષ્ટાન્તભૂતાં કથામુક્ત્વા ગુરુરાહ - "હે શિષ્ય, અનેન દૃષ્ટાન્તેનૈવં વિજાનીહિ - અનૃતેનૈવાનૃતં નિવર્તેત । રાજ્ઞો મિથ્યાદુઃખે સઞ્જાતે ન સત્યં (વ્યાવહારિકમ્) કિઞ્ચિદપિ વસ્તુ તદ્દુઃખનિવૃત્તયે પ્રબભૂવ । એવમનૃતેનૈવ ગુરુવેદાન્તાદિરૂપસાધનેનાનૃતં સંસારદુઃખં નિશ્શેષં નિવર્તેત" ।

## (૨૪૩)

દૃષ્ટાન્તસમન્વયપૂર્વકં મિથ્યાસંસારદુઃખસ્ય મિથ્યાગુરુવેદાન્તાદિસાધનેન નિવૃત્ત્યુપપાદનમ્પૂર્વોક્તદૃષ્ટાન્તસ્યાયમભિપ્રાયઃ - સંસારદુઃખં મિથ્યા । તસ્માત્તન્નિવર્તકગુરુવેદાન્તાદિસાધનેનાપિ મિથ્યાભૂતેન ભાવ્યમ્ । મિથ્યાવસ્તુનિરસને સત્ય- સાધનાપેક્ષા નાસ્તિ । સત્યસાધનેન ન મિથ્યાવસ્તુ નશ્યતિ । પૂર્વોક્તદૃષ્ટાન્તે રાજ્ઞઃ શયનગૃહં પ્રવિષ્ટો મિથ્યાસૃગાલો ન સત્યદૌવારિકેન નિવારિતઃ । રાજસકાશે સત્સ્વપ્યનેકેષુ સત્યાયુધેષુ તૈરનિવારિતઃ મિથ્યાસૃગાલો મિથ્યાલગુડેનૈવ તાડિતઃ પલાયિતઃ । રાજ્ઞો મિથ્યાવ્રણમભૂત્ । તદ્વ્રણં ન સત્યવૈદ્યેન ચિકિત્સિતમ્, કિન્તુ મિથ્યાપરિવ્રાજકેન । રાજ્ઞો મિથ્યાદુઃખમ્, તત્કારણં મિથ્યાસૃગાલં ચ દૂરીકર્તું ન કિઞ્ચિદપિ સત્યસાધનમુપયુક્તમભવત્ । ઈદૃશઃ સ્વપ્નઃ સર્વસાધારણ એવ । જાગ્રત્કાલીનોપકરણાનિ કદાચિદપિ કસ્યચિદપિ ન સ્વપ્ને ઉપયુજ્યન્તે । એવં મિથ્યાભૂતં સંસારદુઃખં મિથ્યાગુરુવેદાન્તાદિસાધનેન નશ્યેત્ । ન મિથ્યાસંસારઃ સ્વનિવર્તનાય સત્યગુરુવેદાન્તાદિ સાધનમપેક્ષતે ।

## (૨૪૪)

મરીચિકોદકેન પિપાસાનિવૃત્તિર્ભવત્વિતિ શઙ્કા । સત્તાવૈષમ્યાત્તત્પરિહારશ્ચનનુ મિથ્યામરીચ્યુદકેન ન પિપાસોપશમો ભવતિ । તથા મિથ્યાગુરુવેદાન્તાદિનાપિ ન સંસારદુઃખનાશોઽપિ સ્યાત્ । યદિ સ્યાત્તર્હિ મરીચિકોદકેનાપિ પિપાસોપશમોઽપિ ભવેત્ । ન તુ તથાનુભૂયતે ઇતિ ચેન્ન । દૃષ્ટાન્તસ્ય વૈષમ્યાત્ । પ્રાતિભાસિકમરીચ્યુદકેન વ્યાવહારિકપિપાસોપશમાભાવેઽપિ વ્યાવહારિકગુરુવેદાન્તાદિસાધનેન વ્યાવહારિકસંસારદુઃખનિવૃત્તિઃ સમ્ભવેદેવ । મરીચિકોદકપિપાસયોઃ સત્તાવૈષમ્યાત્, ગુરુવેદાન્તાદિસાધનસ્ય સંસારદુઃખસ્ય ચ સમાનસત્તાકત્વાચ્ચ દૃષ્ટાન્તવૈષમ્યં બોધ્યમ્ ।

## (૨૪૫)

સમસત્તાકયોઃ પરસ્પરં સાધકતા બાધકતા ચસંસારદુઃખસ્ય ગુરુવેદાન્તાદીનાં ચ સમાના સત્તાસ્તિ । તસ્માદ્ગુરૂપદેશેન વેદાન્તવાક્યૈશ્ચ સંસારદુઃખક્ષયો યુજ્યતે । યયોઃ પરસ્પરં સત્તા સમાના તયોરેવ પરસ્પરં સાધકતા વા બાધકતા વા ભવતિ । તદ્યથા મૃદો ઘટસ્ય ચ સત્તા સમાના । તસ્માન્મૃદ્ઘટસ્ય સાધિકા । વહ્નેઃ

કાષ્ઠસ્ય ચ સત્તા સમાના । અતો વહ્નિઃ કાષ્ઠસ્ય બાધકો ભવતિ । સાધકં = કારણમ્ । બાધકં = નાશકમ્ । મરીચિકોદકસ્ય પિપાસાયાશ્ચ સત્તા ન સમાના । અતો મરીચિકોદકં ન પિપાસાયા બાધકમ્ । મરીચિકોદકં પિપાસાં ન નિવર્તયતીતિ યાવત્ । અત્રેદમાકૂતં - ચૈતન્યે પારમાર્થિકી સત્તાસ્તિ । ચૈતન્યભિન્નેષુ મિથ્યાપદાર્થેષુ વ્યાવહારિકી વા પ્રાતિભાસિકી વા સત્તાસ્તિ ।

૧. અત્રૈવં શઙ્કા ભવેત્ - સમસત્તાકયોરેવ પરસ્પરં સાધકબાધકભાવ ઇતિ નિયમો નાસ્તિ; યતો વિષમસત્તાકયોરપિ ક્વચિત્સાધકબાધકભાવો દૃશ્યતે । તથા હિ, સર્વત્રાધિષ્ઠાનસ્ય સત્તાપેક્ષયા આરોપ્યસ્ય સત્તા વિષમૈવ । અથાપ્યારોપ્યસ્યાધિષ્ઠાનં સાધકં ભવતિ । કલ્પિતરજતસ્યાધિષ્ઠાનં શુક્તિઃ । શુક્તેઃ સત્તા વ્યાવહારિકી । કલ્પિતરજતસ્ય સત્તા પ્રાતિભાસિકી । તાદૃશરજતસ્ય સાધકત્વં (કારણત્વમ્) શુક્તાવસ્તિ । કિઞ્ચ જગતોऽધિષ્ઠાનં બ્રહ્મ । બ્રહ્મણિ પારમાર્થિકી સત્તાસ્તિ । જગતિ તુ વ્યાવહારિકી સત્તા । વ્યાવહારિકસત્તાકજગતઃ સાધકત્વં બ્રહ્મણ્યસ્તિ । તસ્માદ્વિષમસત્તાકમપિ સાધકં ભવતિ । અપિ ચાન્તઃકરણવૃત્તિરૂપશુક્તિયાથાર્થ્યજ્ઞાનેન રજતતજ્જ્ઞાનયોર્બાધો ભવતિ । તત્ર રજતતજ્જ્ઞાનયોઃ સત્તા પ્રાતિભાસિકી । શુક્તિયાથાર્થ્યજ્ઞાનસ્ય તુ સત્તા વ્યાવહારિકી । અતશ્ચ ॥

## (A. 246-248) વ્યાવહારિકપ્રાતિભાસિકપારમાર્થિકસત્તાનાં

વર્ણનમ્-

### (૨૪૬)

વ્યાવહારિકસત્તાયસ્ય પદાર્થસ્ય બ્રહ્મજ્ઞાનમન્તરા ન બાધઃ, કિન્તુ બ્રહ્મજ્ઞાનેનૈવ બાધો ભવતિ તસ્ય વ્યાવહારિકસત્તાત્વેન વ્યપદેશઃ । બ્રહ્મજ્ઞાનેતરાબાધ્યત્વે સતિ બ્રહ્મજ્ઞાનમાત્રબાધ્યત્વં વ્યાવહારિકસત્ત્વમિતિ યાવત્ । સા ચ સત્તેશ્વરસૃષ્ટપદાર્થેષ્વસ્તિ । યતો દેહેન્દ્રિયાદિપ્રપઞ્ચરૂપેશ્વરસૃષ્ટેર્બ્રહ્મજ્ઞાનમન્તરા ન બાધો ભવતિ, કિન્તુ બ્રહ્મજ્ઞાનેનૈવ ભવતિ । તસ્માદીશ્વસૃષ્ટપદાર્થા વ્યાવહારિકસત્તાકા ઇતિ જ્ઞેયમ્ । બાધો નામાપરોક્ષમિથ્યાત્વનિશ્ચયઃ । તથા ચોક્તં પઞ્ચદશ્યામ્-

નાપ્રતીતિસ્તયોર્બાધઃ કિન્તુ મિથ્યાત્વનિશ્ચયઃ ।
નો ચેત્સુષુપ્તિમૂર્ચ્છાદૌ મુચ્યેતાયત્નતો જનઃ ॥ ચિ. ૧૩॥

પરમાત્માવશેષો હિ તત્સત્યત્વવિનિશ્ચયઃ ।
ન જગદ્વિસ્મૃતિર્નો ચેજ્જીવન્મુક્તિર્ન સમ્ભવેત્ ॥ ૧૪॥

અયં ચાપરોક્ષમિથ્યાત્વનિશ્ચય ઈશ્વરસૃષ્ટપદાર્થેષુ બ્રહ્મજ્ઞાનાત્પ્રાઙ્ન કસ્યચિદપિ ભવતિ । કિન્તુ બ્રહ્મજ્ઞાનાદનન્તરમેવ તાદૃશનિશ્ચયો ભવતિ । અતો મૂલા॥ વિષમસત્તાકમપિ બાધકં ભવતિ । તથા ચ વિષમસત્તાકયોઃ પરસ્પરં સાધકબાધકભાવો નાસ્તીતિ નિયમોઽસઙ્ગત એવ । ઇતિ ।
અત્રૈવં સમાધાનં ભવતિ - કેવલા શુક્તિર્ન રજતસ્યાધિષ્ઠાનમ્, ન વા કેવલં બ્રહ્મ જગતોઽધિષ્ઠાનં (વિવર્તોપાદાનકારણમ્) । કિન્તુ તૂલાવિદ્યાસહિતા શુક્તિઃ રજતકલ્પનાધિષ્ઠાનમ્, મૂલાવિદ્યાસહિતં બ્રહ્મ જગત્કલ્પનાધિષ્ઠાનમ્ । ક્વચિદ્વિશેષણગતધર્મા વિશિષ્ટેઽપિ વ્યવહ્રિયન્તે । અનેન નિયમેન પ્રાતિભાસિકતૂલાવિદ્યાસહિતા શુક્તિઃ, અથવા શુક્ત્યવચ્છિન્નચૈતન્યં પ્રાતિભાસિકમિતિ વર્ણ્યતે । વ્યાવહારિકમૂલાવિદ્યાવચ્છિન્નં બ્રહ્મચૈતન્યં વ્યાવહારિકમિત્યપ્યભિધીયતે । યદ્યપ્યવિદ્યા ઉપાધિરેવ ન વિશેષણમ્, અથાપિ અવિવેકિદૃષ્ટૌ વિશેષણવદુપલભ્યમાનત્વાદ્વિશેષણમિતિ વ્યવહ્રિયતે । અત એવાવિદ્યાધર્મભૂતપ્રાતિભાસિકસત્તા વ્યાવહારિકસત્તા વા તદ્વિશેષ્ય (આશ્રય) ભૂતશુક્તૌ બ્રહ્મણિ વા વ્યવહ્રિયતે । તસ્માન્નેહ વિષમસત્તાકં સાધકમ્, કિન્તુ સમસત્તાકમેવ સાધકમ્ । કિઞ્ચ પઞ્ચપાદિકાકારરીત્યા મૂલાવિદ્યાતોઽન્યા તૂલાવિદ્યા નાસ્તિ । તસ્માત્તન્નિવૃત્તિઃ શુક્તિજ્ઞાનાન્ન ભવતિ । કિન્તુ બ્રહ્મજ્ઞાનેનૈવ । પરન્તુ વ્યાવહારિકાન્તઃકરણવૃત્તિરૂપશુક્તિગોચરયથાર્થજ્ઞાનેન શુક્તિનિષ્ઠાવિદ્યાયાસ્તિરસ્કારો ભવતિ । તતસ્તત્કાર્યરજતતજ્જ્ઞાનયોરપિ તિરસ્કારો ભવતિ । અતો નાત્ર વિષમસત્તાકં બાધકમ્ । એતચ્ચ પ્રાસઙ્ગાનુસારિ સમાધાનમ્ ॥ વિદ્યાકાર્યજાગ્રત્પદાર્થાત્મકેશ્વરસૃષ્ટૌ વ્યાવહારિકસત્તા વિદ્યતે । જન્મમરણબન્ધમોક્ષાદ્યખિલવ્યવહારસિદ્ધિપ્રયોજિકા સત્તા વ્યાવહારિકસત્તેતિ વર્ણ્યતે ।

## (૨૪૭)

પ્રાતિભાસિકસત્તાબ્રહ્મજ્ઞાનેતરબાધ્યત્વં પ્રાતિભાસિકત્વમ્ । તાદૃશં સત્ત્વં યત્રાસ્તે સ પ્રાતિભાસિકપદાર્થ ઇત્યુચ્યતે । બ્રહ્મજ્ઞાનં વિનૈવ રજ્જુશુક્તિકોષરાદિજ્ઞાનેન યથાક્રમં સર્પરજતોદકાનાં બાધદર્શનાત્તેષાં પ્રાતિભાસિકં સત્ત્વં અસ્તિ । પ્રાતિભાસિકઃ = પ્રતીતિકાલમાત્રસત્તાકઃ । સત્તા = સ્વરૂપં = સ્થિતિઃ । પ્રતીતિકાલમાત્રભાવિનઃ પદાર્થસ્ય પ્રાતિભાસિકસત્તોચ્યતે । તૂલાવિદ્યાકાર્યશુક્તિરજતાદેઃ પ્રતીતિકાલમાત્રભાઇવત્વાત્ તેષાં પ્રાતિભાસિકસત્તા યુજ્યતે ।

## (૨૪૮)

પારમાર્થિકસત્તાકાલત્રયાબાધ્યત્વં = પારમાર્થિકત્વમ્ । ચૈતન્યમેકમેવ ન કદાપિ બાધ્યત ઇતિ પારમાર્થિકસત્તા ચૈતન્યસ્યૈવ ।

## (૨૪૯)

ગુરુવેદાન્તાદેઃ સંસારદુઃખસ્ય ચોભયોરપિ વ્યાવહારિકસત્તાકત્વાદ્ગુરુવેદાન્તાદિના સંસારદુઃખનિવૃત્તિર્યુક્તા - ઇત્થં ગુરુવેદાન્તાદેઃ સંસારદુઃખસ્ય ચૈકૈવ વ્યાવહારિકી સત્તા । તતઃ સમસત્તાકત્વાત્તયોઃ મિથ્યાગુરુવેદાન્તાદિના મિથ્યાસંસારદુઃખં નિવર્ત્યેતૈવ । ક્ષુત્પિપાસાદિકં તુ પ્રાણધર્મઃ । પ્રાણાઃ તદ્ધર્માશ્ચ બ્રહ્મજ્ઞાનમન્તરા ન નિવર્તન્તે । અતઃ પિપાસા વ્યાવહારિકસત્તાકા । મરીચિકોદકં તુ બ્રહ્મજ્ઞાનં વિનૈવ મરુભુમિજ્ઞાનેન બાધ્યતે । અતો મરીચિકોદકં પ્રાતિભાસિકસત્તાકમ્ । મરીચિકોદકપિપાસયોઃ સમસત્તાકત્વાભાવાન્ન મરીચિકોદકેન પિપાસોપશમો ભવતિ । દાર્ષ્ટાન્તિકે તુ બાધકગુરુવેદાન્તાદેર્બાધ્યસંસારદુઃખસ્ય ચ સમાના સત્તા । દૃષ્ટાન્તે તુ ॥તત્ત્વદૃષ્ટ્યા વિચાર્યમાણે તુ અધિષ્ઠાનરૂપસાધકે અધિષ્ઠાનજ્ઞાનરૂપબાધકે ચ સમસત્તાકત્વનિયમો નાસ્તિ । તથા હિ, અધિષ્ઠાનરૂપં સાધકં વિષમસત્તાકમેવ, ન ક્વચિદપિ સમસત્તાકમ્ । અધિષ્ઠાનજ્ઞાનરૂપં બાધકં તુ ક્વચિદ્વિષમસત્તાકમ્; યથા શુક્તિરજતસ્ય બાધકં શુક્તિજ્ઞાનમ્, સ્વાપ્નજગતો બાધકં જાગ્રજ્જ્ઞાનં ચ બાધ્યાપેક્ષયાધિકસત્તાકત્વાદ્વિષમસત્તાકમ્ । ક્વચિત્તુ સમસત્તાકમપિ ભવતિ; યથા વ્યાવહારિકજગતો બાધકં બ્રહ્મજ્ઞાનમ્ । પરન્તુ મિથ્યાજ્ઞાનમેવ મિથ્યાવસ્તુનો બાધકમિતિ નિયમો ભવત્યેવ । તસ્માદિહોક્તો યો નિયમઃ સ અધિષ્ઠાનરૂપસાધકમધિષ્ઠાનજ્ઞાનરૂપબાધકં ચ વિનાવશિષ્ટપદાર્થવિષયક ઇતિ જ્ઞેયમ્ । મરીચિકોદકપિપાસયોઃ વિષમા સત્તા । તસ્માદ્દૃષ્ટાન્તો વિષમો દાર્ષ્ટાન્તિકાનનુરૂપઃ । વિષમત્વં = ભિન્નવિષયત્વમ્ ।

## (૨૫૦)

શુક્તિરજતાદેર્બ્રહ્મજ્ઞાનમન્તરા બાધ્યત્વે, સંસારદુઃખસ્ય
બ્રહ્મજ્ઞાનેનૈવ બાધ્યત્વે ચ વિનિગમકપ્રશ્નઃનનુ બ્રહ્મભિન્નં નિખિલં મિથ્યેતિ પૂર્વમુપદિષ્ટમ્ । તાદૃશમિથ્યાપદાર્થેષુ
શુક્તિરજતરજ્જુસર્પમૃગતૃષ્ણિકોદકાદયો બ્રહ્મજ્ઞાનમન્તરૈવ બાધ્યન્તે, સંસારદુઃખં
તુ બ્રહ્મજ્ઞાનેનૈવ બાધ્યત ઇતિ ભેદે કો હેતુઃ । સોઽયં સંશયશ્છેત્તવ્ય ઇતિ શિષ્યો
ગુરું પૃચ્છતિ ।

## (૨૫૧)

યદજ્ઞાનાદ્યસ્યોત્પત્તિસ્તજ્જ્ઞાનાત્તસ્ય બાધ ઇત્યુત્તરમ્બ્રહ્મણોઽન્યસ્ય સર્વસ્યાવિદ્યાકાર્યત્વાન્મિથ્યાત્વં સમમેવ । નૈવાત્ર દ્વૈતે સત્યત્વગન્ધોઽપ્યસ્તિ । પરન્તુ યદજ્ઞાનાદ્યદુત્પદ્યતે તજ્જ્ઞાનેન તદ્બાધ્યત ઇતિ નિયમઃ । રજ્જુશુક્તિકોષરાદ્યજ્ઞાનાત્ સર્પરજતોદકાદિકમુત્પન્નમ્ । રજ્જ્વાદિજ્ઞાનેન સર્પાદયો બાધ્યન્તે । તથૈવાદ્વિતીયપ્રત્યગભિન્નબ્રહ્મણોઽજ્ઞાનાદ્વિજૃમ્ભિતમિદં જનનમરણાદિદુસ્સહસંસારદુઃખમપ્યદ્વિતીયપ્રત્યગભિન્નબ્રહ્મસાક્ષાત
બાધ્યતે ।

## (A. 252-283) સંસારવિષયકવિચારઃ-

### (૨૫૨)

સંસારોત્પત્તિક્રમપ્રશ્નઃ
૧. ઘટાદિનિખિલાનાત્મજડપદાર્થોપહિતચૈતન્યાવારિકાવિદ્યા
તૂલાવિદ્યેતત્યુચ્યતે । ઇયમેવ અવસ્થાજ્ઞાનમિતિ,
સાદિમલિનાવિદ્યેતિ ચ કથ્યતે । સા ચ તૂલાવિદ્યા અંશભેદેન
નાના ભૂત્વા ભિન્નભિન્નપદાર્થાવારિકા ભવતિ । યદા
યત્પદાર્થાકારાન્તઃકરણવૃત્તિરુદેતિ તદા તત્પદાર્થાવારકતૂલાવિદ્યાંશો
નશ્યતિ । યદા ત્વન્તઃકરણવૃત્તિઃ પદાર્થાન્તરમનુધાવતિ તદા
પુનરપિ પૂર્વપદાર્થાવારકઃ તૂલાવિદ્યાયા અન્યોંઽશ ઉત્પદ્યતે
। એતાદૃશતૂલાવિદ્યાંશનાશાય ન બ્રહ્મજ્ઞાનાપેક્ષા । તસ્ય
તૂલાવિદ્યાંશસ્ય પ્રાતિભાસિકસત્તાકત્વાત્ ઘટાદિતત્તત્પદાર્થજ્ઞાનેનૈવ
નાશઃ સમ્ભવતિ । પઞ્ચપાદિકાકૃતસ્ત્વેવમાહુઃ -
મૂલાવિદ્યૈવ તૂલાવિદ્યા, ન તતોઽતિરિક્તેતિ । તન્મતે યથા
જનસમુદાયમધ્યેઽશનિપાતે સતિ તદા તત્રસ્થા જનાસ્તતોઽપસરન્તિ,
પશ્ચાત્તત્ર પુનરપિ જનાઃ સમ્મિલન્તિ, તથા યદા યત્પદાર્થાકારા
અન્તઃકરણવૃત્તિરુદેતિ તદા તત્પદાર્થાકારા અવિદ્યા તતસ્તિરોભવતિ
। યદા ત્વન્તઃકરણવૃત્તિઃ પદાર્થાન્તરાકારા ભવતિ, તદા
પુનરપિ સાવિદ્યા પૂર્વપદાર્થે પ્રસૃતા તમાવૃણોતિ । પરન્તુ
બ્રહ્મજ્ઞાનં વિના ન તસ્યા અવિદ્યાયા નાશો ભવતિ । એવમેવ
સ્વાપ્નપદાર્થાનાં પ્રાતિભાસિકરજ્જુસર્પાદિશ્ચાવિદ્યાનાશમન્તરેણૈવ
વિરોધિપદાર્થાન્તરજ્ઞાનેન વા અવિદ્યાયાસ્તિરોધાનેન વા અવિદ્યાયાં લયરૂપો
નાશો વા તિરોધાનં વા ભવતિ । અત્ર પ્રસઙ્ગાત્તૂલાવિદ્યાવર્ણનં કૃતમ્
। બ્રહ્માજ્ઞાનાદુત્પદ્યમાનઃ સંસારઃ કેન ક્રમેણોત્પદ્યત ઇતિ સુનિશ્ચિતં
વર્ણનીયમિતિ શિષ્યો ગુરું પૃચ્છતિ ।

## (A. 253-283) પૂર્વપ્રશ્નસ્ય ગુરોરુત્તરમ્-

## (૨૫૩)

સ્વપ્નવદ્વિના ક્રમં જગતઃ પ્રતીતિઃસ્વાપ્નપદાર્થા યથા ક્રમમન્તરેણાપ્યુત્પદ્યન્તે તદ્વદેવ મિથ્યાજગત્પ્રતિભાસતે । મિથ્યાજગતઃ ક્રમજિજ્ઞાસુઃ મરીચિકોદકાવગાહનમપીચ્છેત્ । ઉપનિષત્સુ જગદુત્પત્તિરનેકધા વર્ણિતા । જાગ્રત્સ્વપ્નયોઃ સર્વથા સામ્યમેવ શ્રૂયતે - "તસ્ય ત્રય આવસથાસ્ત્રયઃ સ્વપ્નાઃ" (ઐ. ૧.૩) ઇતિ । અત એવ તત્ર યુગપત્સૃષ્ટિરપ્યુક્તા । "સ ઇમાન્ લોકાનસૃજત" (ઐ. ૧.૧) ઇતિ । "સ ઇદં સર્વમસૃજત । યદિદં કિઞ્ચ" (તૈ. બ્ર. ૬) ઇતિ ચ । તથૈવ પઞ્ચદશ્યામપ્યુક્તમ્-

સ્વપ્નેન્દ્રજાલસદૃશમચિન્ત્યરચનાત્મકમ્ ।
દૃષ્ટનષ્ટં જગત્પશ્યન્ કથં તત્રાનુરજ્યતિ ॥ તૃ. ૧૭૧॥

સ્વસ્વપ્નમાપરોક્ષ્યેણ દૃષ્ટ્વા પશ્યન્ સ્વજાગરમ્ ।
ચિન્તયેદપ્રમત્તઃ સન્નુભાવનુદિનં મુહુઃ ॥ ૧૭૨॥

ચિરં તયોઃ સર્વસામ્યમનુસન્ધાય જાયતે ।
સત્યત્વબુદ્ધિં સન્ત્યજ્ય નાનુરજ્યતિ પૂર્વવત્ ॥ ૧૭૩॥

નિદ્રાકલ્પિતદેશકાલવિષયજ્ઞાત્રાદિ સર્વં યથા
મિથ્યા તદ્વદિહાપિ જાગ્રતિ જગત્સ્વાજ્ઞાનકાર્યત્વતઃ ।
યસ્માદેવમિદં શરીરકરણપ્રાણાહમાદ્યપ્યસત્
તસ્માત્તત્ત્વમસિ પ્રશાન્તમમલં બ્રહ્માદ્વયં યત્પરમ્ ॥ વિ. ચૂ. ૨૫૨॥

સ્વપ્નેઽર્થશૂન્યે સૃજતિ સ્વશક્ત્યા
ભોક્ત્રાદિ વિશ્વં મન એવ સર્વમ્ ।
તથૈવ જાગ્રત્યપિ નો વિશેષઃ
તત્સર્વમેતન્મનસો વિજૃમ્ભણમ્ ॥ વિ. ચૂ. ૧૭૦॥

ઇત્યાદિના ચોક્તમ્ ।

નનુ યદિ જગદુત્પત્તિરક્રમેણ તર્હિ કિમિતિ તૈત્તિરીયાદિષુ ક્રમ ઉક્ત ઇતિ ચેદત્રોચ્યતે । યદિ શ્રુતેઃ જગદુત્પત્તિવિષયે ક્રમવિવક્ષા સ્યાત્તર્હિ શ્રુતિષુ સૃષ્ટિકથને વૈષમ્યં ન સ્યાત્ । દૃશ્યતે તુ વૈષમ્યમ્ । તથા હિ, છાન્દોગ્યે બ્રહ્મણઃ સકાશાદગ્નિજલપૃથિવીનાં ક્રમેણોત્પત્તિઃ શ્રૂયતે - "તદૈક્ષત । બહુ સ્યાં પ્રજાયેયેતિ । તત્તેજોઽસૃજત" (છા. ૬.૨.૩) ઇત્યાદિના । તૈત્તિરીયે આકાશવાય્વગ્નિજલપૃથિવીનાં પઞ્ચભૂતાનાં ક્રમેણોત્પત્તિઃ શ્રૂયતે - "તસ્માદ્વા એતસ્માદાત્મન આકાશઃ સમ્ભૂતઃ" (તૈ. બ્ર. ૧) ઇત્યાદિના । ક્વચિચ્ચ પરમેશ્વરઃ સર્વ- મસૃજદિતિ ક્રમમન્તરૈવોત્પત્તિઃ શ્રૂયતે - "ઇદં સર્વમસૃજત" (તૈ. બ્ર. ૬) ઇત્યાદિના । ઇત્થં વેદેષુ જગદુત્પત્તેર્નાનાપ્રકારેણ વર્ણનસ્યાયમાશયઃ - જગન્મિથ્યૈવ । વસ્તુભૂતં ચેજ્જગત્સ્યાત્ તદુત્પત્તિક્રમો વેદેષ્વનેકપ્રકારેણ નોચ્યેત । વસ્તુનિ વિકલ્પાસમ્ભવાત્ । અતશ્ચોપનિષદાં જગદુત્પત્તિક્રમે ન તાત્પર્યમ્ । બ્રહ્મણોઽદ્વિતીયત્વવર્ણને પરમતાત્પર્યાત્તદઙ્ગત્વેન જગન્નિષેધસ્ય વિવક્ષિતત્વાન્નિષેધ્યત્વેનાક્ષિપ્તસ્ય જગતો યથાકથઞ્ચિદારોપઃ કર્તવ્ય ઇત્યેવ તાત્પર્યમ્ । તત્રાયં દૃષ્ટાન્તઃ - લીલાર્થં

કશ્ચન કૃત્રિમં ગજં નિર્માય યન્ત્રેણ તમાકાશે ઉત્થાપયતિ । આકાશગમનસમયે તસ્ય ગજસ્ય કર્ણવાલાદ્યવયવેષુ વક્રતાસમ્પત્તૌ તત્સમીકરણાય સ પુરુષો ન પ્રયતતે । એવમેવ બ્રહ્મણોઽદ્વિતીયત્વજ્ઞાનસિદ્ધ્યે દ્વૈતરૂપો દૃશ્યપ્રપઞ્ચો નિષેધાર્થં કલ્પિતઃ । તથા ચ ભાષ્યે પ્રકૃતૈતાવત્ત્વાધિકરણે (૩.૨.૬) વર્ણિતં - “લોકપ્રસિદ્ધં ત્વિદં રૂપદ્વયં બ્રહ્મણિ કલ્પિતં પરામૃશતિ પ્રતિષેધ્યત્વાય શુદ્ધબ્રહ્મસ્વરૂપપ્રતિપાદનાય ચેતિ નિરવદ્યમ્” ઇતિ । તસ્માચ્છ્રુતીનાં પ્રપઞ્ચવિષયેઽનાદરાદેવ તદુત્પત્તિક્રમસ્યૈકવિધત્વેન વર્ણને ન યત્નઃ । તદુત્પત્તિવિષયે શ્રુતીનાં વિગાનદર્શનાદેવ પ્રપઞ્ચનિષેધ એવ શ્રુતીનાં નૈર્ભર્યં ન તદુત્પત્તાવિતિ જ્ઞેયમ્ ।

## (૨૫૪)

શ્રુત્યુક્તક્રમેણ જગદુત્પત્તિકથને સૂત્રકારભાષ્યકૃતોરભિપ્રાયઃયદપિ સૂત્રભાષ્યકૃતૌ દ્વિતીયાધ્યાયે જગદુત્પત્તિપ્રતિપાદકશ્રુતિવાક્ય પરસ્પરવિરોધં પરિહરન્તૌ તૈત્તિરીયોક્તસૃષ્ટિક્રમ એવ સર્વોપનિષદામર્થ ઇતિ વર્ણિતવન્તૌ, તન્મન્દાધિકારિસમાધાનાર્થમિતિ જ્ઞેયમ્ । પૂર્વં વર્ણિતમુત્પત્તિવાક્યાનાં વસ્તુભૂતમભિપ્રાયમવગન્તુમસમર્થા મન્દજિજ્ઞાસવઃ પરસ્પરવિરુદ્ધાનિ વાક્યાનિ દૃષ્ટ્વા ભ્રાન્તા મા ભૂવન્નિતિ સૂત્રભાષ્યકૃતૌ સર્વોપનિષદામાકાશાદિક્રમેણૈવ જગદુત્પત્તૌ તાત્પર્યમિતિ પ્રદર્શયામાસતુઃ । કિઞ્ચ વેદાન્તવિચારેણ યથાર્થજ્ઞાનમલભમાનસ્ય લયચિન્તનાર્થમપિ શ્રુતીનાં વૈમત્યપરિહારેણ વિવક્ષિતો જગદુત્પત્તિક્રમઃ સૂત્રભાષ્યકૃદ્ભ્યાં પ્રદર્શિતઃ ।

૧. સૂત્રશબ્દેન વ્યાસકૃતબ્રહ્મસૂત્રમ્, ભાષ્યશબ્દેન શ્રીશઙ્કરભગવત્પાદભાષ્યં ચ ગ્રાહ્યમ્ । યેન ક્રમેણોત્પત્તિસ્તદ્વિપરીતક્રમેણ જગતો લયશ્ચિન્તનીયઃ । તથા લયચિન્તનેનાદ્વિતીયે બ્રહ્મણિ બુદ્ધિઃ સ્થિરા ભવેત્ । સોઽયં લયચિન્તનપ્રકારઃ વાર્તિકકારૈઃ સુરેશ્વાચાર્યૈઃ પઞ્ચીકરણાખ્યગ્રન્થે વર્ણિતઃ । અસ્ય ગ્રન્થસ્ય ઉત્તમાધિકારિવિષયત્વાદ્યદ્યપિ જગદુત્પત્તિલયક્રમવર્ણનસ્ય નાત્રાવસરસ્તથાપિ સાગરરૂપત્વાદસ્ય ગ્રન્થસ્ય મન્દાનુગ્રહાય સઙ્ક્ષેપતઃ સ ઉચ્યતે । અસઙ્ગત્વાદક્રિયત્વાચ્ચ શુદ્ધબ્રહ્મણઃ સકાશાજ્જગદુત્પત્ત્યાદિકં ન સઙ્ગચ્છતે । કિન્તુ માયાવિશિષ્ટશબલબ્રહ્મણઃ સકાશાજ્જગદુત્પદ્યતે । તસ્માન્માયેશ્વરયોઃ સ્વરૂપં પ્રતિપાદ્યતે ।

## (A. 255-272) શ્રુત્યુક્તોત્પત્તિક્રમનિરૂપણમ્

## (A. 255-260) પ્રસઙ્ગાન્માયાસ્વરૂપપ્રતિપાદનમ્-

### (૨૫૫)

માયાસ્વરૂપં - જીવેશ્વરાદિવિભાગશૂન્યશુદ્ધચૈતન્યાશ્રિતા માયા । ઇયમુત્પત્તિરહિતત્વાદનાદિઃ । તસ્યા ઉત્પત્ત્યઙ્ગીકારે પુત્રાત્પિતુરુત્પત્તિકથનસ્યેવ માયાકાર્યાત્પ્રપઞ્ચાન્માયોત્પત્તિકથનમસઙ્ગતં ભવેત્ । તસ્માચ્ચૈતન્યાન્માયોત્પત્તિર્વક્તવ્યા । તથા સતિ જીવત્વેશ્વરત્વયોર્માયાકાર્યત્વાન્ન જીવચેતનાન્ન વેશ્વરચેતનાન્માયોત્પત્તિર્ભવેત્ । જીવેશ્વરસિદ્ધૌ તત્સકાશાન્માયોત્પત્તિર્મા- યાસિદ્ધૌ જીવેશ્વરસિદ્ધિરિત્યન્યોન્યાશ્રયપ્રસઙ્ગાત્ । શુદ્ધચૈતન્યં ત્વસઙ્ગમક્રિયમવિકારિ ચ । તસ્માન્માયોત્પત્ત્યઙ્ગીકારે શુદ્ધચૈતન્યં વિકારિ ભવેત્ । કિઞ્ચ યદિ શુદ્ધચૈતન્યાન્માયોત્પત્તિરુચ્યતે તર્હિ મોક્ષદશાયાં શુદ્ધચૈતન્યસ્ય સત્ત્વાત્પુનર્માયોત્પત્તિપ્રસઙ્ગઃ સ્યાત્ । મોક્ષસાધનવૈયર્થ્યં ચ સ્યાત્ । તસ્માન્માયોત્પત્તિરહિતા; અત એવ ચાનાદિઃ । સા ચૈકૈવ । જ્ઞાનનાશ્યત્વાત્ સાન્તા ચ । સેયં માયા સદસદ્વિલક્ષણા । ત્રિકાલાબાધ્યં યત્તત્ સદ્ ઇત્યુચ્યતે । ત્રિકાલાબાધ્યત્વાચ્ચૈતન્યમેવ સત્ । માયા તુ જ્ઞાનબાધ્યત્વાત્ સદ્વિલક્ષણા । કાલત્રયેઽપ્યપ્રતીયમાનં શશશ‍ૃઙ્ગવન્ધ્યાસુતાકાશપદ્માદિકં અસદ્ ઇત્યુચ્યતે । જ્ઞાનાત્પૂર્વં માયા તત્કાર્યં ચ પ્રતીયતે । તથા હિ, જાગ્રત્કાલે “અહમજ્ઞો બ્રહ્મ ન

૧. દૃષ્ટિસૃષ્ટિવાદૈકસત્તાવાદૈકજીવવાદેષુ દૃઢતરસંસ્કારવાન્ ઉત્તમાધિકારી ।

૨. જગદ્વિવર્તોપાદાનભૂતમધિષ્ઠાનં માયોપહિતચૈતન્યમેવ,
ન તુ માયાવિશિષ્ટમ્ । તથાપિ માયાવિશિષ્ટસ્યોપાદાનત્વં તતો
જગદુત્પત્તિશ્ચાવિવેકિદૃષ્ટ્યોચ્યતે । વિવેકિદૃષ્ટ્યા
તુ જગતઃ પરિણામ્યુપાદાનં વા વિવર્તોપાદાનં વા ન
માયાવિશિષ્ટચૈતન્યમ્ । કિન્તુ જગતઃ પરિણામ્યુપાદાનં
કેવલા માયા । વિવર્તોપાદાનં માયોપહિતચૈતન્યમ્ ।
અવિવેકિનસ્તૂભયવિધમુપાદાનત્વં માયાવિશિષ્ટચૈતન્યે ભ્રાન્ત્યા
પ્રતીયતે । તસ્માચ્છાસ્ત્રકારૈરવિવેકિનાં દૃષ્ટિરનૂદ્યતે કેવલમ્,
ન તુ તાત્પર્યેણોચ્યતે ઇતિ જ્ઞેયમ્ । જાનામિ” ઇત્યનુભૂયતે માયા ।
સ્વપ્નકાલે પ્રતીયમાનસર્વપદાર્થાનામુપાદાનકારણતયા માયૈવ વિભાતિ
। સુપ્તોત્થિતસ્ય “સુખમહમસ્વાપ્સં ન કિઞ્ચિદવેદિષમ્”
ઇતિ પરામર્શઃ (સ્મૃતિઃ) ભવતિ । સા ચ સ્મૃતિરનનુભૂતેઽર્થે
ન સમ્ભવેત્ । તસ્માત્સુષુપ્તાવજ્ઞાનાનુભવોઽસ્તિ । અજ્ઞાનં માયેતિ
ચૈકમેવ વસ્તૂચ્યતે । ઇત્થમવસ્થાત્રયેઽપિ માયા પ્રતીયતે ।
અતઃ સા અસદ્વિલક્ષણા । સદસદ્વિલક્ષણમાયાકાર્યં જગદપિ
સદસદ્વિલક્ષણમેવ । અદ્વૈતમતે સદસદ્વિલક્ષણમેવ વસ્તુ
મિથ્યેતિ, અનિર્વચનીયમિતિ ચ કથ્યતે । તસ્માન્માયાતત્કાર્યાભ્યાં ન

દ્વૈતં સિદ્ધ્યેત્ । માયાતત્કાર્યયોઃ સદસદ્વિલક્ષણત્વાન્મિથ્યાત્વમેવ । ન હિ મિથ્યાપદાર્થેન દ્વૈતસિદ્ધિર્ભવતિ, સ્વપ્ને દૃષ્ટપદાર્થેન યથા ન દ્વૈતસિદ્ધિસ્તથા મિથ્યામાયાતત્કાર્યાભ્યાં ન બ્રહ્મણઃ સદ્વિતીયત્વસિદ્ધિઃ ।

## (૨૫૬)

અજ્ઞાનસ્ય સ્વાશ્રયવિષયકત્વં - જીવેશ્વરવિભાગશૂન્યશુદ્ધબ્રહ્માશ્રિતા માયા શુદ્ધં બ્રહ્મૈવાવૃણોતિ, ગૃહાશ્રિતં તમો યથા ગૃહમેવાવૃણોતિ, તદ્વત્ । અયમેવ સ્વાશ્રયસ્વવિષયકત્વપક્ષ ઇત્યુચ્યતે । સ્વશબ્દેન શુદ્ધં બ્રહ્મોચ્યતે । તદેવ બ્રહ્માજ્ઞાનસ્યાશ્રયો ભવતિ, તદેવ બ્રહ્માજ્ઞાનેનાવ્રિયતે ચ । તસ્માદજ્ઞાનં સ્વાશ્રયસ્વવિષયકં ઇત્યુચ્યતે । વિષયત્વં = આવૃતત્વમ્ । સઙ્ક્ષેપશારીરકવિવરણવેદાન્તમુક્તાવલ્યદ્વૈતસિદ્ધ્યદ્વૈતદીપિકાદિગ્રન્થેષુ અજ્ઞાનં સ્વાશ્રય- વિષયકં ઇતિ વર્ણિતમ્ ।

## (૨૫૭)

ઉક્તાર્થે વાચસ્પતિમતં - અજ્ઞાનં જીવમાશ્રિત્ય સ્થિત્વા બ્રહ્મ વિષયીકરોતિ । “અહમજ્ઞો બ્રહ્મ ન જાનામિ” ઇત્યનુભવે “અહમ્” ઇતિ શબ્દાર્થો જીવઃ “અજ્ઞઃ” ઇત્યજ્ઞાનાશ્રયત્વેન પ્રતીયતે । તસ્માજ્જીવસ્યાજ્ઞાનાશ્રયત્વં વ્યક્તીભવતિ । “બ્રહ્મ ન જાનામિ” ઇતિ શબ્દૈરજ્ઞાનસ્ય વિષયો બ્રહ્મેતિ સિદ્ધ્યતિ । તથા ચાજ્ઞાનં જીવાશ્રિતં સદ્બ્રહ્મ વિષયીકરોતિ = આવૃણોતીતિ સિદ્ધમ્ । તચ્ચાજ્ઞાનં નૈકમ્, કિન્તુ નાના । અજ્ઞાનસ્યૈકત્વે એકસ્ય જ્ઞાનોદયેનાજ્ઞાને નષ્ટે ઇતરેષામપ્યજ્ઞાનં તત્કાર્યસંસારો વા ન પ્રતીયેત; પ્રતીયતે તુ । અદ્યાવધિ ન કસ્યચિદપિ જ્ઞાનં નોદિતમિત્યભ્યુપગમે ઇતઃ પરમપિ ન કસ્યચિદપિ જ્ઞાનં જાયેત । શ્રવણાદિસાધનાનામાનર્થક્યપ્રસઙ્ગશ્ચ સ્યાત્ । તસ્માદનન્તજીવાશ્રિતાન્યજ્ઞાનાન્યનન્તાનિ । અનન્તજીવાનામનન્તાજ્ઞાનૈઃ કલ્પિતા ઈશ્વરા અપિ અનન્તાઃ । તથા બ્રહ્માણ્ડાન્યપ્યનન્તાનિ । યસ્ય જીવસ્ય જ્ઞાનમુદેતિ તસ્યાજ્ઞાનં તદજ્ઞાનકલ્પિતેશ્વરબ્રહ્માણ્ડાનિ ચ નશ્યન્તિ । યસ્ય જ્ઞાનં નોદિતં તસ્ય બન્ધોઽનુવર્તત એવ ।

## (૨૫૮)

વાચસ્પતિમતાસાઙ્ગત્યમ્; અજ્ઞાનૈકત્વં ચઈશ્વરો જીવાજ્ઞાનકલ્પિત ઇત્યુક્તિઃ શ્રુતિસ્મૃતિપુરાણવિરુદ્ધા । “ઈશ્વરા અનન્તાઃ, પ્રતિજીવં સૃષ્ટિર્ભિન્ના” ઇત્યપિ પ્રમાણવિરુદ્ધમ્ । તસ્માદજ્ઞાનસ્ય નાનાત્વમાશ્રિત્ય ઈશ્વરસ્ય સૃષ્ટેશ્ચૈઐકત્વાભ્યુપગમોઽપિ ન સઙ્ગચ્છતે । તથા હિ, જીવેશ્વરપ્રપઞ્ચા અજ્ઞાનકલ્પિતાઃ । અજ્ઞાનસ્ય નાનાત્વે એકૈકાજ્ઞાનકલ્પિતજીવવદીશ્વરપ્રપઞ્ચાનામપ્યાનન્ત્યં પ્રસજ્યેતૈવ । અત એવ વાચસ્પતિમિશ્રૈરનન્તેશ્વરાનન્તસૃષ્ટય ઉક્તાઃ । તસ્માદજ્ઞાનમેકમિતિ મતમેવ જ્યાયઃ ।

## (૨૫૯)

અજ્ઞાનસ્ય સ્વાશ્રયસ્વવિષયકત્વપક્ષાઙ્ગીકારઃતદિદમેકમજ્ઞાનં ન જીવાશ્રિતમ્, કિન્તુ શુદ્ધબ્રહ્માશ્રિતમેવ । જીવભાવશ્ચાજ્ઞાનકાર્યમ્ । તચ્ચાજ્ઞાનં ન કદાચિદપિ સ્વતન્ત્રં તિષ્ઠતિ । તસ્માન્નિરાશ્રયાજ્ઞાનેન ન જીવભાવઃ સિદ્ધ્યેત્ । યદ્યજ્ઞાનં પ્રથમં યત્કિઞ્ચિદાશ્રયમાશ્રિત્ય તિષ્ઠેત્તદા તત્કાર્યજીવભાવઃ સિદ્ધ્યેત્ । જીવભાવ ઇવેશ્વરભાવોઽપ્યજ્ઞાનકાર્યમેવ । તસ્માદજ્ઞાનં નેશ્વરાશ્રિતમપિ । પરિશેષાદિદમનાદ્યજ્ઞાનં શુદ્ધબ્રહ્માશ્રિતં ભવતિ । અનાદિચૈતન્યાજ્ઞાનયોઃ સમ્બન્ધઃ (કાલઃ) અપ્યનાદિરેવ । ચૈતન્યાજ્ઞાનયોરનાદિસમ્બન્ધાધીનજીવેશ્વરભાવોઽપ્યનાદિરેવ । પરન્તુ જીવેશ્વરભાવયોરજ્ઞાનાધીનત્વાત્ જીવેશ્વરયોઃ અજ્ઞાનકાર્યત્વવ્યપદેશઃ । “અહમજ્ઞઃ” ઇતિ જીવાશ્રિતત્વેન યદ્યપ્યજ્ઞાનમાપાતતઃ પ્રતીયતે, તથાપિ શુદ્ધબ્રહ્માશ્રિતેઽજ્ઞાને જીવસ્ય યોઽભિમાનઃ સ એવાર્થોઽનેન વાક્યેનાભિલપ્યતે ઇતિ પરમાર્થઃ । અજ્ઞાનકાર્યત્વાજ્જીવસ્ય ન તસ્યાજ્ઞાનાધિષ્ઠાનત્વરૂપમાશ્રયત્વં યુજ્યતે । કિન્તુ શુદ્ધબ્રહ્મૈવાજ્ઞાનાસ્ય અધિષ્ઠાનરૂપાશ્રયઃ । “અહમજ્ઞઃ” ઇતિ તુ પ્રતીતિર્જીવસ્યાજ્ઞાનાભિમાનિત્વરૂપમાશ્રયત્વં વિષયીકરોતિ । શુદ્ધબ્રહ્મરૂપાધિષ્ઠાનાશ્રિતમજ્ઞાનં સ્વાશ્રયં બ્રહ્મૈવાવૃણોતિ । તદનન્તરં જીવઃ “અહમજ્ઞોઽસ્મિ” ઇત્યેવમજ્ઞાનસ્ય અભિમાનિરૂપાશ્રયો ભવતિ । અનેન પ્રકારેણાજ્ઞાનં સ્વાશ્રયવિષયકમિતિ સિદ્ધમ્ ।

૧. “અહમજ્ઞઃ” ઇત્યનુભવબલાદજ્ઞાનસ્યાશ્રયો જીવ ઇતિ
વાચસ્પતિમિશ્રા આહુઃ । અયં પક્ષો મુમુક્ષુબુદ્ધૌ સુખં પ્રવિશેદિતિ
તૈસ્તથા વર્ણિતમ્ । વસ્તુતસ્તેષામેવમાશયઃઅહંશબ્દસ્ય
વાચ્યાર્થોઽન્તઃકરણવિશિષ્ટચૈતન્યરૂપો જીવઃ ।
તત્ર વિશેષ્યાંશભૂતસાક્ષિચૈતન્યમેવ બ્રહ્મ । તચ્ચ
બ્રહ્માજ્ઞાનસ્યાશ્રયઃ । વિશેષ્યધર્મસ્ય વિશિષ્ટે વ્યવહાર ઇતિ
ન્યાયેન જીવસ્યાજ્ઞાનાશ્રયત્વવ્યપદેશઃ કૃતઃ ।

## (૨૬૦)

એકાજ્ઞાનપક્ષે બન્ધમોક્ષવ્યવસ્થા; એકાજ્ઞાનપક્ષસ્ય જ્યાયસ્તવમ્; નામભેદેન માયાસ્વરૂપં ચતચ્ચાજ્ઞાનમેકમેવ । જ્ઞાનેન તદજ્ઞાનં નિવર્ત્યતે । પરન્તુ યસ્મિન્ અન્તઃકરણે જ્ઞાનમુદેતિ તાદૃશાન્તઃકરણાવચ્છિન્નચૈતન્યનિષ્ઠાજ્ઞાનાંશસ્તેન જ્ઞાનેન નિવર્ત્યતે । સ એવ મુક્તો ભવતિ । યસ્મિન્ અન્તઃકરણે જ્ઞાનં નોદેતિ તત્રાજ્ઞાનાંશો બન્ધશ્ચ તથૈવાવતિષ્ઠતે । અનેન પ્રકારેણાજ્ઞાનસ્ય એકત્વપક્ષે બન્ધમોક્ષવ્યવહારસિદ્ધિઃ । યદિ વાચસ્પતિમિશ્રમતાનુસારેણ કેષાઞ્ચિન્નાનાજ્ઞાનપક્ષો મનસિ પ્રવિશતિ તદા સોઽપિ પક્ષોઽદ્વૈતજ્ઞાનોપાય એવ । ન તન્મતખણ્ડને આગ્રહઃ કાર્યઃ । યયા પ્રક્રિયયા જિજ્ઞાસોરદ્વૈતબોધો ભવતિ તસ્યાં પ્રક્રિયાયાં તસ્ય બુદ્ધિઃ સ્થિરીકર્તવ્યા । શુદ્ધબ્રહ્માશ્રિતાં માયાં અવિદ્યેતિ અજ્ઞાનમિતિ ચાહુઃ । અચિન્ત્યાનન્તશક્તિમત્ત્વાદ્યુક્તીનામવિષયત્વાચ્ચ માયેતિ વ્યપદેશઃ । વિદ્યાનાશ્યત્વાદવિદ્યેતિ વર્ણ્યતે । સ્વરૂપાવારકત્વાદ્ અજ્ઞાનમિતિ ચ ભણ્યતે । માયાયા આશ્રયભૂતં ચૈતન્યં સામાન્યચૈતન્યમ્ । ન તન્માયાયા વિરોધિ, કિન્તુ સાધકમ્ । માયાયાઃ સત્તાપ્રદં સ્ફુરણપ્રદં ચ । વૃત્ત્યારૂઢં ચૈતન્યમથવા ચૈતન્યસહિતાં વૃત્તિં માયાયા વિરોધિતયા જાનીયાત્ । અત્ર સૂર્યકાન્તશિલારૂઢસૂર્યપ્રભા

દૃષ્ટાન્તત્વેનાવગન્તવ્યા । ઇત્થમેકા અનાદિઃ સાન્તા સદસદ્વિલક્ષણાનિર્વચનીયા અવિદ્યાજ્ઞાનાદિશબ્દવ્યપદેશ્યા સામાન્યચૈતન્યમાશ્રિતા વૃત્ત્યારૂઢચૈતન્યવિનાશ્યા ચ માયા વર્ણિતા ।

૧. અત્રાયમભિપ્રાયઃ - અંશિરૂપાન્ધકારસ્યૈકત્વેઽપિ અંશભૂતા નાનાન્ધકારાઃ પ્રતિગૃહં વર્તન્તે । યસ્મિન્ ગેહે દીપોઽસ્તિ તત્રસ્થોંઽશભૂતોઽન્ધકારો વિનશ્યતિ । ન ગેહાન્તરસ્થાન્ધકારાંશસ્ય નાશઃ । એવમેવાંશિભૂતમજ્ઞાનમેકમેવ । તસ્યાંશભૂતનાનાજ્ઞાનાનિ નાનાન્તઃકરણપ્રદેશસ્થસાક્ષિચૈતન્યમાશ્રિત્ય તિષ્ઠન્તિ । યસ્મિન્નન્તઃકરણપ્રદેશે વૃત્તિજ્ઞાનમુદેતિ તાદૃશાન્તઃકરણપ્રદેશસ્થાજ્ઞાનાંશો વિનશ્યતિ । સ એવ મુક્તો ભવતિ, નેતરે । તસ્માદેકસ્ય જ્ઞાનોદયે સતિ સર્વેષામપ્યજ્ઞાનતત્કાર્યનાશદ્વારા મુક્ત્યાપત્તિર્ન કાર્યા । ઇત્થમેકાજ્ઞાનાઙ્ગીકારપક્ષે બન્ધમોક્ષવ્યવસ્થાસિદ્ધિઃ । કિઞ્ચ “જીવાજ્ઞાનકલ્પિત ઈશ્વરોઽનન્તઃ, જીવભેદેન સૃષ્ટિરપિ નાના” ઇતિ શ્રુતિસ્મૃતિપુરાણાદિવિરુદ્ધપક્ષો ન યુક્તઃ । અત એકાજ્ઞાનપક્ષો જ્યાયાન્ ।

૨. યયા યયા ભવેત્પુંસાં વ્યુત્પત્તિઃ પ્રત્યગાત્મનિ । સા સૈવ પ્રક્રિયેહ સ્યાત્ સાધ્વી સા ચાનવસ્થિતા ॥ (બૃ. ભા. વા. ૧.૪.૪૦૨) ઇતિ નૈષ્કર્મ્યસિદ્ધિકારા આહુઃ ।

## (A. 261-262) પ્રસઙ્ગાદીશ્વરસ્વરૂપવર્ણનમ્-

### (૨૬૧)

ઈશ્વરસ્વરૂપમ્; દ્વિવિધકારણલક્ષણં ચ - શુદ્ધસત્ત્વગુણસહિતા માયા, માયાધિષ્ઠાનં ચૈતન્યમ્, માયાપ્રતિફલિતચૈતન્યાભાસ ઇતિ ત્રયં મિલિત્વા ઈશ્વર ઇત્યભિધીયતે । સોઽયમીશ્વરઃ સર્વજ્ઞઃ । સ એવ જગતઃ કારણમ્ । કારણં દ્વિવિધં - ઉપાદાનકારણમ્, નિમિત્તકારણં ચેતિ । યત્ કાર્યસ્વરૂપે પ્રવિશતિ, યદ્વિના કાર્યસ્ય સ્થિતિર્નાસ્તિ, તદુપાદાનકારણં ઉચ્યતે । યથા મૃદ્ઘટસ્યોપાદાનકારણમ્ । ઘટસ્વરૂપે મૃદઃ પ્રવેશોઽસ્તિ, મૃદં વિના ઘટો ન સ્થિતિં લભતે ચ । યત્ કાર્યસ્વરૂપે ન પ્રવિશતિ, કિન્તુ કાર્યાત્પૃથક્ સ્થિતં સત્કાર્યમુત્પાદયતિ, યસ્ય નાશેન કાર્યં ન નશ્યતિ તન્નિમિત્તકારણં ઇત્યભિધીયતે । યથા ઘટસ્ય કુલાલો દણ્ડચક્રાદયશ્ચ નિમિત્તકારણાનિ । ન કુલાલાદયો ઘટસ્વરૂપે પ્રવિશન્તિ; ઘટાત્પૃથગ્ભૂતા ઘટમુત્પાદયન્તિ; ઘટો૧. કાર્યોત્પત્તિસ્થિતિલયકારણત્વમુપાદાનકારણસ્ય લક્ષણમ્ । જગદુત્પત્તિવિષયે આરમ્ભપરિણામવિવર્તવાદાનાં મધ્યે વિવર્તવાદ એવ શ્રેયાનિતિ વિચારતઃ સિદ્ધ્યતિ । તથા હિ-

(૧) સાવયવૈરનેકૈઃ કારણદ્રવ્યૈઃ સંયોગસચિવૈરેકમવયવિ કાર્યમુત્પદ્યત ઇત્યારમ્ભવાદઃ । યથા અનેકૈસ્તન્તુભિઃ સંયોગસચિવૈરેકં પટરૂપકાર્યમુત્પદ્યત ઇત્યારમ્ભવાદઃ । અત્ર મતે કાર્યકારણયોરત્યન્તભેદોઽભ્યુપગમ્યતે । જગદુત્પત્તિવિષયે આરમ્ભવાદો ન સમ્ભવતિ । અદ્વિતીયબ્રહ્મણોઽપરિચ્છિન્નત્વેન નિરવયવત્વાન્ન તતઃ સાવયવં જગત્પૃથગ્જાયેત ।

(૨) પરિણામવાદોઽપિ ન પ્રપઞ્ચોત્પત્તિવિષયે યુજ્યતે । કારણવસ્તુનઃ

પ્રાક્સિદ્ધકારણાવસ્થાપરિત્યાગપૂર્વકાવસ્થાન્તરપ્રાપ્તિઃ પરિણામઃ
। યથા મૃત્પરિણામો ઘટ ઇતિ પ્રધાનપરિણામો જગદિતિ ચ
સાઙ્ખ્યા વદન્તિ । બ્રહ્મપરિણામો જગદિતિ કેચનોપાસકા મન્યન્તે ।
તદુભયં સૂત્રભાષ્યકારાદિભિઃ ખણ્ડિતમ્ । ચૈતન્યસ્યાકાશાદપિ
સૂક્ષ્મત્વેન નિરવયવત્વાદેવોપાસકમતમત્યન્તમસઙ્ગતમેવ ।
ઇત્થં પરિણામવાદોઽપિ ન યુજ્યતેઽત્ર ।
(૩) વિવર્તવાદે તુ પૂર્વોક્તદોષલેશોઽપિ ન સમ્ભવતિ । કારણવસ્તુનો
નિત્યસિદ્ધસ્વસ્વરૂપાપરિત્યાગેનૈવાન્યથા ભાનમાત્રં વિવર્ત ઇતિ
શ્રુતિયુક્ત્યનુભવસિદ્ધમ્ । યથા શુક્ત્યાદૌ રજતાવભાસઃ । અયમેવ
પક્ષો વેદાન્તાભિમતઃ । અત્ર જગદ્વિવર્તોપાદાનરૂપાધિષ્ઠાનં
માયોપહિતચૈતન્યમેવ । ન માયાવિશિષ્ટમ્ । અવિવેકિનસ્તથા
કથયન્તિ । પરિણામ્યુપાદાનં માયા, વિવર્તોપાદાનમુપહિતચૈતન્યમિતિ
વિવેકે સિદ્ધેઽપિ તદુભયં માયાવિશિષ્ટચૈતન્યમિતિ વદન્તિ
વિવેચનાકુશલાઃ ।
૨. કાર્યોત્પત્તિમાત્રકારણત્વં નિમિત્તકારણસ્ય લક્ષણમ્ । તચ્ચ
નિમિત્તકારણમનેકવિધમ્ । ત્પત્ત્યનન્તરં કુલાલાદીનાં નાશેઽપિ
ઘટો ન નશ્યતિ । ઇત્થં ઉપાદાનં નિમિત્તં ઇતિ ચ કારણં દ્વિવિધમ્ ।

## (૨૬૨)

ઈશ્વર એવ પ્રપઞ્ચસ્યોપાદાનકારણં નીમત્તકારણં ચઈશ્વર એવ જગત ઉપાદાનકારણં નિમિત્તકારણં ચ ભવતિ । યથૈક એવ લૂતાકીટસ્તન્તુરૂપકાર્યં પ્રત્યુપાદાનકારણં નિમિત્તકારણં ચ ભવતિ । તદ્વદેવેશ્વરઃ પ્રપઞ્ચં પ્રત્યુપાદાનં નિમિત્તં ચ । તત્ર લૂતાકીટસ્ય જડં શરીરં તન્તોરુપાદાનકારણમ્, તચ્છરીરસ્થમન્તઃકરણસહિતચૈતન્યં નિમિત્તકારણમ્ । એવમેવેશ્વરશરીરભૂતજડમાયા જગત ઉપાદાનમ્, ચેતનભાગો નિમિત્તકારણમ્ । ઇત્થમેકસ્યૈવેશ્વરસ્ય પ્રપઞ્ચં પ્રત્યુપાદાનનિમિત્તોભયકારણત્વે લૂતાકીટો દૃષ્ટાન્તઃ । મુખ્યદૃષ્ટાન્તસ્તુ સ્વપ્ન એવ । યદા પુનરીશ્વરો જીવાનાં કર્મફલદાનાય ન સમ્મુખો ભવતિ તદા જગતઃ પ્રલયઃ, યદા ચ સ ઈશ્વરો જીવાનાં કર્મફલદાનાયાભિમુખો ભવતિ તદા જગતઃ સૃષ્ટિશ્ચ ભવતિ । ઇત્થં જગત્સૃષ્ટેર્જીવકર્માધીનત્વાજ્જીવસ્વરૂપમિદાનીં નિરૂપ્યતે ।

૧. ન્યાયમતે ઘટેનેશ્વરસ્ય સંયોગે
ઈશ્વરસ્યાભિન્નનિમિત્તોપાદાનત્વમુક્તમ્ । તથા
જીવાશ્રિતજ્ઞાનસુખાદિગુણાનાં જીવસ્યાભિન્નનિમિત્તોપાદાનત્વમભિમતમ્
। કિઞ્ચ યથાસ્મન્મતે જીવસ્ય સ્વપ્નપ્રપઞ્ચં

પ્રત્યભિન્નનિમિત્તોપાદાનત્વમિષ્ટં તથેશ્વરસ્ય જાગ્રત્પ્રપઞ્ચં
પ્રત્યભિન્નનિમિત્તોપાદાનત્વં ભવતિ ।
૨. નનુ દુઃખતત્સાધનપરિહારે વા સુખતત્સાધનસમ્પાદાને
વેચ્છા દૃષ્ટા । ઈશ્વરસ્ય તુ દુઃખતત્સાધનયોરભાવાન્ન
તન્નિવૃત્તીચ્છાસમ્ભવઃ । પર્યાપ્તકામત્વાદીશ્વરસ્ય નાપિ
સુખતત્સાધનસમ્પાદનેચ્છા । અત ઈશ્વરસ્યેચ્છા ન કુત્રચિદપિ
યુજ્યતે । બાલાનામકસ્માદેવ ક્રીડાયામિચ્છાવદીશ્વરસ્યાપિ
જગત્સૃષ્ટિરૂપવિનોદેચ્છા નિમિત્તં વિનૈવ ભવતીત્યપિ ન ।
યથા બાલાનાં ચિત્તે આહ્લાદરૂપસુખપ્રાપ્તિનિમિત્તકેચ્છા ભવતિ
તથા પૂર્ણકામસ્યેશ્વરસ્યાહ્લાદરૂપસુખપ્રાપ્તીચ્છા ન સમ્ભવતીતિ
ચેન્ન । યથા કલ્પવૃક્ષાદિઃ સ્વાશ્રિતપુરુષસઙ્કલ્પરૂપનિમિત્તેન
સ્વસ્વભાવાદેવાશ્રિતપુરુષમનોરથં પૂરયતિ, તથેશ્વરોઽપિ
પ્રાણિનાં ફલદાનોન્મુખો યદા ભવતિ તદા જીવાદૃષ્ટરૂપનિમિત્તેનૈવ
સ્વસ્વભાવાદેવ જગત્સૃષ્ટ્યાદિવિષયક- જ્ઞાનેચ્છાપ્રયત્નાદિકં
કરોતિ । ઈશ્વરીયેચ્છાજ્ઞાનપ્રયત્નમધ્યે એકૈકાપિ વ્યક્તિઃ
સૃષ્ટ્યારમ્ભકાલે ઉત્પન્ના પ્રલયપર્યન્તં તિષ્ઠતિ ।
તસ્માદીશ્વરેચ્છાપ્રયત્ના નિત્યા ઉચ્યન્તે । કિઞ્ચેશ્વરીયેચ્છાદયો
ભૂતભવિષ્યદ્વર્તમાનકાલગતસકલપદાર્થાન્ વિષયીકરોતિ ।
અત એવ સદા સૃષ્ટિઃ પ્રલયો વા, સદા શૈત્યમૌષ્ણ્યં વા, સદા
વૃષ્ટિરવગ્રહો વા ન સમ્ભવતિ । કિન્તુ સમયાનુસારેણૈવ ભવન્તિ ।

(૨૬૩)

જીવસ્વરૂપવર્ણનમ્રજસ્તમસી અભિભૂયોદ્ભૂતો યઃ સત્ત્વગુણઃ સ શુદ્ધસત્ત્વગુણ ઇત્યભિધીયતે । રજસ્તમોભ્યામભિભૂતો યઃ સત્ત્વગુણઃ સ મલિનસત્ત્વગુણ ઇતિ કીર્ત્યતે । ઇદૃશમલિનસત્ત્વગુણસહિતાજ્ઞાનાંશપ્રતિફલિતચિદા અજ્ઞાનં, અજ્ઞાનાધિષ્ઠાનકૂટસ્થચૈતન્યં ચેતિ ત્રયં મિલિત્વા જીવ ઇતિ વર્ણ્યતે । સોઽયં જીવઃ કર્મ કરોતિ । તત્ફલં ચેચ્છતિ ।

## (A. 264-272) જગત્સૃષ્ટિવર્ણનમ્-

(૨૬૪)

ઈશ્વરસ્ય વૈષમ્યનૈર્ઘૃણ્યાભાવઃજીવસ્ય સ્વકર્માનુસારેણોચ્ચાવચભોગાનુભવાયેશ્વરઃ પ્રાણિનાં પુણ્યપાપાનુરૂપાં સૃષ્ટિં કરોતિ । તસ્માદીશ્વરસ્ય ન વૈષમ્યનૈર્ઘૃણ્યે સ્તઃ । નન્વાદ્યસર્ગાત્પૂર્વં ન કર્માસ્તિ । પ્રથમસર્ગે ચેશ્વરઃ પ્રાણિનામુચ્ચનીચશરીરાણિ ઉચ્ચાવચભોગાંશ્ચ સૃજતિ । તસ્માદીશ્વરો વિષમદૃષ્ટિરેવાકસ્માદ્વિષમસૃષ્ટિકરણાદિતિ ચેન્ન । સંસારોઽનાદિઃ । તસ્માદુત્તરોત્તરસૃષ્ટેઃ પૂર્વપૂર્વસૃષ્ટૌ તત્તત્પ્રાણિકૃતં કર્મૈવ કારણમ્ । સૃષ્ટેરિદમ્પ્રથમત્વાસમ્ભવાન્નેશ્વરે દોષઃ ।

(૨૬૫)

જીવભોગાર્થમીશ્વરસ્ય જગત્સિસૃક્ષા - જીવકર્મફલપ્રદાનાદ્યદેશ્વરો વિમુખો ભવતિ તદા જગત્પ્રલયો ભવતિ । પ્રલયે સર્વપદાર્થસંસ્કારા માયાયાં લીના ભવન્તિ । તસ્માજ્જીવાનાં કર્મશેષોઽપિ સૂક્ષ્મરૂપેણ માયાયાં નિલીનો ભવતિ । યદા પ્રાણિનાં કર્મફલદાનાભિમુખો ભવતીશ્વરસ્તદા “જીવાનાં ભોગાર્થમહં જગત્ સૃજે” ઇતીશ્વરસ્યેચ્છા જાયતે ।

## (A. 266-270) સૂક્ષ્મસૃષ્ટિનિરૂપણમ્-

(૨૬૬)

સૂક્ષ્મપઞ્ચભૂતાનાં તદ્ગુણાનાં ચોત્પત્તિઃ - એતાદૃશેશ્વરેચ્છાવશાત્ માયા તમોગુણપ્રધાના ભવતિ તાદૃશતમોગુણપ્રધાનમાયાસકાશાત્ આકાશવાયુતેજોજલપૃથિવ્યાત્મકપઞ્ચભૂતાન્યુત્પદ્યન્તે । તેષુ ભૂતેષુ ક્રમેણ

૧. યથા પુત્રાર્થિની જાયા પત્યા સઙ્ગતા શુક્રરૂપં બીજમ્, તતઃ
ક્રમેણ પુત્રરૂપેણ પરિણતં ગર્ભં ચ વહન્તી પ્રસવાત્પૂર્વં
સન્તતિલાભનિમિત્તેન સદા પ્રસન્ના સત્ત્વગુણપ્રધાનેવ
ભવતિ । પશ્ચાત્પ્રસવકાલે વેદનાનિમિત્તેન પ્રસન્નતાયાઃ
તિરોધાને સતિ શૂન્યચિત્તા તમોગુણપ્રધાનેવ ભવતિ;
યથા વા પૂર્વં શ્વેતવર્ણો મેઘો વર્ષાકાલે શ્યામો ભવતિ;
તથા સૃષ્ટેઃ પૂર્વં બ્રહ્મપ્રતિબિમ્બરૂપજગદ્બીજધારિણી
અવિદ્યોપાધિકાનન્તજીવસહિતપ્રપઞ્ચરૂપગર્ભધારિણી
ચ શુદ્ધસત્ત્વપ્રધાના માયા (ઈશ્વરસ્યોપાધિઃ) ભવતિ ।
પશ્ચાત્સૃષ્ટ્યારમ્ભકાલે સા માયા શુદ્ધસત્ત્વસ્વરૂપતિરોધાનેન
સૃષ્ટિયોગ્યતમોગુણપ્રધાનપ્રકૃતિરૂપા ભવતિ ।

શબ્દસ્પર્શરૂપરસગન્ધાખ્યપઞ્ચગુણા વર્તન્તે ।
માયાયાઃ સકાશાચ્છબ્દસહિત આકાશ ઉત્પન્નઃ । આકાશાદ્વાયુઃ ।

વાયોરાકાશકાર્યત્વાત્કારણગુણેન શબ્દેન સ્વાસાધારણગુણસ્પર્શેન ચ દ્વિગુણો વાયુઃ । વાયોરગ્નિઃ સમ્ભૂતઃ । કારણાકાશવાયુગુણાભ્યાં શબ્દસ્પર્શાભ્યાં સ્વાસાધારણરૂપગુણેન ચ ત્રિગુણોઽગ્નિઃ । અગ્નેરાપઃ સમ્ભૂતાઃ । કારણાકાશવાય્વગ્નિગુણૈઃ શબ્દસ્પર્શરૂપૈઃ સ્વાસાધારણરસગુણેન ચ ચતુર્ગુણા આપઃ । અદ્ભ્યઃ પૃથિવી સમ્ભુતા । કારણાકાશવાય્વગ્ન્યબ્ગુણૈઃ શબ્દસ્પર્શરૂપરસૈઃ સ્વાસાધારણગન્ધગુણેન ચ પઞ્ચગુણા પૃથિવી । આકાશે પ્રતિધ્વનિરૂપશબ્દો વર્તતે । વાયૌ બીસીતિશબ્દઃ, શીતોષ્ણકઠિનાનાં વિલક્ષણસ્પર્શશ્ચ વર્તતે । અગ્નૌ ભુગ્ભુગ્શબ્દઃ, ઉષ્ણસ્પર્શઃ, પ્રકાશાખ્યરૂપં ચ વર્તતે । જલે ચિલિચિલિશબ્દઃ, શીતસ્પર્શઃ, શુક્લરૂપમ્, મધુરરસશ્ચ વર્તતે । લવણતિક્તતાદિરસાસ્તુ પૃથિવીસમ્બન્ધાદેવ જલે વિભાન્તિ । માધુર્યમેવ સ્વાભાવિકરસો જલસ્ય । સ ચ હરીતક્યામલકાદિભક્ષણસંસ્કૃતરસનયા જલપાનેઽભિવ્યજ્યતે । પૃથિવ્યાં કડકડાશબ્દઃ, અનુષ્ણાશીતસ્પર્શઃ, શુક્લકૃષ્ણપીતરક્તહરિતાદિરૂપમ્, મધુરામ્લલવણકટુકષાયતિક્તાખ્યષડ્રસાઃ, સુગન્ધદુર્ગન્ધરૂપદ્વિવિધગન્ધશ્ચ વર્તતે । ઇત્થમાકાશે એકો ગુણઃ । વાયૌ દ્વૌ । અગ્નૌ ત્રયઃ । જલે ચત્વારઃ । પૃથિવ્યાં પઞ્ચગુણાઃ । તત્રાપિ પ્રતિભૂતં પ્રાતિસ્વિકગુણસ્ત્વેક એવ । તદિતરગુણાઃ કારણાદનુગતાઃ । સર્વસ્ય મૂલકારણમીશ્વરઃ । ઈશ્વરે ચાંશદ્વયમસ્તિ । ચૈતન્યાંશો માયાંશશ્ચેતિ । સર્વેષુ ભૂતેષુ વિદ્યમાનો નામરૂપાત્મકમિથ્યાંશો માયાયાઃ, સત્તાસ્ફુર્તિરૂપાંશસ્તુ ચૈતન્યસ્યેતિ જ્ઞેયમ્ ।

## (૨૬૭)

ચતુર્વિધભેદસહિતાન્તઃકરણોત્પત્તિઃઅપઞ્ચીકૃતપઞ્ચભૂતાનાં સત્ત્વગુણાંશસમષ્ટિઃ સત્ત્વં ઇત્યભિધીયમાનમન્તઃકરણમુત્પાદયતિ । અન્તઃકરણં જ્ઞાનોત્પત્તિહેતુઃ । જ્ઞાનોત્પત્તિઃ સત્ત્વગુણાદિત્યઙ્ગીકૃતમ્ । “સત્ત્વાત્સઞ્જાયતે જ્ઞાનમ્” (ભ. ગી. ૧૪.૧૭) ઇતિ । તસ્માદન્તઃકરણં ભૂતાનાં સત્ત્વગુણકાર્યમ્ । તચ્ચાન્તઃકરણમપઞ્ચીકૃતપઞ્ચભૂતવ્યષ્ટિસત્ત્વગુણકાર્યપઞ્ચજ્ઞાનેન્દ્રિ સ્વસ્વવિષયગ્રહણે સહકારિ । તસ્માદપિ પઞ્ચભૂતસમષ્ટિસત્ત્વગુણકાર્યમેવાન્તઃકરણમ્ । ન વૈશેષિકાદીનામિવાન્તઃકરણં નિત્યમ્ । અન્તઃ = દેહસ્યાન્તઃ સ્થિત્વા, કરણં = જ્ઞાનસાધનં ઇત્યન્તઃકરણં ઉચ્યતે । પઞ્ચભૂતસમષ્ટિસત્ત્વગુણકાર્યત્વેનાન્તઃકરણં સત્ત્વં ઇત્યપિ કીર્ત્યતે । અન્તઃકરણપરિણામસ્ય વૃત્તિરિતિ

સંજ્ઞા । અન્તઃકરણસ્ય વૃત્તયશ્ચતસ્રઃ । તત્ર પદાર્થસ્ય સ્વરૂપનિશ્ચયાત્મિકા વૃત્તિર્બુદ્ધિઃ । સઙ્કલ્પાત્મિકા વૃત્તિર્મનઃ । ચિન્તનાત્મિકા વૃત્તિશ્ચિત્તમ્ । "અહમ્" ઇત્યભિમાનાત્મિકા વૃત્તિરહઙ્કારઃ ।

## (૨૬૮)

પઞ્ચભેદસહિતપ્રાણોત્પત્તિઃઅપઞ્ચીકૃતપઞ્ચભૂતસમષ્ટિરજોગુણાંશાત્ પઞ્ચવૃત્તિપ્રાણઃ સમ્ભૂતઃ । સ પ્રાણઃ ક્રિયાભેદાત્ સ્થાનભેદાચ્ચ પઞ્ચવિધઃ । યસ્ય હૃદયં સ્થાનમ્, ક્ષુત્પિપાસે ક્રિયા સ પ્રાણઃ । યસ્ય ગુદઃ સ્થાનમ્, મૂત્રપુરીષયોરધોનયનં ક્રિયા સ અપાનઃ । યસ્ય નાભિઃ સ્થાનમ્, ભુક્તપીતયોરન્નપાનયોઃ પાચનયોગ્યસમીકરણં ક્રિયા સ સમાનઃ । યસ્ય કણ્ઠઃ સ્થાનમ્, શ્વાસઃ ક્રિયા સ ઉદાનઃ । યસ્ય સર્વશરીરં સ્થાનમ્, અન્નપાનાદિરસસ્ય સર્વનાડીષુ પ્રવેશનં ક્રિયા સ વ્યાનઃ । ક્વચિત્ નાગકૂર્મકૃકરદેવદત્તધનઞ્જયાખ્યાઃ પઞ્ચ વાયવોઽધિકતયા પઠ્યન્તે । તત્રોદ્ગમનકૃત્ નાગઃ । ઉન્મીલનહિક્કાદિકૃત્ કૂર્મઃ । ક્ષુતહેતુઃ કૃકરઃ । જૃમ્ભણકરો દેવદત્તઃ । શ્વયથુકરો ધનઞ્જયઃ । એત ઉપવાયવઃ । તેષાં ચ પૃથિવીજલતેજોવાય્વાકાશાનાં રજોગુણાંશેભ્યઃ ક્રમેણોત્પત્તિઃ । તથૈવાપાનસમાનપ્રાણોદાનવ્યાનાનામપિ ક્રમેણ પૃથિવ્યાદીનામેકૈકસ્ય રજોગુણાંશાદુત્પત્તિઃ । સર્વેષાં સમષ્ટિરજોગુણાંશાન્નોત્પત્તિઃ ઇતિ ચોક્તં ક્વચિદ્ગ્રન્થેષુ । પરન્ત્વદ્વૈતસિદ્ધાન્તે એષા પ્રક્રિયા નાસ્તિ । વિદ્યારણ્યસ્વામિભિઃ, પઞ્ચીકરણગ્રન્થે વાર્તિકકારૈશ્ચ સૂક્ષ્મશરીરે પઞ્ચકોશે ચ નાગકૂર્માદીનાં ગ્રહણં ન કૃતમ્ । અપિ ચ તૈરપાનાદિપઞ્ચપ્રાણાનાં પઞ્ચભૂતસમષ્ટિરજોગુણાંશાદુત્પત્તિર્વર્ણિતા । તસ્માદેકૈકભૂતવ્યષ્ટિરજોગુણાંશાદપાનાદીનામુત્પત્તિકથનમયુક્તમેવ । તસ્માત્સૂક્ષ્મશરીરે નાગકૂર્માદીનાં ગ્રહણમસઙ્ગતમ્ । પઞ્ચપ્રાણાનામેવ સૂક્ષ્મશરીરે ગ્રહણં યુક્તમ્ । કિઞ્ચ પ્રાણો વિક્ષેપરૂપઃ । રજોગુણસ્ય વિક્ષેપઃ સ્વભાવઃ । તસ્માત્પઞ્ચભૂતરજોગુણાંશાત્પ્રાણોત્પત્તિકથનં યુક્તમેવ ।

## (૨૬૯)

જ્ઞાનેન્દ્રિયાણાં કર્મેન્દ્રિયાણાં ચોત્પત્તિઃઅપઞ્ચીકૃતૈકૈકભૂતસત્ત્વગુણાંશાત્ પઞ્ચજ્ઞાનેન્દ્રિયાણિ રચિતાનિ । એકૈકભૂતરજોગુણાંશાદેકૈકં કર્મેન્દ્રિયં રચિતમ્ । આકાશસ્ય સત્ત્વગુણાત્ શ્રોત્રમ્, વાયોઃ સત્ત્વગુણાંશાત્ ત્વક્, તેજસઃ સત્ત્વગુણાંશાત્ નેત્રમ્, જલસ્ય સત્ત્વગુણાંશાત્ રસના, પૃથિવ્યાઃ સત્ત્વગુણાંશાત્ ઘ્રાણં ચાજાયત । એતાનિ પઞ્ચેન્દ્રિયાણિ જ્ઞાનસ્ય સાધનાનિ, અતો જ્ઞાનેન્દ્રિયાણીત્યુચ્યન્તે । જ્ઞાનં સત્ત્વગુણાજ્જાયતે । અતશ્ચૈતાનિ પઞ્ચેન્દ્રિયાણિ ભૂતાનાં સત્ત્વગુણાદુત્પન્નત્વેનોચ્યન્તે । શ્રોત્રેન્દ્રિયમાકાશસ્ય ગુણં શબ્દં ગૃહ્ણાતીતિ તદાકાશસ્ય સત્ત્વગુણકાર્યમ્ । એવમેવ યદિન્દ્રિયં યસ્ય ભૂતસ્ય ગુણં ગૃહ્ણાતિ તત્તસ્ય ભૂતસ્ય સત્ત્વગુણકાર્યમિતિ જ્ઞેયમ્ । આકાશસ્ય રજોગુણાંશાત્ વાક્, વાયો રજોગુણાંશાત્ પાણિઃ, અગ્ને રજોગુણાંશાત્ પાદઃ, જલસ્ય રજોગુણાંશાત્ ઉપસ્થઃ, પૃથિવ્યા રજોગુણાંશાત્ ગુદં ચોત્પદ્યતે । સ્ત્રીયોનૌ પુરુષલિઙ્ગે ચ વર્તમાનં વિષયાનન્દલવસાધનમિન્દ્રિયં ઉપસ્થ ઇત્યુચ્યતે । કર્મેતિ ક્રિયોચ્યતે । એતાનિ પઞ્ચેન્દ્રિયાણિ ક્રિયાસાધનત્વાત્ કર્મેન્દ્રિયાણીત્યભિધીયન્તે । ક્રિયાયા રજોગુણકાર્યત્વાદ્ભૂતાનાં રજોગુણાંશાત્કર્મેન્દ્રિયોત્પત્તિર્વર્ણિતા । ઇત્થં સૂક્ષ્મસૃષ્ટિર્નિરૂપિતા ।

## (૨૭૦)

સૂક્ષ્મસૃષ્ટેરુપસંહારઃઅપઞ્ચીકૃતભૂતાનિ તત્કાર્યભૂતાન્તઃકરણપ્રાણકર્મેન્દ્રિયાણિ સૂક્ષ્મસૃષ્ટિરિતિ કીર્ત્યતે । સૂક્ષ્મસૃષ્ટિવિષયકં જ્ઞાનં નેન્દ્રિયૈરુત્પદ્યતે । નેત્રનાસિકાદિગોલકાનિ તુ યદ્યપીન્દ્રિયવિષયાણિ તથાપિ તત્તદ્ગોલકાન્તઃસ્થેન્દ્રિયાણિ ન કસ્યચિદપીન્દ્રિયસ્ય વિષયીભવન્તિ । સૂક્ષ્મસૃષ્ટ્યુત્પત્ત્યનન્તરમીશ્વરેચ્છયા સ્થૂલસૃષ્ટિનિમિત્તં ભૂતાનાં પઞ્ચીકરણં નિષ્પદ્યતે ।

# (A. 271-272) સ્થૂલસૃષ્ટિઃ-

## (૨૭૧)

પઞ્ચીકરણપ્રકારઃપઞ્ચીકરણે દ્વૌ પ્રકારાવુક્તૌ । પ્રથમપ્રકારસ્ત્વેવં - એકૈકસૂક્ષ્મભૂતસ્ય તમોગુણાંશં સામ્યેન દ્વિધા વિભજેત્ । તત્રૈકમર્ધં પૃથગવસ્થાપયેત્ । તતોઽપરમર્ધં સામ્યેન ચતુર્ધા વિભજેત્ । એવં પુનર્વિભાગેન નિષ્પન્નમેકૈકભૂતસ્યાષ્ટમમંશં પૃથગવસ્થાપિતેન સ્વસ્વેતરભૂતચતુષ્ટયસ્યાર્ધભાગેન યોજયેત્ । એવં પઞ્ચીકરણં નિષ્પદ્યતે । તત્રૈકૈકસ્મિન્નપિ સ્થૂલભૂતે એકમર્ધં સ્વાંશઃ । અપરમર્ધં તુ સ્વેતરૈકૈકભૂતાષ્ટમાંશમેલનેન નિષ્પન્નમ્ । એવમેકૈકસ્મિન્નપિ સ્થૂલભૂતે પઞ્ચાનામપિ ભૂતાનામંશસત્ત્વાત્ સ્થૂલભૂતાનિ પઞ્ચીકૃતાનીતિ વર્ણ્યન્તે । દ્વિતીયપ્રકારસ્ત્વેવં - એકૈકસૂક્ષ્મભૂતસ્ય તમોગુણાંશં વૈષમ્યેણ દ્વિધા વિભજેત્ । તત્રૈકો ભાગશ્ચતુર્ભિરંશૈર્નિષ્પન્નઃ । અપરસ્તુ ભાગઃ પઞ્ચમાંશેન । તત્ર

૧. પ્રથમપ્રકારે પ્રતિભૂતમર્ધભાગસ્ય
સ્વકીયત્વેઽપીતરાર્ધભાગસ્ય સ્વેતરભૂતચતુષ્ટયાંશનિષ્પન્નત્વાત્
તેન ભાગેન સ્વભાગસ્ય તિરોધાનં સમ્ભાવ્યેત । તતશ્ચાકાશાદીનાં
ભૂતાનાં પ્રત્યેકં પૃથક્ પૃથગ્ભાનં દુર્ઘટં સ્યાદિતિ
મત્વા યથા પ્રતિભૂતં સ્વાંશાધિક્યં સ્યાત્તથા દ્વિતીયઃ
પ્રકાર આશ્રીયતે । ચતુરંશનિષ્પન્નમધિકપરિમાણકં ભાગં
પૃથગવસ્થાપયેત્ । પઞ્ચમાંશનિષ્પન્નં ન્યૂનપરિમાણકં
ભાગં પુનઃ પઞ્ચધા વિભજેત્ । તત્રૈકમેકમંશં
પૃથગવસ્થાપિતાધિકપરિમાણકપઞ્ચભાગેષુ પૃથક્
પૃથગ્યોજયેત્ । અનેનાપિ પ્રકારેણ પઞ્ચીકરણં સિદ્ધ્યતિ
। તત્ર પ્રથમપ્રકારે પ્રતિભૂતમેકમર્ધં સ્વાંશઃ ।
અપરમર્ધં તુ સ્વેતરભૂતચતુષ્ટયસ્યાંશઃ । યથા આકાશે
એકમર્ધં સ્વસ્યૈવાંશઃ । દ્વિતીયમર્ધં તુ વાયોરષ્ટમાંશેન,
તેજસોઽષ્ટમાંશેન, જલસ્યાષ્ટમાંશેન, પૃથિવ્યા અષ્ટમાંશેન
ચ નિષ્પન્નમ્ । એવં ભૂતાન્તરેષ્વપ્યૂહ્યમ્ । દ્વિતીયપ્રકારે

તુ પ્રતિભૂતમેકો ભાગઃ સ્વકીયૈરેકવિંશત્યંશૈર્નિષ્પન્નઃ ।
દ્વિતીયો ભાગસ્તુ સ્વેતરભૂતાનાં ચતુર્ભિરંશૈર્નિષ્પન્નઃ । યથા
આકાશે એકો ભાગઃ સ્વકીયૈકવિંશત્યંશાત્મકઃ । અપરો ભાગસ્તુ
વાયોઃ પઞ્ચવિંશાંશેન, તજસઃ પઞ્ચવિંશાંશેન, જલસ્ય
પઞ્ચવિંશાંશેન, પૃથિવ્યાઃ પઞ્ચવિંશાંશેન ચ નિષ્પન્નઃ ।
એવં ભૂતાન્તરેષ્વપ્યૂહનીયમ્ । પ્રથમપ્રકારાપેક્ષયા દ્વિતીયપ્રકારે
પ્રતિભૂતં સ્વાંશાધિક્યાદ્વિવિચ્ય પૃથક્ પૃથગાકાશાદીનાં ભાનં
સુઘટં ભવતિ ।

## (૨૭૨)

સ્થૂલબ્રહ્માણ્ડાદ્યુત્પત્તિઃએવં પઞ્ચીકૃતભૂતેભ્ય ઇન્દ્રિયગોચરં સ્થૂલબ્રહ્માણ્ડં ઉત્પદ્યતે । તસ્મિન્ બ્રહ્માણ્ડે ભૂર્ભુવસ્વર્મહર્જનસ્તપસ્સત્ય ઇત્યુપરિ સપ્ત લોકાઃ, અતલસુતલપાતાલવિતલરસાતલતલાતલમહાતલા ઇત્યધઃ સપ્ત લોકા વર્તન્તે । એષુ ચતુર્દશસુ લોકેષુ વસતાં જીવાનાં પૃથક્પૃથગુપભોગયોગ્યાન્નપાનાદિકં, દેવમનુષ્યપશ્વાદિરૂપાણિ ભોગાયતનાનિ સ્થૂલશરીરાણિ ચોત્પદ્યન્તે । ઇત્થં સઙ્ક્ષેપેણ સૃષ્ટિરુક્તા । માયાવૈભવસ્ય વિસ્તરેણ નિરૂપણં તુ કોટિબ્રહ્માયુષાપિ ન શક્યતે । માયાસૃષ્ટપદાર્થાનાં નાન્તોઽસ્તીતિ વાલ્મીકિર્વાસિષ્ઠે નાનેતિહાસૈર્નિરૂપતિવાન્ ।

## (A. 273-183) આત્મવિવેકઃ, અથવા પઞ્ચકોશવિવેકઃ-

## (૨૭૩)

પઞ્ચકોશાસ્તૈરાત્મન આવરણં ચ૧. સ્થૂલશરીરં - સ્થૂલસૂક્ષ્મકારણાત્મકાનિ ત્રીણિ શરીરાણિ સન્તિ । પ્રતિક્ષણં શીર્યમાણત્વાત્ શરીરં ઇતિ વ્યપદેશઃ । દહ્યમાનત્વાત્ દેહ ઇતિ તસ્યૈવ વ્યપદેશઃ । લોમત્વક્સિરામાંસાસ્થિમજ્જાનાં ષણ્ણાં સમુદાયઃ સ્તમ્ભાદિવત્પ્રત્યક્ષેણોપલભ્યમાનત્વાત્ સ્થૂલદેહ ઇત્યુચ્યતે । સ ચ દેહઃ પઞ્ચવિંશતિતત્ત્વાત્મકઃ । તાનિ ચ તત્ત્વાનિ નિમ્નદેશે પ્રદર્શિતપતાકયા સુખં જ્ઞાતું શક્યાનિ ॥ માયાયાં તત્કાર્યેષુ ચ ત્રીણિ શરીરાણિ પઞ્ચ કોશાશ્ચાન્તર્ભવન્તિ । શુદ્ધસત્ત્વગુણપ્રધાના માયેશ્વરસ્ય કારણશરીરમ્ । મલિનસત્ત્વપ્રધાનાવિદ્યાંશો જીવસ્ય કારણશરીરમ્ ।
તદંશા એતે
મુખ્યતત્ત્વાનિ
પૃથિવી
આપઃ
તેજઃ

વાયુઃ

આકાશઃ

પૃથિવી

અસ્થિ

માંસં

નાડ્યઃ

ત્વક્

લોમ

આપઃ

રક્તં

શુક્રં

મૂત્રં

સ્વેદઃ

લાલા

તેજઃ

આલસ્યં

કાન્તિઃ

ક્ષુત્

પિપાસા

નિદ્રા

વાયુઃ

આકુઞ્ચનં

ગમનં

સ્થિતિઃ

ધાવનં

પ્રસારણં

આકાશઃ

ભયં અથવા કટિઃ

મોહઃ અથવા ઉદરં

ક્રોધઃ અથવા હૃદયં

કામઃ અથવા કણ્ઠઃ

શોકઃ અથવા શિરઃ

॥અસ્યાઃ પતાકાયા વિવરણં - પૃથિવ્યંશેન પૃથિવ્યંશસમ્બન્ધેઽસ્થિ, અબંશસમ્બન્ધે માંસમ્, તેજોંઽશસમ્બન્ધે નાડ્યઃ, વાય્વંશસમ્બન્ધે ત્વક્, આકાશાંશસમ્બન્ધે લોમાનિ ચોત્પદ્યતે । ઇત્થમેવ તત્તદ્ભૂતાંશસમ્બન્ધે તત્ત્વાન્તરાણિ સમ્ભવન્તીતિ વિજ્ઞેયમ્ । પઞ્ચવિંશતિતત્ત્વાનાં પઞ્ચભૂતલક્ષણમુચ્યતે - (ક) આકાશે (૧) ભયકાલે પૃથિવીવચ્છરીરસ્ય જાડ્યસમ્ભવાદ્ભયં પૃથિવ્યંશઃ । (૨) પુત્રદારાદિષુ જલવત્ પ્રસરણાન્મોહો જલાંશઃ । (3) અગ્નિવદ્દાહકત્વાત્ ક્રોધોઽગ્ન્યંશઃ । (૪) વાયુવચ્ચઞ્ચલાત્મકત્વાત્ કામો વાય્વંશઃ । (૫) શોક- સમયે આકાશવદ્દેહસ્ય શૂન્યતાપત્તેઃ શોક આકાશાંશઃ । (ખ) વાયૌ (૬) પૃથિવીવત્ સઙ્કુચ્યમાનત્વાત્ આકુઞ્ચનં પૃથિવ્યંશઃ । (૭) જલવચ્ચલનાત્મકત્વાદ્ગમનં જલાંશઃ । (૮) તેજોવચ્છોષણાત્ પ્રકાશનાદ્વા સ્થિતિરગ્ન્યંશઃ । (૯) વાયુવદ્ધાવનાદ્ધાવનં વાય્વંશઃ । (૧૦) આકાશવત્પ્રસરણાત્ પ્રસરણમાકાશાંશઃ । (ગ) તેજસિ (૧૧) જડસ્વાભાવ્યાદાલસ્યં પૃથિવ્યંશઃ । (૧૨) જલવદ્દ્રૂમવિશિષ્ટત્વાત્ કાન્તિર્જલાંશઃ । (૧૩) ભુક્તસ્ય ભસ્મીકરણાત્ ક્ષુત્ તેજોંઽશઃ । (૧૪) શીકરશોષકવાયુવત્ કણ્ઠશોષણાત્ પિપાસા વાય્વંશઃ । (૧૫) નિદ્રાગમે આકાશવચ્છરીરસ્ય શૂન્યત્વાપાદનાન્નિદ્રા આકાશાંશઃ । (ઘ) અપ્સુ (૧૬) જપાકુસુમાદિવદ્રક્તવર્ણત્વાદ્રક્તં પૃથિવ્યંશઃ । (૧૭) જલવદ્દ્રવીભૂતત્વાત્ ગર્ભહેતુભૂતશુક્રં જલાંશઃ । (૧૮) તેજોવદુષ્ણરૂપત્વાન્મૂત્રં તજોંઽશઃ । (૧૯) વાય્વધીનવૃષ્ટિવત્ સ્વેદસ્ય શ્રમોત્પન્નત્વાત્ સ્વેદો વાય્વંશઃ । (૨૦) આકાશવદધરોત્તરગામિત્વાત્ લાલા આકાશાંશઃ । (ઙ) પૃથિવ્યાં (૨૧) કાઠિન્યાદસ્થિ પૃથિવ્યંશઃ । (૨૨) આર્દ્રત્વાત્ માંસં જલાંશઃ । (૨૩) નાડીભ્યસ્તાપસમ્ભવાન્નાડ્યસ્તેજોંઽશઃ । (૨૪) શીતોષ્ણત્વાત્ ત્વગ્વાય્વંશઃ । (૨૫) આકાશવત્ કૃન્તનેઽપ્યપીડ્યમાનતયા સ્થિતત્વાલ્લોમાકાશાંશઃ । એતે ભયમોહાદયો યદ્યપિ સૂક્ષ્મશરીરસ્યૈવાસાધારણા ધર્માસ્તથાપિ જલાશ્રયઘટે જલનિષ્ઠશૈત્યોપલબ્ધિવત્ સ્થૂલદેહમાશ્રિત્યોપલભ્યમાનત્વાત્ સ્થૂલદેહસ્ય ધર્મા ઇત્યુપચારત ઉચ્યન્તે । અત એવૈતે સ્થૂલદેહતત્ત્વેષુ પરિગણિતાઃ । એતત્પઞ્ચવિંશતિતત્ત્વસમુદાયસ્ય સ્થૂલ-॥ ઉત્તરશરીરારમ્ભકપઞ્ચસૂક્ષ્મભૂતાનિ મનોબુદ્ધિચિત્તાહઙ્કારાશ્ચત્વારઃ, પઞ્ચ પ્રાણાઃ, પઞ્ચ કર્મેન્દ્રિયાણિ, પઞ્ચ જ્ઞાનેન્દ્રિયાણિ ચ મિલિત્વા જીવસ્ય સૂક્ષ્મશરીરં ભવતિ । સકલજીવાનાં સૂક્ષ્મશરીરાણિ મિલિત્વા ઈશ્વરસ્ય સૂક્ષ્મશરીરં ભવતિ । સકલમપિ સ્થૂલં બ્રહ્માણ્ડં ઈશ્વરસ્ય સ્થૂલશરીરં ભવતિ । જીવસ્ય વ્યષ્ટિસ્થૂલશરીરં તુ પ્રસિદ્ધમેવ । શરીરત્રયેઽસ્મિન્નેવ પઞ્ચકોશા અન્તર્ભવન્તિ । કારણશરીરે આનન્દમયકોશસ્યાન્તર્ભાવઃ । સૂક્ષ્મશરીરે વિજ્ઞાનમયમનોમયપ્રાણમયાનાં ત્રયાણાં કોશાનામન્તર્ભાવઃ । પઞ્ચ જ્ઞાનેન્દ્રિયાણિ નિશ્ચયાત્મકાન્તઃકરણવૃત્તિરૂપા બુદ્ધિશ્ચ મિલિત્વા વિજ્ઞાનમયકોશ ઇત્યુચ્યતે । પઞ્ચ જ્ઞાનેન્દ્રિયાણિ સઙ્કલ્પવિકલ્પાત્મકાન્તઃકરણવૃત્તિરૂપમનશ્ચ મિલિત્વા મનોમયકોશઃ । પઞ્ચ પ્રાણાઃ પઞ્ચ કર્મેન્દ્રિયાણિ ચ મિલિત્વા પ્રાણમયકોશઃ । સ્થૂલશરીરં અન્નમયકોશ ઇત્યુચ્યતે ઇતિ શરીરત્રયે પઞ્ચાપિ કોશા અન્તર્ભવન્તિ । ઈશ્વરશરીરે ઈશ્વરકોશાઃ, જીવશરીરે જીવકોશાશ્ચ વર્તન્તે । કોશો નામાચ્છાદનં પિધાનં વોચ્યતે । અસિપિધાનં યથા અસિસ્વરૂપમાચ્છાદયતિ તથૈતે પઞ્ચ કોશા આત્મનઃ સ્વરૂપમાચ્છાદયન્તીત્યન્નમયાદયઃ કોશા ઇતિ કીર્ત્યન્તે । અનેકે મન્દમતયો ગુરુશાસ્ત્રસમ્પ્રદાયવિહીના પઞ્ચકોશાન્તર્ગતમનાત્મ॥દેહ ઇતિ વ્યવહારઃ । નામરૂપવર્ણાશ્રમજાતિજન્મમરણાદયો ધર્માઃ સ્થૂલદેહસ્યૈવ । ભુક્તસ્યાન્નસ્ય સ્થવિષ્ઠો ભાગઃ પુરીષં ભવતિ । મધ્યમો ભાગો માંસં ભવતિ । સૂક્ષ્મો ભાગો મન ઉપચિનોતિ । પીતસ્ય જલસ્ય સ્થૂલાંશો મૂત્રં ભવતિ । મધ્યમોંઽશો રક્તં ભવતિ । સૂક્ષ્મોંઽશઃ પ્રાણોપચયં કરોતિ । ભક્ષિતસ્ય તૈલઘૃતાદિસ્નેહદ્રવ્યસ્ય સ્થૂલાંશોઽસ્થિ

ભવતિ । મધ્યમોંઽશો મેદો ભવતિ । સૂક્ષ્મોંઽશો વાચમુપચિનોતિ । માતુઃ શોણિતાત્ શિશો રક્તમાંસચર્માણિ જાયન્તે । પિતુઃ શુક્રાદસ્થિનાડીમજ્જા જાયન્તે । એતત્ સ્થૂલશરીરં ચતુર્વિધં ભવતિ, અણ્ડજં જરાયુજં સ્વેદજમુદ્ભિજ્જમિતિ । અણ્ડાજ્જાયમાનપક્ષિસર્પાદયોઽણ્ડજાઃ । ઉલ્બાજ્જાયમાનમનુષ્યમૃગાદયો જરાયુજાઃ । સ્વેદાજ્જાયમાનયૂકામશકાદયઃ સ્વેદજાઃ । બીજં ભૂમિં વોદ્ભિદ્ય જાયમાના વૃક્ષૌષધિવીરુધાદય ઉદ્ભિજ્જાઃ ।
સૂક્ષ્મશરીરં - અપઞ્ચીકૃતપઞ્ચભૂતકાર્યાત્મકસપ્તદશતત્ત્વોપેતં સૂક્ષ્મશરીરમિત્યુક્તમ્
આત્મબોધેપઞ્ચપ્રાણમનોબુદ્ધિદશેન્દ્રિયસમન્વિતમ્ ।
અપઞ્ચીકૃતભૂતોત્થં સૂક્ષ્માઙ્ગં ભોગસાધનમ્ ॥ ૧૩॥ ઇતિ ।
તત્ર પ્રાણાઃ પઞ્ચ, કર્મેન્દ્રિયાણિ પઞ્ચ, જ્ઞાનેન્દ્રિયાણિ પઞ્ચ, મન એકમ્, બુદ્ધિશ્ચૈકેતિ
સપ્તદશતત્ત્વાનિ મિલિત્વા લિઙ્ગં ઇત્યુચ્યતે । શુભાશુભકર્મકર્તૃત્વમ્, સુખદુઃખાદિફલભોક્તૃત્વમ્, ઇહલોકપરલોકાદિગમનાગમને, રાગદ્વેષાદિ, શમદમાદિ, આન્ધ્યમાન્ધ્યપટુત્વાદિ ચ
સર્વં લિઙ્ગશરીરધર્માઃ । સ્થૂલશરીરવત્પ્રત્યક્ષપ્રમાણાગોચરત્વાત્સૂક્ષ્મશરીરમિત્યુચ્યતે ।
શબ્દાદિવિષયોપલબ્ધિહેતુત્વાત્, લક્ષણયા આત્માવબોધકત્વાચ્ચ લિઙ્ગદેહ ઇતિ કીર્ત્યતે ॥

ભૂતં યં કમપિ પદાર્થમાત્મત્વેન મન્યમાનાઃ કોશાનાં સાક્ષિભૂતાન્મુખ્યાત્મસ્વરૂપાદ્વિમુખા ભવન્તિ । અત એવાન્નમયાદયઃ કોશા આત્મસ્વરૂપાચ્છાદકા ઇતિ વર્ણ્યન્તે ।

## (૨૭૪)

વિરોચનસિદ્ધાન્તઃ (અન્નમયકોશાત્મવાદઃ) કેચન પામરા વિરોચનસિદ્ધાન્તમનુસરન્તોઽન્નમયકોશમેવાત્મેતિ વદન્તિ । તત્રૈવં યુક્તીઃ કથયન્તિ । (૧) યત્રાહમિતિ ધીરુત્પદ્યતે, સ આત્મા । સા ચાહન્ધીઃ સ્થૂલશરીરે ભવતિ । “અહં મનુષ્યઃ” “અહં બ્રાહ્મણઃ” ઇત્યનુભવઃ સાર્વજનીનઃ । મનુષ્યત્વબ્રાહ્મણત્વાદિધર્માઃ સ્થૂલશરીરસ્યૈવ । તસ્માદહન્ધીવિષય॥ કારણશરીરં - અજ્ઞાનમેવ કારણશરીરમિત્યુચ્યતે । સ્થૂલસૂક્ષ્મશરીરયોઃ કારણત્વાદજ્ઞાનં કારણશરીરમિત્યુચ્યતે । અસ્ય ચ સ્વરૂપં પ્રાગભિતિહમ્ । તત્ત્વજ્ઞાનદાહ્યત્વાત્ કારણદેહ ઇતિ ચોચ્યતેઽજ્ઞાનમેવ । ઈશ્વરસ્ય શરીરાણિ કોશાશ્ચ - સમષ્ટ્યજ્ઞાનરૂપમાયેશ્વરસ્ય કારણશરીરમ્ । સૈવેશ્વરસ્ય આનન્દમયકોશઃ । જીવાનાં સૂક્ષ્મશરીરસમષ્ટિરૂપહિરણ્યગર્ભઃ ઈશ્વરસ્ય સૂક્ષ્મશરીરમ્ । અત્રેશ્વરસ્ય વિજ્ઞાનમયમનોમયપ્રાણમયકોશા અન્તર્ભવન્તિ । શ્રોત્રાદિપઞ્ચજ્ઞાનેન્દ્રિયાધિષ્ઠાતૃદેવતારૂપદિક્પાલવાયુસૂર્યવરુણાશ્વિનીકુમારાત્મકાનિ યાનીશ્વરસ્ય પઞ્ચજ્ઞાનેન્દ્રિયાણિ તાનિ, સમષ્ટિબુદ્ધિમયમહત્તત્ત્વરૂપઃ, અથવા સર્વબુદ્ધ્યભિમાનિબ્રહ્મરૂપા યેશ્વરસ્ય બુદ્ધિઃ સા ચ મિલિત્વા ઈશ્વરસ્ય વિજ્ઞાનમયકોશઃ । પૂર્વોક્તશ્રોત્રાદ્યધિષ્ઠાતૃદેવતારૂપાણિ યાનીશ્વરસ્ય પઞ્ચ જ્ઞાનેન્દ્રિયાણિ તાનિ, સમષ્ટિમનોમયાહઙ્કારરૂપં વા સર્વમનોઽભિમાનિચન્દ્રરૂપં વા યદીશ્વરસ્ય મનસ્તચ્ચ મિલિત્વા ઈશ્વરસ્ય મનોમયકોશઃ । અગ્નીન્દ્રોપેન્દ્રપ્રજાપતિયમાત્મકાનિ યાનીશ્વરસ્ય પઞ્ચ કર્મેન્દ્રિયાણિ તાનિ, સમષ્ટિપ્રાણો વા વાય્વભિમા- નિદેવતારૂપો વા ય ઈશ્વરસ્ય પ્રાણઃ સ ચ મિલિત્વા ઈશ્વરસ્ય પ્રાણમયકોશઃ । સમષ્ટિસ્થૂલસૃષ્ટિરૂપો વિરાડીશ્વરસ્ય સ્થૂલશરીરમ્ । સ એવેશ્વરસ્યાન્નમયકોશઃ । પઞ્ચકોશઃ - માતાપિતૃભ્યામુપભુક્તાન્નરસપરિણામરૂપશુક્રશોણિતસમ્બન્ધાન્માતુરુદરે ઉત્પન્નો જનનાનન્તરમપિ

ક્ષીરશાકાદિરૂપાન્નેન વર્ધિતો મરણાનન્તરમપ્યન્નરૂપપૃથિવ્યામેવ લીયમાનો દેહોઽન્નમયકોશ ઉચ્યતે । પ્રાણમયકોશસ્તુ કેવલરજોગુણસ્યાવસ્થાવિશેષઃ । પ્રાણાદયો વાયવ આપાદમસ્તકં સ્થૂલદેહં વ્યાપ્ય, તસ્ય બલમાધાયેન્દ્રિયાણિ સ્વસ્વવ્યાપારેષુ પ્રવર્તયન્તિ । કર્મેન્દ્રિઐર્વ્યવહારનિર્વર્તનાદિચ્છાદિરૂપરજોગુણવૃત્તિસહિતત્વાચ્ચ મનોમયકોશઃ સત્ત્વરજોગુણયોરવસ્થાવિશેષઃ । વિજ્ઞાનમયકોશસ્તુ કેવલસત્ત્વગુણસ્યાવસ્થાવિશેષઃ । એવમવસ્થાભેદેનૈકસ્મિન્નેવ સૂક્ષ્મશરીરે ત્રયઃ કોશા વર્ણ્યન્તે । આનન્દ એવાત્મનઃ સ્વરૂપમ્ । આત્મસ્વરૂપાનન્દપ્રતિબિમ્બસહિતા પ્રિયમોદપ્રમોદરૂપવૃત્તિલયાવિધભૂતા યા અવિદ્યા સૈવ કારણદેહઃ । સૈવાનન્દમયકોશશ્ચ । ઇષ્ટવસ્તુદર્શનજન્યા વૃત્તિઃ પ્રિય ઇતિ, તલ્લાભજન્યા વૃત્તિઃ પ્રમોદ ઇતિ ચ કીર્ત્યતે । એતા વૃત્તયો જાગ્રત્સ્વપ્નયોરવસ્થયોઃ પુણ્યકર્મફલભૂતસુખાનુભવકાલે ઉદ્ભવન્તિ । સુષુપ્તૌ તા વૃત્તયઃ સ્વકારણેઽજ્ઞાને લીયન્તે એતાદૃશમજ્ઞાનમાનન્દમયકોશ ઇત્યુચ્યતે । તત્રાન્નમયકોશો ભોગસ્થાનમ્ ॥ સ્થુલદેહ એવાત્મા । અથવા યત્ર મુખ્યા પ્રીતિર્ભવતિ સ આત્મા । દારાપત્યધનપશ્વાદયો યતોઽસ્ય સ્થૂલદેહસ્યોપકુર્વન્તિ તતસ્તેષુ પ્રીતિર્ભવતિ । યદિ તેઽસ્ય સ્થુલદેહસ્ય નોપકુર્વન્તિ તદા તેષુ પ્રીતિર્નાસ્તિ । યસ્ય નિમિત્તેનાન્યત્ર પ્રીતિરુપજાયતે તસ્મિન્નેવ સ્થુલે દેહે મુખ્યા પ્રીતિઃ સર્વેષામ્ । તસ્માત્ સ્થુલદેહ એવાત્મા । તસ્માદ્વસ્ત્રાભરણાન્નપાનાદ્યુપકરણૈઃ સ્થૂલશરીરસ્ય સમલઙ્કૃત્ય પોષણમેવ પરમપુરુષાર્થ ઇત્યસુરરાજવિરોચનસ્ય સિદ્ધાન્તઃ । ॥ સૂક્ષ્મશરીરં ભોગસાધનમ્ । તત્રાપિ પ્રાણમયકોશઃ ક્રિયાશક્તિમત્ત્વાત્ કાર્યરૂપો ભવતિ । મનોમયકોશસ્તુ ઇચ્છાશક્તિમત્ત્વાત્કરણરૂપો ભવતિ । વિજ્ઞાનમયકોશસ્તુ જ્ઞાનશક્તિમત્ત્વાત્ કર્તૃરૂપો ભવતિ । આનન્દમયકોશસ્તુ ભોક્તૃરૂપઃ ।

૧. ચાર્વાકમતાનુસારિણો વાય્વાદિભૂતચતુષ્ટયસઙ્ઘાતરૂપં દેહમાત્મત્વેન પ્રતિપન્નાસ્તત્રૈતા યુક્તીરાહુઃ - (૧) અહન્ધીવિષયો યઃ સ આત્મા । “અહં મનુષ્યઃ” “અહં સ્થૂલઃ” “અહં કૃશઃ” “અહં બ્રાહ્મણઃ” ઇત્યાદ્યનુભવેષુ મનુષ્યત્વાદિધર્મવિશિષ્ટઃ સ્થૂલદેહ એવ વિષયો ભવતીતિ સ દેહ એવાત્મા । (૨) અથવા પરમપ્રેમવિષયો યઃ સ આત્મા । એતત્સ્થૂલદેહોપકારકત્વનિમિત્તં પુરસ્કૃત્યૈવ પુત્રમિત્રકલત્રાદયઃ પ્રિયા ભવન્તિ । અતો દેહ એવ પરમપ્રીતેર્વિષયઃ । એવં પરમપ્રેમાસ્પદત્વરૂપાત્મલક્ષણયોગાત્સ્થૂલદેહ એવાત્મા । (૩) તસ્ય દેહસ્યાલઙ્કરણપોષણાદિજન્યભોગ એવ પરમપુરુષાર્થઃ । (૪) મરણમેવ મોક્ષઃ । (૫) પ્રત્યક્ષમેકમેવ પ્રમાણં નાન્યત્પ્રમાણમસ્તીતિ । તદેતચ્ચાર્વાકમતમસઙ્ગતં - (૧) “અહં પશ્યામિ” “અહં વદામિ” ઇત્યાદિવ્યવહારેષ્વિન્દ્રિયસ્યાપ્યહન્ધીવિષયત્વં દૃશ્યતે । (૨) “મમ દેહઃ કૃશઃ” ઇત્યાદિવ્યવહારેષુ દેહસ્ય મમતાવિષયત્વમપિ ભવતિ । યો મમતાવિષયઃ સ અહન્તાવિષયો ન ભવિતુમર્હતિ । ઇત્થં સ્થૂલદેહે

અહન્ધીવિષયત્વસ્ય વ્યભિચારદર્શનાત્સ્થૂલદેહો નાત્મા ।
(૩) પુત્રદારાદ્યપેક્ષયા સ્થૂલદેહેઽધિકપ્રીતિદર્શનેઽપિ
દેહાદપ્યતિશયિતા પ્રીતિરિન્દ્રિયેષુ દૃશ્યતે । તથા ચ
પરપ્રેમાસ્પદત્વસ્યાપ્યભાવાત્ સ્થૂલદેહો નાત્મા । (૪) કિઞ્ચ
ચેતન એવાત્મા ભવિતુમર્હતિ । જડાનાં ભૂતાનાં સઙ્ઘાતરૂપે દેહે
ચૈતન્યાભાવાદ્દેહો નાત્મા । (૫) પૂગચૂર્ણાદિસંયુક્તતામ્બૂલપત્રે
રાગજનનશક્તિવત્ ભૂતસમુદાયાત્મકદેહે જ્ઞાનશક્તિરસ્તીત્યેતન્ન
યુજ્યતે । જડભૂતસમુદાયરૂપદેહે જ્ઞાનશક્તિરસ્તિ ચેત્તર્હિ
ભૂતસમુદાયરૂપઘટાદાવપિ ચૈતન્યં પ્રસજ્યેત । ન તુ
ઘટાદૌ ચૈતન્યમસ્તિ । (૬) સુષુપ્તિમૂર્ચ્છામરણાદ્યવસ્થાસુ
ઘટાદિવદ્દેહોઽપિ જડો ભવતિ । તસ્માન્ન જડો દેહ આત્મા ભવતિ
। (૭) યદિ દેહ આત્મા ભવેત્તદા બાલદેહાદ્ભિન્ને યૌવનદેહે
"સોઽહમ્" ઇતિ પ્રત્યભિજ્ઞા ન ભવિતુમર્હતિ । જાયતે તુ
તથા પ્રત્યભિજ્ઞા । અતોઽપિ દેહો નાત્મા । (૮) જન્મમરણાદિયુક્તસ્ય
દેહસ્ય જન્મનઃ પૂર્વં મરણાદૂર્ધ્વં ચ સત્તા નાસ્તિ । આત્મા ત્વસ્તિ ।
અન્યથા કૃતનાશાકૃતાભ્યાગમપ્રસઙ્ગઃ સ્યાત્ । અતશ્ચ દેહો નાત્મા ।
(૯) દેહાલઙ્કરણપોષણાદિજન્યભોગ એવ પરમપુરુષાર્થ ઇત્યપિ ન ।
તથા હિ, યઃ ઇચ્છાવિષયઃ સ પુરુષાર્થ ઇત્યુચ્યતે । સા ચેચ્છા
સર્વેષાં સુખપ્રાપ્તૌ દુઃખનિવૃત્તૌ ચ ભવતિ । અતસ્તયોરેવ
પુરુષાર્થત્વમુચિતમ્ । તત્રાપિ સર્વસુખાપેક્ષયા અધિકં યત્સુખમ્,
આત્યન્તિકી ચ યા દુઃખનિવૃત્તિસ્તયોરેવ પરમપુરુષાર્થત્વં ભવતિ
। તાદૃશં નિરતિશયં સુખમ્ ॥

## (૨૭૫)

ઇન્દ્રિયાત્મવાદઃ - અપરે કેચનૈવમાહુઃ સ્થૂલશરીરં નાત્મા । કિન્તુ સ્થૂલશરીરે યત્સદ્ભાવે જીવનવ્યવહારો ભવતિ, યદભાવે મરણવ્યવહારો ભવતિ સ આત્મા । સ ચ સ્થૂલશરીરાદ્વ્યતિરિક્તઃ । જીવનમરણવ્યવહારાવિન્દ્રિયાધીનૌ ભવતઃ । શરીરે યાવત્કાલપર્યન્તમિન્દ્રિયાણિ સ્વસ્વવ્યાપારક્ષમાણિ ભવન્તિ તાવત્કાલપર્યન્તં "અયં જીવતિ" ઇતિ વ્યવહારો ભવતિ । યસ્ય કસ્યાપીન્દ્રિયસ્ય નાશે "અયં મૃતઃ" ઇતિ ચ વ્યવહ્રિયતે । કિઞ્ચ "અહં પશ્યામિ" "અહં વદામિ" ઇત્યાદિવ્યવહારે "અહમ્" ઇતિ બુદ્ધિરિન્દ્રિયે એવ ભવતિ । તસ્માત્ "અહમ્" ઇતિ બુદ્ધિવિષયેન્દ્રિયમેવાત્મા ।

## (૨૭૬)

હિરણ્યગર્ભોપાસકાનાં પ્રાણાત્મવાદઃ - હિરણ્યગર્ભોપાસકાઃ
પ્રાણ એવાત્મેતિ વદન્તિ ।

આત્યન્તિકી દુઃખનિવૃત્તિશ્ચ મોક્ષે એવ સ્તઃ । વૈષયિકભોગે દોષસત્ત્વાન્ન સ પરમપુરુષાર્થઃ । (૧૦) દેહસ્યાત્મત્વે મરણાનન્તરં દેહસ્ય દાહે મોક્ષાન્વયિનો દેહરૂપસ્યાત્મન એવાભાવાત્ "મરણમેવ મોક્ષઃ" ઇતિ શબ્દો નિરર્થકઃ । (૧૧) ભાવિભોજનાદૌ તૃપ્ત્યાદિહેતુત્વજ્ઞાનમનુમાનપ્રમાણેન સિદ્ધ્યતિ । દેશાન્તરે મૃતપિત્રાદિમરણજ્ઞાનમાપ્તવાક્યરૂપશબ્દપ્રમાણાત્ સિદ્ધ્યતિ । તસ્માત્પ્રત્યક્ષમાત્રસ્ય પ્રમાણત્વવાદો હઠ એવ । ઇત્થં દેહાત્મવાદિચાર્વાકમતમસઙ્ગતમેવ ।

૧. ચાર્વાકૈકદેશિનો લોકાયતિકા ઇન્દ્રિયાત્મવાદિનઃ ।

તન્મતમપ્યસઙ્ગતમ્ । (૧) યદભાવે શરીરં ન તિષ્ઠેત્સ આત્મા । શ્રોત્રનેત્રવાક્પાદાદ્યભાવેઽપિ બધિરાન્ધમૂકપઙ્ગુરૂપં શરીરં જીવત્યેવ । તસ્માન્નેન્દ્રિયમાત્મા । (૨) "અહં પશ્યામિ" "અહં વદામિ" ઇત્યાદિવ્યવહારે ઇન્દ્રિયસ્યાહન્ધીવિષયત્વાદિન્દ્રિયમેવાત્મેતિ યદુક્તં તત્રાપ્યુચ્યતે, "ચક્ષુષ્માનહં પશ્યામિ" ઇત્યેવ તત્ર વક્તુરભિસન્ધિઃ । ન તુ "ચક્ષૂરૂપોઽહં પશ્યામિ" ઇતિ । તસ્માત્ તત્રાહમનુભવસ્ય વિષયશ્ચક્ષુરાદીન્દ્રિયવ્યતિરિક્ત એવ ભવતિ । કિઞ્ચ "મમ ચક્ષુસ્તીક્ષ્ણમ્" "મમ ચક્ષુર્મન્દમ્" ઇતિ ચક્ષુરાદીન્દ્રિયેષુ મમતાવિષયત્વદર્શનાત્તેષુ અહન્તાવિષયત્વં વ્યભિચરિતમ્ । તસ્માદિન્દ્રિયં નાત્મા । (૩) યો યત્ વેત્તિ સ વેત્તા વેદ્યાદ્વિલક્ષણઃ । યથા ઘટસ્ય દ્રષ્ટા ઘટાદ્વિલક્ષણસ્તથેન્દ્રિયાણાં પટુત્વમન્દત્વાદિવેત્તા આત્મેન્દ્રિયાદ્વિલક્ષણઃ । (૪) મનસોઽન્યત્ર વ્યાકુલત્વે શ્રોત્રાદીનિ શબ્દાદીન્ ન ગૃહ્ણન્તીતિ જડાનીન્દ્રિયાણિ । અતશ્ચ નેન્દ્રિયમાત્મા । (૫) એવં સતિ હઠાદિન્દ્રિયમેવ ચેતનમિતિ યો વદતિ સ એવં પ્રષ્ટવ્યઃ - "કિમેકમેવેન્દ્રિયં ચેતનમ્, ઉત સર્વેન્દ્રિયાણાં સમુદાયઃ, આહોસ્વિત્ પ્રત્યેકં સર્વાણીન્દ્રિયાણિ" ઇતિ । નાદ્યઃ - યદિન્દ્રિયં ચેતનત્વેનાભિમતં તસ્યાભાવેઽપિ જ્ઞાનં જીવનં ચ દૃશ્યતે । તસ્માદેકમેવેન્દ્રિયં ચેતનમિતિ પક્ષોઽસઙ્ગતઃ । ન દ્વિતીયઃ - ઇન્દ્રિયસમુદાયમધ્યે એકસ્યેન્દ્રિયસ્ય નાશેઽપિ સમુદાયનાશો

ભવતિ । તતશ્ચ સમુદાયાન્તર્ગતસ્યૈકસ્યેન્દ્રિયસ્ય નાશે
સમુદાયનાશાત્ જ્ઞાનજીવનયોર્વિલયઃ પ્રસજ્યતે । ન તુ તથા
ભવતિ । તસ્માદિન્દ્રિયસમુદાયોઽપિ ન ચેતનઃ । ન તૃતીયઃ -
પ્રત્યેકમિન્દ્રિયાણામાત્મત્વે એકસ્મિન્ દેહે દશ ચેતના આત્માનોઽઙ્ગીકાર્યાઃ
। દશાનાં વિરુદ્ધેચ્છત્વસમ્ભવાત્ વિરુદ્ધેચ્છનાનાચેતનાધિષ્ઠિતં
શરીરં દશાનાં મત્તગજાનામલનસ્તમ્ભવદુન્મથ્યેત ।
ઇત્થમિન્દ્રિયાણામચેતનત્વાન્ન તેષામાત્મત્વં યુક્તમ્ । (૬)
શ્રુતિષુ પ્રસિદ્ધ ઇન્દ્રિયસંવાદ ઇન્દ્રિયાભિમાનિદેવતાવિષયો
વેદિતવ્યઃ । ન તાઃ શ્રુતય ઇન્દ્રિયાણાં ચેતનત્વે પ્રમાણમ્ ।
તસ્માદિન્દ્રિયાત્મવાદોઽસઙ્ગતઃ । તત્રેમાં યુક્તિમાચક્ષતે
- મરણસમયે મૂર્ચ્છિતસ્ય પાર્શ્વસ્થાઃ સતિ પ્રાણેઽયં
જીવતીતિ, તદભાવેઽયં મૃત ઇતિ ચ નિશ્ચિન્વન્તિ । કિઞ્ચ
ચક્ષુઃશ્રોત્રવાગાદીન્દ્રિયાભાવે તત્તદિન્દ્રિયવ્યાપારોપરમેઽપિ
અન્ધબધિરમૂકાનાં શરીરં યથાવદવસ્થિતમેવ
ભવતિ । પ્રાણોત્ક્રમણે તુ શરીરં તત્ક્ષણમેવ પતિત્વા
ભયઙ્કરં શ્મશાનવદમઙ્ગલં ચ ભવતિ । કિઞ્ચ
“ચક્ષુષ્માનહં પશ્યામિ, શ્રોત્રવાનહં શૃણોમિ”
ઇતિ વ્યવહારાદિન્દ્રિયવિલક્ષણ આત્મા સિદ્ધઃ । સ ચાત્મા ક
ઇતિ જિજ્ઞાસાયાં સુષુપ્તૌ સર્વેન્દ્રિયોપરમેઽપિ પ્રાણો જાગર્તિ
। પ્રાણસત્ત્વાદેવ તદા “અયં જીવતિ” ઇતિ વ્યવહારો
ભવતિ । સ્થૂલશરીરાત્પ્રાણવિયોગે તુ “અયં મૃતઃ”
ઇતિ વ્યવહારો જાયતે । તસ્માજ્જીવનમરણવ્યવહારયોઃ શરીરે
પ્રાણસદ્ભાવાસદ્ભાવાધીનત્વાત્ પ્રાણ એવાત્મેતિ નિશ્ચેયઃ ।

## (૨૭૭)

મનાત્મવાદઃ - અન્યે આહુઃ પ્રાણો જડઃ । તસ્માત્સ નાત્મા, ઘટાદિવત્ । બન્ધમોક્ષૌ મનોમાત્રાધીનૌ । વિષયાસક્તં મનો બન્ધહેતુઃ । વિષયવાસનાશૂન્યં મનો મોક્ષહેતુઃ । કિઞ્ચ, મનઃસમ્બન્ધાદેવેન્દ્રિયાણાં સ્વસ્વવિષયાવબોધનસામર્થ્યમ્ । નાન્યથા । તસ્માન્મન એવ સર્વવ્યવહારકારણમ્ ।

૧. પ્રાણાત્મવાદખણ્ડનં -
સમષ્ટિપ્રાણહિરણ્યગર્ભોપસકમતમસઙ્ગતમ્ । (૧)
બાહ્યવાયુવત્પ્રાણસ્યાપિ વાયુવિશેષત્વાન્ન સ આત્મા । (૨)

પ્રાણસ્યાદર્શનં ન નિયમેન મરણકારણમ્ । વૃક્ષાદિષુ
પ્રાણાદર્શનેઽપિ તેષાં જીવનાત્ । મનુષ્યસ્ય મૂર્ચ્છાવસ્થાયામપિ
ક્વચિત્ પ્રાણસત્ત્વોપલબ્ધિર્નાસ્તિ । અથાપિ મનુષ્યો ન મૃતો
ભવતિ । પરન્તુ જીવત્યેવ । તસ્માદપિ પ્રાણો નાત્મા । (૩) અપિ ચ
સુષુપ્તૌ સન્નપિ પ્રાણઃ ધનાદ્યપહારિણં ચોરં ન નિવારયતિ
। ન વા બન્ધુજનમાગતં પુરસ્કરોતિ । તસ્માત્પ્રાણો જડઃ ।
અતશ્ચ સ નાત્મા । (૪) દેહાદ્બહિઃ પ્રાણોત્ક્રમણે દેહસ્ય
મૃતત્વપ્રસિદ્ધેઃ પ્રાણ આત્મેતિ વચનમપ્યસઙ્ગતમ્ ।
દેહાદ્બહિર્જાઠરાગ્નેર્નિર્ગમાદપિ લોકે મરણપ્રસિદ્ધેઃ સત્ત્વાત્
। અતઃ પ્રાણોત્ક્રમણે મરણપ્રસિદ્ધિર્વ્યભિચરિતા । શ્રુતૌ
પ્રાણશ્રૈષ્ઠ્યકીર્તનં પ્રાણોપાસનાવિધિસ્તુતયેઽર્થવાદઃ । (૫)
શ્રુતૌ પ્રાણમયાદિકોશાનામાત્મત્વપ્રતિપાદનં સ્થૂલારુન્ધતીન્યાયેન
સર્વાન્તરપ્રત્યગભિન્નાધિષ્ઠાનબ્રહ્મપ્રદર્શનાર્થમ્ । (૬) શ્રુતૌ
પ્રાણસ્યેન્દ્રિયૈઃ સહ સંવાદસ્ય દેહે તત્પ્રવેશસ્ય ચ વર્ણનં
પ્રાણાભિમાનિદેવતાભિપ્રાયેણેતિ જ્ઞેયમ્ । (૭) ક્ષુધયા મમ પ્રાણો યાતિ
। ભોજનેન મમ પ્રાણસ્તૃપ્યતીત્યાદિવ્યવહારાત્પ્રાણો મમતાવિષય
એવ ભવતિ । ન ત્વહન્તાવિષયઃ । અતો ન સ આત્મા । (૮) સ્વપ્રાણસ્ય
બહિર્ગમનસ્યાન્તરાગમનસ્ય ચ વેદનાત્ તદ્વેદનકર્તા સાક્ષી આત્મા
પ્રાણાદન્ય એવેતિ સિદ્ધમ્ । અતો મન એવાત્મા ।

## (૨૭૮)

વિજ્ઞાનવાદિબૌદ્ધમતં (બુદ્ધિરેવાત્મા) ક્ષણિકવિજ્ઞાનવાદી બૌદ્ધ એવમાહ - મનસો વ્યાપારો બુદ્ધ્યધીનો ભવતિ । યતો બુદ્ધેરાકાર એવ મનસ્તસ્માત્ ક્ષણિકવિજ્ઞાનરૂપા બુદ્ધિરેવાત્મા ભવિતુમર્હતિ । મનો નાત્મેતિ । તેષામયમાશયઃ - સર્વે પદાર્થા વિજ્ઞાનસ્યૈવાકારા ભવન્તિ । તચ્ચ વિજ્ઞાનં પ્રકાશરૂપમ્ । પ્રતિક્ષણં વિજ્ઞાનમુત્પદ્ય વિનશ્યતિ । પૂર્વવિજ્ઞાનસ્ય સમમન્યદ્વિજ્ઞાનમુત્પદ્યતે । તતઃ પૂર્વવિજ્ઞાનં વિનશ્યતિ । તથૈવ તૃતીયવિજ્ઞાનોત્પત્તૌ દ્વિતીયવિજ્ઞાનસ્ય વિનાશો ભવતિ । તુરીયવિજ્ઞાનસ્યોત્પત્તૌ તૃતીયવિજ્ઞાનનાશો ભવતિ । એવં નદીપ્રવાહવદ્વિજ્ઞાનસ્ય ધારાવિચ્છિન્નાનુવર્તતે । સા ચ વિજ્ઞાનધારા દ્વિવિધા - એકા આલયવિજ્ઞાનધારા । અન્યા તુ પ્રવૃત્તિવિજ્ઞાનધારા । “અહમ્, અહમ્” ઇતિ વિજ્ઞાનધારા આલયવિજ્ઞાનધારેતિ કીર્ત્યતે । સૈવ બુદ્ધિરિતિ કથ્યતે । “અયં ઘટઃ, અયં દેહઃ” ઇતિ વિજ્ઞાનધારા પ્રવૃત્તિવિજ્ઞાનધારેતિ ભણ્યતે । આલવિજ્ઞાનધારાયાઃ સકાશાત્પ્રવૃત્તિવિજ્ઞાનધારોત્પદ્યતે । મનસઃ સ્વરૂપમપિ પ્રવૃત્તિવિજ્ઞાનધારાન્તર્ભૂતમેવ

। અતો મન આલયવિજ્ઞાનધારારૂપબુદ્ધેઃ કાર્યમ્ । સા બુદ્ધિરેવાત્મા । આલયવિજ્ઞાનધારયા પ્રવૃત્તિવિજ્ઞાનધારાયા બાધચિન્તનેન નિર્વિશેષક્ષણિકવિજ્ઞાનધારાયાઃ

૧. મનાત્મવાદખણ્ડનં - નારદપાઞ્ચરાત્રતન્ત્રાનુસારિણો મન
એવાત્મેતિ વદન્તિ । તદપિ ન સમ્ભવતિ । (૧) ટઙ્કવાસ્યાદિવન્મનસઃ
કરણત્વાન્ન મન આત્મા ।
(૨) સૂષુપ્ત્યાદૌ મસનોઽભાવેઽપિ સામાન્યચૈતન્યસ્ય
સત્ત્વાત્, "સતિ મનસિ ચૈતન્યં તદભાવે તદભાવઃ"
ઇત્યન્વયવ્યતિરેકસ્ય ભઙ્ગાત્ ન મનશ્ચેતનમ્, કિન્તુ જડમેવ ।
તસ્માન્મનો નાત્મા ।
(૩) "મમ મનોઽન્યત્ર ગતમ્, ઇદાનીં પ્રત્યાગતમ્"
ઇતિ વ્યવહારાન્મનો મમતાયા વિષયો નાહન્તાયાઃ । તસ્માન્મનસઃ
સ્થૈર્યચાઞ્ચલ્યાદિવેત્તા સાક્ષીભૂત આત્મા મનોવિલક્ષણઃ સિદ્ધઃ ।
(૪) ચૈતન્યાભાસસહિતમેવ મનો ભોક્તૃ ભવતિ, ન સ્વતન્ત્રં મનઃ । અતોઽભોક્તૃત્વાદપિ મનો નાત્મા ।
(૫) મન એવ મનુષ્યાણાં કારણં બન્ધમોક્ષયોઃ । બન્ધાય
વિષયાસક્તં મુક્ત્યૈ નિર્વિષયં સ્મૃતમ્ ॥ ઇતિ વચનાસ્યાયમાશયઃ
- વિષયવાસનાવાસિતં મનો મોક્ષસાધનં પ્રતિબદ્ધ્ય
જગદધ્યાસાસ્પદં ભૂત્વા બન્ધકારણં ભવતિ । તદેવ ચ મનો
વિષયવાસનારહિતં જ્ઞાનપ્રાપ્તિદ્વારા મનસઃ સ્વરૂપં બાધિત્વા
મોક્ષકારણં ભવતીતિ । ન તદ્વાક્યં મનસ એવાત્મતાં બોધયતિ ।
કિન્તુ બન્ધસાધનાન્નિવૃત્તિં મોક્ષસાધને પ્રવૃત્તિં તદ્વાક્યં
બોધયતિ ।
(૬) "મનો બ્રહ્મેતિ વ્યજાનાત્" (તૈ. ભૃ. ૪) ઇત્યાદિના
મનોમયકોશસ્યાત્મત્વબોધકશ્રુતેસ્તાત્પર્યં તુ સ્થૂલારુન્ધતીન્યાયેનેતિ
પ્રાક્ પ્રદર્શિતમ્ । સ્થિતિઃ સિદ્ધ્યતિ । તાદૃશી સ્થિતિરેવ
તન્મતે મોક્ષઃ । ઇત્થં વિજ્ઞાનવાદિનો બુદ્ધેઃ ક્ષણિકતાં
સ્વયમ્પ્રકાશરૂપતાં ચ કલ્પયિત્વા, સા બુદ્ધિરેવાત્મેતિ વર્ણયન્તિ ।

## (A. 279-282) આનન્દમયકોક્ષ એવાત્મેતિ મતમ્-

## (૨૭૯)

તત્ર ભટ્ટમતં - પૂર્વમીમાંસાવાર્તિકકારો ભટ્ટ એવમાહન હિ વિદ્યુલ્લેખેવાત્મા ક્ષણિકઃ, કિન્તુ સ્થિરઃ । સ આત્મા જડરૂપઃ પ્રકાશરૂપશ્ચાસ્તે । અયમસ્યાભિપ્રાયઃ - સુષુપ્તેરુત્થિત એવં વદન્તિ "એતાવન્તં કાલમહં જડો નિઃસંજ્ઞોઽસ્વાપ્સમ્" ઇતિ । તસ્માદાતમા જડરૂપ ઇતિ સિદ્ધ્યતિ । કિઞ્ચ સુષુપ્તાદુત્થિતસ્ય સ્મૃતિરપિ ભવતિ । અનનુભૂતેઽર્થે ન સ્મૃતિર્ભવેત્ । સુષુપ્તાવાત્મસ્વરૂપાતિરિક્તં ન કિઞ્ચિદપિ જ્ઞાનસાધનમસ્તિ । સુષુપ્ત્યનન્તરભાવિસ્મૃતેઃ કારણં સૌષુપ્તજ્ઞાનમેવ વાચ્યમ્ । તચ્ચ સુષુપ્તિકાલીનં જ્ઞાનમાત્મસ્વરૂપમેવ । ઇત્થમાત્મા ખદ્યોતવત્પ્રકાશરૂપોઽપ્રકાશરૂપશ્ચ । જ્ઞાનરૂપત્વાત્ પ્રકાશરૂપઃ, જડરૂપત્વાદપ્રકાશરૂપશ્ચ । આનન્દમયકોશ એવ પ્રકાશરૂપોઽપ્રકાશરૂપશ્ચાસ્તિ । સુષુપ્તૌ ચૈતન્યાભાસસહિતાજ્ઞાનમેવાનન્દમયકોશ ઇત્યુચ્યતે । તત્ર ચિદાભાસઃ પ્રકાશરૂપોઽજ્ઞાનમપ્રકાશરૂપં ચ ભવતિ । તસ્માદ્ભટ્ટમતે આનન્દમયકોશ એવાત્મેતિ સિદ્ધમ્ ।

૧. વિજ્ઞાનવાદમતખણ્ડનં - બુદ્ધશિષ્યં યોગાચારં યેઽનુસરન્તિ તે ક્ષણિકવિજ્ઞાનરૂપાં બુદ્ધિમાત્મેતિ વર્ણયન્તિ । તદસઙ્ગતં - (૧) રૂપાદીનાં જ્ઞાનરૂપં કાર્યં પ્રતિ નેત્રાદીન્દ્રિયં સાધનમ્ । તથા નિશ્ચયરૂપકાર્યં પ્રતિ સાધનભૂતા બુદ્ધિર્નાત્મા ભવિતુમર્હતિ । કિન્તુ સર્વપદાર્થનિશ્ચાયિકાયા બુદ્ધેર્યઃ સાક્ષી સ એવાત્મા । (૨) સ આત્મા સ્વયં સ્વયમ્પ્રકાશરૂપત્વાત્સદા ભાસતે । અતો ભાસ્યરૂપાદેર્ભાસકઃ સૂર્યાદિર્યથા ભાસ્યવિલક્ષણસ્તથા ભાસ્યબુદ્ધેર્ભાસક આત્મા બુદ્ધેર્વિલક્ષણઃ સિદ્ધ્યતિ । યથા દીપાદેઃ પ્રકાશો ઘટાદિના સમ્બદ્ધો ઘટાદેરાકારમાપદ્ય સમ્મિશ્રતયા ભાસમાનોઽપિ વસ્તુતો ઘટાદેર્વિલક્ષણસ્વભાવ એવ તથા જ્ઞાનસ્વરૂપ આત્મા બુદ્ધિવૃત્ત્યા સમ્બદ્ધસ્તદાકારમાપદ્યાવિવિક્તતયા ભાસમાનોઽપિ પરમાર્થતયા બુદ્ધિવૃત્તેર્વિલક્ષણો નિત્યશુદ્ધાસઙ્ગચિન્માત્રરૂપઃ । (૩) અપઞ્ચીકૃતભૂતસમષ્ટિસત્ત્વગુણાંશકાર્યભૂતસ્યાન્તઃકરણસ્ય નિશ્ચયરૂપક્રિયયા બુદ્ધિરિતિ, સઙ્કલ્પવિકલ્પરૂપક્રિયયા મન ઇતિ ચ વ્યપદેશઃ । તસ્માદ્બુદ્ધિરન્તઃકરણાદવ્યતિરિક્તા । તતશ્ચ ભૌતિકાન્તઃકરણાવ્યતિરિક્તબુદ્ધેરપિ ભૌતિકત્વાદ્દેહેન્દ્રિયમનોવદનાત્મત્વમેવ સિદ્ધમ્ । (૪) કઠોપનિષત્તૃતીયવલ્લ્યાં આત્મનો રથસ્વામિત્વેન, બુદ્ધેઃ સારથિત્વેન ચ વર્ણનં દૃશ્યતે । યથા સારથિવિલક્ષણો રથસ્વામી તથા બુદ્ધીવલક્ષણ આત્મા ભવતિ । (૫) "મમ બુદ્ધિરિદાનીં મન્દા, ઇદાનીં

તીક્ષ્ણા” ઇતિ મમતાવિષયત્વાદ્બુદ્ધેરહન્તાવિષયત્વં
ન યુજ્યતે । અતો ન બુદ્ધિરાત્મા । (૬) આત્મનઃ ક્ષણિકત્વં
વિજ્ઞાનવાદિસમ્મતમત્યન્તમસઙ્ગતમ્ । તથાત્વે ઉત્તમર્ણો ગતવત્સરે
દત્તં ધનમસ્મિન્ વત્સરેઽધમર્ણાન્ના ॥

## (૨૮૦)

માધ્યમિકબૌદ્ધમતં (આનન્દમયકોશ આત્મા) શૂન્યવાદિનો બૌદ્ધાસ્ત્વેવમાહુઃ, આત્મા નિરંશઃ । તસ્માદેકસ્યૈવાત્મનઃ પ્રકાશરૂપત્વમપ્રકાશરૂપત્વં ચ ન ઘટેત । ખદ્યોતસ્ય સાંશત્વાદેકોંઽશઃ પ્રકાશરૂપોઽપરોંઽશોઽપ્રકાશરૂપશ્ચ ભવતિ । ન ત્વાત્મનો નિરંશસ્ય વિરુદ્ધોભયરૂપવત્ત્વકથનં યુક્તમ્ । યદ્યુભયરૂપતાસિદ્ધ્યે આત્મનઃ સાંશત્વં અઙ્ગીક્રિયતે તર્હિ સાંશાનાં ઘટાદીનામુત્પત્તિનાશદર્શનાદાત્મનોઽપિ ઉત્પત્તિનાશવત્ત્વં પ્રસજ્યેત । યદુત્પત્તિનાશવદ્વસ્તુ તદુત્પત્તેઃ પ્રાગૂર્ધ્વં ચ નાશાદસદ્ભવતિ । આદ્યન્તયોર્યદસત્તન્મધ્યેઽપ્યસદેવ ભવતિ । “આદાવન્તે ચ યન્નાસ્તિ વર્તમાનેઽપિ તત્તથા” (મા. કા. વૈ. ૬) ઇતિ સ્મૃતેઃ । તસ્માદુત્પત્તિનાશવત્ત્વે આત્મા અસદ્રૂપો ભવેત્ । તથા આત્મભિન્નઃ સર્વોઽપિ પદાર્થઃ ઉત્પત્તિનાશવત્ત્વાદસદ્રૂપ એવ । અનયા રીત્યા આત્માનાત્મરૂપસકલવસ્તૂનામસદ્રૂપત્વાત્ શૂન્યમેવ પરમતત્ત્વમિતિ શૂન્યવાદિનો માધ્યમિકબૌદ્ધસ્ય મતમ્ । તેઽપ્યજ્ઞાનરૂપાનન્દમયકોશમેવ પ્રતિપાદયન્તિ । તથા હિ, દૃષ્ટિભેદેનાજ્ઞાનં ત્રિભી રૂપૈઃ પ્રતીયતે । (૧) અદ્વૈતશાસ્ત્રસંસ્કારરહિતસ્ય જગદાકારેણ પરિણતમજ્ઞાનં સત્યત્વેન પ્રતીયતે । (૨) અદ્વૈતશાસ્ત્રાનુસારિયુક્તિકુશલાનાં પણ્ડિતાનામજ્ઞાનં તત્કાર્યં જગચ્ચ સદસદ્વિલક્ષણાનિર્વચનીયત્વેન ભાતિ । (૩) જ્ઞાનનિષ્ઠાં પ્રાપ્તસ્ય જીવન્મુક્તસ્ય વિદુષોઽજ્ઞાનં તત્તકાર્યં ચ તુચ્છત્વેન પ્રતીયતે । તુચ્છમ્, અસત્, શૂન્યં ઇતિ ત્રયઃ શબ્દાઃ સમાનાર્થાઃ । તથા ચોક્તં પઞ્ચદશ્યાં ચિત્રદીપે ॥ દાતુમિચ્છેત્ । પ્રથમક્ષણે ભુક્તવાન્ પુરુષ ઉત્તરક્ષણે “તૃપ્તોઽહમસ્મિ” ઇતિ ન બ્રૂયાત્ । આત્મનઃ ક્ષણિકત્વે ગતવત્સરે ધનં દત્તવત ઉત્તમર્ણસ્ય, પૂર્વક્ષણે ભુક્તવતઃ પુરુષસ્ય ચેદાનીમભાવાત્ । તસ્માદાત્મા ન ક્ષણિકઃ । (૭) આત્મનઃ ક્ષણિકત્વે મોક્ષસાધનકલાપો વ્યર્થઃ સ્યાત્ ।

૧. આત્મા ચિજ્જડોભયાત્મક ઇતિ
ભટ્ટપક્ષોઽપ્યસઙ્ગતઃ“અયમન્ધકારઃ પ્રકાશઃ”
“અયં પુરુષઃ સ્થાણુઃ” ઇતિવચ્ચૈકત્ર
વસ્તુનિ ચિજ્જડાંશવિરોધાત્ । ઉભયાંશત્વમઙ્ગીકૃત્ય
“નોભાવપ્યંશાવનુભવગોચરૌ કિન્તુ જડાંશ
એવાનુભવગોચરો ન ચેતનાંશઃ” ઇતિ કથનં તુ ન યુક્તમ્
। યથા દણ્ડદર્શનમાત્રેણ “અયં દણ્ડી” ઇતિ જ્ઞાનં
ન જાયતે; કિન્તુ દણ્ડપુરુષોભયદર્શનેનૈવ જાયતે તથા
જડાંશમાત્રદર્શનેન ન ચિજ્જડોભયાત્મકાત્મસિદ્ધિર્ભવેત્
। ચેતનાંશસ્યાપ્યનુભવગોચરત્વાભ્યુપગમે જાડ્યં તત્ર

કલ્પિતમિતિ વક્તવ્યમ્ । હઠાદુભયોરંશયોઃ સત્યત્વાભ્યુપગમે
આત્મનો જડચેતનાંશયોઃ પરસ્પરં કઃ સમ્બન્ધઃ । સંયોગો વા
વિષયવિષયિભાવો વેતિ સ પ્રષ્ટવ્યઃ ॥

માયા ચેયં તમોરૂપા તાપનીયે તદીરણાત્ ।
અનુભુતિસ્તત્ર માનં પ્રતિજજ્ઞે શ્રુતિઃ સ્વયમ્ ॥ ૧૨૫ ॥

જડં મોહાત્મકં તચ્ચેત્યનુભાવયતિ શ્રુતિઃ ।
આબાલગોપં સ્પષ્ટત્વાદાનન્ત્યં તસ્ય સાબ્રવીત્ ॥ ૧૨૬ ॥

ઇત્થં લૌકિકદૃષ્ટ્યૈતત્ સર્વૈરપ્યનુભૂયતે ।
યુક્તિદૃષ્ટ્યા ત્વનિર્વાચ્યં નાસદાસીદિતિ શ્રુતેઃ ॥ ૧૨૮ ॥

નાસદાસીદ્વિભાતત્વાન્નો સદાસીચ્ચ બાધનાત્ ।
વિદ્યાદૃષ્ટ્યા શ્રુતં તુચ્છં તસ્ય નિત્યનિવૃત્તિતઃ ॥ ૧૨૯ ॥

તુચ્છાનિર્વચનીયા ચ વાસ્તવી ચેત્યસૌ ત્રિધા ।
જ્ઞેયા માયા ત્રિભિર્બોધૈઃ શ્રૌતયૌક્તિકલૌકિકૈઃ ॥ ૧૩૦ ॥ ઇતિ ।

ઇત્થં જીવન્મુક્તાનાં તુચ્છત્વેન પ્રતીયમાનેઽજ્ઞાને મોહમાપન્નાઃ શૂન્યવાદિનો ન પરમપુરુષાર્થં લભન્તે । કિન્તુ તુચ્છરૂપ આનન્દમયકોશ એવાત્મેતિ વદન્તિ । ॥આદ્યે પક્ષે "અનિત્યયોઃ સાવયવયોર્દ્વયોર્વસ્તુનોરેવ સંયોગ" ઇતિ નિયમાદાત્મનોઽનિત્યત્વં પ્રસજ્યેત । દ્વિતીયપક્ષે ચિજ્જડાંશયોરુભયોરપ્યેકસ્યૈવાત્મનઃ સ્વરૂપત્વાચ્ચિદંશો જડો ભવેત્ । જડાંશશ્ચ ચિદ્ભવેત્ । તૃતીયપક્ષે ઘટતજ્જ્ઞાનવદુભયોરંશયોરનાત્મત્વં ભવેત્ । "વિજ્ઞાનમાનન્દં બ્રહ્મ" (બૃ. ૩.૧.૨૭) "પ્રજ્ઞાનં બ્રહ્મ" (ઐ. ૩.૧) "સત્યં જ્ઞાનમનન્તં બ્રહ્મ" (તૈ. બ્ર. ૧) ઇત્યાદિશ્રુતિપ્રસિદ્ધજ્ઞાનમાત્રસ્વરૂપસ્યાત્મનોઽર્ધાંશસ્ય જડત્વાભ્યુપગમે પ્રમાણં નોપલભ્યતે । સુપ્તોત્થિતસ્ય "જડો નિઃસંજ્ઞોઽહમસ્વાપ્સમ્" ઇત્યાત્મનો જડત્વસમ્પાદિકા યા સ્મૃતિરુક્તા સા સૌષુપ્તાજ્ઞાનમેવ વિષયીકરોતિ । તસ્માદાત્મનો જડચેતનોભયાંશકત્વમસઙ્ગતમેવ । "સર્વં શૂન્યમ્; શૂન્યમેવ પરમતત્ત્વમ્, સુષુપ્તિકાલીનાજ્ઞાનરૂપાનન્દમયકોશ એવાત્મા" ઇતીદં માધ્યમિકમતમપ્યસઙ્ગતમેવ । તથા હિ, કિં શૂન્યં સાક્ષિસહિતમુત સાક્ષિરહિતમુત સ્વપ્રકાશમિતિ ત્રિધા તત્ર વિકલ્પો ભવતિ । આદ્યપક્ષે યઃ શૂન્યસ્ય સાક્ષી સ શૂન્યાદ્વિલક્ષણ આત્મા સિદ્ધ્યતે । દ્વિતીયપક્ષે સાક્ષિરહિતત્વાચ્છૂન્યમેવ ન સિદ્ધ્યતિ । તૃતીયપક્ષે સ્વપ્રકાશત્વાદસ્મદભિમતં બ્રહ્મૈવ શૂન્યમિતિ નામાન્તરેણોક્તં ભવતિ । તથા ચ શૂન્યાસિદ્ધિરેવ । "અસદ્વા ઇદમગ્ર આસીત્" (તૈ. બ્ર. ૭) "અસદેવેદમગ્ર આસીત્" (છા. ૬.૨.૧) ઇત્યાદિવાક્યાનિ પૂર્વાપરવિરોધાત્ ન શૂન્યં પ્રતિપાદયન્તિ । કિન્તુ નૈયાયિકવૈશેષિકબૌદ્ધાદયઃ પ્રાગભાવાદીન્ જગતઃ કારણત્વેન વર્ણયન્તિ, તદનૂદ્ય તાદૃશવિપરીતગ્રહનિવર્તને એવ તાદૃશશ્રુતીનાં તાત્પર્યમ્ । અસત્ = અનભિવ્યક્તનામરૂપાત્મકમ્, ઇદં = જગત્, અગ્રે = પ્રાક્ સૃષ્ટેરાસીદિતિ શ્રુત્યર્થઃ । ઇત્થં શૂન્યવાદોઽસઙ્ગત એવ । બૌદ્ધશિષ્યાશ્ચત્વારઃ । (૧)

માધ્યામિકઃ શૂન્યવાદી, (૨) યોગાચારઃ ક્ષણિકવિજ્ઞાનવાદી, (૩) સૌત્રાન્તિકોઽનુમેયબાહ્યપદાર્થવાદી, (૪) વૈભાષિકઃ પ્રત્યક્ષબાહ્યાર્થવાદી ।

## (૨૮૧)

પ્રાભાકરનૈયાયિકયોર્મતં (આનન્દમયકોશ આત્મા) પૂર્વમીમાંસકૈકદેશિનઃ પ્રાભાકરા નૈયાયિકાશ્ચૈવં કથયન્તિ - નાત્મા શૂન્યરૂપઃ । "આત્મા શૂન્યરૂપઃ" ઇતિ વદન્નેવં પ્રષ્ટવ્યઃ - શૂન્યરૂપં તેનાનુભૂયતે ન વેતિ । યદિ શૂન્યરૂપમનુભૂયતે તદા યેન તચ્છૂન્યરૂપમનુભૂયતે સ એવાત્મા । સ ચ શૂન્યવિલક્ષણ ઇતિ ચ સિદ્ધ્યતિ । યદિ શૂન્યરૂપં નાનુભૂયતે તદા શૂન્યમેવ નાસ્તીતિ સિદ્ધ્યતિ । અનયા રીત્યા શૂન્યવિલક્ષણ આત્મા સિદ્ધઃ । તસ્યાત્મનો મનસા સંયોગેન જ્ઞાનમુત્પદ્યતે । તેન જ્ઞાનરૂપેણ ગુણેનાત્મા ચેતનો ભવતિ । સ્વરૂપતસ્ત્વાત્મા જડઃ । સુખદુઃખેચ્છાદ્વેષપ્રયત્નધર્માધર્મા અપ્યાત્મનો ગુણા ઇતિ । તન્મતેઽપ્યાનન્દમયકોશ એવાત્મા । વિજ્ઞાનમયકોશસ્થા યા બુદ્ધિઃ સાત્મનો જ્ઞાનરૂપો ગુણ ઇત્યુચ્યતે । તથા હિ, આનન્દમયકોશે ચૈતન્યં ગૂઢમાસ્તે । વિવેકહીનાનાં ન તત્પ્રતીયતે । તસ્માત્પ્રાભાકરા નૈયાયિકાશ્ચ સુષુપ્તમાત્માનં જ્ઞાનહીનં મન્વાનાઃ સ્વરૂપત એવાત્માનં જડમાહુઃ । તસ્માદ્ગૂઢચૈતન્યે આનન્દમયકોશે એવ તયોરાત્મત્વભ્રાન્તિરસ્તિ । અપિ ચ તન્મતે આત્મસ્વરૂપં નિત્યજ્ઞાનં ન જીવેઽભિમતમ્, કિન્ત્વનિત્યજ્ઞાનમેવ જીવેઽભિમતમ્ । તચ્ચાનિત્યં જ્ઞાનં સિદ્ધાન્તેઽન્તઃકરણવૃત્ત્યાત્મકબુદ્ધિરૂપં ભવતિ । ઇત્થં પ્રાભાકરનૈયાયિકયોર્મતે આનન્દમયકોશ આત્મા । બુદ્ધિસ્તસ્યાત્મનો ગુણઃ । ઇદમપિ મતં ન સમીચીનમ્ । જ્ઞાનભિન્નં યદ્યજ્જડવસ્તુ ઘટાદિકં તત્સર્વમનિત્યમસ્તિ । યદ્યાત્મા જ્ઞાનસ્વરૂપો ન ભવેત્તદા ઘટાદિવજ્જડોઽનિત્યશ્ચ ભવેત્ । આત્મનોઽનિત્યત્વે મોક્ષાન્વયિનોઽભાવાત્ મોક્ષસાધનાનાં નિષ્પ્રયોજનતા સ્યાત્ । ઇત્થં વેદાન્તવાક્યેષ્વશ્રદ્દધાના બહિર્મુખાઃ પુરુષા ગુરુસમ્પ્રદાયશૂન્યાઃ પઞ્ચકોશેષ્વન્યતમમેવ સ્વસ્વબુદ્ધ્યનુસારેણાત્મત્વેન મન્વાના મુખ્યમાત્માનં સાક્ષિણં ન જાનન્તિ । તસ્માદન્નમયાદય આત્મન આચ્છાદકત્વાત્ કોશા ઇતિ વર્ણ્યન્તે ।

૧. પ્રાભાકરનૈયાયિકયોર્મતખણ્ડનં - "સુષુપ્તૌ
જ્ઞાનાભાવાદાત્મા જડઃ" ઇત્યેતન્ન યુજ્યતે ।
"સુખમહમસ્વાપ્સં ન કિઞ્ચિદવેદિષમ્" ઇતિ
પરામર્શબલાત્ સુષુપ્તૌ સુખાજ્ઞાનયોરનુભવસ્યોપપાદિતત્વાત્
તેષાં વચનં બાધિતં ભવતિ । આત્મા યદિ સ્વરૂપતો જડઃ સ્યાત્
તદા સુષુપ્તાવનુભૂતસ્યાનન્દસ્ય સ્મરણં ન સ્યાત્ । સ્મર્યતે તુ ।
તસ્માદાત્મા ન જડઃ ।

## (૨૮૨)

ઈશ્વરીયપઞ્ચકોશૈસ્તત્સ્વરૂપાચ્છાદનમ્યથા જીવસ્ય પઞ્ચકોશા જીવસ્ય યથાર્થસ્વરૂપં સાક્ષિણમાવૃણ્વન્તિ તથેશ્વરસ્ય સમષ્ટિપઞ્ચકોશા ઈશ્વરસ્ય યથાર્થસ્વરૂપમાવૃણ્વન્તિ । તથા હિ, ઈશ્વરસ્ય યથાર્થં સ્વરૂપં

તત્પદલક્ષ્યં યદ્રૂપં તદેવ । તમેતં શ્રૌતમર્થં વિહાય કેચન માયારૂપાનન્દમયકોશવિશિષ્ટમન્તર્યામિણં તત્પદવાચ્યમેવ પરમતત્ત્વમિતિ વદન્તિ । તથૈવાન્યે હિરણ્યગર્ભવૈશ્વાનરવિષ્ણુબ્રહ્મશિવગણેશદેવીસૂર્યાદિષુ ખડ્ગકુદ્દાલાશ્વત્થાર્કવેણ્વન્તેષુ પદાર્થેષુ પરમાત્મત્વભ્રાન્તિમાપન્નાઃ । યદ્યપિ સકલપદાર્થેષુ લક્ષ્યભાગઃ પરમાત્મનો ન ભિન્નઃ તથાપિ તત્તદુપાધિવિશિષ્ટાનેવ પરમાત્મત્વેન મન્યન્તે । તદેતન્મતં તેષાં ભ્રાન્તિરેવ । પઞ્ચકોશાવૃતાજ્જીવેશ્વરયોઃ પરમાર્થસ્વરૂપાદ્બહિર્મુખા દેહાદિષ્વાત્મત્વભ્રાન્તિમાપદ્ય પુણ્યપાપાન્યાચરન્તિ । અન્તર્યામ્યાદિવંશપર્યન્તાનાં પદાર્થાનામીશ્વરબુદ્ધ્યા આરાધનં કૃત્વા સુખં પ્રાપ્તુમિચ્છન્તિ । યાદૃશમુપાધિમારાધયન્તિ તદનુસારેણ ફલં ચ સિદ્ધ્યતિ । યસ્માત્કારણસૂક્ષ્મસ્થૂલરૂપઃ સર્વોઽપિ પ્રપઞ્ચ ઈશ્વરશરીરેઽન્તર્ભૂતસ્તસ્માત્ તત્તદુપાસનાનુસારિ ફલં ભવતિ । તથા ચોક્તં પઞ્ચદશ્યાં ચિત્રદીપીવમન્યે સ્વસ્વપક્ષાભિમાનેનાન્યથાન્યથા ।
મન્ત્રાર્થવાદકલ્પાદીનાશ્રિત્ય પ્રતિપેદિરે ॥ ૧૨૦॥

અન્તર્યામિણમારભ્ય સ્થાવરાન્તેશવાદિનઃ ।
સન્ત્યશ્વત્થાર્કવંશાદેઃ કુલદેવત્વદર્શનાત્ ॥ ૧૨૧॥

ઇત્યાદિના । પરન્તુ મોક્ષો ન બ્રહ્મજ્ઞાનં વિના સિદ્ધ્યતિ । યો મોક્ષ૧. યથા જીવસ્ય પઞ્ચકોશા જીવસ્ય નિજસ્વરૂપં પ્રત્યગાત્માનં જીવદૃષ્ટિં પ્રત્યાચ્છાદયન્તિ, ન તથેશ્વરસ્ય પઞ્ચકોશા ઈશ્વરસ્ય નિજં સ્વરૂપં ઈશ્વરદૃષ્ટિં પ્રત્યાચ્છાદયન્તિ । ઈશ્વરસ્યાવરણરહિતત્વેન નિત્યમુક્તત્વાત્ ન તસ્ય કિઞ્ચિદપિ કર્તવ્યમસ્તિ । તસ્માત્ યથા વ્યષ્ટિપઞ્ચકોશેભ્યઃ પ્રત્યગાત્મનો વિવેચનં જીવેન કર્તવ્યં તથા સમષ્ટિપઞ્ચકોશેભ્યો બ્રહ્મણો વિવેચનમપિ જીવેનૈવ કર્તવ્યમ્ । સદ્રૂપઃ, ચિદ્રૂપઃ, આનન્દરૂપઃ, અદ્વય ઇત્યાત્મનશ્ચત્વારિ વિશેષણાનિ । દેહાદેસ્તુ અનૃતઃ, જડઃ, દુઃખરૂપઃ, સદ્વય ઇતિ ચત્વારિ વિશેષણાનિ । તત્રાત્મનઃ સદ્રૂપચિદ્રૂપાભ્યાં દેહાદેરનૃતજડરૂપયોસ્તિરોધાનં ભવતિ । તસ્માદ્દેહાદિઃ સત્ત્વેન ચેતનત્વેન ચ ભાતિ । દેહાદેઃ દુઃખરૂપેણ સદ્વયત્વેન ચાત્મન આનન્દરૂપત્વાદ્વયત્વયોરભિભવો ભવતિ । અતશ્ચાત્મા દુઃખિત્વેન સદ્વિતીયત્વેન ચ ભાતિ । ઇત્થમાત્મનઃ પઞ્ચકોશાનાં ચાન્યોન્યાધ્યાસોઽસ્તિ । તસ્માન્મુમુક્ષુરવશ્યં પઞ્ચકોશવિવેચનં કુર્યાત્ । મિચ્છતિ સ વિવેકેન જીવેશ્વરયોઃ સ્વરૂપં પઞ્ચકોશેભ્યઃ પૃથક્કૃત્ય જાનીયાત્ । તત્ર દૃષ્ટાન્તઃ । યથા મિલિતયોઃ મુઞ્જેષીકયોઃ પૃથક્કરણં ક્રિયતે, તથા વિવેકેન જીવેશ્વરયોઃ સ્વરૂપં પઞ્ચકોશેભ્યઃ પૃથક્કૃત્ય જાનીયાત્ ।

## (૨૮૩)

પઞ્ચકોશવિવેકપ્રકારઃ - સ્વપ્નાવસ્થાયાં સ્થૂલદેહો ન ભાતિ । પરન્ત્વાત્મા ભાસતે । તથા સુષુપ્તૌ સૂક્ષ્મશરીરસ્ય જ્ઞાનં ન ભવતિ । સુખસ્વરૂપ આત્મા સ્વયમ્પ્રકાશસ્વરૂપેણ પ્રતીયતે । સુષુપ્તૌ સુખજ્ઞાનાભાવે “સુખમહમસ્વાપ્સમ્” ઇતિ સ્મૃતિઃ સુપ્તોત્થિતસ્ય ન સ્યાત્ । તથા સ્મૃતેર્જાયમાનત્વાદેવ સુષુપ્તૌ સુખાનુભવોઽભ્યુપેયઃ । તચ્ચ સુખં સુષુપ્તૌ ન વિષયજન્યમ્ । તદા સર્વકાર્યપ્રપઞ્ચપ્રવિલયાત્ । કિન્તુ તદાત્મસ્વરૂપસુખમેવ । સ ચાત્મા સ્વયમ્પ્રકાશસ્વરૂપઃ । તસ્માત્સુખસ્વરૂપ આત્મા સ્વયમ્પ્રકાશરૂપેણ સુષુપ્તૌ ભાસતે । નિદિધ્યાસનફલભૂતનિર્વિકલ્પકસમાધૌ ત્વાત્મા અજ્ઞાનકૃતાવરણરહિતઃ પ્રકાશતે ।

કારણશરીરરૂપાજ્ઞાનમપિ તદા ન ભાસતે । ઇત્થં દેહત્રયં વ્યભિચરતિ એકામવસ્થાં વિહાયાવસ્થાન્તરે અભાનાત્ । તસ્માદ્દેહત્રયમવ્યાપકમ

१. મુઞ્જા નામ કોશવિશિષ્ટદીર્ઘતૃણવિશેષઃ । ઈષીકા નામ તત્તૃણમધ્યસ્થકાણ્ડવિશેષઃ ।

२. પ્રાતીતિકત્વં વેદાન્તસિદ્ધાન્તે જગતઃ સ્ફુટમ્ ।
સુષુપ્તૌ તુ જગલ્લીનં પ્રબોધે જાયતે પુનઃ ॥

દૃષ્ટિસૃષ્ટિમિમાં બ્રહ્માનુભવી બહુમન્યતે । ઇતિ ।

૩. (१) સ્થૂલદેહવિવેચનં - યથા ઘટસ્યોત્પત્તિવિનાશયોઃ પ્રાગૂર્ધ્વં ચ વિદ્યમાનત્વાદેકત્વાચ્ચાકાશો ઘટાદ્ભિન્નોઽવ્યભિચારી ચ, તથા સ્થૂલદેહસ્ય જનનમરણયોઃ પ્રાગૂર્ધ્વં ચ વિદ્યમાનત્વાદેકત્વાચ્ચાત્મા સ્થૂલદેહાદ્ભિન્નોઽવ્યભિચારી ચ । ઘટ ઇવ સ્થૂલદેહો જનનમરણયોઃ પ્રાગૂર્ધ્વં ચાવર્તમાનત્વાદનેકત્વાચ્ચાત્મનો ભિન્નો વ્યભિચારી ચ । યદધિકદેશકાલવર્તિ તદવ્યભિચારીત્યુચ્યતે । સર્વશરીરવર્ત્યાત્મા એક એવ । તસ્માદાકાશવદાત્મા વ્યાપકઃ । અતઃ સર્વદેશવર્તી ભવત્યાત્મા । દેહાનામુત્પત્તિમરણયોઃ પ્રાગૂર્ધ્વં ચાત્માસ્તિ । તસ્માદાત્મા કાલત્રયાબાધ્યઃ સર્વકાલવર્તી ચ ભવતિ । એવં સર્વદેશકાલવર્તિત્વાદાત્મા અવ્યભિચારી । યદ્ધિ વસ્તુ સ્વલ્પદેશે સ્વલ્પકાલે ચ વર્તતે તદ્વ્યભિચારિ । ઘટ ઇવ દેહોઽપિ પરિચ્છિન્નઃ સ્વલ્પદેશે વર્તતે । ઉત્પત્તિનાશવાંશ્ચ દેહઃ સર્વકાલવર્તી ન ભવતિ, કિન્તુ સ્વલ્પકાલે એવ વર્તતે । અતઃ સ્વલ્પદેશકાલવર્તિત્વાત્ સ્થૂલદેહો વ્યભિચારી । એવં દેહાત્મનોર્વ્યભિચારિત્વાવ્યભિચારિત્વરૂપવિલક્ષણધર્મવત્ત્વાદેવ તયોઃ પરસ્પરં ભેદઃ સિદ્ધ્યતિ । તસ્માન્નાહં સ્થૂલદેહઃ । નાપિ મદીયોઽસૌ દેહઃ । કિન્તુ દેહઃ પઞ્ચભૂતકાર્યત્વાદ્ભૌતિકઃ । મમ સ્થૂલદેહવ્યતિરિક્તત્વાદેવ ચ તદાશ્રિતનામરૂપજાત્યાશ્રમકર્માદયો ધર્મા ન માં સ્પૃશન્તિ । નાપિ તે ધર્મા મત્સમ્બન્ધિનઃ । ઇતિ સ્થૂલશરીરવિવેકઃ ॥ નિત્યં ચ । આત્મા તુ સર્વાવસ્થાસ્વનુગતતયા ભાતિ । તસ્માદ્વ્યાપકો નિત્યશ્ચ । ઇત્થં દેહત્રયવિલક્ષણતયા વિવિચ્યાત્માનં જાનીયાત્ । તત્ર સ્થૂલશરીરં અન્નમયકોશઃ, કારણશરીરં આનન્દમયકોશઃ । સૂક્ષ્મશરીરે

પ્રાણમયમનોમયવિજ્ઞાનમયાખ્યાસ્ત્રયઃ કોશા અન્તર્ભૂતાઃ । તસ્માચ્છરીરત્રયવિવેકેન પઞ્ચકોશવિવેકો જાયતે । યથા પઞ્ચકોશવિલક્ષણં જીવસ્વરૂપં તથૈવેશ્વરસ્વરૂપમપિ ॥

(૨) સૂક્ષ્મદેહવિવેચનં - સુષુપ્તિર્મૂર્ચ્છા મરણં પ્રલયો જ્ઞાનમિતિ પઞ્ચસ્વવસ્થાસુ લિઙ્ગદેહઃ સ્વકારણેઽજ્ઞાને લીયતે । તસ્માત્સૂક્ષ્મદેહો વ્યભિચારી અસંશ્ચ । આત્મા તુ સર્વકાલેષ્વપિ પ્રકાશમાનત્વાદવ્યભિચારી । અતઃ સદ્રૂપશ્ચ । સદ્રૂપત્વાદાત્મા ન લિઙ્ગદેહઃ । લિઙ્ગદેહોઽપિ નાત્મસમ્બન્ધી । સ ત્વપઞ્ચીકૃતપઞ્ચમહાભૂતકાર્યમ્ । તસ્માન્નાહં લિઙ્ગદેહઃ । કર્તૃત્વભોક્તૃત્વસુખદુઃખાદિલિઙ્ગદેહધર્મા અપિ નાહમ્ । નાપિ તે ધર્મા મદીયાઃ । તેષાં સાક્ષ્યહં તેભ્યો ભિન્નઃ । ઇતિ સૂક્ષ્મદેહવિવેચનમ્ । (૩) કારણદેહવિવેચનં - અજ્ઞાનમેવ કારણદેહઃ । નાહં કારણદેહઃ । સોઽપિ ન મદીયઃ । કારણશરીરધર્માવાવરણવિક્ષેપાવપિ નાહમ્ । ન તૌ ધર્મૌ મદીયૌ । તયોઃ સાક્ષ્યહં તાભ્યાં ભિન્નઃ । ઇતિ કારણશરીરવિવેચનમ્ । (૪) જાગ્રદવસ્થાવિવેકઃ - અવસ્થા નામ દશા ભોગકાલવિશેષરૂપા । સ્વપ્નસુષુપ્ત્યવસ્થાવિલક્ષણત્વે સતિ ઇન્દ્રિયજન્યજ્ઞાનતત્સંસ્કારાધારભૂતઃ કાલવિશેષો જાગ્રદવસ્થા । તસ્યામવસ્થાયાં ચતુર્દશત્રિપુટીભિર્જીવો વ્યવહરતિ । અસ્યામવસ્થાયાં ષડ્વિશેષાઃ - (૧) અવસ્થાતો જીવસ્ય સ્થાનં ચક્ષુઃ । સકલશરીરવર્તિનોઽપિ જીવસ્ય ચક્ષુષો મુખ્યસ્થાનત્વાત્તદેવ સ્થાનમિત્યુક્તમ્ । (૨) શક્તિઃ ક્રિયા । (૩) વાણી વૈખરી । (૪) ભોગઃ સ્થૂલઃ । (૫) ગુણઃ સત્ત્વમ્ । (૬) સંજ્ઞા વિશ્વઃ । ઇયં જાગ્રદવસ્થા સ્વપ્નસુષુપ્ત્યવસ્થયોર્વ્યભિચરતીતિ અસન્મયી । તત્સાક્ષિભૂતસ્ત્વાત્મા સર્વાસ્વપ્યવસ્થાસ્વનુવર્તમાનત્વાત્સત્યસ્વરૂપઃ । તસ્માજ્જાગ્રદવસ્થાતોઽયં વિલક્ષણો જીવઃ । ઇતિ જાગ્રદવસ્થાવિવેકઃ । (૫) સ્વપ્નાવસ્થાવિવેકઃ - યસ્યામવસ્થાયામિન્દ્રિયાણામુપરમાત્ તત્સાહાય્યમન્તરેણૈવ મનો હિતાખ્યનાડ્યન્તઃ જાગ્રત્સંસ્કારવશાત્ વિષયાકારેણ પરિણતં સત્ સ્વયંજ્યોતિઃસ્વરૂપેણ સાક્ષિણાનુભૂયતે સાવસ્થા સ્વપ્નાવસ્થા । અત્ર જીવસ્ય (૧) સ્થાનં કણ્ઠઃ । (૨) શક્તિર્જ્ઞાનમ્ । (૩) વાણી મધ્યમા । (૪) ભોગઃ સૂક્ષ્મઃ । (૫)

ગુણો રજઃ । (૬) સંજ્ઞા તૈજસઃ । ઇતિ સ્વપ્નાવસ્થાસામગ્ર્યઃ
। જાગ્રત્સુષુપ્ત્યવસ્થયોરિયં સ્વપ્નાવસ્થા ન ભવતિ । આત્મા
ત્વવસ્થાત્રયસાક્ષિત્વાત્ સ્વપ્નાવસ્થાતોઽપિ વિલક્ષણઃ । ઇતિ
સ્વપ્નાવસ્થાવિવેકઃ । (૬) સુષુપ્ત્યવસ્થાવિવેકઃ - યસ્યાં કેવલં
સુખમજ્ઞાનં ચાનુભૂયતે સા સુષુપ્તિઃ । અસ્યાઃ સામગ્ર્યઃ (૧) સ્થાનં
હૃદયમ્ । (૨) શક્તિર્દ્રવ્યસ્વરૂપિણી । જ્ઞાનક્રિયાત્મવ્યવહારાભાવાત્
કેવલજ્ઞાનસ્વરૂપેણૈવ દ્રવ્યેણ સત્ત્વાત્ દ્રવ્યશક્તિરિત્યુચ્યતે
। (૩) વાણી પશ્યન્તી । (૪) ભોગ આનન્દઃ । (૫) ગુણસ્તમઃ । (૬)
સંજ્ઞા પ્રાજ્ઞઃ । ન જાગ્રત્સ્વપ્નાવસ્થયોઃ સુષુપ્ત્યવસ્થાસ્તિ ।
આત્મા ત્વવસ્થાત્રયસાક્ષિત્વાત્ સુષુપ્ત્યવસ્થાતો વિલક્ષણઃ । ઇતિ
સુષુપ્ત્યવસ્થાવિવેકઃ । સમષ્ટિપઞ્ચકોશવિલક્ષણમસ્તિ
। ચતુર્થતરઙ્ગે ચતુર્વિધાકાશદૃષ્ટાન્તેન
જીવેશ્વરયોર્લક્ષ્યસ્વરૂપવિવેચનં વિસ્તરેણોક્તમ્ । ઉપરિ
ષષ્ઠતરઙ્ગેઽપિ અસ્તિ-ભાતિપ્રિયરૂપનિરૂપણપ્રસઙ્ગે
મહાવાક્યાર્થનિરૂપણપ્રસઙ્ગે ચાત્મનઃ પરમાર્થસ્વરૂપં
નિરૂપયિષ્યતે । સઙ્ગ્રહેણાત્રાત્મવિવેચનં કૃતમ્ ।

## (A. 284-316) મહાવાક્યાર્થોપદેશનિરૂપણમ્-

### (૨૮૪)

મહાવાક્યાર્થોપદેશઃઇત્થં પઞ્ચકોશેભ્યો વિવિચ્યાત્મજ્ઞાનેઽપિ ન કૃતકૃત્યતાસિદ્ધિઃ । અતો જીવબ્રહ્માભેદનિશ્ચયાય પનુરપિ વિચારઃ કર્તવ્ય એવ । તસ્માચ્છિષ્યસ્ય કૃતકૃત્યતાસિદ્ધયે ગુરુસ્તસ્મૈ મહાવાક્યાર્થમેવમુપદિદેશ - “પઞ્ચકોશવિલક્ષણતયા જ્ઞાતમાત્માનં બ્રહ્માભિન્નં વિજાનીહિ” ઇતિ ।

### (૨૮૫)

કર્તુર્ભોક્તુશ્ચાત્મનો બ્રહ્માભેદાસમ્ભવ ઇતિ પ્રશ્નઃનન્વાત્મા પુણ્યપાપે કૃત્વા સ્વર્ગનરકપૃથિવ્યાદિલોકેષુ નાનાવિધાનિ સુખદુઃખાન્યનુભવતિ । તસ્ય બ્રહ્મણૈક્યં નોપપદ્યેત ઇતિ ચેત્ અત્રોચ્યતે

## (A. 286-316) પૂર્વોક્તપ્રશ્નસ્યોત્તરમ્-

## (૨૮૬)

અકર્તુરભોક્તુર્નિત્યમુક્તસ્યાત્મનઃ સદા બ્રહ્માભેદઃ સિદ્ધ એવબ્રહ્મસ્વરૂપાદાત્મનો ભિન્નતયા દૃશ્યમાનં શાસ્ત્રેષુ શ્રુતં ચ પુણ્યપાપસ્વર્ગનરકાદિકં સર્વં મિથ્યેતિ વિજાનીહિ । ન હિ મિથ્યાવસ્ત્વધિષ્ઠાનં દૂષયતિ । સ્વપ્ને ભિક્ષામટન્ રાજા ન દરિદ્રો ભવતિ । ન મરીચિકોદકેન ભૂમિરાર્દ્રીભવતિ । ન મિથ્યાસર્પેણ રજ્જુઃ સવિષા ભવતિ । અતસ્ત્વં મિથ્યાભૂતસકલશુભાશુભકર્મણાં કર્તાપિ વસ્તુતો ન કર્તા, અકર્તૃત્વાભોક્તૃત્વાદિબોધકશ્રુતિપ્રમાણાત્ । ઇત્થં તવ સ્વરૂમત્યાશ્ચર્યં નિરુપમં ચ ભવતિ । અસ્યાયમભિપ્રાયઃ । તવ બ્રહ્માભિન્ને સ્વરૂપે સ્થૂલસૂક્ષ્મશરીરે તત્ફલજન્મમરણસ્વર્ગનરકસુખદુઃખાદિકં સર્વમવિદ્યયા કલ્પિતમ્ । તવ બ્રાહ્મસ્વભાવસ્તાભિઃ કલ્પિતસામગ્રીભિર્નાન્યથા ભવતિ । તસ્માજ્જ્ઞાનાત્પૂર્વમપ્યાત્મા બ્રહ્મસ્વરૂપ એવાસ્તે । કાલત્રયેઽપ્યાત્મનિ શરીરસ્ય તદ્ધર્માણાં ચ સમ્બન્ધો નાસ્તિ । આત્મા સદા નિત્યમુક્ત એવાસ્તે । આત્મનો બ્રહ્મણશ્ચ ન કદાપિ ભેદોઽસ્તિ ।

## (૨૮૭)

જીવન્મુક્તસ્ય નિશ્ચયઃ, વેદાન્તશ્રવણફલં ચઆત્મા યદિ સદા નિત્યમુક્તબ્રહ્મસ્વરૂપ એવ તદા જ્ઞાનનિવર્ત્યાજ્ઞાનતત્કાર્યાદ્યભાવાત્ જ્ઞાનસાધનશ્રવણાઇદવૈયર્થ્યમિતિ ચેન્ન । જીવન્મુક્તસ્ય વિદુષો દૃષ્ટ્યા અજ્ઞાનં તત્કાર્યં ચ સર્વં તુચ્છમેવ । તસ્ય જીવન્મુક્તસ્ય નિશ્ચય ઇદાનીં પ્રદર્શ્યતે - અયં પ્રપઞ્ચો ગગનારવિન્દવન્નાસ્ત્યેવ । તસ્માત્ જગતઃ કર્તેશ્વરોઽપિ નાસ્તિ । સાક્ષિણો વિષયભૂતમજ્ઞાનાદિકં સાક્ષ્યમિત્યુચ્યતે । તાદૃશસાક્ષ્યાભાવાત્ સાક્ષી નાસ્તિ । દૃશ્યાવભાસકં દૃગિત્યુચ્યતે । દેહાદિરૂપદૃશ્યાભાવાત્ દૃગપિ નાસ્તિ । ન ચ કેવલકૂટસ્થચૈતન્યસ્યૈવ સાક્ષીતિ દૃગિતિ ચ વ્યપદિશ્યમાનત્વાત્ સાક્ષિદૃશોર્નિષેધો ન યુજ્યતે ઇતિ વાચ્યમ્ । સાક્ષ્યાપેક્ષયા હિ સાક્ષીતિ, દૃશ્યાપેક્ષયા હિ દૃગિતિ ચ વ્યપદેશઃ । સાક્ષ્યદૃશ્યયોરભાવે સાક્ષીતિ દૃગિતિ ચ વ્યપદેશમાત્રં નિષિધ્યતે । ન તુ સ્વરૂપં નિષિધ્યતે । યદિ બન્ધઃ સ્યાત્તદા બન્ધનિવૃત્તિરૂપમોક્ષોઽપિ સ્યાત્ । બન્ધોઽપિ નાસ્તિ, મોક્ષોઽપિ નાસ્તિ । યદ્યજ્ઞાનં સ્યાત્તત્ જ્ઞાનેન નશ્યેત્ । અજ્ઞાનાભાવાત્તન્નાશકજ્ઞાનમપિ નાસ્તિ ઇતિ જ્ઞાત્વા કર્તવ્યં પરિત્યજેત્ । મયેદં કર્તવ્યમિતિ બુદ્ધિં પરિત્યજેદિતિ યાવત્ । યતોઽયં લોકઃ પરશ્ચ લોકસ્તુચ્છઃ, તસ્માત્તલ્લાભાર્થમનુષ્ઠેયં કિઞ્ચિદપિ નાસ્તિ । આત્મનિ બન્ધો નાસ્તિ । તસ્માન્મોક્ષોઆર્થમપિ કર્તવ્યં કિઞ્ચિદપિ નાસ્તિ । ઇત્થમાત્માનં નિત્યમુક્તબ્રહ્મસ્વરૂપેણ જ્ઞાત્વા નિશ્ચલો યદા કર્તવ્યમખિલં સન્ન્યસ્યતિ તદા અક્રિયબ્રહ્મસ્વરૂપવિદેહમોક્ષં લભતે । અસ્યાયમભિપ્રાયઃઆત્મા જ્ઞાનાત્પૂર્વમપિ નિત્યમુક્તબ્રહ્મસ્વરૂપ એવાસ્તે । તથાપિ જ્ઞાનાત્પૂર્વં "આત્મા કર્તા ભોક્તા ચ" ઇતિ મિથ્યાગ્રહણેન સુખપ્રાપ્તયે દુઃખહત્યૈ ચ પુરુષોઽનેકસાધનાન્યનુતિષ્ઠન્ વૃથા ક્લેશમનુભવતિ । પુરુષસ્ય બહુજન્માર્જિતપુણ્યપુઞ્જપરિપાકાદ્યદોત્તમાચાર્યલાભો ભવતિ તદા સ ગુરુર્વેદાન્તવાક્યમુપદિશતિ । તાદૃશવેદાન્તવાક્યશ્રવણેન "નાહં કર્તા ભોક્તા વા, કિન્ત્વહં બ્રહ્મસ્વરૂપઃ । અતશ્ચ ન મે કિઞ્ચિદપિ કર્તવ્યમસ્તિ" ઇતિ પુરુષસ્ય જ્ઞાનમુદેતિ । એતાદૃશં જ્ઞાનમેવ વેદાન્તશ્રવણાદિફલમ્ । બ્રહ્મપ્રાપ્તિસ્તુ ન વેદાન્તશ્રવણફલમ્, બ્રહ્મણઃ સ્વસ્વરૂપતયા નિત્યપ્રાપ્તત્વાત્ ।

(૨૮૮)

જ્ઞાન્યજ્ઞાનિનોશ્ચિહ્નમકર્તવ્યતાબુદ્ધિર્જ્ઞાનિનશ્ચિહ્નમ્ । અજ્ઞાનિનસ્તુ કર્તવ્યતાબુદ્ધિશ્ચિહ્નમ્ । યઃ સ્વાતિરિક્તં કિઞ્ચિદ્વસ્તુ સ્વેન પ્રાપ્તવ્યમસ્તીતિ મત્વા તત્પ્રાપ્તયે મયા પ્રયત્નઃ કર્તવ્ય ઇતિ મન્યતે સોઽજ્ઞાની । યઃ પુનઃ સ્વેન પ્રાપ્તવ્યમન્યન્નાસ્તીતિ દૃઢનિશ્ચયેન રૂપાન્તરપ્રાપ્તિં નેચ્છતિ, કિન્તુ શાન્તસઙ્કલ્પો ન કઞ્ચન કામં કામયતે સ જ્ઞાની ।

(૨૮૯)

ગોપ્યતત્ત્વોપદેશઃ - ચૈતન્યસ્વરૂપં બ્રહ્મૈકમખણ્ડમસઙ્ગં જન્માદિભાવવિકારશૂન્યમદૃશ્યં નામરૂપરહિતમદ્વિતીયં સ્વપ્રકાશાનન્દરૂપં ચાસ્તે । ન તત્ર મૂલાજ્ઞાનમસ્તિ । ન સ્થૂલસૂક્ષ્મશરીરાણિ સન્તિ । ન સમષ્ટિવ્યષ્ટિપ્રપઞ્ચોઽસ્તિ । નેશોઽસ્તિ । ન સૂત્રાત્મા, ન વા વિરાડસ્તિ । ન વિશ્વતૈજસપ્રાજ્ઞાઃ સન્તિ । ન ચ ભોગો વા યોગો વા બન્ધો વા મોક્ષો વાસ્તિ । ન કિઞ્ચિદપિ દ્વૈતં તત્ર વિદ્યતે । અથાપિ તસ્મિન્ બ્રહ્મણિ સર્વમપ્યસ્તિ । તથા હિ, જાગ્રત્કાલે સકલમિદં દૃશ્યં જગત્તસ્મિન્ બ્રહ્મણિ બુદ્ધિપરિકલ્પિતં વિલસતિ । સ્વપ્નકાલે ચ ભોગભોગ્યાદીનામભાવેઽપિ વિચિત્રો નાનાવિધઃ પ્રપઞ્ચો બુદ્ધિપરિકલ્પિતઃ પ્રતીયતે । સુષુપ્તિકાલે તુ સા બુદ્ધિઃ પ્રવિલીના ભવતિ । તદા સકલદૃશ્યદ્વૈતપ્રપઞ્ચરહિતમદ્વૈતં ચિન્માત્રં બ્રહ્મ પ્રકાશતે । બુદ્ધિપરિકલ્પિતં સર્વં મનોરથમાત્રં મિથ્યૈવ । નિશ્ચલં કૂટસ્થં બ્રહ્મૈવ તાં બુદ્ધિં પ્રકાશયતિ । યસ્ય

૧. જ્ઞાની સ્વવ્યતિરિક્તદ્વિતીયવસ્તુદર્શનશ્રવણાદિકં ન કરોતીતિ ભગવદ્ગીતાયાં પઞ્ચમાધ્યાયે સપ્તમાષ્ટમનવમેષુ શ્લોકેષૂક્તોઽર્થો મુમુક્ષૂણાં બુદ્ધિવૈશદ્યાય વિસ્પષ્ટં વ્યાખ્યાયતેઽત્ર-

યોગયુક્તો વિશુદ્ધાત્મા વિજિતાત્મા જિતેન્દ્રિયઃ ।
સર્વભૂતાત્મભૂતાત્મા કુર્વન્નપિ ન લિપ્યતે ॥ ભ. ગી. ૫.૭॥

અસ્યાયમર્થઃ - યોગયુક્તઃ = નિષ્કામકર્મયોગેન વા બ્રહ્મનિષ્ઠારૂપસન્ન્યાસયોગેન વા યુક્તઃ; અત એવ વિશુદ્ધાત્મા = વિશુદ્ધઃ = રાગદ્વેષાદિરહિતઃ આત્મા = મનો યસ્ય સઃ । અત એવ વિજિતાત્મા = વિજિતો વિષયેષુ તુચ્છત્વબુદ્ધ્યા અભાવરૂપતામાપાદિતઃ, આત્મા = બાહ્યવાસનારૂપસ્વભાવો યસ્ય સઃ । અત એવ જિતેન્દ્રિયઃ = જિતાનિ વિષયગ્રહણાદ્વિમુખીકૃતાનિ, ઇન્દ્રિયાણિ = દ્વિવિધાનીન્દ્રિયાણિ યેન સઃ । અત એવ સર્વભૂતાત્મભૂતાત્મા = સર્વભૂતાનાં = બ્રહ્માદિસ્તમ્બાન્તનિખિલપ્રાણિનામ્, આત્મભૂતઃ = સ્વરૂપભૂતઃ, આત્મા = પ્રત્યગ્રૂપ આત્મા યસ્ય સઃ । એવં સર્વાત્મભાવં પ્રાપ્તો યો બ્રહ્મવિત્ સઃ કુર્વન્નપિ = પ્રારબ્ધાક્ષિપ્તશરીરયાત્રાનિર્વાહકકર્માણિ પુણ્યપાપમિશ્રાત્મકાનિ વિધિપૂર્વકમવિધિપૂર્વકં વાનુતિષ્ઠન્નપિ ન લિપ્યતે = “અકર્તાહમભોક્તાહમસઙ્ગઃ પરમેશ્વરઃ” ઇતિ દૃઢતરનિશ્ચયવાન્ કર્મણાં ફલેન ન સમ્બધ્યતે ।

૨. નિશ્ચલં કૂટસ્થં બ્રહ્મ બુદ્ધિં પ્રકાશયતીતિ
વેદાન્તસિદ્ધાન્તઃ । અતો ન ક્ષણિકવિજ્ઞાનવાદિમતેઽતિવ્યાપ્તિઃ ।
તેષાં મતે બુદ્ધ્યતિરિક્તસ્ય પ્રકાશકપદાર્થસ્યાભાવાત્
। હૃદયે દૃઢતરં જ્ઞાનમેવમુદેતિ તસ્ય
હૃદયાદજ્ઞાનાન્ધાકારો નિશ્શેષં ધ્રુવં વિનશ્યતિ । સ સદા
અસઙ્ગૈકરસસ્વયમ્પ્રકાશબ્રહ્મસ્વરૂપતયૈવાત્માનમનુભવતિ । તસ્ય
દૃષ્ટ્યા ન કિઞ્ચિદપિ દૃશ્યં દ્વૈતમભૂત્ ભવતિ ભવિષ્યતિ
વા । તસ્ય દૃષ્ટ્યા સકલમિદં જગન્મનોરથમાત્રવિલસિતમ્ ।
ન હિ જ્ઞાની તાદૃશસ્ય જગતઃ પ્રાપ્તિં નિવૃત્તિં વા ઇચ્છતિ ।
ન હિ જ્ઞાનિનઃ કાચિદપ્યાશાસ્તિ । જ્ઞાની હિ ચક્ષુષા પશ્યન્નપિ
ન પશ્યતિ । શ‍ૃણ્વન્નપિ ન શ‍ૃણોતિ, રસયન્નપિ ન રસયતિ,
સ્પૃશન્નપિ ન સ્પૃશતિ, જિઘ્રન્નપિ ન જિઘ્રતિ । વદન્નપિ ન
વદતિ । ગૃહ્ણન્નપિ ન ગૃહ્ણાતિ । વિસૃજન્નપિ ન વિસૃજતિ ।
ગચ્છન્નપિ ન ગચ્છતિ । યુવતિમનુભવન્નપિ નિત્યસન્ન્યાસી ભવતિ ।
હે સોમ્ય, મહદિદમાશ્ચર્યં વિજાનીહીત્યાહ ગુરુઃ ।

૧. ઇદાનીં યોગયુક્તત્વવિશુદ્ધાત્મત્વવિજિતેન્દ્રિયત્વસર્વભૂતાત્મભૂતત્વરૂપપઞ્ચલક્ષણવિશિષ્ટસ્ય આહારાદિવિષયે પ્રવૃત્તસ્ય બ્રહ્મવિદો દર્શનશ્રવણાદિરૂપેન્દ્રિયવ્યાપારેષુ "નાહં કર્તા" ઇતિ યા સુદૃઢા બુદ્ધિઃ સોચિતૈવેતિ દ્વાભ્યાં શ્લોકાભ્યામુચ્યતેનૈવ કિઞ્ચિત્કરોમીતિ યુક્તો મન્યેત તત્ત્વિત્ ।
પશ્યન્ શ‍ૃણ્વન્ સ્પૃશન્ જિઘ્રન્નશ્નન્ ગચ્છન્ સ્વપન્ શ્વસન્ ॥ ભ. ગી. ૫.૮॥

પ્રલપન્ વિસૃજન્ ગૃહ્ણન્નુન્મિષન્નિમિષન્નપિ ।
ઇન્દ્રિયાણીન્દ્રિયાર્થેષુ વર્તન્ત ઇતિ ધારયન્ ॥ ૯॥

અનયોરર્થઃ - તત્ત્વવિત્ = આત્મનઃ સ્વભાવં જાનન્ બ્રહ્મવિત્ । યુક્તઃ = આત્મનઃ કૂટસ્થત્વાસઙ્ગત્વાન્તર્બહિઃપૂર્ણત્વાદિદર્શનરૂપપ્રજ્ઞયા યુક્તઃ સન્, પશ્યન્ રૂપમ્, શ‍ૃણ્વન્ શબ્દમ્, સ્પૃશન્ સ્પર્શમ્, જિઘ્રન્ ગન્ધમ્, અશ્નન્ અન્નાદિકમ્, ગચ્છન્ દેશાન્તરમ્, સ્વપન્ = નિદ્રામનુભવન્, શ્વસન્ = પ્રાણવ્યાપારં કુર્વન્, પ્રલપન્ = શબ્દમુચ્ચારયન્, વિસૃજન્ = મલમૂત્રાદિત્યાગં કુર્વન્, ગૃહ્ણન્ = દાનાદાનાદિકં કુર્વન્, ઉન્મિષન્ = નેત્રોન્મીલનં કુર્વન્, નિમિષન્ = નેત્રનિમીલનં કુર્વન્ । અપિશબ્દાત્ યદપ્યન્યત્કર્મ કર્તવ્યતયા પ્રાપ્તં તત્સર્વં બહિર્દૃષ્ટ્યાનુતિષ્ઠન્નપિ । ઇન્દ્રિયાણિ = દશેન્દ્રિયાણિ, ઇન્દ્રિયાર્થેષુ = શબ્દાદિસ્વસ્વવિષયેષુ વર્તન્તે = શ્રવણાદિરૂપસ્વસ્વવ્યાપારં કુર્વન્તિ ઇતિ = "નાહં શ્રોતા, સ્પ્રષ્ટા, દ્રષ્ટા, રસયિતા, ઘ્રાતા, ભોક્તા, ગન્તા વા" ઇત્યાદિલક્ષણાં વૃત્તિં ધારયન્ = સદા વહન્, નૈવ કિઞ્ચિત્કરોમીતિ ઇન્દ્રિયાણ્યેવ સ્વસ્વકર્માણિ કુર્વન્તિ । અહં ત્વક્રિયત્વાન્ન કિઞ્ચિદપિ

કર્મ કરોમિ । પરન્તુ તત્તદિન્દ્રિયકર્મણાં સાક્ષી ભૂત્વા નિષ્ક્રિયસ્વસ્વરૂપેણ તૂષ્ણીમસ્મીતિ મન્યેત = જાનીયાત્ । દેહેન્દ્રિયાદીનાં વ્યાપારેષુ "અહં મમ" ઇતિ ભાવનાં હિત્વા વિદ્વાન્ તૂષ્ણીં સ્થાતુમર્હતીતિ શ્લોકદ્વયસ્ય સમ્પિણ્ડિતોઽર્થઃ ।

અત્રેદમાકૂતં - જ્ઞાનિનઃ સદા અસઙ્ગનિર્વિકારચિન્માત્રસ્વરૂપબ્રહ્મૈવાહમિતિ દૃઢનિશ્ચયસત્ત્વાત્સ પરમાર્થતો ન કામપિ ક્રિયાં કરોતિ । પ્રારબ્ધવશાત્તુ તસ્ય દેહેન્દ્રિયદ્વારા દર્શનાદિકાઃ ક્રિયાઃ સમ્ભવન્તિ । તાશ્ચ ક્રિયાસ્તસ્ય પ્રારબ્ધફલોપભોગરૂપાઃ । પરન્તુ પ્રારબ્ધબલાયાતાંસ્તાન્ ભોગાન્ ભુઞ્જાનસ્યાપિ જ્ઞાનિનો ન ભોગેષુ રાગો જાયતે । તથા હિ ॥

॥ રાગશ્ચ નેન્દ્રિયકૃતઃ । ઇન્દ્રિયાણાં દર્શનાદિવ્યાપારજનનેનૈવ ચરિતાર્થત્વાત્ । નાપ્યાત્મકૃતઃ । આત્મનઃ સર્વદૃશ્યાવભાસકસાધારણનિર્વિકારપ્રકાશસ્વરૂપત્વાત્ । પરિશેષાત્ વિષયનિષ્ઠગુણદોષવિવેચનસમર્થમનસ એવાનુકૂલે વિષયે રાગો ભવતિ । સ ચ રાગો જ્ઞાનિનો મનસિ નૈવોન્મિષતિ । જ્ઞાનિનો મનસોઽન્તર્મુખતયાતીવોપશાન્તત્વાત્ । "રાગો લિઙ્ગમબોધસ્ય" (નૈ. સિ. ૪.૬૭) ઇતિ હિ શાસ્ત્રપ્રસિદ્ધિઃ । જ્ઞાનિનઃ સર્વથા રાગાનુદયે તસ્ય શરીરસ્થિતિનિમિત્તભોજનાદાવપ્યપ્રવૃત્ત્યાપત્ત્યાં જ્ઞાનિનઃ પ્રારબ્ધાનુભવો નાસ્તીત્યાપદ્યેત । ન ચેયમાપત્તિરિષ્ટૈવેતિ વક્તું શક્યતે । કર્માનુસારેણ પ્રાણિનાં ફલદાતુરીશ્વરસ્યેચ્છયા જ્ઞાનિનોઽપિ પ્રારબ્ધાનુભવસ્યાવશ્યકત્વાત્ । તસ્માજ્જ્ઞાનિનોઽપિ પ્રારબ્ધફલાનુભવાન્યથાનુપપત્ત્યા ભોજનાદાવિચ્છોદેતીતિ વાચ્યમિતિ ચેત્તન્ન । પ્રારબ્ધજનિતો રોગાદિર્યથા જ્ઞાનિન ઇચ્છાવિરહેઽપિ ભવતિ તથૈવ તસ્ય મિથ્યાજ્ઞાનાભાવાત્ પ્રારબ્ધફલભોગે અદૃઢ આભાસરૂપો રાગાભાસરૂપો રાગો જાયતે । અદૃઢત્વાદેવ સ રાગઃ સ્વનિવૃત્તયે ન વેદાન્તવિચારાદિકમપેક્ષતે । સોઽયમદૃઢો રાગઃ સ્વાયત્તત્વેન ભર્જિતબીજવદ્દુર્બલત્વેન ચ શરીરસ્થિતિમાત્રનિમિત્તશાસ્ત્રીયભોગમાત્રે હેતુર્ભવતિ ન તુ વ્યસનકારણીભૂતશાસ્ત્રનિષિદ્ધભોગહેતુઃ । અપિ ચ જ્ઞાનિનો વિષયસત્યતાભ્રાન્ત્યભાવાત્, પ્રત્યુત દૃઢતરવિષયમિથ્યાત્વનિશ્ચયજનિતતીવ્રતરવૈરાગ્યબલાચ્ચ દૃઢરાગો નૈવ ભવતિ । અયમર્થઃ સ્પષ્ટં ષષ્ઠતરઙ્ગે વક્ષ્યતે । અથવા શાખાગ્રં વા રજ્જું વારુહ્ય નૃત્યતોઽપિ મલ્લસ્ય ચિત્તં યથા સ્વાવલમ્બે એવ જાગરૂકં ભવતિ, યથા વા ક્ષીરપૂર્ણં કુમ્ભં ધૃત્વા ગચ્છન્ત્યા યોષિતઃ પથિ સ્વસખીભિઃ સહ વાર્તાસલ્લાપાદિકં કુર્વાણાયા અપિ ચિત્તં ક્ષીરે એવૈકાગ્રં ભવતિ, તથા જ્ઞાનિનોઽપિ ચિત્તં પ્રારબ્ધવશાદાપાતતો વિષયેષુ પ્રવૃત્તમપિ વિશેષતો લક્ષ્યે સ્વાત્મસ્વરૂપ એવ નિષ્ઠિતં ભવતિ । કિઞ્ચ જ્ઞાનિનો દેહેન્દ્રિયાદિવર્ગો વિનૈવ રાગં પ્રારબ્ધફલત્વેનોપગતદર્શનાદિક્રિયયૈવ કૃતાર્થતાં યાતિ । અતશ્ચ સ્વાત્મસ્વરૂપેઽવસ્થિતસ્ય જ્ઞાનિનઃ પ્રારબ્ધફલાયાતભોગાભાસેષુ ન દૃઢતરરાગસમ્ભવઃ । કદાચિત્, વિષયપ્રવૃત્તિહેતુભૂતપ્રારબ્ધવતો જ્ઞાનિનો

મનો મત્તગજેન્દ્રવત્પ્રમત્તં સત્ વિષયેષુ વિક્ષિપ્તમપિ, વિષયેષુ દોષદૃષ્ટ્યાત્મકવિવેકમૃગેન્દ્રોન્મેષાત્ ઝટિત્યેવ વિક્ષેપાદ્વિમુક્તં પ્રશાન્તં ભવતિ ।

સ્વાન્તઃકરણે તીવ્રરાગાભાવાત્ ભોગહેતુપ્રારબ્ધસત્ત્વાચ્ચ ગઙ્ગાનિમગ્નાર્ધગાત્રઃ પુરુષ ઇવ જ્ઞાની મુખ્યતયા સ્વરૂપસુખે રમતે । અમુખ્યતયા વેતનગ્રાહી ભૃતક ઇવ ક્લેશં સહમાનઃ તીવ્રપ્રારબ્ધફલં ચાનુભવતિ । શિથિલપ્રારબ્ધફલભૂતનિષિદ્ધવિષયાન્ પ્રયત્નેન પરિહરતિ ચ । તથાપિ જ્ઞાનનિર્ભિન્નહૃદયગ્રન્થેર્જ્ઞાનિનોઽન્તઃકરણસ્ય ક્ષીણવાસનત્વાત્તીવ્રતરરાગાભાવાચ્ચ નિષિદ્ધવિષયપરિત્યાગેનાદૃઢરાગેણ વિહિતવિષયભોગેઽપિ વિકલપુરુષચિત્તસ્યેવ જ્ઞાનિનોઽન્તઃકરણસ્ય ન મુખ્યતેત્યયમભિપ્રાયઃ, ઇન્દ્રિયાણીન્દ્રિયાર્થેષુ વર્તન્તે ઇતિ જડેન્દ્રિયાણામેવ સ્વસ્વવિષયેષુ પ્રવૃત્તિં વર્ણયતા ગીતાશ્લોકેન બોધ્યતે ।

"જ્ઞાની યુવતિમનુભવન્નપિ સન્ન્યાસી" ઇત્યુક્તેરયમાશયઃ - વિરક્તસ્ય દારૈષણાતો વ્યુત્થિતસ્ય સન્ન્યાસિનો જ્ઞાનિનો ન સ્ત્રીભોગપ્રસક્તિઃ । તસ્ય સ્ત્રીપ્રસક્તૌ વ્યુત્થાનશાસ્ત્રં નિરર્થકં ભવેત્ । વાન્તાશી સ સન્ન્યાસ્યેવ ન ભવેત્ । કિન્તુ વેષધારી ડામ્ભિકો ગૃહસ્થાદપ્યધમોઽપૂજ્યશ્ચ । પરિશેષાત્ ગૃહસ્થે જ્ઞાનિનિ સ્ત્રીભોગઃ પ્રસજ્યતે । સ જ્ઞાની ગૃહસ્થો ધૃતા-॥

## (A. 290-292) લયચિન્તનક્રમઃ-

### (૨૯૦)

સકલમપિ પ્રપઞ્ચમીશ્વરસ્વરૂપતયા ચિન્તયેતિત્થં પરમાર્થતત્ત્વે ઉપદિષ્ટેઽપિ શિષ્યમુખેઽપ્રસન્નતામાલક્ષ્ય "નૂનમયમકૃતાર્થો યતોઽસ્ય મુખમપ્રસન્નમાસ્તે" ઇતિ ગુરુર્નિરચિનોત્ । અતઃ પુનરપિ તં સ્થૂલદૃષ્ટ્યોપદિશન્પ્રપઞ્ચલયચિન્તનપ્રક - યથા મૃત્કાર્યભૂતો ઘટોઽન્તર્બહિશ્ચ મૃદેવ ભવતીતિ મૃત્કાર્યં સર્વમપિ મૃદેવ । યથા ચ જલકાર્યભૂતફેનબુદ્બુદાદિકં સર્વમપિ જલમેવ ભવતિ । તથા યદ્યસ્ય કાર્યં તત્તાદૃશકારણસ્વરૂપમેવ ભવતિ । ન કાર્યં કારણસ્વરૂપાદતિરિચ્યતે । સકલસ્ય પ્રપઞ્ચસ્ય મૂલકારણમીશ્વર એવ । તસ્માત્સકલોઽપિ કાર્યપ્રપઞ્ચ ઈશ્વરસ્વરૂપાન્નાતિરિચ્યતે । સકલપ્રપઞ્ચસ્યાપિ સ્વરૂપમીશ્વર એવ । "સ ચેશ્વરોઽહમેવ" ઇતિ જ્ઞાત્વા સકલપ્રપઞ્ચસ્ય લયં સ્વસ્મિન્નનુચિન્તયેત્ ।

### (૨૯૧)

સ્થૂલપ્રપઞ્ચસ્ય પઞ્ચીકૃતભૂતસ્વરૂપત્વં સૂક્ષ્મસૃષ્ટેરપઞ્ચીકૃતભૂતસ્વરૂપત્વં ચ ચિન્તયેત્ ॥ શિનસ્તૈલપાને પ્રવૃત્તિવત્ સન્તાનાર્થી સન્ શાસ્ત્રવિધિમનતિક્રમ્ય વિધિનોઢાં જાયાભૃતુકાલે ગચ્છન્નપિ ન લિપ્યતે, યતઃ સ ભોગાસક્ત્યા ન સ્ત્રિયં ગચ્છતિ । વિષયમિથ્યાત્વદર્શનેન વિવેકવૈરાગ્યાદિસમ્પન્નત્વાત્ તાદૃશો ગૃહસ્થો જ્ઞાની ઉપચારાત્સન્ન્યાસીત્યુચ્યતે । સન્ન્યાસિન ઇવ તસ્યાપિ વિવેકવૈરાગ્યાદિસમ્પન્નત્વાત્ । યસ્તુ વિવેકવૈરાગ્યાદિવિકલો ભોગાસક્ત્યૈવ સ્ત્રિયં

ગચ્છતિ સ વેદાન્તપ્રવચનપટુરપિ ન જ્ઞાની । રાગાદેરનિવૃત્ત્યા સોઽજ્ઞાન્યેવ । અત્ર સ્ત્રીરૂપવિષયમધિકૃત્ય કૃતો વિચારઃ સર્વવિષયવિચારોપલક્ષણાર્થઃ । રાગરૂપદોષપ્રતિષેધશ્ચ દ્વેષાદિસર્વદોષપ્રતિષેધોપલક્ષણાર્થો વેદિતવ્યઃ । અયમભિપ્રાયઃ - "ઇન્દ્રિયેષુ સ્વસ્વવ્યાપારેષુ વ્યાપૃતેષ્વપિ ન મે તત્રાસ્તિ સમ્પર્કઃ । નાહમિન્દ્રિયવર્ગઃ । ઇન્દ્રિયવર્ગશ્ચ ન મમ । અહં તુ સાક્ષી કૂટસ્થોઽસઙ્ગઃ । ઇન્દ્રિયાણિ વિષયેષુ પ્રવર્તન્તાં વા તતો નિવર્તન્તાં વા । ન મે તત્ર સમ્બન્ધલેશોઽપિ" ઇત્યેવં જ્ઞાનિનો નિશ્ચયસત્ત્વાદેવ સ કર્માણિ કુર્વન્નિવ લક્ષ્યમાણોઽપિ ન પરમાર્થતઃ કિઞ્ચિદપિ કરોતિ ।

૧. અભિલષિતાર્થપ્રાપ્તૌ ચિત્તચાઞ્ચલ્યહેતુભૂતેચ્છારૂપવૃત્તિનાશે તેનૈવ નિમિત્તેનોદિતાયામન્તર્મુખાયામન્તઃકરણસ્ય સાત્ત્વિકવૃત્તૌ નિશ્ચલદર્પણાદાવિવ સ્વરૂપાનન્દપ્રતિબિમ્બો ભવતિ । તમાનન્દમનુભવતો મુખવિકાસો ભવતિ । પ્રકૃતે ચ શિષ્યસ્યાવિદ્યાતત્કાર્યનિવૃત્તિપૂર્વકપરમાનન્દરૂપમોક્ષો જ્ઞાનદ્વારા પ્રાપ્તુમિષ્ટઃ । અભિલષિતાર્થસિદ્ધ્યભાવાચ્ચ શિષ્યસ્યેચ્છારૂપચિત્તવૃત્તિવિનાશો નાભવત્ । ઇચ્છારૂપવૃત્તિનિવૃત્ત્યાત્મકનિમિત્તાભાવાદન્તર્મુખવૃત્ત્યુદયઃ, તસ્મિન્ સ્વરૂપાનન્દપ્રતિબિમ્બોદયઃ, તદનુભવજન્યમુખવિકાસશ્ચ ન શિષ્યસ્યાભવત્ । તેન મુખવિકાસાભાવેન શિષ્યસ્યાકૃતાર્થતાનુમિતાભૂત્ ।

૨. કાર્યસ્ય કારણસ્વરૂપતાં જ્ઞાત્વા તદનતિરિક્તત્વચિન્તનમેવ લયચિન્તનમુચ્યતે । સ્થૂલમિદં બ્રહ્માણ્ડમખિલમપિ પઞ્ચીકૃતભૂતકાર્યમ્ । તત્ર પૃથિવીકાર્યં સર્વં પૃથિવીસ્વરૂપમ્ । જલકાર્યં સર્વં જલસ્વરૂપમ્ । ઇત્થમેવ યદ્યદ્ભૂતકાર્યં તત્તદ્ભૂતસ્વરૂપમિત્યખિલસ્યાપિ બ્રહ્માણ્ડસ્ય પઞ્ચીકૃતપઞ્ચભૂતસ્વરૂપત્વમનુચિન્તયેત્ । તથૈવ પઞ્ચીકૃતં સર્વમપિ ભૂતમપઞ્ચીકૃતભૂતકાર્યત્વાદપઞ્ચીકૃતભૂતસ્વરૂપમિતિ ચિન્તયેત્ । અન્તઃકરણાદિસૂક્ષ્મસૃષ્ટિરપ્યપઞ્ચીકૃતભૂતકાર્યત્વાદપઞ્ચીકૃતભૂતસ્વરૂપમિતિ ચિન્તયેત્ । અન્તઃકરણં સર્વભૂતસમષ્ટિસત્ત્વગુણકાર્યત્વાત્સત્ત્વગુણસ્વરૂપમેવ । તથા પ્રાણોઽપિ પૂર્વોક્તપઞ્ચભૂતસમષ્ટિરજોગુણકાર્યત્વાત્ રજોગુણસ્વરૂપ એવ । પાય્વિન્દ્રિયં પૃથિવ્યા રજોગુણકાર્યત્વાત્ પૃથિવ્યા રજોગુણસ્વરૂપમેવ । ઘ્રાણેન્દ્રિયં પૃથિવ્યાઃ સત્ત્વગુણકાર્યત્વાત્ પૃથિવ્યાઃ સત્ત્વગુણસ્વરૂપમેવ । તથૈવ રસનેન્દ્રિયમુપસ્થેન્દ્રિયઞ્ચ જલસ્ય ક્રમેણ સત્ત્વગુણરજોગુણકાર્યત્વાત્ તત્તત્સ્વરૂપમેવ । ચક્ષુરિન્દ્રિયં પાદેન્દ્રિયઞ્ચ તેજસઃ ક્રમેણ સત્ત્વગુણરજોગુણસ્વરૂપે । ત્વગિન્દ્રિયં પાણીન્દ્રિયઞ્ચ વાયોઃ ક્રમેણ સત્ત્વગુણરજોગુણસ્વરૂપે । શ્રોત્રેન્દ્રિયં

વાગિન્દ્રિયં ચાકાશસ્ય ક્રમેણ સત્ત્વગુણરજોગુણસ્વરૂપે । ઇત્થં
સૂક્ષ્મસૃષ્ટિઃ સમગ્રાપ્યપઞ્ચીકૃતભૂતસ્વરૂપૈવેતિ ચિન્તયેત્ ।

## (૨૯૨)

અપઞ્ચીકૃતભૂતાનાં પ્રકૃતૌ પ્રધાને પ્રધાનસ્ય બ્રહ્મણિ ચ લયં ચિન્તયેત્ - પ્રાગુક્તચિન્તનાનન્તરમપઞ્ચીકૃતભૂતાનામપિ લયશ્ચિન્તનીયઃ । પૃથિવી જલકાર્યત્વાત્ જલસ્વરૂપા । જલં તેજઃકાર્યત્વાત્તેજઃસ્વરૂપમ્ । તેજો વાયુકાર્યત્વાદ્વાયુસ્વરૂપમ્ । વાયુરાકાશકાર્યત્વાદાકાશસ્વરૂપઃ । આકાશસ્તમોગુણપ્રધાનપ્રકૃતિકાર્યત્વાત્પ્રકૃતિસ્વરૂપઃ । પ્રકૃતિર્માયાયા અવસ્થાવિશેષત્વાન્માયાસ્વરૂપા । એકમેવ વસ્તુ "પ્રધાનમ્, પ્રકૃતિઃ, માયા, અવિદ્યા, અજ્ઞાનમ્, શક્તિઃ" ઇત્યનેકશબ્દૈર્વ્યપદિશ્યતે । તદેવ વસ્તુ સકલમપિ કાર્યજાતં સ્વસ્મિન્નુપસંહૃત્ય પ્રલયકાલે ઉદાસીનસ્વરૂપેણ વર્તમાનત્વાત્ પ્રધાનં ઇત્યુચ્યતે । તદેવ વસ્તુ પ્રપઞ્ચસૃષ્ટ્યુપાદાનતાયોગ્યતમોગુણપ્રધાનસ્વરૂપેણ વિદ્યમાનત્વાત્ પ્રકૃતિરિત્યાખ્યાયતે । દેશકાલાદિસામગ્રીં વિનૈવેન્દ્રજાલેન દુર્ઘટાનેક૧. સકલમિદં જગત્ યસ્માત્ પ્રકર્ષેણ ક્રિયતે તાદૃશં સૃષ્ટ્યુપાદાનભૂથં વસ્તુ "પ્રકૃતિઃ" ઇત્યુચ્યતે । અથવા "પ્ર" ઇતિ સત્ત્વગુણઃ, "કૃ" ઇતિ રજોગુણઃ, "તિ" ઇતિ સત્ત્વરજસ્સહિતતમોગુણ ઉચ્યતે । તથા ચ તમોગુણપ્રધાના પ્રકૃતિરિતિ સિદ્ધ્યતિ । પદાર્થોત્પાદનકાલે ઇન્દ્રજાલં "માયા" ઇતિ વ્યપદિશ્યતે । તદ્વદેવાસઙ્ગેઽદ્વિતીયે બ્રહ્મણિ દુર્ઘટેચ્છાદ્યુત્પાદકત્વાત્તદેવ વસ્તુ માયેતિ ભણ્યતે । તદેવ વસ્તુ બ્રહ્મસ્વરૂપાવારકત્વાદજ્ઞાનમિતિ કીર્ત્યતે । તદેવ વસ્તુ બ્રહ્મવિદ્યાવિનાશ્યત્વાદવિદ્યેતિ વર્ણ્યતે । તદેવ વસ્તુ કદાપિ સ્વાતન્ત્ર્યેણાનવસ્થિતં સત્ બ્રહ્મચૈતન્યમાશ્રિત્યૈવ વર્તમાનત્વાચ્છક્તિરિતિ ચ વ્યપદિશ્યતે । ઇત્થં પ્રકૃત્યાદયઃ પ્રધાનસ્યાવસ્થાવિશેષત્વાત્પ્રધાનસ્વરૂપા એવ ભવન્તિ । તચ્ચ પ્રધાનં બ્રહ્મચૈતન્યસ્ય શક્તિઃ । યથા પુરુષગતા સામર્થ્યરૂપા શક્તિઃ પુરુષાત્પૃથક્તયા નાસ્તિ તથા બ્રહ્મચૈતન્યગતા પ્રધાનરૂપા શક્તિરપિ બ્રહ્મચૈતન્યાદ્વ્યતિરેકેણ નાસ્તિ । ઇત્થં બ્રહ્મચૈતન્યે સકલાનાત્મપદાર્થાનાં લયશ્ચિન્તનીયઃ । તતઃ "તાદૃશમદ્વિતીયં બ્રહ્માહમેવ" ઇતિ ચિન્તયેત્ । યસ્ય હિ મન્દબુદ્ધેર્બુદ્ધિમાન્દ્યાદિરૂપપ્રતિબન્ધૈર્વેદાન્તવિચારે ન પ્રવૃત્તિરુપજાયતે । કૃતે વા વિચારે સાક્ષાત્કારો ન સમ્પદ્યતે તસ્યેદં લયચિન્તનરૂપં ધ્યાનમુક્તમ્ ।

## (૨૯૩)

જ્ઞાનધ્યાનયોર્ભેદઃ, અહઙ્ગ્રહધ્યાનં ચજ્ઞાનં હિ પ્રમાણપ્રમેયયોરધીનમ્, ન તુ વિધેઃ પુરુષેચ્છાદેર્વાધીનમ્ । ધ્યાનં તુ વિધેઃ પુરુષેચ્છાશ્રદ્ધયોઃ હઠાત્કારસ્ય ચાધીનમ્ ।

૧. નનુ યદિ બ્રહ્મણઃ શક્તિર્બ્રહ્મણો ભિન્ના
તદા અદ્વૈતશ્રુતિવિરોધઃ । યદ્યભિન્ના તદા તસ્યા
બ્રહ્મસ્વરૂપત્વાદેવ "બ્રહ્મણઃ શક્તિ" ઇતિ
પૃથક્તયા વ્યવહારાનુપપત્તિઃ । તસ્માદ્બ્રહ્મણઃ શક્તેશ્ચ
ભેદાભેદૌ વાચ્યૌ । તથાત્વે ચ તમઃપ્રકાશયોરિવ

વિરુદ્ધસ્વભાવયોર્ભેદાભેદયોઃ સામાનાધિકરણ્યાનુપપત્તિરિતિ
ચેન્ન । રજ્વા સહ સર્પસ્યેવ બ્રહ્મણા સહ શક્તેઃ કલ્પિતભેદો
વાસ્તવાભેદશ્ચેત્યનિર્વચનીયતાદાત્મ્યસમ્બન્ધોઽભ્યુપેયતે ।
તતશ્ચ શક્તેઃ સ્વાશ્રયેણ સહ વાસ્તવભેદાભાવાત્ કેનાપિ પ્રમાણેન
તસ્યાઃ સ્વાશ્રયાદ્ભિન્નતયા પ્રતીત્યભાવાચ્ચ પ્રલયકાલે માયાયાઃ
સત્ત્વેઽપિ ન તયા બ્રહ્મણઃ સદ્વિતીયત્વમ્ । સૃષ્ટિકાલેઽપિ
માયાકાર્યદ્વૈતપ્રપઞ્ચે પ્રતીયમાનેઽપિ ન તેન પ્રપઞ્ચેન
બ્રહ્મણઃ સદ્વિતીયત્વમ્ । રજ્જૌ કલ્પિતસર્પાદિર્યથા પરમાર્થતો
રજ્જુસ્વરૂપત્વમેવ તથા બ્રહ્મણિ કલ્પિતપ્રપઞ્ચસ્યાપિ પરમાર્થતો
બ્રહ્મસ્વરૂપત્વેન તદતિરેકેણ પ્રપઞ્ચસ્યાભાવાત્ । તસ્માદ્બ્રહ્મ
સદાદ્વિતીયમેવ ।

૨. અત્રાદિશબ્દેન વર્તમાનો ભૂતો ભાવી ચેતિ ત્રિવિધઃ પ્રતિબન્ધો
ગ્રાહ્યઃ । તત્રેષ્ટવસ્તુષ્વહં મમેતિ દૃઢતરવાસનારૂપા
વિષયાસક્તિઃ, પરોક્તાર્થગ્રહણસામર્થ્યાભાવરૂપબુદ્ધિમાન્દ્યમ્,
આચાર્યાદ્યાપ્તોક્તાર્થે વિશ્વાસાભાવાદન્યથાકલ્પનરૂપઃ કુતર્કઃ,
દેહાદિષ્વાત્મબુદ્ધિરૂપો વિપર્યયાખ્યદુરાગ્રહ ઇત્યેતચ્ચતુષ્ટયં
વર્તમાનપ્રતિબન્ધઃ । ધનપુત્રકલત્રાદીષ્ટવસ્તુનાશાનન્તરમપિ
તદનુચિન્તનં ભૂતપ્રતિબન્ધઃ । બ્રહ્મલોકાદિપ્રાપ્તીચ્છા
ભાવિજન્મહેતુ-
ભૂતપ્રારબ્ધકર્મશેષો વા ભાવિપ્રતિબન્ધઃ । એતેષાં જ્ઞાનોત્પત્તિપ્રતિબન્ધકાનાં નિરૂપણં પઞ્ચદશ્યાં ધ્યાનદીપે ૩૮-૫૩ શ્લોકેષુ દ્રષ્ટવ્યમ્ । તત્ર પ્રત્યક્ષજ્ઞાને પ્રમાણં ચક્ષુરાદીન્દ્રિયમ્, પ્રમેયો ઘટાદિઃ । ઘટચક્ષુષોઃ સન્નિકર્ષે સતિ વિનાપિ પુરુષસ્યેચ્છાદિકં ઘટપ્રત્યક્ષં ભવતિ । “ચતુર્થ્યાં ચન્દ્રો ન દ્રષ્ટવ્યઃ” ઇતિ નિષેધોઽસ્તિ । તથા સત્યપિ “અસ્મિન્ દિને ચન્દ્રમહં ન પશ્યેયમ્” ઇતિ નિશ્ચયવતોઽપિ પુરુષસ્યાનિચ્છત એવ યેન કેનાપિ કારણેન ચક્ષુશ્ચન્દ્રયોઃ પ્રમાણપ્રમેયયોઃ સન્નિકર્ષે સતિ ચન્દ્રસ્ય પ્રત્યક્ષજ્ઞાનં જાયત એવ । ઇત્થં જ્ઞાનં પ્રમાણપ્રમેયમાત્રાધીનમ્ । ન તુ વિધેઃ પુરુષેચ્છાદેર્વાધીનમ્ । “સાલગ્રામશિલા વિષ્ણુરૂપા” ઇતિ ધ્યાયત ઉત્તમં ફલં ભવતિ । તત્ર પુરુષઃ શાસ્ત્રેણ વિષ્ણું ચતુર્ભુજત્વેન શઙ્ખચક્રગદાપદ્મલક્ષ્મીસહિતત્વેન ચ જાનાતિ । ચક્ષુષા તુ સાલગ્રામં શિલાત્વેનૈવ જાનાતિ । તથાપિ શાસ્ત્રવિધૌ વિશ્વાસેન ધ્યાનફલે ઇચ્છયા ચ “સાલગ્રામં વિષ્ણુઃ” ઇતિ ધ્યાયતિ પુરુષઃ ।

૧. જ્ઞાનં ત્રિવિધં - ભ્રમજ્ઞાનમ્, સ્મૃતિજ્ઞાનમ્, પ્રમાજ્ઞાનં
ચેતિ । તત્ર ભ્રાન્તિજ્ઞાનં કેવલં કલ્પિતવસ્ત્વધીનમ્
। સ્મૃતિજ્ઞાનં સ્વવિષયસદૃશવસ્તુદર્શનેન
વા તત્સમ્બન્ધિવસ્તુદર્શનેન વોદિતા યા
પૂર્વાનુભૂતવસ્તુવિષયકમનોવૃત્તિસ્તદધીનમ્ ।

પ્રમાજ્ઞાનં ત્વન્તર્ગતસુખાદિવિષયકજ્ઞાનં ન્યાયમતે
વાચસ્પતિમતે ચ મનોરૂપપ્રમાણસ્ય સુખાદિરૂપપ્રમેયસ્ય
ચાધીનમ્ । સિદ્ધાન્તે તુ મનસઃ પ્રમાણત્વાનભ્યુપગમેન
સુખાદિજ્ઞાનં કેવલપ્રમેયાધીનમ્ । બાહ્યપ્રમાજ્ઞાનં
તુ ઇન્દ્રિયાનુમાનાદિરૂપપ્રમાણસ્ય પ્રમેયરૂપવસ્તુનશ્ચ
સમ્બન્ધાધીનમ્ । શબ્દપ્રમાણજન્યબ્રહ્મજ્ઞાનરૂપા શાબ્દીપ્રમા તુ
મહાવાક્યરૂપશબ્દપ્રમાણસ્ય પ્રત્યગભિન્નબ્રહ્મરૂપપ્રમેયસ્ય
ચ યો લક્ષણાવૃત્તિરૂપપરમ્પરાસમ્બન્ધસ્તજ્જ્ઞાનાધીના
। ઇતરલૌકિકપદાર્થવિષયકશાબ્દી પ્રમા તુ
ક્વચિત્ શક્તિવૃત્તિરૂપસમ્બન્ધજ્ઞાનાધીના ।
ક્વચિલ્લક્ષણાવૃત્તિરૂપસમ્બન્ધજ્ઞાનાધીના । ઇત્થં
ચ કિઞ્ચિજ્જ્ઞાનં જ્ઞેયવસ્તુમાત્રાધીનમ્ । કિઞ્ચિજ્જ્ઞાનં
પ્રમાણપ્રમેયસમ્બન્ધાધીનમ્ । અથવા તત્સમ્બન્ધજ્ઞાનાધીનમ્ ।
ભ્રમપ્રમાસાધારણ્યેન જ્ઞાનસ્ય વિષયો પ્રમેય ઇત્યુચ્યતે ।
તત્ર જ્ઞેયત્વમપ્યસ્તિ । ઇત્થં સર્વમપિ જ્ઞાનં વસ્ત્વધીનમેવ
। "ઇદં વસ્તુ" [ ઇહ "જ્ઞાનમ્" ] ઇતિ શબ્દેન
ઈશ્વરસૃષ્ટેન વા મનોમયેન વા (પરોક્ષજ્ઞાનવિષયેણ વા)
ભ્રમસિદ્ધેન વા વસ્તુના પ્રમાણદ્વારા સાક્ષાદ્વા વૃત્તેઃ સમ્બન્ધો
ગૃહ્યતે । તસ્માજ્જ્ઞાનં ન વિધ્યાદ્યધીનમ્ । ધ્યાનરૂપમુપાસનં
તુ ન વસ્ત્વધીનમ્ । કિન્તુ કર્ત્રધીનમ્ । યદ્યપિ ધ્યાનમપિ
મનોવૃત્ત્યાત્મકમેવ તથાપિ પુરુષસ્યેચ્છાદ્યધીનં તદ્ભવતિ
। ન વસ્ત્વધીનમ્ । તસ્માદ્ધ્યાનં માનસત્વેઽપિ ન જ્ઞાનમ્ ।
કિન્તુ ક્રિયૈવ । બ્રહ્મસાક્ષાત્કારરૂપજ્ઞાને પ્રત્યગભિન્નં બ્રહ્મ
પ્રમેયં વેદાન્તમહાવાક્યં પ્રમાણમ્ । ગુરુમુખાદ્વેદાન્તશ્રવણં
કુર્વતો વેદાન્તમહાવાક્યાદ્બ્રહ્માત્મસાક્ષાત્કારો જાયતે ।
મહાવાક્યરૂપપ્રમાણમન્તરા કેવલેચ્છાદિના નાત્મસાક્ષાત્કારો ભવતિ
। ઉપાસનં ત્વૈશ્વર્યં વિધિમપેક્ષતે । શાસ્ત્રવિધિમનુસૃત્ય
ક્રિયમાણમેવોપાસનં ફલાય કલ્પતે । વિધિમન્તરા સ્વેચ્છયા
સ્વસઙ્કલ્પાનુસારેણ યત્કિઞ્ચિદર્થધ્યાનં નેષ્ટફલાય
પ્રભવતિ । તદિદં ધ્યાનમનેકવિધમ્ । સાલગ્રામશિલાયાં
વિષ્ણુબુદ્ધિકરણવદન્યસ્મિન્નન્યબુદ્ધિકરણં પ્રતીકધ્યાનમ્
। વૈકુણ્ઠવાસિનો વિષ્ણોશ્ચતુર્ભુજત્વાદિરૂપેણ ધ્યાનં તુ

નાન્યસ્મિન્નન્યબુદ્ધિકરણરૂપં પ્રતીકધ્યાનમ્ । કિન્તુ તદ્ધ્યાનં ધ્યેયવસ્તુસ્વરૂપાનુસારિ ધ્યાનમેવ । વૈકુણ્ઠવાસિનો વિષ્ણોઃ સ્વરૂપં ન પ્રત્યક્ષગોચરમ્, કિન્તુ શાસ્ત્રૈકસમધિગમ્યમ્ । શાસ્ત્રે ચ વિષ્ણોઃ સ્વરૂપં ચતુર્ભુજત્વેન શઙ્ખચક્રાદ્યુપેતત્વેન ચ વર્ણિતમ્ । અતસ્તથા વિષ્ણોર્ધ્યાનં ધ્યેયવસ્તુસ્વરૂપાનુસાર્યેવ । વિધિશાસ્ત્રે વિશ્વાસસ્ય, ઇચ્છાદેશ્ચાભાવે ધ્યાનં ન સિદ્ધ્યતિ । "ઇદમુપાસીત" ઇત્યેવંરૂપં પુરુષસ્ય પ્રવર્તકં વચનં વિધિઃ । તદ્વચને શ્રદ્ધા વિશ્વાસઃ । અન્તઃકરણસ્ય રજોગુણપરિણામરૂપા કામાત્મિકા વૃત્તિરિચ્છા । હઠાદપિ ધ્યાનં સિદ્ધ્યતિ । જ્ઞાને તુ ન તદપેક્ષા । નૈરન્તર્યેણ ધ્યેયાકારચિત્તવૃત્તિપ્રવાહો હિ ધ્યાનમ્ । તત્ર ચિત્તવૃત્તેર્વિક્ષેપે સતિ હઠાત્તાં સ્થિરીકુર્યાત્ । જ્ઞાનરૂપાન્તઃકરણવૃત્ત્યુદયકાલ એવ વિષયાવરણભઙ્ગસ્ય સિદ્ધત્વાદ્વૃત્તિસ્થૈર્યસમ્પાદનસ્ય નાસ્ત્યુપયોગઃ । તસ્માન્ન જ્ઞાને હઠાપેક્ષા । અહઙ્ગ્રહધ્યાનમ્વૈકુણ્ઠવાસિચતુર્ભુજવિષ્ણુધ્યાનવત્ "અહં બ્રહ્મ" ઇતિ ધ્યાનમપિ ધ્યેયસ્વરૂપાનુસાર્યેવ ધ્યાનમ્, ન તુ પ્રતીકધ્યાનમ્ । કિન્ત્વિદમહઙ્ગ્રહધ્યાનમ્ । ધ્યેય- સ્વરૂપસ્ય સ્વાભિન્નતયાનુસન્ધાનં અહઙ્ગ્રહધ્યાનં ઉચ્યતે । યસ્ય વેદાન્તવિચારેઽપ્યપરોક્ષજ્ઞાનં નોદેતિ, સ વેદસ્યાજ્ઞારૂપોપાસનાવિધિવાક્યે વિશ્વાસવાન્ નૈરન્તર્યેણ હઠાત્ "અહં બ્રહ્માસ્મિ" ઇત્યહઙ્ગ્રહધ્યાનમનુતિષ્ઠેત્ । તસ્ય ક્રમેણ જ્ઞાનોત્પત્તિદ્વારા મોક્ષઃ સિદ્ધ્યતિ ।

## (A. 294-326) પ્રણવોપાસનનિરૂપણમ્-

### (૨૯૪)

પ્રણવે અહઙ્ગ્રહધ્યાનં - પ્રકારાન્તરેણાહઙ્ગ્રહધ્યાનમિ

૧. યસ્ય બુદ્ધિઃ શાસ્ત્રોક્તે પરોક્ષે ધ્યેયે ન સહસા સ્થિરીભવતિ, સ પુરુષપ્રેરકેણ શાસ્ત્રવિધિના બોધિતે પરોક્ષધ્યેયપ્રતિનિધિભૂતે પ્રત્યક્ષે સાલગ્રામાદૌ અન્યસ્મિન્ વા ધ્યેયવિષ્ણુબુદ્ધિકરણરૂપં અન્યબુદ્ધિકરણરૂપં વા પ્રતીકધ્યાનં કુર્યાત્ । "અહં

બ્રહ્માસ્મિ” ઇતિ નિર્ગુણોપાસનં ત્વહઙ્ગ્રહધ્યાનં
ધ્યેયસ્વરૂપાનુસારિત્વાત્તસ્ય ।
૨. યદ્યપ્યત્ર ધ્યાનવિષયીભૂતં બ્રહ્મ ન પરમાર્થરૂપમ્, કિન્તુ
મનઃકલ્પિતમેવ । તસ્માત્તદ્વિષયકચિત્તવૃત્તિપ્રવાહરૂપધ્યાનમપિ
ભ્રાન્તિજ્ઞાનમેવ, ન યથાર્થજ્ઞાનમ્ । તથાપિ મણિપ્રભાયાં
મણિબુદ્ધિરૂપસંવાદિભ્રાન્ત્યા ધાવતઃ પુંસો મણિજ્ઞાનદ્વારા
મણિલાભવત્ પ્રકૃતાહઙ્ગ્રહધ્યાનેન બ્રહ્મજ્ઞાનલાભેન
મોક્ષઃ સિદ્ધ્યત્યેવ । દાનીમુચ્યતે - પ્રણવરૂપે ઓઙ્કારે
અહઙ્ગ્રહધ્યાનં માણ્ડૂક્યાદિશ્રુત્યનુસારેણ સુરેશ્વરાચાર્યૈઃ
કથિતમ્ । તદનુષ્ઠાનમપ્યુચિતં મોક્ષકામસ્ય । તસ્યૈવં ક્રમઃ -
પ્રણવરૂપમક્ષરં બ્રહ્મસ્વરૂપમેવ । તાદૃશપ્રણવસ્વરૂપં બ્રહ્મ
અહમેવ ઇતિ નૈરન્તર્યેણાનવરતં ધ્યાયેત્ । નૈતત્સમં કિઞ્ચિદપિ
ધ્યાનમસ્તિ । એતદ્ધ્યાનસ્ય વિશેષક્રમઃ સુરેશ્વરાચાર્યૈઃ
પઞ્ચીકરણાખ્યે ગ્રન્થે પ્રતિપાદિતઃ । એતદુપાસકોઽપારં સંસારં
તરતિ । અત્રાધિકારી સન્ન્યાસ્યેવ ।

(૨૯૪)

નિર્ગુણપ્રણવોપસનસ્ય સગુણપ્રણવોપાસનસ્ય ચ ફલમ્પ્રણવોપાસનમનેકોપનિષત્સુ વર્ણિતમ્ । માણ્ડૂક્યોપનિષદિ વિશેષેણ વર્ણિતમ્ । તદુપનિષદ્વ્યાખ્યાને ભાષ્યકારૈરાનન્દગિર્યાચાર્યૈશ્ચ વિસ્પષ્ટં વર્ણિતઞ્ચ । તત્ર યઃ ક્રમઃ સ એવ વાર્તિકારૈઃ પઞ્ચીકરણગ્રન્થે પ્રતિપાદિતઃ । તાદૃશપ્રૌઢગ્રન્થવિચારાસમર્થાનામનાયાસેન બોધાય પ્રણવોપાસનક્રમોઽત્ર નિરૂપ્યતેઉપનિષત્સુ પ્રણવોપાસનં દ્વિધા વર્ણિતં - પરબ્રહ્મરૂપેણ પ્રણવસ્યોપાસનમ્, અપરબ્રહ્મરૂપેણ પ્રણવસ્યોપાસનં ચેતિ । નિર્ગુણં બ્રહ્મ “પરં બ્રહ્મ” ઇત્યુચ્યતે । સગુણં બ્રહ્મ “અપરં બ્રહ્મ” ઇતિ કીર્ત્યતે । પરબ્રહ્મરૂપેણ પ્રણવોપાસકો મોક્ષમેવ લભતે । અપરબ્રહ્મરૂપેણ પ્રણવોપાસકસ્તુ બ્રહ્મલોકં આપ્નોતિ । ઇત્થં નિર્ગુણસગુણભેદેન પ્રણવોપાસનં દ્વિવિધમ્ ।

## (A. 296-315) નિર્ગુણપ્રણવોપાસનક્રમઃ-

(૨૯૬)

સર્વવસ્તૂનામોઙ્કારસ્વરૂપત્વં - નિર્ગુણપ્રણવોપાસનક્રમ એવાત્ર નિરૂપ્યતે, ન સગુણોપાસનક્રમઃ । સગુણોપાસનસ્ય ફલમપિ નિર્ગુણોપાસનેઽન્તર્ભવતિ । તથા હિ, નિર્ગુણોપાસકસ્યાપિ બ્રહ્મલોકેચ્છાવત ઇચ્છારૂપપ્રતિબન્ધસત્ત્વાન્ન

જ્ઞાનદ્વારા મોક્ષલાભઃ । કિન્તુ તસ્ય બ્રહ્મલોકપ્રાપ્તિર્ભવતિ । સ તત્ર હિરણ્યગર્ભસમાન્ ભોગાનનુભૂય તત્રૈવ બ્રહ્મવિચારેણ જ્ઞાનોદયદ્વારા મોક્ષં લભતે । બ્રહ્મલોકેચ્છારહિતસ્ય નિર્ગુણોપાસકસ્ય ત્વિહૈવ લોકે જ્ઞાનલાભાન્મોક્ષઃ સિદ્ધ્યતિ । ઇત્થં સગુણોપાસનફલસ્ય નિર્ગુણોપાસનાન્તર્ભૂતત્વાદિહ નિર્ગુણોપાસનમેવ નિરૂપ્યતે । કારણકાર્યરૂપં સર્વં વસ્ત્વોઙ્કારસ્વરૂપમેવ । અતઃ સર્વોઽપિ રૂપપ્રપઞ્ચ ઓઙ્કાર એવ । સર્વેષ્વપિ પદાર્થેષુ નામ રૂપં ચેત્યંશદ્વયમસ્તિ । તત્ર

૧. માણ્ડૂક્યશબ્દેન ગૌડપાદકારિકાપિ ગ્રાહ્યા ।

આદિશબ્દેન કઠપ્રશ્નાદ્યુપનિષદો ગૃહ્યન્તે ।

રૂપાત્મકોંઽશઃ તત્તન્નામાત્મકાંશાન્નાતિરિચ્યતે । કિન્તુ નામસ્વરૂપમેવ રૂપાંશોઽપિ । તથા હિ, પદાર્થાનાં રૂપાત્મકો ય આકારવિશેષસ્તદભિધાયકનામપદૈરેવ સર્વે પદાર્થા નિરૂપતિઆઃ સન્તો ગૃહ્યન્તે ત્યજ્યન્તે વા । તત્તદભિધાનજ્ઞાનમન્તરા કેવલાકારમાત્રેણ વ્યવહારો ન સિદ્ધ્યતિ । અતો નામૈવ સારભૂતમ્ । આકારનાશેઽપિ નામાવશિષ્યતે । યથા નષ્ટેઽપિ ઘટે મૃદવશિષ્યતે ઇતિ મૃદ્વ્યતિરેકેણ ઘટો નાસ્તિ । કિન્તુ મૃત્સ્વરૂપમેવ ભવતિ । તથા આકારે નષ્ટેઽપિ મૃદ્વદવશિષ્યમાણનામ્નો ન ભિદ્યતે આકારઃ । કિન્તુ નામસ્વરૂપમેવ ભવત્યાકારોઽપિ । અથવા ઘટશરાવોદઞ્ચનાદિષુ મૃદનુગતા ભવતિ । ઘટશરાવોદઞ્ચનાદયઃ પરસ્પરં વ્યભિચરન્તિ । તસ્માદ્ઘટશરાવાદયો મિથ્યા । તેષ્વનુગતા મૃત્સત્યા । એવં ઘટસ્યાકારા નાના । તેષામભિધાયકં “ઘટઃ” ઇતિ નામૈકમેવ । એકસ્ય ઘટસ્યાકારો ન ઘટાન્તરેઽસ્તિ । તસ્માદાકારા વ્યભિચારિણઃ । સર્વેષ્વપિ ઘટાકારેષુ એકમેવ નામાનુગતં વર્તતે । તસ્માન્મિથ્યાભૂત આકારઃ સત્યભૂતાન્નામ્નો નાતિરિચ્યતે । ઇત્થમેવ સર્વપદાર્થાનામાકારોઽપિ તત્તન્નામ્નો ન વ્યતિરિક્તઃ । તસ્માન્નામસ્વરૂપ એવાકારઃ । સર્વોઽયં નામપ્રપઞ્ચ ઓઙ્કારવ્યતિરેકેણ નાસ્તિ । કિન્તુ ઓઙ્કારસ્વરૂપમેવ સર્વં નામ । તથા હિ, વાચકશબ્દ એવ “નામ” ઇતિ કથ્યતે । લોકે વેદે ચ પ્રયુક્તઃ સર્વઃ શબ્દ ઓઙ્કારાદેવોત્પન્ન ઇતિ શ્રુતિષૂચ્યતે । “તદ્યથા શઙ્કુના સર્વાણિ પર્ણાનિ સન્તૃણ્ણાનિ એવમોઙ્કારેણ સર્વા વાક્ સન્તૃણ્ણા” “ઓઙ્કાર એવેદં સર્વમ્” ઇતિ । કાર્યં સર્વં કારણસ્વરૂપમેવ ભવતિ । તસ્માદોઙ્કારકાર્યભૂતાનિ વાચકશબ્દાત્મકાનિ નામાનિ ઓઙ્કારસ્વરૂપાણિ । ઇત્થં રૂપાંશો યઃ પદાર્થાકારઃ સ નામસ્વરૂપઃ ।

નામ ચ સર્વમોઙ્કારસ્વરૂપમ્ । તસ્માત્સર્વસ્વરૂપ ઓઙ્કારઃ ।

## (૨૯૭)

ઓઙ્કારસ્ય બ્રહ્માભેદેન ચિન્તનમ્યથા સર્વસ્વરૂપ ઓઙ્કારઃ । તથા સર્વસ્વરૂપં બ્રહ્મ । તસ્માદોઙ્કારો બ્રહ્મરૂપઃ । અથવા ઓઙ્કારો બ્રહ્મણો વાચકઃ । બ્રહ્મ ઓઙ્કારસ્ય વાચ્યમ્ ।

૧. યથા પુણ્યાધિક્યાન્મનુષ્યાપેક્ષયાધિકકાલસ્થાયી
દેવઃ “અમરઃ” ઇત્યુપચારેણોચ્યતે તથૈવ
ઘટાદિપદાર્થાનામાકારાપેક્ષયા ઘટાદિનામ્નામધિકકાલસ્થાયિત્વાત્
નામ્નાં સત્યત્વમુપચારાદુચ્યતે । વાચ્યવાચકયોરભેદોઽસ્તિ ।
તસ્માદપ્યોઙ્કારો બ્રહ્મરૂપઃ । કિઞ્ચ વિચાર્યમાણે યદક્ષરં
બ્રહ્મણ્યધ્યસ્તં તસ્ય બ્રહ્માધિષ્ઠાનં ભવતિ । અધ્યસ્તસ્ય
સ્વરૂપમધિષ્ઠાનાન્નાતિરિચ્યતે । તસ્માદપ્યોઙ્કારો બ્રહ્મૈવ ।
તસ્માદોઙ્કારં બ્રહ્મરૂપેણ ચિન્તયેત્ ।

# (A. 298-305) બ્રહ્મસ્વરૂપસ્યોઙ્કારસ્યાત્મનશ્ચાભેદઃ-

## (૨૯૮)

આત્મનો બ્રહ્મણશ્ચ પાદચતુષ્ટયાદિનિરૂપણમ્બ્રહ્મરૂપમોઙ્કારમાત્મનોઽભિન્નતયા ચિન્તયેત્ । તથા હિ, આત્મનઃ બ્રહ્મણા સહ મુખ્યાભેદોઽસ્તિ । બ્રહ્મણ ઇવાત્મનશ્ચત્વારઃ પાદાઃ સન્તિ । પાદો નામ ભાગોંઽશો વા । વિરાટ્, હિરણ્યગર્ભઃ, ઈશ્વરઃ, તત્પદલક્ષ્યાર્થભુતેશ્વરસાક્ષી ચેતિ બ્રહ્મણશ્ચત્વારઃ પાદાઃ । વિશ્વઃ, તૈજસઃ, પ્રાજ્ઞઃ, ત્વમ્પદલક્ષ્યજીવસાક્ષી ચેતિ ચત્વાર આત્મનઃ પાદાઃ । જીવસાક્ષિણ એવ તુરીય ઇતિ વ્યપદેશઃ । સમષ્ટિસ્થૂલપ્રપઞ્ચસહિતચેતનસ્ય વિરાડિતિ નામ । વ્યષ્ટિસ્થૂલાભિમાનિનો વિશ્વ ઇતિ નામ । વિરાજો વિશ્વસ્ય ચ સ્થૂલોપાધિકત્વાદ્વિશ્વો વિરાડ્રૂપ એવ ન તતોઽન્યઃ । વિરાડ્રૂપસ્ય વિશ્વસ્ય સપ્તાઙ્ગાનિ સન્તિ । દ્યૌઃ = સ્વર્ગલોકઃ શિરઃ । સૂર્યશ્ચક્ષુઃ । વાયુઃ પ્રાણઃ । આકાશ ઉરઃ । સમુદ્રાદિરૂપં જલં મૂત્રસ્થાનં (બસ્તિઃ) । પૃથિવી પાદૌ । આહવનીયઃ = હોમાધિકરણોઽગ્નિઃ મુખમ્ । ઇત્યેતાનિ સપ્ત વિશ્વસ્યાઙ્ગાનિ । દ્યુલોકાદીનિ યદ્યપિ ન વિશ્વસ્યાઙ્ગાનિ તથાપિ વિરાજોઽઙ્ગાનિ ભવન્તિ । તસ્ય વિરાજો વિશ્વેનાભેદોઽસ્તિ । તસ્માન્માણ્ડૂક્યોપનિષદિ વિશ્વાઙ્ગત્વેન તાન્યુક્તાનિ । એવમેવ વિરાડાત્મકવિશ્વસ્યૈકોનવિંશતિમુખાનિ સન્તિ । પ્રાણાઃ પઞ્ચ, કર્મેન્દ્રિયાણિ પઞ્ચ, જ્ઞાનેન્દ્રિયાણિ પઞ્ચ, અન્તઃકરણચતુષ્ટયમિત્યેતાનિ મુખાનિ ।

૧. સકલપ્રાણિશરીરેષ્વહમિત્યભિમાનકરણાત્ ઈશ્વરો વૈશ્વાનર
ઇતિ કથ્યતે । વિવિધં રાજતે = અનેકધા પ્રકાશતે ઇતિ સ એવ

વૈશ્વાનરઃ "વિરાટ્" ઇત્યભિધીયતે ।

૨. સકલજીવાનાં કર્માનુસારેણ ફલદાનાત્ "ઈશ્વરઃ" ઇતિ નામ ।

૩. સૂક્ષ્મદેહાભિમાનાપરિત્યાગેનૈવ સ્થૂલદેહે "અહમ્" ઇત્યભિમાનવાન્ જાગ્રદભિમાની જીવઃ "વિશ્વઃ" ઇત્યુચ્યતે ।

૪. તેજશ્શબ્દવાચ્યાન્તઃકરણસહિતઃ પ્રાણેન્દ્રિયાધ્યક્ષઃ સ્વપ્નાભિમાની જીવઃ "તૈજસઃ" ઇત્યભિધીયતે ।

૫. પ્રાજ્ઞઃ = પ્ર + અજ્ઞઃ । સુષુપ્તિકાલે સ્વપ્રકાશાત્માનન્દેન સહાજ્ઞાનવૃત્તેઃ સત્ત્વાત્ સુષુપ્ત્યભિમાની જીવઃ "પ્રાજ્ઞઃ" ઇતિ કીર્ત્યતે । ભોગસ્ય સાધનભૂતત્વાત્ મુખાનીત્યુચ્યન્તે । જાગ્રદવસ્થાયામેતૈરેકોનવિંશતિમુખૈઃ સ્થૂલશબ્દાદયો બાહ્યવૃત્ત્યાનુભૂયન્તે । તસ્માદ્વિરાડ્રૂપો વિશ્વઃ સ્થૂલભુગિતિ, બાહ્યવૃત્તિરિતિ, જાગ્રદવસ્થ ઇતિ ચ કથ્યતે ।

## (૨૯૯)

ચતુર્દશત્રિપુટ્યઃ - ભોગસાધનેષુ પ્રાણાદિષ્વેકોનવિંશતિમુખેષુ શ્રોત્રાદિદશેન્દ્રિયાણિ અન્તઃકરણચતુષ્ટયં ચેતિ ચતુર્દશમુખાનિ સ્વસ્વવિષયાણાં સાહાય્યં સ્વસ્વદેવતાનાં ચ સાહાય્યમપેક્ષન્તે । દેવતાવિષયયોઃ સાહાય્યમન્તરા કેવલૈરેતૈશ્ચતુર્દશમુખૈર્ભોગો ન સમ્ભવતિ । તસ્માત્પઞ્ચ પ્રાણાશ્ચતુર્દશ ત્રિપુટ્યશ્ચ વિરાડ્રૂપવિશ્વસ્ય મુખાનીત્યુચ્યન્તે । મુખમ્, દેવતા, વિષયશ્ચેતિ ત્રયાણાં સમૂહસ્ય "ત્રિપુટી" ઇતિ નામ । સા ચ ત્રિપુટી એવં વર્ણ્યતે - (૧) શ્રોત્રેન્દ્રિયમધ્યાત્મમ્, તદ્વિષયઃ શબ્દોઽધિભૂતમ્, દિગભિમાનિની દેવતા અધિદૈવમ્ । અત્ર ક્રિયાશક્તિજ્ઞાનશક્તિભ્યાં યુક્તાનીન્દ્રિયાણિ અન્તઃકરણં ચાધ્યાત્મં ઇત્યુચ્યતે । તેષાં વિષયોઽધિભૂતં ઇતિ કીર્ત્યતે । તેષાં સહાયભૂતા દેવતા અધિદૈવં ઇત્યભિધીયતે । (૨) ત્વગિન્દ્રિયમધ્યાત્મમ્, તદ્વિષયઃ સ્પર્શોઽધિભૂતમ્, વાય્વભિમાનિની દેવતા અધિદૈવમ્ । (૩) નેત્રેન્દ્રિયમધ્યાત્મમ્, રૂપમધિભૂતમ્, સૂર્યોઽધિદૈવમ્ । (૪) રસનેન્દ્રિયમધ્યાત્મમ્, રસોઽધિભૂતમ્, વરુણોઽધિદૈવમ્ । (૫) ઘ્રાણેન્દ્રિયમધ્યાત્મમ્, ગન્ધોઽધિભૂતમ્, અશ્વિનીકુમારૌ અધિદૈવમ્ । અથવા પૃથિવ્યભિમાનિની દેવતા અધિદૈવમ્ । (૬) વાગિન્દ્રિયમધ્યાત્મમ્, વક્તવ્યં અધિભૂતમ્, અગ્નિદેવતા અધિદૈવમ્ । (૭) પાણીન્દ્રિયમધ્યાત્મમ્, પદાર્થગ્રહણમધિભૂતમ્, ઇન્દ્રોઽધિદૈવમ્ । (૮) પાદેન્દ્રિયમધ્યાત્મમ્, ગમનમધિભૂતમ્, વિષ્ણુરધિદૈવમ્ । (૯) પાયુરધ્યાત્મમ્, મલવિસર્જનમધિભૂતમ્, યમોઽધિદૈવમ્ । (૧૦) ઉપસ્થેન્દ્રિયમધ્યાત્મમ્, ગ્રામ્યસુખોત્પત્તિઃ (મૈથુનસુખોત્પત્તિઃ) અધિભૂતમ્, પ્રજાપતિરધિદૈવમ્ । (૧૧) મનોઽધ્યાત્મમ્, મન્તવ્યં (સઙ્કલ્પઃ) અધિભૂતમ્, ચન્દ્રોઽધિદૈવમ્ । (૧૨) બુદ્ધિરધ્યાત્મમ્, બોદ્ધવ્યં (નિશ્ચયઃ) અધિભૂતમ્, બૃહસ્પતિરધિદૈવમ્ । (૧૩) અહઙ્કારોઽધ્યાત્મમ્, અહઙ્કર્તવ્યમધિભૂતમ્, રુદ્રોઽધિદૈવમ્ । (૧૪) ચિત્તમધ્યાત્મમ્, ચિન્તનીયમ

૧. સૂર્યાશ્વસ્ય ઘ્રાણાભ્યામશ્વિનીકુમારયોરુત્પત્તિવર્ણનાત્

ઘ્રાણદેવતે અશ્વિનીકુમારાવિતિ કેચનાહુઃ । પૃથિવ્યા
ઘ્રાણસ્યોત્પન્નત્વાત્પૃથિવ્યભિમાનિની દેવતા ઘ્રાણદેવતેતિ વાર્તિકકારા
આહુઃ ।
૨. વચનક્રિયાયા વિષયભૂતઃ પદાર્થો વક્તવ્યમિત્યુચ્યતે । સ
વચનક્રિયાદ્વારા વાગિન્દ્રિયસ્યાધિભૂતમ્ । એવમેવ સર્વેન્દ્રિયાણાં
સ્વસ્વક્રિયાદ્વારા વિષયભૂતઃ પદાર્થઃ અધિભૂતમિતિ જ્ઞેયમ્ ।
ક્વચિત્તુ સ્થૂલદૃષ્ટ્યા વચનાદિક્રિયૈવાધિભૂતમિત્યુચ્યતે ।
ધિભૂતમ્, ક્ષેત્રજ્ઞઃ સાક્ષી અધિદૈવમ્ । એતાશ્ચતુર્દશ
ત્રિપુટ્યઃ પઞ્ચ પ્રાણાશ્ચ મિલિત્વૈતાનિ વિરાડ્રૂપસ્ય
વિશ્વસ્યૈકોનવિંશતિમુખાનિ ।

## (૩૦૦)

વિશ્વઃ, વિરાટ્, અકારમાત્રા, ઇત્યેતેષામભેદચિન્તનમ્વિરાજો વિશ્વસ્ય ચ યથાભેદસ્તથા ઓઙ્કારપ્રથમમાત્રાયા અકારસ્ય વિરાડ્રૂપવિશ્વેન સહાભેદોઽસ્તિ । તથા હિ, બ્રહ્મણશ્ચતુર્ષુ પાદેષુ પ્રથમઃ પાદો વિરાટ્ । આત્મનશ્ચતુર્ષુ પાદેષુ પ્રથમઃ પાદો વિશ્વઃ । ઓઙ્કારસ્ય માત્રાત્મકેષુ ચતુર્ષુ પાદેષુ પ્રથમઃ પાદોઽકારઃ । ત્રયાણામેષામાદિત્વરૂપધર્મસામાન્યસત્ત્વાત્ વિશ્વવિરાડકારાણામભેદં ચિન્તયેત્ । ઇત્થં વિશ્વસ્ય સપ્તાઙ્ગાન્યેકોનવિંશતિમુખાનિ ચ વ્યાખ્યાતાનિ ।

## (૩૦૧)

વિશ્વતૈજસયોર્ભેદઃ - વિશ્વસ્યોક્તાનિ સપ્તાઙ્ગાન્યેકોનવિંશતિમુખાનિ ચ તૈજસસ્યાપિ સન્તીત્યવગન્તવ્યમ્ । કિન્તુ ઇયાનસ્તિ ભેદઃવિશ્વસ્યાઙ્ગાનિ મુખાનિ ચેશ્વરસૃષ્ટાનિ । તૈજસસ્ય ત્વિન્દ્રિયદેવતાવિષયરૂપત્રિપુટ્યઃ શિરાદ્યઙ્ગાનિ ચ મનોમયાનિ । તૈજસસ્ય ભોગઃ સૂક્ષ્મઃ । ભોગો નામ સુખદુઃખાદ્યનુભવઃ । યદ્યપ્યનુભવરૂપે જ્ઞાને સ્થૂલત્વસૂક્ષ્મત્વભેદો ન સમ્ભવતિ । તથાપિ બાહ્યશબ્દાદિવિષયસમ્બન્ધાત્સાક્ષાજ્જાયમાનસુખદુઃખાદિસાક્ષાત્કારઃ સ્થૂલ ઇત્યુચ્યતે । માનસશબ્દાદિસમ્બન્ધાજ્જાયમાનસુખદુઃખાદિસાક્ષાત્કારઃ સૂક્ષ્મ ઇત્યુચ્યતે । તથા ચ શ્રુતિઃ - "સ્થૂલભુગ્વૈશ્વાનરઃ" (મા. આ. ૩) "પ્રવિવિક્તભુક્તૈજસઃ" (મા. આ. ૪) ઇતિ । "વિશ્વો હિ સ્થૂલભુઙ્નિત્યં તૈજસઃ પ્રવિવિક્તભુક્" (મા. આ. ૫) ઇતિ ચ તૈજસસ્ય ભોગયોગ્યાઃ શબ્દાદયો માનસત્વાત્સૂક્ષ્માઃ । તદપેક્ષયા વિશ્વસ્ય ભોગયોગ્યાઃ શબ્દાદયો બાહ્યત્વાત્સ્થૂલાઃ । કિઞ્ચ વિશ્વો બહિષ્પ્રજ્ઞઃ । તૈજસસ્ત્વન્તઃપ્રજ્ઞઃ । યતો વિશ્વસ્યાન્તઃકરણવૃત્તિરૂપા પ્રજ્ઞા બહિર્ગચ્છતિ । તૈજસસ્ય પ્રજ્ઞા ન બહિર્ગચ્છતિ । તસ્માત્તૌ ક્રમેણ બહિષ્પ્રજ્ઞત્વેનાન્તઃપ્રજ્ઞત્વેન ચ વ્યપદિશ્યેતે ।

## (૩૦૨)

તૈજસઃ, હિરણ્યગર્ભઃ, ઉકારઃ, ઇત્યેતેષામભેદચિન્તનમ્યથા વિશ્વવિરાજોરભેદસ્તથા તૈજસહિરણ્યગર્ભયોરભેદો જ્ઞેયઃ । તૈજસસ્યોપાધિઃ સૂક્ષ્મઃ । હિરણ્યગર્ભસ્યોપાધિરપિ સૂક્ષ્મઃ । તસ્માત્તયોરૈક્યં

૧. સાક્ષિચૈતન્યં ચિત્તસ્યાશ્રયત્વાત્તસ્યાનુગ્રહં કરોતિ ।
તસ્માત્સાક્ષિચૈતન્યં ચિત્તસ્યાધિદૈવમિત્યુચ્યતે । અત એવ
કેચનાચાર્યાશ્ચિન્તનરૂપં સ્મૃતિજ્ઞાનં સાક્ષ્યાશ્રિતમાહુઃ ।
ક્વચિચ્ચિત્તસ્યાધિદૈવં નારાયણઃ (વાસુદેવઃ) ઇત્યુક્તમ્ । બોધ્યમ્ ।
તૈજસહિરણ્યગર્ભયોરેકત્વં નિશ્ચિત્ય ઓઙ્કારસ્ય દ્વિતીયમાત્રયા
ઉકારેણ સહ તયોરભેદં ચિન્તયેત્ । આત્મનશ્ચતુર્ષુ પાદેષુ દ્વિતીયઃ
પાદસ્તૈજસઃ । બ્રહ્મણો દ્વિતીયઃ પાદો હિરણ્યગર્ભઃ । ઓઙ્કારમાત્રાસુ
દ્વિતીયા માત્રા ઉકારઃ । દ્વિતીયત્વં ત્રયાણામેષાં સમાનધર્મઃ ।
તસ્માત્ત્રયાણામૈક્યં ચિન્તયેત્ ।

## (૩૦૩)

પ્રાજ્ઞઃ, ઈશ્વરઃ, મકારઃ, ઇત્યેતેષામભેદચિન્તનમ્પ્રાજ્ઞમીશ્વરરૂપં જાનીયાત્ । પ્રાજ્ઞસ્ય કારણશરીરમુપાધિઃ । ઈશ્વરસ્યાપિ કારણમેવોપાધિઃ । ઈશ્વરઃ પ્રાજ્ઞશ્ચ પાદેષુ તૃતીયૌ । ઓઙ્કારસ્ય તૃતીયા માત્રા મકારઃ । ત્રિષ્વેતેષુ તૃતીયત્વસ્ય સમાનધર્મત્વાત્તેષામૈક્યં ચિન્તયેત્ । સોઽયં પ્રાજ્ઞઃ "પ્રજ્ઞાનઘનઃ" ભવતિ । યસ્માત્ જાગ્રત્સ્વપ્નયોર્યાવન્તિ જ્ઞાનાનિ સ્થિતાનિ તાનિ સર્વાણિ સુષુપ્તૌ ઘનીભવન્તિ, અવિદ્યામાત્રરૂપતાં ભજન્તીતિ યાવત્ । તસ્માત્પ્રાજ્ઞઃ "પ્રજ્ઞાનઘનઃ" ઇત્યુચ્યતે । અયં પ્રાજ્ઞઃ "આનન્દભુક્" ઇતિ શ્રૂયતે । "આનન્દભુક્ પ્રાજ્ઞઃ" (મા. આ. ૫) યતોઽયં પ્રાજ્ઞોઽવિદ્યાવૃતમાનન્દં ભુઙ્ક્તે તતઃ "આનન્દભુક્" ઇતિ વ્યપદિશ્યતે । વિશ્વતૈજસયોરિવ પ્રાજ્ઞસ્યાપિ ભોગે ત્રિપુટી વર્ણ્યતે - ચૈતન્યપ્રતિબિમ્બસહિતાવિદ્યાવૃત્તિરધ્યાત્મમ્, અજ્ઞાનાવૃતસ્વરૂપાનન્દોઽધિભૂતમ્, ઈશ્વરોઽધિદૈવમિતિ । ઇત્થં વિશ્વો બહિષ્પ્રજ્ઞઃ । તૈજસોઽન્તઃપ્રજ્ઞઃ । પ્રાજ્ઞઃ પ્રજ્ઞાનઘનશ્ચ ભવતિ ।

## (૩૦૪)

વિશ્વાદીનાં ત્રયાણામેકત્વમ્, તુરીયસ્યેશ્વરસાક્ષિણાભેદં ચ ચિન્તયેતિત્થં વિશ્વાદીનાં ત્રયાણાં મિથો ભેદ ઉપાધિપ્રયુક્ત એવ । વિશ્વસ્ય સ્થૂલં સૂક્ષ્મમજ્ઞાનં ચેતિ ત્રયમપ્યુપાધિઃ, તૈજસસ્ય સૂક્ષ્મમજ્ઞાનં ચેતિ દ્વયમુપાધિઃ, પ્રાજ્ઞસ્યાજ્ઞાનં એકમેવોપાધિઃ । ઇત્થમુપાધીનામાધિક્યન્યૂનત્વાભ્યાં ત્રયાણાં ભેદેઽપિ વસ્તુતઃ સ્વરૂપેણ ન ભેદઃ । વિશ્વતૈજસપ્રાજ્ઞેષુ ત્રિષ્વનુગતં ચૈતન્યં પરમાર્થત ઉપાધિત્રયાસમ્બદ્ધમવતિષ્ઠતે । ત્રયાણામુપાધીનામધિષ્ઠાનં તુરીયમ્ । તદ્ધિ ન બહિષ્પ્રજ્ઞમ્ । નાન્તઃપ્રજ્ઞમ્ । ન પ્રજ્ઞાનઘનમ્ ।

૧. યથા તણ્ડુલકણા જલેન પિણ્ડીકૃતા એકીભવન્તિ
યથા વા વૃષ્ટ્યુદકબિન્દવો નિમ્નદેશં પ્રાપ્ય

તડાગાદિરૂપેણૈકીભવન્તિ । તથા જાગ્રત્સ્વપ્નકાલીનનાનાજ્ઞાનાનિ
સુષુપ્તાવિદ્યાયામેકીભવન્તિ । તાદૃશાવિદ્યાપ્રતિબિમ્બિતચૈતન્યરૂપઃ
પ્રાજ્ઞજીવોઽધિષ્ઠાનકૂટસ્થસહિતઃ પ્રજ્ઞાનઘન
ઇત્યુચ્યતે । ન કર્મેન્દ્રિયાણાં જ્ઞાનેન્દ્રિયાણાં વા વિષયઃ । ન
બુદ્ધેર્વિષયઃ । ન કસ્યાપિ શબ્દસ્ય વિષયઃ । એતાદૃશં તુરીયં
પરમાત્મનશ્ચતુર્થપાદાત્મકેશ્વરસાક્ષિરૂપશુદ્ધબ્રહ્મસ્વરૂપં
જાનીયાત્ ।

## (૩૦૫)

દ્વિસ્વરૂપસ્યાત્મનો દ્વિસ્વરૂપેણોઙ્કારેણાભેદં આત્મપાદાનામોઙ્કારમાત્રાણાં ચાભેદં ચિન્તયેતિત્થં પરમાર્થરૂપમપરમાર્થરૂપમિત્યાત
દ્વિવિધં સ્વરૂપમુક્તમ્ । તત્ર ત્રયઃ પાદા અપરમાર્થસ્વરૂપમ્ । તુરીયઃ પાદઃ પરમાર્થસ્વરૂપમ્ । આત્મન ઇવોઙ્કારસ્યાપિ સ્વરૂપદ્વયમસ્તિ । અકારોકારમકારાત્મકમાત્રાત્રયરૂપાણ્યક્ષરાણિ અપરમાર્થસ્વરૂપમ્ । માત્રાત્રયવ્યાપકમ્, અસ્તિભાતિપ્રિયરૂપમધિષ્ઠાનચૈતન્યં પરમાર્થસ્વરૂપમ્ । ઓઙ્કારસ્ય પરમાર્થસ્વરૂપં શ્રુતૌ “અમાત્રઃ” ઇતિ શબ્દેન વ્યપદિશ્યતે । “અમાત્રશ્ચતુર્થોઽવ્યવહાર્યઃ” (મા. આ. ૧૨) ઇતિ । યતસ્તસ્મિન્ પરમાર્થસ્વરૂપે માત્રાણાં વિભાગો નાસ્તિ તસ્માત્તદમાત્રમિત્યુચ્યતે । ઇત્થં સ્વરૂપદ્વયવત ઓઙ્કારસ્ય સ્વરૂપદ્વયવતા આત્મના સહાભેદં જાનીયાત્ । (૧) વ્યષ્ટિસમષ્ટિસ્થૂલપ્રપઞ્ચસહિતયોર્વિશ્વવિરાજોરકારેણાભેદં જાનીયાત્ । આત્મનઃ પાદેષુ વિશ્વઃ પ્રથમઃ । ઓઙ્કારસ્ય માત્રાસુ અકારઃ પ્રથમા માત્રા । અતસ્તયોરૈક્યં વિદ્યાત્ । (૨) સૂક્ષ્મપ્રપઞ્ચસહિતહિરણ્યગર્ભાત્મકતૈજસમુકારરૂપેણ જાનીયાત્ । આત્મનઃ પાદેષુ તૈજસો દ્વિતીયઃ । ઓઙ્કારસ્ય માત્રાસુ ઉકારો દ્વિતીયા માત્રા । તસ્માત્તયોરૈક્યં વિદ્યાત્ । (૩) કારણોપાધિસહિતેશ્વરરૂપં પ્રાજ્ઞં મકારરૂપેણ વિદ્યાત્ । આત્મનઃ પાદેષ્વીશ્વરસ્વરૂપઃ પ્રાજ્ઞસ્તૃતીયઃ । ઓઙ્કારમાત્રાસુ મકારસ્તૃતીયા માત્રા । તતસ્તયોરભેદં જાનીયાત્ । આત્મનસ્ત્રિષ્વપિ પાદેષ્વનુગતં પરમાર્થરૂપં તુરીયં ઓઙ્કારસ્ય તિસૃષ્વપિ માત્રાસ્વનુગતાત્ ઓઙ્કારસ્ય પરમાર્થસ્વરૂપાદમાત્રાદભિન્નતયા જાનીયાત્ । વિશ્વાદિષુ તુરીયોઽનુગતઃ । તથા અકારાદિષુ તિસૃષુ માત્રાસુ અમાત્રોઽનુગતઃ । તસ્માદોઙ્કારસ્ય પરમાર્થસ્વરૂપમમાત્રં તુરીયં ચાભિન્નં જાનીયાત્ । અનયા રીત્યા આત્મ-પાદાનાં ત્રયાણાં ઓઙ્કારમાત્રાણાં તિસૃણાં ચૈકતાચિન્તનરૂપં લયચિન્તનં કુર્યાત્ ।

## (૩૦૬)

લયચિન્તનાનુવાદઃએકૈકમાત્રારૂપવિશ્વાદીનામન્યમાત્રારૂપતા - લયચિન્તનમિદાનીં
નિરૂપ્યતે । વિશ્વાત્મકોઽકારઃ તૈજસાત્મકાદુકારાન્ન ભિન્નઃ । કિન્તૂકારરૂપ એવ । એવં ચિન્તનમેવ લય ઇત્યુચ્યતે ।
એવમેવેતરાસ્વપિ માત્રાસૂહ્યમ્ ।
યસ્મિન્નુકારેઽકારસ્ય લયઃ કૃતસ્તં તૈજસાત્મકમુકારં પ્રાજ્ઞાત્મકમકારે
લીનં કુર્યાત્ । પ્રાજ્ઞરૂપં મકારમપિ તુરીયરૂપે ઓઙ્કારસ્ય પરમાર્થસ્વરૂપે

અમાત્રે લીનં કુર્યાત્ । યતઃ સ્થૂલસ્યોત્પત્તિઃ સૂક્ષ્માદ્ભવતિ સ્થૂલસ્ય લયશ્ચ સૂક્ષ્મે ભવતિ, તસ્માદ્વિશ્વરૂપોઽકારસ્તૈજસરૂપે ઉકારે લીયેત । સૂક્ષ્મસ્યોત્પત્તિઃ કારણાદ્ભવતિ, સૂક્ષ્મસ્ય લયશ્ચ કારણે ભવતિ । તસ્માત્તૈજસરૂપ ઉકારઃ તત્કારણે પ્રાજ્ઞરૂપે મકારે લીયેત । અત્ર વિશ્વાદિગ્રહણેન સ્વસ્વત્રિપુટ્યા સહ સમષ્ટિવિરાડાદયોઽપિ ગૃહીતા ભવન્તિ । યસ્મિન્ પ્રાજ્ઞરૂપે મકારે ઉકારસ્ય લયઃ કૃતઃ તં મકારં તુરીયરૂપે ઓઙ્કારસ્ય પરમાર્થરૂપે અમાત્રે લીનં કુર્યાત્ । ઓઙ્કારપરમાર્થસ્વરૂપસ્ય તુરીયસ્ય ચાભેદોઽસ્તિ । તચ્ચ તુરીયં બ્રહ્મૈવ । તસ્મિન્ શુદ્ધે બ્રહ્મણીશ્વરઃ પ્રાજ્ઞશ્ચ કલ્પિતૌ । યદ્યસ્મિન્ કલ્પિતં તત્તત્સ્વરૂપમિતિ ન્યાયઃ । તસ્માદીશ્વરસહિતપ્રાજ્ઞરૂપમકારસ્યામાત્રે લયો યુજ્યત એવ । ઇત્થં યસ્મિન્ ઓઙ્કારસ્ય પરમાર્થસ્વરૂપે અમાત્રે સર્વેષાં પ્રવિલયઃ કૃતઃ “સ એવાહમસ્મિ” ઇત્યૈકાગ્ર્યેણાનવરતં ચિન્તયેત્ । નિખિલચરાચરપ્રપઞ્ચાત્મકાસઙ્ગાદ્વયાસંસારિનિત્યમુક્તનિર્ભયબ્રહ્મરૂપો ય ઓઙ્કારસ્તસ્ય યત્ પરમાર્થસ્વરૂપં “તદેવાહમસ્મિ” ઇત્યાદરેણ નૈરન્તર્યેણ ચ દીર્ઘકાલં યશ્ચિન્તયતિ તસ્ય જ્ઞાનમુદેતિ । તતો જ્ઞાનદ્વારા મુક્તિરૂપફલમપિ સિદ્ધ્યતિ । તદેવમોઙ્કારસ્ય નિર્ગુણોપાસનં સર્વોપાસનેભ્યઃ શ્રેષ્ઠમ્ ।

(૩૦૭)

ઓઙ્કારોપાસને પરમહંસસ્યૈવાધિકારઃ - પૂર્વોક્તરીત્યા ઓઙ્કારસ્વરૂપં યો જાનાતિ સ મુનિઃ । મનનાન્મુનિરિત્યુચ્યતે । એવમોઙ્કારસ્ય ચિન્તનં મનનરૂપં ભવતિ । યસ્યૈવમોઙ્કારચિન્તનરૂપમનનં નાસ્તિ ન સ મુનિઃ । ઇત્થં માણ્ડૂક્યોપનિષદુક્તરીત્યા સઙ્ક્ષેપેણોઙ્કારચિન્તનં વર્ણિતમ્ । નૃસિંહતાપિન્યાદ્યુપનિષત્સ્વપ્યોઙ્કારોપાસનક્રમો વર્ણિતઃ (નૃ. ઉ. ૫) । ઇદં ચોઙ્કારચિન્તનં પરમહંસાનામેવ ગોપ્યં ધનમ્ । બહિર્મુખસ્ય નાસ્ત્યત્રાધિકારઃ । અત્યન્તાન્તર્મુખસ્યૈવાત્રાધિકારઃ । ગૃહસ્થાનાં નાસ્ત્યત્રાધિકારઃ । દારાપત્યવિત્તાદિપરિગ્રહરહિતઃ પરમહંસ એવાત્રાધિકારી ।

## (A. 308-309) ઓઙ્કારધ્યાનફલમ્-

(૩૦૮)

ઓઙ્કારધ્યાનં જ્ઞાનદ્વારા મોક્ષફલકમુક્તરીત્યા બ્રહ્મરૂપેણોઙ્કારોપાસકસ્ય જ્ઞાનદ્વારા મોક્ષઃ સિદ્ધ્યતિ । પરન્તુ યસ્ય પુનરૈહિકભોગે આમુષ્મિકબ્રહ્મલોકભોગે વેચ્છાસ્તિ તીવ્રવૈરાગ્યં

ચ નાસ્તિ, તથાપિ હઠાદિચ્છાં નિરુધ્ય દારાપત્યધનાદિકં પરિત્યજ્ય પરમહંસગુરૂપદેશેન યાવજ્જીવમોઙ્કારરૂપં બ્રહ્માભિધ્યાયેત્, તસ્ય ભોગેચ્છા જ્ઞાનપ્રતિબન્ધિકા ભવતિ । તસ્માત્તસ્યેહ ન જ્ઞાનં જાયતે । કિન્તુ સ ધ્યાનાનુષ્ઠાનપૂર્વકમેવૈતચ્છરીરં ત્યક્ત્વા શરીરાન્તરમાદત્તે । ઐહિકભોગેચ્છાનિરોધપૂર્વકં ધ્યાનાનુષ્ઠાનકારણાત્સ મનુષ્યલોકે સતાં શુચીનાં શ્રીમતાં કુલેઽભિજાયતે । તત્ર પૂર્વજન્મેચ્છાવિષયભૂતાન્ સકલાન્ ભોગાન્ ભુક્ત્વા પૂર્વજન્માનુષ્ઠિતધ્યાનસંસ્કારબલાદ્ભૂયોઽપિ ધ્યાને વા વિચારે વા પ્રવર્તતે । તતો જ્ઞાનમ્, જ્ઞાનાન્મોક્ષં ચ લભતે ।

## (૩૦૯)

ઓઙ્કારધ્યાનં બ્રહ્મલોકપ્રાપ્તિફલકમ્યઃ પુનર્બ્રાહ્મલૌકિકભોગેચ્છાં નિરુધ્યોઙ્કારરૂપબ્રહ્મધ્યાનમકરોત્સ શરીરપાતાનન્તરં બ્રહ્મલોકં ગચ્છતિ । તત્ર મનુષ્યપિતૃદેવાનાં દુર્લભં સ્વાતન્ત્ર્યં તત્પ્રયુક્તમાનન્દં ચાનુભવતિ । હિરણ્યગર્ભતુલ્યભોગાન્ સત્યસઙ્કલ્પત્વાદ્યૈશ્વર્યવિશેષાંશ્ચ લભતે ।

# (A. 310-316)

## (૩૧૦)

બ્રહ્મલોકમાર્ગઃબ્રહ્મલોકગમનમાર્ગક્રમસ્ત્વેવં - બ્રહ્મોપાસનતત્પરઃ પુરુષો યદા મ્રિયતે તદા તસ્યાન્તઃકરણમિન્દ્રિયાણિ ચ સમ્મૂર્ચ્છિતાનિ ભવન્તિ । તતઃ સ ન કિઞ્ચિદપિ બોદ્ધું કર્તું વા શક્નોતિ । તથાપિ યમદૂતાસ્તસ્ય લિઙ્ગશરીરં નેતું ન તદન્તિકમાગચ્છન્તિ । કિન્ત્વગ્ન્યભિમાનિની દેવતા તસ્ય મરણસમયે તમુપાસકં શરીરાદ્વિયોજ્ય સ્વલોકં નયતિ । તતોઽગ્નિલોકાત્તમુપાસકમહરભિમાનિની દેવતા સ્વલોકં નયતિ । તતઃ શુક્લપક્ષાભિમાનિની દેવતા તમુપાસકં સ્વલોકં નયતિ । તત ઉત્તરાયણાભિમાનિની દેવતા તમુપાસકં સ્વલોકં નયતિ । તતઃ સંવત્સરાભિમાનિની દેવતા તમુપાસકં સ્વલોકં નયતિ । તતો દેવલોકાભિમાનિની દેવતા તમુપાસકં સ્વલોકં નયતિ । તતો વાય્વભિમાનિની દેવતા તમુપાસકં સ્વલોકં નયતિ । તતઃ સૂર્યાભિમાનિની દેવતા તમુપાસકં સ્વલોકં નયતિ । તતશ્ચન્દ્રાભિમાનિની દેવતા તમુપાસકં સ્વલોકં નયતિ । તતો વિદ્યુદભિમાનિની દેવતા તમુપાસકં સ્વલોકં નયતિ ।

૧. મરણસમયે જીવાપેતસ્થૂલદેહાલ્લિઙ્ગશરીરં વિયુક્તં ભવતિ । તદા ચૈતન્યાભાવાત્સમ્મૂર્ચ્છિતાન્યુપાસકસ્યાન્તઃકરણમિન્દ્રિય ચ સ્વતઃ ન કિઞ્ચિદપિ જ્ઞાતું શક્નુવન્તિ । ક્રિયાશક્તિયુક્તપ્રાણોઽપિ સ્વરૂપત એવાચેતનત્વેનેચ્છાભાવાન્ન ક્વચિદપિ ગન્તું શક્નોતિ । તત્ર વિદ્યુલ્લોકે હિરણ્યગર્ભાજ્ઞયા હિરણ્યગર્ભલોકવાસી હિરણ્યગર્ભસરૂપશ્ચ કશ્ચનામાનવો દિવ્યપુરુષસ્તમુપાસકં નેતુમાગચ્છતિ । સ ચામાનવઃ પુરુષસ્તમુપાસકં વિદ્યુલ્લોકાદ્વરુણલોકં નયતિ । વિદ્યુદભિમાનિની દેવતા ચ વરુણલોકપર્યન્તં તમનુગચ્છતિ । તતોઽપ્યમાનવ એવ પુરુષસ્તમુપાસકં વરુણલોકાદિન્દ્રલોકં નયતિ । વરુણદેવતા ચેન્દ્રલોકપર્યન્તં તમનુસરતિ । તતોઽપિ સ દિવ્યઃ પુરુષ એવ તમુપાસકમિન્દ્રલોકાત્પ્રજાપતિલોકં નયતિ । ઇન્દ્રશ્ચ પ્રજાપતિલોકપર્યન્તં તમનુસરતિ ।

પ્રજાપતેર્બ્રહ્મલોકગમનસામર્થ્યાભાવાદમાનવપુરુષોઽસહકૃત એવ તમુપાસકં પ્રજાપતિલોકાત્ બ્રહ્મલોકં નયતિ । બ્રહ્મલોકસ્યાધિપતિર્હિરણ્યગર્ભઃ । સમષ્ટિસૂક્ષ્માભિમાની ચેતનો હિરણ્યગર્ભ ઇતિ કીર્ત્યતે । તમેવ હિરણ્યગર્ભમપરબ્રહ્મેતિ કાર્યબ્રહ્મેતિ ચ વદન્તિ । કાર્યબ્રહ્માધિષ્ઠિત એવ લોકો બ્રહ્મલોક ઇત્યુચ્યતે ।

## (૩૧૧)

સાયુજ્યમુક્તિવર્ણનમ્યદ્યપિ પૂર્વોક્તરીત્યા ઓઙ્કારોપાસનં શુદ્ધબ્રહ્મરૂપેણોક્તમ્, શુદ્ધબ્રહ્મોપાસકસ્ય શુદ્ધબ્રહ્મપ્રાપ્તિરેવોચિતા । "યથાક્રતુરસ્મિન્ લોકે પુરુષો ભવતિ તથેતઃ પ્રેત્ય ભવતિ" (છા. ૩-૧૪-૧) ઇતિ શ્રુતેઃ ।

યં યં વાપિ સ્મરન્ ભાવં ત્યજત્યન્તે કલેવરમ્ ।
તં તમેવૈતિ કૌન્તેય સદા તદ્ભાવભાવિતઃ ॥ ભ. ગી. ૮.૬॥

ઇતિ સ્મૃતેર્ન્યાયાચ્ચ । તથાપિ શુદ્ધબ્રહ્મપ્રાપ્તેર્વેદાન્તપ્રમાણજન્યદ્વૈતમિથ્યાત્વપૂર્વકાદ્વૈતજ્ઞાનમાત્રસાધ્યત્વાત્ ભોગેચ્છારૂપપ્રતિબન્ધસત્ત્વાચ્ચ યસ્ય જ્ઞાનં ન સઞ્જાતં તસ્ય કાર્યબ્રહ્મપ્રાપ્તિરૂપસાયુજ્યમુક્તિરેવ સિદ્ધ્યતિ । બ્રહ્મલોકં ગતસ્યોપાસકસ્ય હિરણ્યગર્ભસ્ય માનવિભૂત્યૈશ્વર્યાદિકં સિદ્ધ્યતિ । સત્યસઙ્કલ્પત્વમિચ્છાનુરૂપં શરીરં સઙ્કલ્પમાત્રેણાભીષ્ટભોગલાભશ્ચ સિદ્ધ્યતિ । યુગપદેવ નાનાશરીરૈર્નાનાભોગાનુભવેચ્છાયાં સત્યાં સઙ્કલ્પમાત્રાદેવ ક્ષણેનૈવ નાનાવિચિત્રશરીરાણિ પૃથક્ પૃથક્ ભોગોપકરણસિદ્ધિશ્ચ ભવતિ । કિં બહુના । યદ્યત્સઙ્કલ્પયતિ તત્સર્વમપ્રત્યૂહેન સદ્યઃ સમ્પદ્યતે । પરન્તુ જગત્સૃષ્ટિપાલનસંહરણવ્યતિરિક્તાઃ સર્વા વિભૂતયો હિરણ્યગર્ભસમાઃ સિદ્ધ્યન્તિ । અનેકેશ્વરત્વે જગત ઉન્મથપ્રસઙ્ગાત્ સૃષ્ટ્યાદિત્રિકાતિરિક્તસકલૈશ્વર્યાણ્યુપાસકસ્ય સિદ્ધ્યન્તિ । ઇયમેવ સાયુજ્યમુક્તિરિતિ કથ્યતે । એવમુપાસકો હિરણ્યગર્ભસમઃ સન્ ચિરકાલં સઙ્કલ્પમાત્રસિદ્ધાન્ નાના દિવ્યભોગાન્ ભુઞ્જાનઃ પ્રલયકાલે હિરણ્યગર્ભલોકસ્યાવસાનકાલે સમુદિતાદ્વૈતાત્મજ્ઞાનો વિદેહમોક્ષં લભતે ।

બ્રહ્મણા સહ તે સર્વે સમ્પ્રાપ્તે પ્રતિસઞ્ચરે ।
પરસ્યાન્તે કૃતાત્માનઃ પ્રવિશન્તિ પરં પદમ્ ॥ કૂ. પુ. ૧૨.૨૬૯॥

ઇત્યાદિવચનાત્ ।

## (૩૧૨)

અહઙ્ગ્રહધ્યાનાદેવ બ્રહ્મલોકપ્રાપ્તિરિતિ નિયમઃ - યથા

ઓઙ્કારરૂપબ્રહ્મોપાસકસ્ય બ્રહ્મલોકપ્રાપ્તિદ્વારા મોક્ષલાભઃ ફલં તથોપનિષત્સૂક્તાનામિતરેષામપિ બ્રહ્મોપાસનાનામિદમેવ ફલમ્ । કિન્તુ અહઙ્ગ્રહોપાસનં વિનેતરોપાસનેન ન બ્રહ્મલોકોઽવાપ્યત ઇતિ સૂત્રકારૈર્ભાષ્યકારૈશ્ચ બ્રહ્મસૂત્રેષુ ભાષ્યાદિષુ ચ ચતુર્થાધ્યાયે વર્ણિતમ્ । નાર્મદબાણાનાં શિવરૂપેણ, સાલગ્રામશિલાનાં વિષ્ણુરૂપેણ ચ ધ્યાનં તુ પ્રતીકધ્યાનમેવ । નાહઙ્ગ્રહધ્યાનમ્ । એવમેવ "મનો બ્રહ્મેત્યુપાસીત" (છા. ૩.૧૮.૧) "આદિત્યો બ્રહ્મેત્યાદેશઃ (છા. ૩.૧૯.૧) ઇત્યાદિશ્રુત્યુક્તોપાસનમપિ પ્રતીકધ્યાનમેવ ।

નાહઙ્ગ્રહધ્યાનમ્ । તેષાં તત્તત્પ્રકરણે પૃથક્ ફલશ્રવણાત્તૈર્ન બ્રહ્મલોકોઽવાપ્યતે । સગુણસ્યાથવા નિર્ગુણસ્ય બ્રહ્મણઃ સ્વાત્માભેદેન ચિન્તનમહઙ્ગ્રહધ્યાનમિત્યુચ્યતે । તેનૈવ ધ્યાનેન બ્રહ્મલોકોઽવાપ્યેત ।

## (૩૧૩)

ઉત્તરાયણમાર્ગેણ બ્રહ્મલોકં ગતાનાં પુનઃ સંસારાપ્રાપ્તિઃ; જ્ઞાનદ્વારા મોક્ષપ્રાપ્તિશ્ચપૂર્વોક્તો માર્ગ ઉત્તરાયણમાર્ગો દેવયાનમાર્ગોઽર્ચિરાદિમાર્ગ ઇતિ ચોચ્યતે । તેન દેવમાર્ગેણ બ્રહ્મલોકં ગત ઉપાસકઃ પુનઃ સંસારં ન પ્રતિપદ્યતે, કિન્તુ તત્રૈવ જ્ઞાનોત્પત્ત્યા સ વિદેહમુક્તિમાપ્નોતિ । તત્ર જ્ઞાનસાધનીભૂતગુરૂપદેશાદ્યપેક્ષા નાસ્તિ । બ્રહ્મલોકે ગુરૂપદેશાદિસાધનં વિનૈવ જ્ઞાનોત્પત્તિર્ભવતિ । તત્ર ચ કારણં બ્રહ્મલોકે રજસ્તમોગુણયોર્લેશતોઽપ્યભાવઃ । તસ્ય લોકસ્ય કેવલ૧. રાજ્ઞઃ પ્રજાનાં રાજ્ય ઇવ ઈશ્વરલોકે વાસમાત્રં સાલોક્યમુક્તિઃ । તતોઽપિ શ્રેષ્ઠા રાજસેવકવદીશ્વરસમીપે વાસરૂપા સામીપ્યમુક્તિઃ । તતોઽપ્યુત્કૃષ્ટા રાજાનુજવદીશ્વરસમાનરૂપપ્રાપ્તિઃ સારૂપ્યમુક્તિઃ । તતોઽપ્યતિશયિતા રાજ્ઞો જ્યેષ્ઠપુત્રયુવરાજવદીશ્વરસમાનસત્યસઙ્કલ્પાદ્યૈશ્વર્યપ્રાપ્તિઃ સાર્ષ્ટ્યમુક્તિરિત્થમુત્તરોત્તરમુત્કૃષ્ટા ચતુર્વિધા મુક્તિઃ શાસ્ત્રેષુ કથિતા । તત્ર ચતુર્થી સાર્ષ્ટ્યમુક્તિઃ શ્રેષ્ઠા । સાર્ષ્ટ્યમુક્તિરેવ સાયુજ્યમુક્તિરીત્યુચ્યતે । સત્ત્વગુણપ્રધાનતા ચ । તમોગુણાભાવાત્ જડત્વાલસ્યાદિકં નાસ્તિ । રજોગુણાભાવાત્ તત્કાર્યભૂતકામક્રોધાદિરૂપવિક્ષેપોઽપિ નાસ્તિ । એવં તમોરજસોરભાવાદાવરણવિક્ષેપયોરભાવે કેવલસત્ત્વગુણપ્રધાને બ્રહ્મલોકે સત્ત્વગુણકાર્યજ્ઞાનરૂપપ્રકાશસ્તત્ર લોકે મુખ્યઃ । “એતેન પ્રતિપદ્યમાના ઇમં માનવમાવર્તં નાવર્તન્તે” (છા. ૪.૧૫.૫) “ન ચ પુનરાવર્તતે” (છા. ૮.૧૫.૧) “તેષાં ન પુનરાવૃત્તિઃ” (બૃ. ૬.૨.૧૫) “જ્ઞાનમુત્પદ્યતે પુંસાં ક્ષયાત્પાપસ્ય કર્મણઃ” “સત્ત્વાત્ સઞ્જાયતે જ્ઞાનમ્” (ભ. ગી. ૧૪.૧૭) ઇત્યાદિશ્રુતિસ્મૃતિભ્યઃ ।

## (૩૧૪)

હિરણ્યગર્ભલોકવાસિનોઽસઙ્ગનિર્વિકારબ્રહ્મરૂપતયા આત્મનો ભાને કારણમ્પૂર્વમોઙ્કારસ્ય બ્રહ્મરૂપતયોપાસનકાલે ઓઙ્કારમાત્રાણામર્થો વક્ષ્યમાણરીત્યા ચિન્તિતઃ - સ્થૂલોપાધિવિશિષ્ટવિરાડાત્મકવિશ્વચૈતન્યમકારરૂપપ્રથમમાત્રાયા વાચ્યાર્થઃ । સૂક્ષ્મોપાધિવિશિષ્ટહિરણ્યગર્ભાત્મકતૈજસચૈતન્યમુકાર- રૂપદ્વિતીયમાત્રાયા વાચ્યાર્થઃ । કારણોપાધિવિશિષ્ટેશ્વરાત્મકપ્રાજ્ઞચૈતન્યં મકારરૂપતૃતીયમાત્રાયા વાચ્યાર્થઃ । એવં પ્રાક્ચિન્તિતાર્થાનુસ્મરણમુપાસકસ્ય બ્રહ્મલોકે જાયતે । સત્ત્વગુણપ્રભાવાચ્ચ વક્ષ્યમાણપ્રકારેણ વિવેકપૂર્વકં વિચારયતિ ચોપાસકઃ - (૧) સ્થૂલોપાધિદૃષ્ટ્યા ખલુ શુદ્ધે ચૈતન્યે વિરાટ્ત્વવિશ્વત્વપ્રતીતિરભૂત્ । તત્ર સમષ્ટિસ્થૂલદૃષ્ટ્યા વિરાટ્ત્વમ્, વ્યષ્ટિસ્થૂલદૃષ્ટ્યા વિશ્વત્વં ચાભાત્ । સમષ્ટિવ્યષ્ટ્યાત્મકસ્થૂલદૃષ્ટિવિરહે વિરાટ્ત્વવિશ્વત્વે ન પ્રતીયેયાતામ્ । કિન્તુ શુદ્ધં ચૈતન્યમાત્રં ભાસેત । તસ્માત્સ્થૂલોપાધિસહિતવિરાડાત્મકવિશ્વોઽકારવાચ્યાર્થઃ । (૨) તથૈવ સૂક્ષ્મોપાધિસહિતહિરણ્યગર્ભાત્મકતૈજસ ઉકારવાચ્યાર્થઃ । સમષ્ટિસૂક્ષ્મોપાધિદૃષ્ટ્યા શુદ્ધચૈતન્યે હિરણ્યગર્ભત્વમ્, વ્યષ્ટિસૂક્ષ્મોપાધિદૃષ્ટ્યા તૈજસત્વં ચાભાત્ । સૂક્ષ્મોપાધિદૃષ્ટિવિરહે તુ હિરણ્યગર્ભત્વં તૈજસત્વં વા ન ભાયાત્ । કિન્તુ શુદ્ધં ચૈતન્યમાત્રં ભાસેત । (૩) તથૈવ કારણોપાધિસહિતેશ્વરાત્મા પ્રાજ્ઞો

મકારવાચ્યાર્થઃ । સમષ્ટ્યજ્ઞાનોપાધિદૃષ્ટ્યા શુદ્ધચૈતન્યે ઈશ્વરત્વમભાત્, વ્યષ્ટ્યજ્ઞાનોપાધિદૃષ્ટ્યા પ્રાજ્ઞત્વમભાત્ । અજ્ઞાનોપાધિદૃષ્ટિવિરહે તુ ઈશ્વરત્વં પ્રાજ્ઞત્વં વા ન ભાસેત । કિન્તુ કેવલચૈતન્યમાત્રં પ્રતીયેત । કિઞ્ચ યત્ર યદ્વસ્ત્વન્યદૃષ્ટ્યા પ્રતીયતે તત્ર તદ્વસ્તુ પરમાર્થતો નાસ્તિ । યસ્ય વસ્તુનો યદ્રૂપમન્યદૃષ્ટિં વિના સ્વત એવ પ્રતીયતે તદેવ તસ્ય પારમાર્થિકં સ્વરૂપમ્ । યથા કસ્મિંશ્ચિત્પુરુષે પિતૃદૃષ્ટ્યા પુત્રત્વમ્, પિતામહદૃષ્ટ્યા પૌત્રત્વં ચ પ્રતીયમાનં ન તસ્ય પરમાર્થધર્મઃ, કિન્તુ પુરુષત્વમેવ તસ્ય પરમાર્થધર્મઃ । તથા સ્થૂલસૂક્ષ્મકારણોપાધિદૃષ્ટ્યા ભાસમાનવિશ્વત્વતૈજસત્વપ્રાજ્ઞત્વાદયો ન પરમાર્થધર્માઃ, પરન્તુ મિથ્યૈવ તે । ચૈતન્યમાત્રં પરમાર્થસત્યમ્ । તચ્ચ ચૈતન્યં સમસ્તભેદશૂન્યમ્ । વિરાજો વિશ્વસ્ય ચ ભેદ ઔપાધિક એવ । તયોરુભયોઃ સ્થૂલોપાધિકત્વેઽપિ સમષ્ટ્યુપાધિકો વિરાટ્ । વિશ્વસ્તુ વ્યષ્ટ્યુપાધિકઃ । સમષ્ટિવ્યષ્ટ્યુપાધિપ્રયુક્તભેદવત્ત્વેઽપિ વિરાડ્વિશ્વયોઃ સ્વરૂપતો નાસ્તિ ભેદઃ । તથૈવ હિરણ્યગર્ભતૈજસયોઃ સમષ્ટિવ્યષ્ટ્યુપાધિપ્રયુક્તભેદવત્ત્વેઽપિ સ્વરૂપતો ન ભેદોઽસ્તિ । એવમેવેશ્વરપ્રાજ્ઞયોઃ સમષ્ટિવ્યષ્ટ્યુપાધિનિબન્ધન એવ ભેદો ન સ્વરૂપતઃ । ઇત્થં ચ પ્રાજ્ઞેનેશ્વરસ્ય, તૈજસેન હિરણ્યગર્ભસ્ય, વિશ્વેન વિરાજશ્ચાભેદઃ સિદ્ધઃ । એવમેવ સ્થૂલોપાધિકસ્ય સૂક્ષ્મોપાધિકેન વા કારણોપાધિકેન વા ન ભેદગન્ધોઽપ્યસ્તિ । યતઃ સ્થૂલસૂક્ષ્મકારણરૂપોપાધિદૃષ્ટિપરિત્યાગે ચૈતન્યસ્વરૂપે ન કોઽપિ ભેદોઽસ્તિ । કિઞ્ચાનાત્મનઃ સકાશાદપિ ચૈતન્યસ્ય નાસ્તિ ભેદઃ । યતોઽનાત્મભૂતદેહાદિપ્રપઞ્ચોઽવિદ્યાદશાયામેવ ભાતિ । ન પરમાર્થતઃ । તસ્માદનાત્મપ્રપઞ્ચસ્યાપિ ચૈતન્યેન સહ ભેદોઽસઙ્ગત એવ । ઇત્થં સર્વભેદશૂન્યાસઙ્ગનિર્વિકારનિત્યમુક્તપરબ્રહ્મસ્વરૂપઃ પ્રત્યગાત્મા ઓઙ્કારલક્ષ્યાર્થત્વેન સ્વયમ્પ્રકાશતયા બ્રહ્મલોકે ઉપાસકસ્ય ભાસતે । તસ્માદ્ધિરણ્યગર્ભલોકે વસત ઉપાસકસ્ય ન પુનઃ સંસારગતિઃ । કિન્તુ સ જ્ઞાનેન વિદેહકૈવલ્યમેવાપ્નોતિ કાર્યબ્રહ્મણોઽવસાનસમયે ।

(૩૧૫)

ઓઙ્કારસ્ય મહાવાક્યાનાં ચાર્થૈકત્વમ્યદ્યપિ મહાવાક્યવિવેકમન્તરા જ્ઞાનં ન સિદ્ધ્યતીતિ સિદ્ધાન્તસ્તથાપિ ઓઙ્કારવિવેકસ્ય મહાવાક્યવિવેકરૂપત્વાદોઙ્કારવિવેકેનાપિ જ્ઞાનમુદિયાદેવ । તથા હિ, સ્થૂલોપાધિસહિતચેતનોઽકારવાચ્યાર્થઃ; સ્થૂલોપાધિરહિતકેવલચેતનોઽકારલક્ષ્યાર્થઃ । સૂક્ષ્મોપાધિસહિતચેતન ઉકારવાચ્યાર્થઃ । સૂક્ષ્મોપાધિરહિતચેતન ઉકારલક્ષ્યાર્થઃ । કારણોપાધિસહિતચેતનો મકારવાચ્યાર્થઃ । કારણોપાધિરહિતચેતનો મકારલક્ષ્યાર્થઃ । ઇત્થમુપાધિસહિતા વિશ્વાદયોઽકારાદિમાત્રાણાં વાચ્યાર્થાઃ । ઉપાધિરહિતઃ કેવલં ચેતનઃ સકલમાત્રાણાં લક્ષ્યાર્થઃ । તથૈવ નામરૂપાત્મકાખિલોપાધિસહિતચેતન ઓઙ્કારવાચ્યાર્થઃ । નામરૂપાત્મકસકલોપાધિરહિતકેવલચેતન ઓઙ્કારલક્ષ્યાર્થઃ । ઇત્થમોઙ્કારસ્ય મહાવાક્યાનાં ચાર્થ એક એવ ભવતિ । તસ્માદોઙ્કારવિવેકેનૈવાદ્વૈતાત્મજ્ઞાનં જાયતે । ઇત્થમદૃષ્ટિરાચાર્યવાક્યં શ્રુત્વા ઉપાસનાયાં પ્રવૃત્તો જ્ઞાનદ્વારા પરમપુરુષાર્થમોક્ષમલભત ।

(૩૧૬)

૧. વેદાન્તશ્રવણમનનરૂપવિચારે પ્રવૃત્તો જિજ્ઞાસુસ્તં
વિહાય નાન્યત્ સાધનમનુતિએષ્ઠેત્ । વેદાન્તવિચારશીલઃ

પુરુષો યદિ વિચારં પરિત્યજ્યાન્યત્ર પ્રસજ્યતે સ આરૂઢપતિતો ભવતિ । અથવા “કરસ્થં મધુ સન્ત્યજ્ય કૂર્પરં લેઢિ મૂઢધીઃ” ઇતિ ન્યાયસ્ય વિષયો ભવતિ । યઃ કરસ્થં મધુ પ્રમાદાત્પરિસ્રાવ્ય મધુના લિપ્તં કૂર્પરં લેઢિ પશ્ચાત્, તસ્ય તુલ્યો ભવતિ વેદાન્તવિચારં પરિત્યજ્યાન્યત્ર પ્રસક્તઃ પુરુષઃ । તસ્માદ્વેદાન્તવિચારશીલઃ પુરુષઃ સુદૃઢબોધોદયપર્યન્તં વિચારમેવ કુર્યાત્ । યસ્ય વિચારે ન પ્રવૃત્તિર્ભવતિ સ નિર્ગુણોપાસનં કુર્યાત્ । તત્રાપ્યશક્તેન “ઉપવાસાત્ વરા ભિક્ષા” ઇતિ ન્યાયેન સગુણોપાસનાદિકં કર્તવ્યં ભવેત્ ।

૨. માયાવિશિષ્ટચૈતન્યરૂપં કારણં બ્રહ્મ સગુણેશ્વર ઇત્યુચ્યતે । અથવા કારણબ્રહ્મોપલક્ષણભૂતા હિરણ્યગર્ભવૈશ્વાનરહરિહરગૌરીગણેશાર્કાદયઃ કાર્યબ્રહ્મરૂપા અપિ સગુણેશ્વરત્વેન ધ્યેયાઃ । અથવા તેષાં હરિહરાદીનાં પ્રતીકભૂતસાલગ્રામાદયઃ, તેષાં પ્રતિમાવિશેષાશ્ચ સગુણેશ્વરત્વેનોપાસ્યાઃ । પૂર્વોક્તેષૂપાસ્યેષૂત્તરોત્તરાપેક્ષયા પૂર્વપૂર્વસ્યોપાસનં પ્રશસ્તં ભવતિ । ઉત્તરત્ર સમ્મતરઙ્ગે વક્ષ્યમાણક્રમેણ માયાવિશિષ્ટચૈતન્યરૂપં કારણં બ્રહ્મૈવેશ્વરશબ્દસ્ય મુખ્યાર્થઃ । તદેવોપાસ્યમ્ । તથાપિ “માયાં તુ પ્રકૃતિં વિદ્યાન્માયિનં તુ મહેશ્વરમ્” (શ્વે. ૧૦) ઇતિ શ્રુત્યા માયાવિશિષ્ટચૈતન્યાદન્યસ્ય વસ્તુનોઽભાવાત્ શ્રીવિદ્યારણ્યસ્વામિનઃ સર્વમતાવિરોધેન ચિત્રદીપે ઈશ્વરસ્વરૂપમવર્ણયન્ । તદનુસારેણ હિરણ્યગર્ભાદિસર્વમુપાસ્યવસ્તુ ઈશ્વર એવેત્યભિપ્રાયઃ ।

૩. ફલાભિસન્ધિમન્તરા સ્વસ્વવર્ણાશ્રમોચિતાનિ કર્માણિ કેવલમીશ્વરાર્પણબુદ્ધ્યા કુર્યાત્ । કર્મોપરમકાલે નામોચ્ચારણાદિરૂપમીશ્વરભજનં ચ કુર્યાત્ । ફલેચ્છાં વિનાનુષ્ઠિતમીશ્વરે સમર્પિતં ચ વિહિતં કર્મેશ્વરપ્રસાદહેતુર્ભવતિ । અતો નિષ્કામકર્માનુષ્ઠાનમીશ્વરભજનરૂપમેવ ભવતિ ।

# વિચારસાગરઃ

## Chapter 6 સંસ્કૃતવિચારસાગરે ગુરુવેદાન્તાદિસાધનમિથ્યાત્વવર્ણનં નામ ષષ્ઠસ્તરઙ્ગઃ ।

### (A. 317-317)

(૩૧૭)

ઉપોદ્ઘાતઃ - ચતુર્થતરઙ્ગે ઉત્તમાધિકારિણ ઉપદેશપ્રકારો વર્ણિતઃ । પઞ્ચમતરઙ્ગે મધ્યમાધિકારિણ ઉપદેશપ્રકારઃ કથિતઃ । અસ્મિંસ્તુ તરઙ્ગે કનિષ્ઠાધિકારિણ ઉપદેશપ્રકારો નિરૂપ્યતે । યસ્ય તુ સંશયા બહવો જાયન્તે સ તીક્ષ્ણબુદ્ધિરપિ કનિષ્ઠાધિકાર્યેવ ભવતિ । સંશયો હિ પાપાત્મા । "સંશયાત્મા વિનશ્યતિ" (ભ. ગી. ૪.૪૦) ઇતિ સ્મૃતિઃ । અસ્ય તરઙ્ગસ્ય યુક્તિપ્રધાનત્વાત્ યસ્ય ગુરુમુખાચ્છ્રુતેઽપિ વેદાર્થે કુતર્કા ઉપજાયન્તે તસ્યાયં તરઙ્ગ ઉપયુજ્યતે । કુતર્કદગ્ધબુદ્ધિઃ કનિષ્ઠાધિકારી । તસ્યોપદેશપ્રકારોઽસ્મિન્ તરઙ્ગે વર્ણ્યતે । પઞ્ચમે તરઙ્ગે પ્રણવોપાસનજગદુત્પત્ત્યાદિનિરૂપણાત્પૂર્વમિદમુક્તં - ચૈતન્યાદ્ભિન્નમજ્ઞાનં તત્કાર્યં ચાનાત્મા । અનાત્મપદાર્થઃ સર્વોઽપિ સપ્રવન્મિથ્યા ઇતિ । તમિમં ગુરોરુપદેશં શ્રુત્વા પ્રશ્નાદુપરતૌ જ્યેષ્ઠૌ ભ્રાતરૌ દૃષ્ટ્વા તર્કદૃષ્ટિઃ પૃચ્છતિ

### (A. 318-319) કનિષ્ઠાધિકારિણસ્તર્કદૃષ્ટેઃ પ્રશ્નઃ-

(૩૧૮)

સ્વપ્નદૃષ્ટાન્તેન જાગ્રત્પદાર્થસ્ય મિથ્યાત્વં ન ભવતિ ઇતિ
તર્કદૃષ્ટિઃ પૃચ્છતિ - પૂર્વમત્યન્તમજ્ઞાતો યઃ પદાર્થસ્તસ્ય જ્ઞાનં સ્વપ્ને ન ભવતિ ।
કિન્તુ જાગ્રતિ યદ્વિષયકાનુભવોઽભૂત્ તદ્વિષયકં સ્મરણં સ્વપ્ને જાયતે । તથા
ચ સ્મૃતિવિષયજાગ્રત્પદાર્થાનાં સત્યત્વાત્ સ્વપ્ને જાયમાનં તદ્વિષયકસ્મૃતિજ્ઞાનમપિ સત્યમેવ । તસ્માત્સ્વપ્નદૃષ્ટાન્તેન જાગ્રત્પદાર્થાનાં મિથ્યાત્વકથનં ન યુજ્યત એવ ।

## (૩૧૯)

સ્વપ્નો ન મિથ્યાઅથવા સ્વપ્નજ્ઞાનવિષયભૂતાઃ પદાર્થાઃ સત્યા એવ । ન મિથ્યા । તથા હિ, સ્વપ્નાવસ્થાયાં સ્થૂલશરીરં ત્યક્ત્વા લિઙ્ગશરીરં બહિર્નિર્ગત્ય સર્વં સત્યં ગિરિસમુદ્રાદિકં પશ્યતિ । અતઃ સ્વપ્નો ન મિથ્યા ।

૧. ચિન્તાં પ્રકૃતસિદ્ધ્યર્થામુપોદ્ઘાતં વિદુર્બુધાઃ ।

૨. સ્વપ્નો જાગ્રત્યનુભૂતપદાર્થવિષયકસ્મૃતિરૂપમાનસવિપર્યાસ
ઇતિ કથયતાં નૈયાયિકાદીનાં મતરીત્યાયં પ્રશ્નઃ ।

૩. પઞ્ચપ્રાણમનોબુદ્ધિદશેન્દ્રયસમન્વિતમ્ ।
અપઞ્ચીકૃતભૂતોત્થં સૂક્ષ્માઙ્ગં ભોગસાધનમ્ ॥ આ. બો. ૧૩ ॥

# (A. 320-321) પૂર્વોક્તપ્રશ્નયોરુત્તરમ્-

## (૩૨૦)

સ્વપ્નજ્ઞાનં પ્રત્યક્ષમ્ । ન જાગ્રત્પદાર્થાનાં સ્મૃતિરૂપમ્પૂર્વકાલસમ્બન્ધવતઃ પદાર્થસ્ય જ્ઞાનં સ્મૃતિર્ભવતિ । યથા પૂર્વં દૃષ્ટસ્ય ગજસ્ય “સ ગજઃ” ઇતિ સ્મૃતિરૂપં જ્ઞાનમુત્પદ્યતે । પુરતઃ સ્થિતં ગજં દૃષ્ટ્વા તુ “અયં ગજઃ” ઇતિ જાયમાનં જ્ઞાનં તુ ન સ્મૃતિઃ । કિન્તુ પ્રત્યક્ષમેવ । સ્વપ્ને “અયં ગજોઽગ્રે તિષ્ઠતિ”, “ઇયં નદી પ્રાચીં દિશં પ્રવહતિ”, “અયં પર્વતો રમ્યો વિરાજતે” ઇત્યેવં જ્ઞાનં ભવતિ । તસ્માજ્જાગ્રતિ દૃષ્ટાનાં પદાર્થાનાં સ્મરણં ન સ્વપ્ને ભવતિ । કિન્તુ ગજાદીનાં પ્રત્યક્ષજ્ઞાનમેવ ભવતિ । કિઞ્ચ યદુક્તં “જાગ્રત્યનુભૂતપદાર્થવિષયકજ્ઞાનમેવ સ્વપ્ને ભવતિ । નાનનુભૂતપદાર્થવિષયકજ્ઞાનં જાયતે । તસ્માજ્જાગ્રત્પદાર્થજ્ઞાનજન્યસંસ્કારાત્સ્વપ્નજ્ઞાનમુદેતિ । સંસ્કારજન્યં જ્ઞાનં સ્મૃતિરિતિ કથ્યતે” ઇતિ । તન્ન યુજ્યતે । તથા હિ, પ્રત્યક્ષજ્ઞાનં દ્વિવિધમેકમભિજ્ઞારૂપપ્રત્યક્ષં અપરં ચ પ્રત્યભિજ્ઞારૂપપ્રત્યક્ષં ઇતિ । (૧) કેવલમિન્દ્રિયસન્નિકર્ષજન્યં જ્ઞાનં અભિજ્ઞાપ્રત્યક્ષં ઇતિ વર્ણ્યતે । યથા “અયં ગજઃ” ઇતિ નેત્રેન્દ્રિયસન્નિકર્ષમાત્રજન્યં ગજજ્ઞાનમભિજ્ઞાપ્રત્યક્ષમ્ । (૨) પૂર્વાનુભવજન્યસંસ્કારેણેન્દ્રિયસન્નિકર્ષેણ ચોત્પન્નં જ્ઞાનં પ્રત્યભિજ્ઞાપ્રત્યક્ષં ઇતિ વર્ણ્યતે । યથા પૂર્વાનુભૂતે ગજે પુરતો દૃષ્ટે સતિ “સોઽયં ગજઃ” ઇતિ જ્ઞાનં પ્રત્યભિજ્ઞાપ્રત્યક્ષમ્ । અત્ર ચ પૂર્વદૃષ્ટહસ્તિજ્ઞાનજન્યસંસ્કારો ગજેન સહ નેત્રેન્દ્રિયસમ્બન્ધશ્ચેત્યુભયમપિ પ્રત્યભિજ્ઞાપ્રત્યક્ષકારણમ્ । અતશ્ચ સંસ્કારજન્યં જ્ઞાનં સ્મૃતિરેવેતિ ન નિયમઃ । પ્રત્યભિજ્ઞાપ્રત્યક્ષસ્યાપિ સંસ્કારજન્યત્વાત્ । પરન્તુ ઇન્દ્રિયસન્નિકર્ષમન્તરા કેવલસંસ્કારજન્યં જ્ઞાનં સ્મૃતિજ્ઞાનં ઇતિ કીર્ત્યતે । (૧) સ્વપ્ને જાયમાનં ગજાદિજ્ઞાનં ન સંસ્કારમાત્રજન્યમ્ । અપિ તુ નિદ્રારૂપદોષજન્યમપિ । ગજાદિરિવ સ્વપ્ને કલ્પિતેન્દ્રિયાદિકમપિ વર્તતે ।

૧. પ્રત્યક્ષજ્ઞાનસામગ્રીસહિતસંસ્કારજન્યં
જ્ઞાનં પ્રત્યભિજ્ઞાપ્રત્યક્ષં ઇતિ કથ્યતે ।
સંસ્કારસહિતેન્દ્રિયજન્યં જ્ઞાનં પ્રત્યભિજ્ઞાપ્રત્યક્ષમિતિ

લક્ષણસ્ય બાહ્યપ્રત્યભિજ્ઞાપ્રત્યક્ષે
સમ્ભવેઽપ્યાન્તરપ્રત્યભિજ્ઞાપ્રત્યક્ષેઽસ્ય
લક્ષણસ્યાસમ્ભવાદવ્યાપ્તિઃ સ્યાત્ ।
તસ્માત્પ્રથમોક્તમેવોભયવિધપ્રત્યભિજ્ઞાપ્રત્યક્ષસાધારણં
નિર્દુષ્ટં લક્ષણમ્ । અત્રાયં વિશેષઃ - સંસ્કારજન્યં જ્ઞાનં
સ્મૃતિરિત્યુક્તે પ્રત્યભિજ્ઞાનસ્યાપિ સંસ્કારજન્યત્વાત્તત્રાતિવ્યાપ્તિઃ
સ્યાત્ । તદ્વારણાય સ્મૃતિલક્ષણે માત્રપદં નિવેશ્યમ્ ।
સંસ્કારમાત્રજન્યં જ્ઞાનં સ્મૃતિરિત્યુક્તે સંસ્કારમાત્રરૂપસામગ્ર્યા
અનુભવનાશાનન્તરં સદા વિદ્યમાનત્વાત્ સદા સ્મૃત્યુત્પત્તિપ્રસઙ્ગઃ ।
અતસ્તદ્વારણાય સ્મૃતિલક્ષણે ઉદ્ભૂતપદમપિ નિવેશ્યમ્ । તથા ચ
"ઉદ્ભૂતસંસ્કારમાત્રજન્યં જ્ઞાનં સ્મૃતિઃ" ઇતિ નિર્દુષ્ટં
સ્મૃતિલક્ષણમ્ । તસ્માત્સ્વપ્ને ગજાદીનાં જ્ઞાનમિન્દ્રિયજન્યમ્ ।
યદ્યપિ સ્વાપ્નપદાર્થઃ સાક્ષિભાસ્યો નેન્દ્રિયજન્યજ્ઞાનવિષયઃ ।
તથાપ્યવિવેકિદૃષ્ટ્યા સ્વાપ્નજ્ઞાનમિન્દ્રિયજન્યમિતિ કથ્યતે ।
તથા ચ સ્વાપ્નપદાર્થજ્ઞાનં ન જાગ્રત્પદાર્થગોચરા સ્મૃતિઃ ।
(૨) કિઞ્ચ નિદ્રાતઃ પ્રબુદ્ધઃ પુરુષો વદતિ "સ્વપ્નેઽદ્ય
ગજમહમપશ્યમ્" ઇતિ । સ્વાપ્નગજજ્ઞાનં યદિ સ્મૃતિઃ સ્યાત્
તદા પ્રબુદ્ધઃ "સ્વપ્નેઽદ્ય ગજમહમસ્માર્ષમ્" ઇતિ વદેત્ ।
ન તુ કોઽપિ તથા વદતિ । તસ્માન્ન સ્વપ્ને જાગ્રત્પદાર્થવિષયિણી
સ્મૃતિઃ । (૩) અપિ ચ "જાગ્રતિ દૃષ્ટાનામથવા શ્રુતાનાં
પદાર્થાનામેવ જ્ઞાનં સ્વપ્ને જાયતે" ઇતિ નાસ્તિ નિયમઃ । અપિ
તુ જાગ્રત્યજ્ઞાતપદાર્થાનામપિ જ્ઞાનં સ્વપ્ને ભવતિ । ઇહ જન્મનિ
કદાપ્યદૃષ્ટસ્યાશ્રુતસ્ય ચ વિલક્ષણસ્ય પદાર્થસ્ય જ્ઞાનમપિ
કદાચિત્સ્વપ્ને ભવતિ । "અનુભૂતશ્ચાનનુભૂતશ્ચ" ઇતિ
શ્રુતેઃ । તસ્માત્સ્વપ્ને જાયમાનં જ્ઞાનં ન સ્મૃતિઃ । (૪) યદ્યપિ ઇહ
જન્મન્યનુભૂતપદાર્થજ્ઞાનજન્યસંસ્કાર એવ સ્મૃતિહેતુરિતિ નાસ્તિ
નિયમઃ । જન્માન્તરીયાનુભવજન્યસંસ્કારસ્યાપિ સ્મૃતિહેતુત્વદર્શનાત્
। તથા હિ, પ્રવૃત્તિં પ્રતિ અનુકૂલતા(ઇષ્ટસાધનતા)
જ્ઞાનં કારણમ્, તદભાવે પ્રવૃત્ત્યદર્શનાત્ । તતશ્ચ
જાતમાત્રસ્ય શિશોઃ સ્તન્યપાને પ્રાથમિકપ્રવૃત્તે કારણભૂતં
"સ્તન્યપાનં મમેષ્ટસાધનમ્" ઇતિ જ્ઞાનં ભવતિ
। તત્ર ચ જન્માન્તરે શિશોઃ સ્તન્યપાનસ્યાનુકૂલતાનુભૂતા

। તાદૃશાનુભવાહિતસંસ્કારવશાદસ્મિન્ જન્મનિ શિશોઃ પ્રાથમિકી સ્તન્યપાનસ્યાનુકૂલતાસ્મૃતિર્જાતેતિ વક્તવ્યમ્ । તસ્માજ્જન્માન્તરીયાનુભવજન્યસંસ્કારાદપિ સ્મૃતિર્ભવતિ । એવમેવેહ જન્મન્યનનુભૂતપદાર્થવિષયકસ્મૃતિરપિ જન્મનાન્તરીયાનુભવજન્યસંસ્કારવશાત્ સ્વપ્ને સમ્ભવત્યેવ । તથાપિ જાગ્રતિ યસ્ય પદાર્થસ્ય જ્ઞાનં કસ્મિન્નપિ જન્મનિ કદાપિ ન સમ્ભવેત્ તાદૃશપદાર્થસ્ય પ્રતીતિઃ સ્વપ્ને ભવતિ । યથા કદાચિત્ કશ્ચન સ્વપ્ને સ્વમસ્તકં ચ્છિન્નમન્યત્ર પતિતં સ્વચક્ષુષા પશ્યતિ તત્ર ન કોઽપિ જાગ્રતિ ચ્છિન્નં સ્વશિરોઽન્યત્ર પતિતં સ્વચક્ષુષા દૃષ્ટવાન્ । તસ્માજ્જાગ્રત્પદાર્થાનુભવજન્યસંસ્કારવશાત્સ્વપ્ને સ્મૃતિર્ભવીતિ કથનમત્યન્તમસઙ્ગતમ્ । (૫) સ્વપ્નસ્ય સ્મૃતિરૂપત્વખણ્ડનેઽનન્તા યુક્તયો ગ્રન્થકારૈસ્તત્ર તત્રોક્તાઃ । તત્ર ચ “સ્મૃતિજ્ઞાનસ્ય વિષયો ન ક્વચિદપિ સમ્મુખે વિદ્યમાનતયા પ્રતીયતે । સ્વાપ્નગજાદયસ્તુ સ્વપ્નકાલે સમ્મુખે વર્તમાનતયા પ્રતીયન્તે । તસ્માત્સ્વપ્ને ગજાદિજ્ઞાનં ન સ્મૃતિઃ” ઇતીદં પૂર્વોક્તં દૂષણં પ્રબલમ્ ।

## (૩૨૧)

સ્વપ્ને લિઙ્ગશરીરં સ્થૂલશરીરાદ્બહિર્ગત્વા સત્યગિરિસમુદ્રાદિકં ન પશ્યતિ - સ્વપ્ને લિઙ્ગશરીરં સ્થૂલશરીઆદ્બહિર્ગત્વા સત્યગિરિસમુદ્રાદિકં પશ્યતીતિ યદુક્તં તત્રોત્તરમુચ્યતે - યદિ સ્થૂલશરીરાદ્બહિર્ગત્વા લિઙ્ગશરીરં સત્યં ગિરિસમુદ્રાદિકં પશ્યતિ તદા લિઙ્ગશરીરસ્ય બહિર્ગમનાત્ મરણાવસ્થાયાં યથા સ્થૂલશરીરં ભયઙ્કરં ભવતિ તથા સ્વપ્નાવસ્થાયામપિ લિઙ્ગશરીરાભાવાત્સ્થૂલશરીરમમઙ્ગલં કુણપસદૃશં ચ ભવેત્ । ન તુ તથા સ્વપ્નાવસ્થાયાં સ્થૂલશરીરં ભવતિ । કિન્તુ સ્વપ્નાવસ્થાયામપિ સ્થૂલશરીરં પ્રાણસહિતં જાગ્રતીવ સુન્દરં ચ ભવતિ । તસ્માત્સ્થૂલશરીરં વિહાય સ્વપ્નાવસ્થાયાં લિઙ્ગશરીરં ન બહિર્ગચ્છતિ । અથ યદ્યુચ્યતે - સ્વપ્નાવસ્થાયાં પ્રાણા ન બહિર્ગચ્છન્તિ । કિન્ત્વન્તઃકરણમિન્દ્રિયાણિ ચ બહિર્ગત્વા પર્વતાદિકં પશ્યતિ । પ્રાણાનાં બહિર્ગમનાભાવાદેવ મરણાવસ્થાયામિવ સ્થૂલશરીરં ન ભયઙ્કરં ભવતિ । અપિ ચ સ્વપ્ને પ્રાણાનાં બહિર્ગમને ન કિઞ્ચિદપિ પ્રયોજનમસ્તિ । યતઃ પ્રાણાનાં જ્ઞાનશક્તિર્નાસ્તિ । કિન્તુ ક્રિયાશક્તિરેવાસ્તિ । તસ્માદ્બાહ્યપદાર્થજ્ઞાનસામર્થ્યં યેષામસ્તિ તાન્યેવ બહિર્ગચ્છન્તિ । જ્ઞાનશક્તિશ્ચાન્તઃકરણસ્ય જ્ઞાનેન્દ્રિયાણાં ચાસ્તિ । પ્રાણાનાં કર્મેન્દ્રિયાનાં ચ જ્ઞાનશક્તિર્નાસ્તિ । કિન્તુ ક્રિયાશક્તિરેવાસ્તિ । તસ્માત્સ્વપ્નાવસ્થાયાં પ્રાણાઃ કર્મેન્દ્રિયાણિ ચ સ્થૂલશરીરે એવ તિષ્ઠન્તિ । અતશ્ચ મરણ- નિમિત્તકદાહાદિભ્યઃ સ્થૂલશરીરં સંરક્ષિતં ભવતિ ।

સ્વપ્નાવસ્થાયામન્તઃકરણં જ્ઞાનેન્દ્રિયાણિ ચ બહિર્ગત્વા સત્યગિરિસમુદ્રાદિકં દૃષ્ટ્વા પુનઃ પ્રાણાનાં કર્મેન્દ્રિયાણાં ચ સમીપં પ્રત્યાગચ્છન્તીતિ । ઇદં ન સઙ્ગચ્છતે -

(૧) સ્થૂલસૂક્ષ્મસઙ્ઘાતમધ્યે પ્રાણ એવ સ્વામી । પ્રાણહીનં દેહં ક્ષણાર્ધમપિ ગેહે ન સ્થાપયન્તિ । બહિરરણ્યં નીત્વા દહન્તિ । પ્રાણરહિતં શરીરં સ્પૃષ્ટ્વા સ્નાન્તિ ચ । અતઃ સ્થૂલશરીરસ્ય સારઃ પ્રાણઃ । તથા સૂક્ષ્મશરીરસ્યાપિ પ્રધાનઃ પ્રાણ એવ । તથા હિ, પ્રાણા ઇન્દ્રિયાણિ ચ "સ્વેષુ કઃ શ્રેષ્ઠઃ" ઇતિ વિષયે પરસ્પરં વિવાદમાપન્નાઃ પ્રજાપતિસમીપં ગતાસ્તમપૃચ્છન્ "કો નઃ શ્રેષ્ઠઃ" ઇતિ । સ હોવાચ પ્રજાપતિઃ - "યસ્મિન્ વ ઉત્ક્રાન્તે સ્થૂલમિદં શરીરમમઙ્ગલં ભવતિ સ વઃ શ્રેષ્ઠઃ" (છા. ૫.૧.૭) ઇતિ । પ્રજાપતેર્વચનં શ્રુત્વા ક્રમેણૈકૈકમિન્દ્રિયં શરીરાન્નિર્ગત્ય સંવત્સરં બહિરુષિત્વા પુનઃ શરીરં પ્રાવિશન્ । તદા તત્તતદિન્દ્રિયપ્રવાસકાલે તત્તદિન્દ્રિયપ્રયુક્તદર્શનાદિરૂપવ્યાપારવિકલમપીદં શરીરમન્ધબદિરાદિરૂપં ભૂત્વા પ્રાણેનાવષ્ટબ્ધં સન્ધિધૃતમતિષ્ઠત્ । પ્રાણે તૂચ્ચિક્રમિષતિ વિકલમિદં શરીરં ભૂમૌ પિપતિષતિ સ્મ । તદા સર્વાણીન્દ્રિયાણિ "પ્રાણ એવ નઃ શ્રેષ્ઠઃ" ઇતિ નિશ્ચિક્યુઃ । તસ્માદ્યાવદેવાસ્મિન્ દેહે પ્રાણો નિવસતિ તાવદેવેતરેન્દ્રિયાણિ તત્ર તિષ્ઠન્તિ । પ્રાણે તૂત્ક્રાન્તે ઇતરેન્દ્રિયાણ્યપિ તદનૂત્ક્રામન્તિ । તસ્માત્સૂક્ષ્મસઙ્ઘાતસ્ય રાજેવ પ્રાણ એવ પ્રધાનઃ । પ્રાણે શરીરાદનિર્ગતેઽન્તઃકરણં જ્ઞાનેન્દ્રિયાણિ ચ ન બહિર્ગચ્છેયુઃ ।

(૨) અથવા અન્તઃકરણં જ્ઞાનેન્દ્રિયાણિ ચ ભૂતાનાં સત્ત્વગુણકાર્યાણિ । અતસ્તેષાં જ્ઞાનશક્તિરસ્તિ, ન ક્રિયાશક્તિઃ । પ્રાણસ્ય તુ ક્રિયાશક્તિરસ્તિ । પ્રાણસ્ય ક્રિયાશક્તિબલાદેવ મરણસમયે લિઙ્ગશરીરં સ્થૂલમિદં શરીરં વિહાય લોકાન્તરં ગચ્છતિ । પ્રાણબલેનૈવેન્દ્રિયદ્વારાન્તઃકરણવૃત્તિર્બહિર્ઘટાદિદેશં ગચ્છતિ । પ્રાણસાહાય્યં વિનાન્તઃકરણાદિકં ન બહિર્ગન્તું પ્રભવતિ । અત એવ યોગશાસ્ત્રે ઉચ્યતે - "પ્રાણનિરોધં વિના મનોનિરોધો ન સિધ્યતિ । પ્રાણસઞ્ચરણેન મનસઃ સઞ્ચરણં ભવતિ । પ્રાણનિરોધાન્મનોનિરોધો ભવતિ" ઇતિ ચ । અતો મનોનિરોધરૂપરાજયોગમનુષ્ઠાતુમિચ્છન્ પ્રાણનિરોધરૂપહઠયોગમનુતિષ્ઠેત્ । અનેનાપિ હેતુનાન્તઃકરણસ્ય ગમનં પ્રાણાધીનં ભવતિ । પ્રાણે બહિરનિર્ગતેઽન્તઃકરણં જ્ઞાનેન્દ્રિયાણિ ચ ન બહિર્ગચ્છેયુઃ ।

(૩) સ્વપ્નાવસ્થાયાં સ્થૂલશરીરં પ્રાણસહિતમેવ દૃશ્યતે । અતશ્ચ સ્વપ્ને અન્તઃકરણં બહિર્ગત્વા સત્યપદાર્થાન્ વિષયીકરોતીત્યેતન્ન સમ્ભવતિ ।

(૪) અથવા કશ્ચન રાત્રૌ સ્વપ્ને સ્વસમ્બન્ધિભિર્મિલિતો નાનાવ્યવહારાન્ કરોતિ । પ્રાતર્જાગરણાનન્તરં યદા તાન્ સમ્બન્ધિનઃ સાક્ષાત્પશ્યતિ તદા "વયં રાત્રૌ મિલિત્વા અભૂમ । એતાંશ્ચ વ્યવહારાનકુર્મ" ઇતિ વક્તુમર્હતિ । પરન્તુ તથા ન કથયતિ । પૂર્વપક્ષિરીત્યા તુ સ્વપ્નદ્રષ્ટા બહિર્ગતવાન્ । સમ્બન્ધિનં દૃષ્ટવાન્ । તેન સહ સત્યરૂપાન્ વ્યવહારાંશ્ચ કૃતવાન્ । તથા પરસ્પરદર્શનં વ્યવહરણં ચ સમ્બન્ધિનોઽપિ પરિજ્ઞાતં ભવિતુમર્હતિ । તતશ્ચ સમ્બન્ધી વા યદા સ્વપ્નદ્રષ્ટારં પશ્યતિ તદા સોઽપિ તં પ્રતિ "વયં સ્વપ્ને મિલિતા વ્યવહારાનકુર્મ" ઇતિ વક્તુમર્હતિ । પરન્તુ સોઽપિ ન તથા વક્તિ । સિદ્ધાન્તે તુ સ્વપ્ને બહિર્ગમનં સમ્બન્ધિદર્શનં તેન સહ વ્યવહરણં સર્વં ચાન્તરેવ કલ્પિતમ્ ।

(૫) અથવા સ્વપ્ને બહિર્ગત્વા સત્યપદાર્થાન્ પશ્યતીત્યઙ્ગીકારે રાત્રૌ નિદ્રાં કુર્વતઃ મધ્યાહ્નસૂર્યપ્રકાશદર્શનમ્, ગઙ્ગાયા દક્ષિણતટે કાશીપુરીદર્શનમ્, કાશ્યાઃ પ્રાચ્યાં દિશિ પ્રયાગક્ષેત્રસ્ય, પ્રતીચ્યાં દિશિ ગયાક્ષેત્રસ્ય દર્શનં ચ સ્વપ્ને

૧. અત્ર પ્રાણશબ્દેનેન્દ્રિયશબ્દેન ચ તત્તદભિમાનદેવતા ગ્રાહ્યાઃ । ન ભવિતુમુચિતમ્ । રાત્રૌ મધ્યાહ્નસૂર્યપ્રકાશસ્ય, ગઙ્ગાયા દક્ષિણતટે કાશીપુર્યાઃ, કાશ્યાઃ પ્રાચ્યાં દિશિ પ્રયાગક્ષેત્રસ્ય, પ્રતીચ્યાં દિશિ ગયાક્ષેત્રસ્ય ચાભાવાત્ । તસ્માત્ (૧) સ્વપ્ને જાગ્રત્યનુભૂતપદાર્થાનાં સ્મરણં ભવતીતિ (૨) બહિર્ગત્વેશ્વરસૃષ્ટગિરિનદ્યાદિદર્શનં ભવતીતિ ચ દ્વાવપિ પક્ષૌ નિરાકૃતૌ વેદિતવ્યૌ ।

## (A. 322-341) "જાગ્રત્સ્વપ્નયોસ્તુલ્યતા" ઇતિ સિદ્ધાન્તનિરૂપણમ્-

### (૩૨૨)

સ્વપ્ને ત્રિપુટીસમુદાયઃ સર્વોઽપ્યુપજાયતેસ્વપ્ને જાગ્રત્પદાર્થસ્મૃતેર્લિઙ્ગશરીરબહિર્ગમનસ્ય ચાસમ્ભવેઽપિ જાગ્રતીવ સ્વપ્નેઽપિ જ્ઞાતા, જ્ઞાનમ્, જ્ઞેયમિતિ ત્રિપુટી ભાસતે । તસ્માત્કણ્ઠાધઃસ્થનાડ્યન્તરેવ સર્વમુત્પદ્યતે । અયમર્થો માણ્ડૂક્યબૃહદારણ્યકાદિષુ સૂચિતઃ । "સ્વપ્નસ્થાનોઽન્તઃપ્રજ્ઞઃ" (મા. આ. ૪) "સ યત્ર પ્રસ્વપિત્યસ્ય લોકસ્ય સર્વાવતો માત્રામપાદાય સ્વયં વિહત્ય સ્વયં નિર્માય સ્વેન ભાસા સ્વેન જ્યોતિષા પ્રસ્વપિતિ । અત્રાયં પુરુષઃ સ્વયઞ્જોતિર્ભવતિ" (બૃ. ૪.૩.૯) "ન તત્ર રથા ન રથયોગા ન પન્થાનો ભવન્તિ । અથ રથાન્ રથયોગાન્ પથઃ સૃજતે" (બૃ. ૪.૩.૧૦) ઇતિ । અયમર્થઃ - "ન જાગ્રત્કાલીનઃ પદાર્થા સ્વપ્ને ભાન્તિ । કિન્તુ રથરથિકાશ્વમાર્ગાદયઃ સર્વેઽપિ સ્વપ્ને અભિનવાસ્તત્કાલ એવ સૃજ્યન્તે ઇતિ । તસ્માત્સ્વપ્ને ઉપલભ્યમાના ગિરિનદીસમુદ્રવનગ્રામપટ્ટણસૂર્યચન્દ્રાદયઃ સર્વેઽપિ નૂતના ઉત્પદ્યન્તે । યદિ સ્વપ્ને પર્વતાદયો નોત્પદ્યન્તે તર્હિ તેષાં પ્રત્યક્ષજ્ઞાનં સ્વપ્ને નોત્પત્તુમર્હતિ । જાયતે તુ તેષાં સ્વપ્ને પ્રત્યક્ષજ્ઞાનમ્ । વિષયેણ સહેન્દ્રિયાણામન્તઃકરણવૃત્તેશ્ચ સમ્બન્ધઃ પ્રત્યક્ષજ્ઞાને હેતુઃ । તસ્માત્પર્વતાદયો વિષયાઃ તજ્જ્ઞાનસાધનાન્તઃકરણેન્દ્રિયાદિકં સર્વમપ્યન્તરુત્પદ્યન્તે । નનુ સ્વપ્નપદાર્થાઃ શુક્તિરજતાદિવત્સાક્ષિભાસ્યાઃ । અતસ્તજ્જ્ઞાનેઽન્તઃકરણેન્દ્રિયાણામુપયોગો નાસ્તિ । તસ્માત્ સ્વપ્ને જ્ઞેયાનાં પર્વતાદીનામુત્પત્ત્યઙ્ગીકારસ્યોચિતત્વેઽપિ જ્ઞાતૃજ્ઞાનયોરિન્દ્રિયાણાં ચોત્પત્ત્યઙ્ગીકારો નોચિત ઇતિ ચેન્ન ।

(૧) યથા સ્વપ્ને પર્વતાદયઃ પ્રતીયન્તે તથેન્દ્રિયાણિ, અન્તઃકરણમ્, પ્રાણસહિતસ્થૂલશરીરં ચેત્યેતાન્યપિ પ્રતીયન્તે । તસ્માત્તેષાં સર્વેષામુત્પત્તિરઙ્ગીકાર્યૈવ ।

(૨) અથવા સ્વપ્નપદાર્થાનાં નેત્રાદિવિષયતા પ્રતીયતે । વ્યાવહારિકનેત્રાદિવિષયતા સ્વાપ્નપ્રાતિભાસિકપદાર્થાનાં ન ઘટતે । સમસત્તાકપદાર્થયોરેવ પરસ્પરં સાધકબાધકતાસ્તીતિ પઞ્ચમતરઙ્ગે નિરૂપિતત્વાત્ । તથા ચ વ્યાવહારિકનેત્રાદીનાં શરીરે વિદ્યમાનત્વેઽપિ તેષાં વિષમસત્તાકત્વાત્તજ્જન્યજ્ઞાનવિષયત્વં સ્વાપ્નપદાર્થાનાં ન સમ્ભવેત્ ।

(૩) અથવા વ્યાવહારિકેન્દ્રિયાણિ સ્વસ્વગોલકાનિ વિહાય કાર્યકરણે ન સમર્થાનિ । સ્વપ્નાવસ્થાયાં નિદ્રાં કુર્વતો હસ્તપાદવાગાદીનાં ગોલકાનિ નિશ્ચલતયા પાર્શ્વસ્થેનાનુભૂયતે । સ્વપ્નદ્રષ્ટા તુ સ્વપ્ને હસ્તેન દ્રવ્યમાદાયાક્રોશન્ ધાવતિ

। તસ્માત્સ્વપ્ને ઇન્દ્રિયાણામુત્પત્તિરવશ્યમઙ્ગીકાર્યા ।

(૪) તથૈવ સ્વપ્ને સુખદુઃખાદિરૂપં જ્ઞેયં તજ્જ્ઞાનં તજ્જ્ઞાનાશ્રયઃ પ્રમાતા ચેત્યેતે ચ પ્રતીયન્તે । અસતઃ પદાર્થસ્ય પ્રતીતિર્ન ભવેત્ । તસ્માત્ સકલા ત્રિપુટી સ્વપ્ને ઉત્પદ્યતે । અનિર્વચનીયખ્યાતેઃ પ્રકારસ્ત્વેવં - યાવન્તિ ભ્રમજ્ઞાનાનિ ભવન્તિ તેષાં સર્વેષામપિ વિષયા અનિર્વચનીયા ઉત્પદ્યન્તે । વિષયં વિના ન કિઞ્ચિદપિ જ્ઞાનમુત્પદ્યેતેતિ સિદ્ધાન્તઃ । મતાન્તરે તુ વસ્તુનો રૂપાન્તરેણ ભાનમેવ ભ્રમ ઇત્યુચ્યતે । સિદ્ધાન્તે તુ યથા પદાર્થોઽસ્તિ તથૈવ તજ્જ્ઞાનં ભવતીત્યભ્યુપગમ્યતે । તસ્માદ્ભ્રમસ્થલેઽપિ વિષયોઽવશ્યમુત્પદ્યત એવ । વિષયં વિના જ્ઞાનં ન ભવતિ । તથા ચ સ્વપ્ને ત્રિપુટ્યા ભાનાત્ સકલા ત્રિપુટી ઉત્પદ્યત એવ ।

## (A. 323-234) સ્વાપ્નપદાર્થસ્યાધિષ્ઠાનોપાદાનયોઃ પ્રદર્શનપૂર્વકમુત્પત્તિવર્ણનમ્-

### (૩૨૩)

સ્વપ્ને પદાર્થાનામુત્પત્ત્યઙ્ગીકારો ન યુક્ત ઇતિ શઙ્કાસ્વપ્ને પ્રતીયમાનપદાર્થાનામુત્પત્ત્યઙ્ગીકારે યથા સિદ્ધાન્તે સ્વપ્નદૃષ્ટાન્ત- બલાજ્જાગ્રત્પદાર્થા મિથ્યેતિ પ્રસાધ્યતે, તથા જાગ્રત્પદાર્થાનામિવ સ્વાપ્નપદાર્થાનામપ્યુત્પત્તિમત્ત્વાત્તેઽપિ સત્યા ઇત્યઙ્ગીકાર્યં ભવેત્ । સ્વપ્ને પદાર્થાનામુત્પત્ત્યનઙ્ગીકારે નૈષ દોષઃ સ્યાત્ । તથા હિ, જાગ્રતિ પદાર્થા ઉત્પન્ના સન્તઃ પ્રતીયન્તે । સ્વપ્ને તુ પદાર્થા અસન્ત એવ પ્રતીયન્તે । તસ્માત્સ્વપ્નેઽસતાં પદાર્થાનાં જ્ઞાનં ભ્રમરૂપં ભવતિ । અતસ્તેષામુત્પત્ત્યઙ્ગીકારો ન યુક્ત એવ ।

### (૩૨૪)

પૂર્વોક્તશઙ્કાયાઃ સમાધાનમ્-

(૧) યસ્ય વસ્તુન ઉત્પત્તૌ દેશકાલાદિરૂપો યાવાન્ સામગ્રીકલાપ અપેક્ષિતસ્તાવન્તં સામગ્રીકલાપં વિનૈવોત્પદ્યમાનં વસ્તુ મિથ્યેત્યભિધીયતે । સ્વપ્ને ગજાદીનામુત્પત્તાવુચિતદેશકાલાદિરૂપસામગ્રી નાસ્તિ । ચિરેણ કાલેન વિસ્તીર્ણે દેશે ઉત્પત્તું યોગ્યા ગજાદયઃ સ્વપ્ને ક્ષણમાત્રકાલેનાતિસૂક્ષ્મકણ્ઠપ્રદેશે ઉત્પદ્યન્તે । તસ્માત્સ્વાપ્નગજાદયો મિથ્યા । (૨) યદ્યપિ સ્વપ્નાવસ્થાયામધિકદેશકાલૌ પ્રતીયેતે, તથાપિ ગજાદિપદાર્થાન્તરવદધિકદેશકાલાવપિ સ્વપ્નેઽનિર્વચનીયપ્રાતિભાસિકતયૈવોત્પદ્યેતે । તથા હિ, વિષયં વિના પ્રત્યક્ષજ્ઞાનં નોદેતિ । સ્વપ્નેઽધિકદેશકાલયોર્જ્ઞાનમુત્પદ્યતે । વ્યાવહારિકદેશકાલૌ તુ સ્વલ્પૌ ભવતઃ । તસ્માત્પ્રાતિભાસિકાવધિકદેશકાલાવુત્પદ્યેતે । પરન્તુ સ્વપ્નાવસ્થાયામુત્પન્નૌ પ્રાતિભાસિકાધિકદેશકાલૌ સ્વપ્નાવાસ્થાયામુત્પદ્યમાનગજાદીનાં કારણભાવં ન ભજતઃ । કારણં પૂર્વકાલે ભવતિ કાર્યં ચોત્તરકાલે ભવતીતિ હિ નિયમઃ । સ્વપ્ને તુ દેશકાલૌ ગજાદયશ્ચ યુગપદેવોત્પદ્યન્તે । તસ્માત્સ્વપ્ને પ્રાતિભાસિકદેશકાલયોર્ગજાદીનાં ચ પરસ્પરં કાર્યકારણતા ન સમ્ભવતિ । વ્યાવહારિકદેશકાલૌ તુ સ્વલ્પૌ સ્તઃ । ન તૌ ગજાદ્યુત્પાદને યોગ્યૌ । તસ્માદુચિતદેશકાલાદિરૂપસામગ્રીં વિનોત્પદ્યમાનાઃ સ્વાપ્નપદાર્થા મિથ્યા । (૩) અપિ ચ સ્વપ્ને ગજાદીનાં

માતાપિત્રાદિરૂપસામગ્ર્યપિ નાસ્તિ । યદ્યપિ સ્વપ્ને પ્રાણિનઃ તેષાં માતાપિત્રાદયોઽપિ પ્રતીયન્તે । તથાપિ સ્વાપ્નમાતાપિતરૌ ન પુત્રસ્યોત્પત્તિકારણતાં ભજતઃ । યતો માતા પિતા પુત્રશ્ચેતિ ત્રયોઽપિ યુગપત્સહૈવોત્પદ્યન્તે । તસ્માન્ન તેષાં કાર્યકારણભાવઃ । યસ્યા દોષસહિતાવિદ્યાયાઃ સકાશાત્ સ્વાપ્નપદાર્થા જાયન્તે સૈવાવિદ્યા તેષાં પદાર્થાનાં માતૃત્વમ્, પિતૃત્વમ્, પુત્રત્વં ચોત્પાદયતિ । સ્વાપ્નપદાર્થોત્પત્તૌ નાન્યા કાપિ સામગ્ર્યસ્તિ । નિદ્રાદોષસહિતાવિદ્યૈવ સ્વાપ્નપદાર્થોત્પત્તૌ કારણમ્ । દોષસહિતાવિદ્યાયા જાતં શુક્તિરૂપ્યાદિકં મિથ્યા ભવતિ । તસ્માત્સ્વાપ્નપદાર્થા અપિ મિથ્યૈવ ન સત્યાઃ । સ્વાપ્નપદાર્થાનામુપાદાનકારણમન્તઃકરણમ્; અથવા સાક્ષાદવિદ્યૈવ । આદ્યપક્ષે સાક્ષિચૈતન્યં સ્વપ્નાધિષ્ઠાનમ્ । દ્વિતીયપક્ષે બ્રહ્મચૈતન્યં સ્વપ્નાધિષ્ઠાનમ્ । ઇત્થં ચ સ્વપ્નઃ અન્તઃકરણસ્ય અથવા અવિદ્યાયાઃ પરિણામઃ । ચૈતન્યસ્ય વિવર્તશ્ચ ભવતિ ।

૧. અત્રાયં વિશેષઃ - (૧) સ્થૂલસૂક્ષ્મદેહદ્વયાવચ્છિન્નકૂટસ્થચૈતન્યરૂપપારમાર્થિકજીવોઽસ્તિ । (૨) માયાવૃતકૂટસ્થે કલ્પિતાન્તઃકરણે પ્રતિફલિતચિદાભાસરૂપઃ દેહદ્વયાભિમાનવાન્ વ્યાવહારિકજીવોઽસ્તિ । (૩) નિદ્રારૂપમાયયાવૃતે વ્યાવહારિકજીવરૂપાધિષ્ઠાને કલ્પિતઃ પ્રાતિભાસિકજીવોઽસ્તિ । એવં ત્રિવિધજીવવાદિભિર્વિ- ॥

## (A. 325-331) ત્રિવિધસત્તાપક્ષે વિલક્ષણયોર્જાગ્રત્સ્વપ્નયોઃ

## (A. 325-326) સત્તાભેદઃ; વસ્તુતસ્તયોરવૈલક્ષણ્યાત્સત્તૈક્યમેવ તત્ર શઙ્કા-

### (૩૨૫)

બ્રહ્મચૈતન્યસ્ય સ્વપ્નાધિષ્ઠાનત્વે બ્રહ્મજ્ઞાનમન્તરા સ્વપ્નો ન નિવર્તેતેતિ શઙ્કાદ્વિતીયપક્ષે બ્રહ્મચૈતન્યં સ્વપ્નસ્યાધિષ્ઠાનમિતિ અવિદ્યોપાદાનમિતિ ચોક્તમ્ । અધિષ્ઠાનજ્ઞાનમન્તરા કલ્પિતં ન નિવર્તેત । સ્વપ્નાધિષ્ઠાનં ચ બ્રહ્મ । તસ્માદ્બ્રહ્મજ્ઞાનમન્તરાજ્ઞાનિનો જાગ્રદવસ્થાયાં સ્વપ્નો ન નિવર્તેત ।

### (૩૨૬)

જાગ્રત્સ્વપ્નયોર્બ્રહ્માધિષ્ઠાનકત્વે ઉભાવપિ વ્યાવહારિકૌ સ્યાતામ્ । અથવોભાવપિ પ્રાતિભાસિકૌ સ્યાતામિતિ શઙ્કાયથા સ્વપ્નસ્યાધિષ્ઠાનં બ્રહ્મ ઉપાદાનં ચાવિદ્યા । તથૈવ વેદાન્તસિદ્ધાન્તે જાગ્રતિ વ્યાવહારિકપદાર્થાનામપ્યધિષ્ઠાનં બ્રહ્મ । ઉપાદાનં ચાવિદ્યૈવ ભવતિ । તત્ર જાગ્રત્પદાર્થા વ્યાવહારિકા ઇતિ, સ્વાપ્નપદાર્થાઃ પ્રાતિભાસિકા ઇતિ ॥ વિદ્યારણ્યસ્વામિભિઃ "સ્વપ્નાધિષ્ઠાનં વ્યાવહારિકો જીવો જગચ્ચ" ઇતિ કથ્યતે । (૧) સ્વાપ્નજીવસ્ય (દ્રષ્ટુઃ) અધિષ્ઠાનં જાગ્રજ્જીવઃ (દ્રષ્ટા) । (૨) સ્વાપ્નજગતઃ (દૃશ્યસ્ય)

અધિષ્ઠાનં જાગ્રજ્જગત્ (દૃશ્યમ્) ઇતિ વર્ણ્યતે । (૩) સ્વાપ્નાધ્યાસોપાદાનં વ્યાવહારિકજીવજગતોરાવારકં નિદ્રારૂપમવસ્થાજ્ઞાનં (તૂલાજ્ઞાનમ્) ભવતિ । તત્ર વ્યાવહારિકદ્રષ્ટા જડઃ । વ્યાવહારિકદૃશ્યં ચ જડમેવ । તયોઃ સત્તાસ્ફૂર્તિપ્રદત્વરૂપાધિષ્ઠાનત્વં ન સમ્ભવતિ । તસ્માત્

(૧) અહઙ્કારાવચ્છિન્નચૈતન્યં વા (૨) અહઙ્કારાનવચ્છિન્નચૈતન્યં વા સ્વપ્નાધિષ્ઠાનમ્ । ઇદં મતદ્વયમપિ સમીચીનમ્ ।

(૧) તત્ર પ્રથમમતે અહઙ્કારાવચ્છિન્નચૈતન્યાવારકતૂલાજ્ઞાનમેવ સ્વપ્નોપાદાનં ભવતિ । જાગ્રજ્જ્ઞાનેનૈવ વિનાપિ બ્રહ્મજ્ઞાનં તસ્ય નિવૃત્તિરપિ સમ્ભવતિ । (૨) અવિદ્યાપ્રતિબિમ્બરૂપજીવચૈતન્યમ્, બિમ્બરૂપેશ્વરચૈતન્યં વા વિવરણકારરીત્યા વ્યાપકત્વાદહઙ્કારાનવચ્છિન્નચૈતન્યમિત્યુચ્યતે । તસ્ય સ્વપ્નાધિષ્ઠાનત્વે તદાવારકમૂલાજ્ઞાનં સ્વપ્નસ્યોપાદાનમિત્યઙ્ગીકર્તવ્યમ્ । જાગ્રદ્બોધેન તાદૃશસ્વપ્નસ્ય બાધરૂપનિવૃત્તિર્ન સમ્ભવતિ । કિન્તૂપાદાને વિલયરૂપનિવૃત્તિઃ સમ્ભવતિ । પરન્તુ અહઙ્કારાનવચ્છિન્નચૈતન્યસ્ય સ્વપ્નાધિષ્ઠાનત્વાઙ્ગીકારેઽપિ શરીરાન્તઃપ્રદેશસ્થચૈતન્યમેવાધિષ્ઠાનમિતિ ફલતિ । બાહ્યદેશસ્થચૈતન્યં નાધિષ્ઠાનમ્ । અવિદ્યાપ્રતિબિમ્બિતજીવચૈતન્યમ્, બિમ્બરૂપેશ્વરચૈતન્યં ચેત્યુભયમપ્યહઙ્કારાનવચ્છિન્નં ભવતિ । વ્યાપકત્વાચ્છરીરસ્યાન્તર્વિદ્યતે ચ । અન્તર્દેશસ્થચૈતન્યે યા સ્વપ્નાધિષ્ઠાનતા તસ્યા અન્તઃકરણમવચ્છેદકમિત્યભ્યુપગમે અહઙ્કારાવચ્છિન્નસ્યાધિષ્ઠાનતા સિદ્ધ્યતિ । તસ્યૈવ ચૈતન્યસ્ય સ્વપ્નં પ્રત્યધિષ્ઠાનતાયાં અન્તઃકરણસ્યાવચ્છેદકત્વાનઙ્ગીકારે અહઙ્કારાનવચ્છિન્નસ્યાધિષ્ઠાનતા સિદ્ધ્યતિ । અહઙ્કારાનવચ્છિન્નચૈતન્યં તુ અવિદ્યાપ્રતિબિમ્બં ચેતિ દ્વયમપિ ભવતિ । મતભેદેન દ્વયોરપિ સ્વપ્નાધિષ્ઠાનત્વં ભવતિ । તથાપિ અવિદ્યાપ્રતિબિમ્બરૂપજીવચૈતન્યસ્યાધિષ્ઠાનત્વાભ્યુપગમ એવ સાધીયાન્ ॥ ચ કથ્યન્તે । એષ ભેદો ન ભવિતુમર્હતિ । ઉભયોરપ્યધિષ્ઠાનં બ્રહ્મૈવ ભવતિ । ઉપાદાનં ચાવિદ્યૈવ ભવતિ । તસ્માજ્જાગ્રત્સ્વપ્નયોરુભયોરપિ વ્યાવહારિકતા ભવિતુમર્હતિ । અથવોભયોઃ પ્રાતિભાસિકતા ભવિતુમર્હતિ । ઉભયોઃ સત્તાવૈષમ્યે નાસ્ત્યુપપત્તિઃ ।

## (A. 327-328) પૂર્વોક્તશઙ્કયોઃ સમાધાનમ્-

### (૩૨૭)

બ્રહ્મજ્ઞાનં વિનાપિ સ્વપ્નનિવૃત્તિપ્રદર્શનમત્ર પ્રથમશઙ્કાયાઃ સમાધાનમેવં ભવતિ । નિવૃત્તિર્દ્વિવિધેતિ પૂર્વં ચતુર્થતરઙ્ગે ખ્યાતિનિરૂપણપ્રસઙ્ગે ઉક્તમ્ । (૧) કારણસહિતકાર્યવિનાશરૂપાત્ય- ન્તિકનિવૃત્તિઃ સ્વપ્નસ્ય જાગ્રદવસ્થાયાં બ્રહ્મજ્ઞાનમન્તરા ન સમ્ભવતિ । (૨) પરન્તુ દણ્ડપ્રહારેણ યથા ઘટસ્ય મૃત્તિકાયાં લયો ભવતિ । તથા સ્વપ્નહેતુભૂતનિદ્રારૂપદોષનાશાદ્વા સ્વપ્નવિરોધિજાગ્રદવસ્થોત્પત્ત્યા વા અવિદ્યાયાં લયરૂપા નિવૃત્તિઃ સ્વપ્નસ્ય બ્રહ્મજ્ઞાનં વિનાપિ સમ્ભવેત્ ।

(૩૨૮)

દોષાન્તરાસહકૃતાવિદ્યામાત્રજન્યં વ્યાવહારિકમ્ । દોષાન્તરસહકૃતાવિદ્યાજન્યં પ્રાતિભાસિકમિતિ દ્વિતીયશઙ્કાસમાધાનમ્યદુક્તં જાગ્રત્સ્વપ્નૌ સમાનાવિતિ તન્ન । જાગ્રતિ દેહાદિપદાર્થાનામુત્પત્તૌ દોષાન્તરાસહકૃતકેવલાવિદ્યોપાદાનકારણમ્ । સ્વાપ્નપદાર્થાનામુત્પત્તૌ સાદિનિદ્રાદિદોષસહિતાવિદ્યા કારણમિતિ વિશેષોઽસ્તિ । તસ્માદન્યદોષરહિતકેવલાવિદ્યાજન્યં વ્યાવહારિકમ્ । સાદિદોષસહકૃતાવિદ્યાજન્યં પ્રાતિભાસિકમ્ । સ્વપ્નપદાર્થાઃ નિદ્રાદોષસકૃતાવિદ્યાજન્યત્વાત્પ્રાતિભાસિકા ભવન્તિ । જાગ્રત્પદાર્થા દોષાન્તરરહિતકેવલાવિદ્યાજન્યત્વાદ્વ્યાવહારિકા ભવન્તિ । ઇત્થં સ્વાપ્નપદાર્થાનાં જાગ્રત્પદાર્થેભ્યો વૈલક્ષણ્યં દૃશ્યતે । ઇદં તુ સર્વં સત્તાત્રૈવિધ્ય॥અથવા અવિદ્યાપ્રતિબિમ્બસ્ય કલ્પિતત્વાદધિષ્ઠાનત્વં નોચિતમ્ । તસ્માત્ અન્તઃકરણોપહિતમવિદ્યોપહિતં વા સાક્ષિચૈતન્યં સ્વપ્નસ્યાધિષ્ઠાનમિત્યભ્યુપગમો યુક્તઃ । એતત્સર્વમપિ ત્રિવિધસત્તાવાદિમતેનોપપાદિતમ્ । દૃષ્ટિસૃષ્ટિવાદરીત્યા તુ સર્વાનાત્મપદાર્થાનામેકૈવ (પ્રાતિભાસિકી) સત્તા ભવતિ । તસ્માજ્જાગ્રત્સ્વપ્નયોરુભયોરપિ બ્રહ્મચૈતન્યમેવાધિષ્ઠાનમિત્યઙ્ગીક્રિયતે । સા ચ દૃષ્ટિસૃષ્ટિર્દ્વિવિધા - દૃષ્ટિસમસમયા સૃષ્ટિઃ । દૃષ્ટિરેવ વિશ્વસૃષ્ટિરિતિ ચ । આદ્યે જગત્પ્રતીયતે । પરન્તુ તસ્ય પ્રાતિભાસિક્યેવ સત્તા । દ્વિતીયે જગત્ તત્કારણમજ્ઞાનં વા ન કિઞ્ચિદપ્યસ્તિ । આત્માતિરિક્તં સર્વં શશશૃઙ્ગાદિવત્તુચ્છમ્ । બ્રહ્મૈવ સત્યમસ્તિ । તસ્ય ચ પારમાર્થિકી સત્તા ઇત્યેકસત્તાવાદોઽસ્મિન્ કલ્પે । મઙ્ગીકૃત્ય સ્થૂલદૃષ્ટ્યોક્તમ્ । વિચાર્યમાણે તુ સત્તાત્રૈવિધ્યં ન સઙ્ગચ્છતે । જાગ્રત્સ્વપ્નયોરપિ પરસ્પરં વૈલક્ષણ્યમપિ ન સિદ્ધ્યતિ ।

(૩૨૯)

પ્રમાણગ્રન્થેષુ સત્તાત્રૈવિધ્યમુક્તમિત્યાક્ષેપઃવેદાન્તપરિભાષાદિગ્રન્થેષુ પૂર્વોક્તરીત્યા વ્યાવહારિકપ્રાતિભાસિકપદાર્થયોર્ભેદો નિરૂપિતઃ । તસ્માત્તૈઃ સત્તાત્રૈવિધ્યમઙ્ગીકૃતમ્ । તથૈવ વિદ્યારણ્યસ્વામિભિરપિ સત્તાત્રૈવિધ્યમભ્યુપેતમ્ । એવં હિ તૈરુક્તં - દેહાદિપદાર્થા દ્વિપ્રકારાઃ । બાહ્યા આભ્યન્તરાશ્ચેતિ । તત્રેશ્વરસૃષ્ટા બાહ્યાઃ । જીવસઙ્કલ્પકૃતા મનોમયા આન્તરાઃ । તત્ર જીવસઙ્કલ્પરચિતા મનોમયા આન્તરાઃ સાક્ષિભાસ્યાઃ । ઈશ્વરસૃષ્ટા બાહ્યાઃ પ્રમાતૃપ્રમાણગોચરાઃ । આન્તરમનોમયદેહાદય એવ જીવસ્ય સુખદુઃખહેતુભૂતાઃ । બાહ્યાસ્ત્વીશ્વરસૃષ્ટા ન સુખદુઃખહેતવઃ । તસ્માદાન્તરમનોમયપદાર્થનિવૃત્તાવેવ મુમુક્ષુણા યતિતવ્યમ્ । બાહ્યપ્રપઞ્ચો ન સુખદુઃખહેતુઃ । અતસ્તન્નિવૃત્તૌ ન યતિતવ્યમ્ । તથા હિ, કયોશ્ચિત્ દ્વયોઃ પુરુષયોઃ પુત્રૌ ધનાર્જનાર્થં કદાચિદ્દેશાન્તરં જગ્મતુઃ । તયોર્મધ્યે એકસ્ય પુરુષસ્ય પુત્રો દિષ્ટં ગતઃ । અન્યસ્ય પુત્રો જીવન્નાસ્તે । પ્રભૂતં ધનં ચ સ સમ્પાદિતવાન્ । સ ચ સ્વસ્ય પ્રભૂતધનલાભં સ્વપિત્ર નિવેદયિતું દ્વિતીયસ્ય મરણં તત્પિત્રે નિવેદયિતું ચ કઞ્ચન વાર્તાહરં પ્રેષયામાસ । સ તુ વિપ્રલમ્ભકો વાર્તાહારો જીવત્પુત્રકાય પિત્રે તવ પુત્રો મમારેતિ, મૃતપિત્રકાય પિત્રે ચ તવ પુત્રો નીરોગો વિપુલં ધનમર્જિતવાન્ । ગજમારુહ્ય સપરિવારોઽચિરાદેવાગમિષ્યતીતિ ચોવાચ । પ્રતારકસ્ય વાર્તાહરસ્ય કપટવાક્યં શ્રુત્વા જીવત્પુત્રકઃ પિતા પુત્રશોકાદ્ભૃશં રુરોદ । મૃતપુત્રકઃ પિતા ત્વતીવ હર્ષમવાપ । ઇત્થમીશ્વરસૃષ્ટે પુત્રે દેશાન્તરે જીવત્યપિ મનોમયપુત્રસ્ય મૃતત્વાદેકો દુઃખમવાપ । તત્રેશ્વરસૃષ્ટઃ પુત્રો જીવન્નપિ સ્વપિત્રે ન સુખં જનયતિ । તથૈવેતરસ્યેશ્વરસૃષ્ટઃ પુત્રો મૃતોઽપિ સ્વપિત્રે ન દુઃખમુત્પાદયતિ । મનોમયપુત્રસ્ય જીવનાત્સુખમેવ તસ્યાભવત્ । તસ્માત્સર્વત્ર

જીવસૃષ્ટિરેવ સુખદુઃખહેતુર્નેશ્વરસૃષ્ટિઃ સુખદુઃખહેતુઃ । ઇત્થં પઞ્ચદશપ્રકરણે દ્વૈતવિવેકપ્રકરણે વિદ્યારણ્યસ્વામિભિઃ પ્રપઞ્ચિતમ્ । તત્ર જીવસૃષ્ટિઃ પ્રાતિભાસિકી । ઈશ્વરસૃષ્ટિશ્ચ વ્યાવહારિકી । ગ્રન્થાન્તરેષ્વપ્યેવમેવ સત્તાત્રૈવિધ્યપક્ષ એવાશ્રિતઃ । તત્ર પારમાર્થિકસત્તા ચૈતન્યસ્ય । ચૈતન્યભિન્નસ્ય જડસ્ય વ્યાવહારિકસત્તા પ્રાતિભાસિકસત્તા ચેતિ દ્વિધા સત્તા । સૃષ્ટ્યાદિકાલે ઈશ્વરસઙ્કલ્પમાત્રજન્યકેવલાવિદ્યાકાર્યપઞ્ચમહાભૂતતત્કાર્યાણાં વ્યાવહારિકસત્તા । દોષસહકૃતાવિદ્યાકાર્યસ્વાપ્નપદાર્થાનાં શુક્તિરજતાદીનાં ચ પ્રાતિભાસિકસત્તા । ઇત્થં જાગ્રત્પદાર્થાનાં વ્યાવહારિકસત્તા । સ્વાપ્નપદાર્થાનાં પ્રાતિભાસિકસત્તા ચ વર્ણ્યતે કેષુચિદ્ગ્રન્થેષુ ।

(૩૩૦)

અનાત્મપદાર્થાનાં સર્વેષાં પ્રાતિભાસિકસત્તૈવ આત્મપદાર્થસ્ય પારમાર્થિકી સત્તેતિ સત્તા દ્વિવિધૈવ । અતઃસત્તાત્રૈવિધ્યપક્ષો મન્દાધિકારિક ઇતિ અધુનોત્તમાધિકારિકસત્તૈકત્વપ્રતિપાદનાય જાગ્રત્સ્વપ્નયોર્વૈલક્ષણ્યાભાવઃ કથ્યતે । દેશકાલાદિકારણકલાપ- મન્તરેણૈવ સ્વપ્ને ગજાદયોઽર્થા ઉત્પદ્યન્તે । તસ્માત્તે મિથ્યેત્યુચ્યન્તે । તથૈવાકાશાદિપ્રપઞ્ચસૃષ્ટિરપિ બ્રહ્મણઃ સકાશાત્ દેશકાલાદિકારણકલાપં વિનૈવ ભવતિ । અદ્વિતીયત્વેન બ્રહ્મણસ્તત્ર સ્વલ્પોઽપિ દેશકાલાદિર્નાસ્તિ । સ્વપ્ને તુ ગજાદ્યુત્પત્તિયોગ્યપુષ્કલદેશકાલાદ્યભાવેઽપિ સ્વલ્પદેશકાલાદિર્વિદ્યતે । સોઽપ્યાકાશાદિસૃષ્ટૌ નાસ્તિ । યતો દેશકાલાદિશૂન્યપરમાત્મનઃ સકાશાદાકાશાદિસૃષ્ટિઃ શ્રૂયતે । અત એવ તૈત્તિરીયોપનિષદિ ક્રમેણાકાશાદિસૃષ્ટિકથનેઽપિ ન દેશકાલાદિસૃષ્ટિરુક્તા । સૂત્રકારભાષ્યકારાદિભિરપિ દેશકાલાદિસૃષ્ટિવિચારો ન કૃતઃ । તૈત્તિરીયોપનિષદઃ સૂત્રકારભાષ્યકારયોશ્ચાયમભિપ્રાયઃ । યત આકાશાદિપ્રપઞ્ચોત્પત્તિર્દેશકાલાદિસામગ્રીં વિનોત્પદ્યતે તત આકાશાદયોઽપિ સ્વપ્નવત્ મિથ્યેવેતિ । સૃષ્ટિઃ = ઉત્પત્તિઃ = અધ્યારોપઃ । ૧. ઇત આરભ્ય (૩૪૨) આવર્તાવધિ દૃષ્ટિસૃષ્ટિવાદસ્ય પ્રતિપાદનં ક્રિયતે । ૨. અત્રેદં રહસ્યં - કુત્રચિચ્છૂન્યવને દ્વૌ બલિનૌ પુરુષૌ સ્વસ્વબલપરીક્ષણવિષયે વિવાદમકુરુતામ્ । "યોઽન્યં મારયતિ સ બલીયાન્ જ્ઞેયઃ" ઇતિ । એવં પ્રતિજ્ઞાપૂર્વકમુભાવપિ પ્રત્યેકં સ્વસ્વહસ્તે નિશિતકોટિદ્વયોપેતમાયુધં મધ્યે ગૃહીત્વા તસ્યાયુધસ્યૈકાં કોટિં સ્વોરસિ કોટ્યન્તરં ચાન્યસ્યોરસિ પ્રવેશ્યાભિમખં ભૂત્વા યુધ્યન્તૌ દ્વાવપિ મમ્રતુઃ । એવમેવ સર્વપ્રપઞ્ચશૂન્યે બ્રહ્મરૂપે વને જાગ્રત્પ્રપઞ્ચઃ સ્વપ્નપ્રપઞ્ચશ્ચેતિ દ્વૌ બલિનૌ પુરુષૌ પ્રતિભાસેતે । તયોશ્ચ પરસ્પરસ્ય વિષયે પરસ્પરસ્ય દૃષ્ટાન્તેન પરસ્પરસ્ય પરાહતિરેવમેવ જ્ઞેયા । તથા હિ - ઉચિતદેશકાલસામગ્રીમન્તરેણ યજ્જાયતે તન્મિથ્યેતિ પ્રસિદ્ધં લોકે । યથા દેશરૂપસામગ્ર્યાઃ પૂર્ણત્વેઽપિ કાલરૂપસામગ્ર્યા ન્યૂનત્વાત્ ઐન્દ્રજાલિકનિર્મિતહસ્તિહર્મ્યાદિકં મિથ્યા તથૈવ કણ્ઠસ્થહિતાખ્યનાડીરૂપાલ્પપ્રદેશે સ્વલ્પકાલે ચ જાયમાનઃ સ્વપ્નપ્રપઞ્ચો મિથ્યા । તદ્દૃષ્ટાન્તબલાત્ જાગ્રત્પ્રપઞ્ચોઽપિ મિથ્યૈવ । ઇત્થં સ્વપ્નપ્રઞ્ચદૃષ્ટાન્તેન જાગ્રત્પ્રપઞ્ચઃ પરાહતો ભવતિ । એવમેવ દેશકાલાદિસામગ્રીલેશશૂન્યે બ્રહ્મણિ જાગ્રત્પ્રપઞ્ચઃ પ્રતીયતે । તસ્માત્સ અસન્ ભવતિ । પ્રતીયમાનૌ દેશકાલૌ તુ જાગ્રત્પ્રપઞ્ચાન્તર્ગતૌ તદનન્તર્ગતદેશકાલૌ પ્રપઞ્ચકારણ-॥

(૩૩૧)

દેશકાલયોરુત્પત્તિવિષયે આક્ષેપસમાધાને - નનુ મધુસૂદનસરસ્વતીસ્વામિભિર્દેશકાલૌ સાક્ષાદવિદ્યાકાર્યત્વેનોક્તૌ । આદૌ માયાવિશિષ્ટપરમાત્મનઃ સાકાશાત્ માયાપરિણામભૂતદેશકાલૌ જાયેતે । તત આકાશાદય ઉત્પદ્યન્તે । યોગ્યદેશકાલરૂપસામગ્રીસત્ત્વાત્તત્સકાશાદાકાશાદિપ્રપઞ્ચોત્પત્તિઃ સમ્ભવતીતિ ચેત્ । તન્ન । મધુસૂદનસરસ્વતીસ્વામિનાં દેશકાલૌ પ્રથમમુત્પદ્યેતે પશ્ચાદાકાશાદિકમિતિ નાભિપ્રાયઃ । અતીતકાલસ્થિતં વસ્તુ પ્રથમમિતિ પૂર્વમિતિ ચોચ્યતે । ભવિષ્યત્કાલસ્થિતિકં વસ્તુ ઉત્તરમિતિ પશ્ચાદિતિ ચોચ્યતે । આકાશાદ્યુત્પત્તેઃ પ્રથમં દેશકાલાવુત્પન્નાવિત્યભ્યુપગમે આકાશાદ્યુત્પત્તિકાલાત્ યઃ પૂર્વઃ કાલસ્તાદૃશકાલોપહિતઃ પરમાત્મા દેશકાલાદ્યધિષ્ઠાનમિતિ સિદ્ધ્યતિ । તતશ્ચ દેશકાલાદ્યુત્પત્તિં પ્રતિ પૂર્વકાલસ્યાપેક્ષા ભવતિ । કાલસ્યોત્પત્તિમન્તરા ચ પૂર્વકાલો ન પ્રસિદ્ધ્યતિ । તસ્માદાકાશાદેઃ પૂર્વકાલે દેશકાલૌ સ્ત ઇત્યઙ્ગીકારો ન સઙ્ગચ્છતે । ॥મિતિ ચેદત્રાયં પ્રષ્ટવ્યઃ - તૌ દેશકાલૌ કિં બ્રહ્મણોઽભિન્નાવુત ભિન્નાવિતિ । આદ્યપક્ષે બ્રહ્માભિન્નદેશકાલયોરભાવાત્ દેશકાલરૂપસામગ્રીશૂન્યે બ્રહ્મણિ પ્રપઞ્ચસ્ય પ્રતીતિઃ સિદ્ધ્યતિ । દ્વિતીયપક્ષે બ્રહ્મભિન્નદેશકાલૌ કિં સત્યાવુત મિથ્યા । યદિ દેશકાલૌ સત્યૌ તદા અદ્વૈતશ્રુતિવિરોધઃ । યદિ મિથ્યા તદા પ્રપઞ્ચવત્તયોરપિ કાર્યત્વાત્તયોઃ કારણતયાન્યૌ દેશકાલૌ વાચ્યૌ । સ્વસ્યૈવ સ્વકારણત્વે આત્માશ્રયઃ । પ્રથમયોર્દેશકાલયોર્દ્વિતીયૌ દેશકાલૌ કારણમ્, દ્વિતીયયોઃ પ્રથમૌ કારણમિત્યભ્યુપગમેઽન્યોન્યાશ્રયઃ । દ્વિતીયયોસ્તૃતીયૌ દેશકાલૌ કારણમ્, તૃતીયયોઃ પ્રથમૌ દેશકાલૌ કારણમિત્યભ્યુપગમે ચક્રકાપત્તિઃ । તૃતીયયોશ્ચતુર્થૌ દેશકાલૌ કારણમ્, ચતુર્થયોઃ પઞ્ચમૌ કારણમિત્યભ્યુપગમે અનન્તદેશકાલાદિધારારૂપાનવસ્થા । તસ્માન્ન બ્રહ્મણિ દેશકાલૌ સિદ્ધ્યતઃ । ઇત્થં દેશકાલાદિસામગ્રીશૂન્યબ્રહ્મણઃ સકાશાજ્જાગ્રત્પ્રપઞ્ચોત્પત્ત્યા તસ્યાસત્ત્વં તુચ્છત્વં અધ્યવસીયતે । અપિ ચ જાગ્રદ્દશાયાં કદાચિત્સ્વપ્નપદાર્થસ્મૃતિર્ભવતિ । સ્વપ્ને તુ પ્રાયશો જાગ્રત્પદાર્થસ્મરણં ન સમ્ભવતિ । અતશ્ચ જાગ્રત્પ્રપઞ્ચોઽસન્ । તદ્દૃષ્ટાન્તબલાત્સ્વપ્નપ્રપઞ્ચોઽપ્યસન્ । યદા જાગ્રદવસ્થાયા અભાવઃ સિદ્ધો ભવતિ તદા તદન્તર્ગતસમાધ્યવસ્થાયા અપ્યભાવોઽર્થાચ્ચૈતન્યે સિદ્ધ્યતિ । જાગ્રત્સ્વપ્નયોરભાવસિદ્ધ્યા તદવસ્થાદ્વયાન્તર્ગતબુદ્ધેરભાવાત્ તદ્વિલયાત્મકસુષુપ્ત્યવસ્થાયાઃ, સુષુપ્ત્યન્તર્ગતમરણમૂર્ચ્છાવસ્થયોશ્ચાભાવોઽપિ સિદ્ધ્યતિ । ઇત્થં બ્રહ્મણિ સર્વપ્રપઞ્ચસ્યાસિદ્ધ્યા અજાતવાદઃ સિદ્ધ્યતિ । “ન તસ્ય કાર્યં કરણં ચ વિદ્યતે” (શ્વે. ૬.૮) “અપૂર્વમનપરમ્” (બૃ. ૨.૫.૧૩) ॥ કિન્તુ મધુસૂદનસ્વામિનામયમાશયઃ - યથા ભૂતભૌતિકપ્રપઞ્ચઃ પ્રતીયતે તથા દેશકાલાવપિ પ્રતીયેતે । આત્મભિન્નં કિઞ્ચિદપિ ન નિત્યમ્ । તસ્માદ્દેશકાલાવપિ ન નિત્યૌ । અસન્ પદાર્થો ન પ્રતીયતે । તસ્માદાકાશાદિવદ્દેશકાલાવપ્યુત્પદ્યેતે । તૌ ચ દેશકાલૌ માયાપરિણામૌ ચૈતન્યવિવર્તૌ ચ । યો વિવર્તઃ સ ન કસ્યચિદપિ કારણમ્ । તસ્માદાકાશાદિપ્રપઞ્ચોત્પત્તૌ દેશકાલયોઃ કારણતા ન સઙ્ગચ્છતે । અપિ ચ કારણં પૂર્વભાવિ । કાર્યં પશ્ચાદ્ભાવીતિ સ્થિતે, આકાશાદ્યુત્પત્તેઃ પૂર્વં દેશકાલોત્પત્તિર્ન સમ્ભવતીતિ પ્રતિપાદિતત્વાત્ સર્વથા દેશકાલાવાકાશાદિપ્રપઞ્ચકારણં ન ભવત ઇતિ સિદ્ધમ્ । કિન્તુ સ્વપ્ને યથા યુગપદેવ પિતાપુત્રયોરુત્પત્તિર્યુગપદુત્પદ્યમાનયોસ્તયોઃ કાર્યકારણત્વપ્રતીતિશ્ચ ભવતિ । તથા જાગ્રત્યપિ માયાવિશિષ્ટપરમાત્મનઃ સકાશાત્ દેશકાલાદિસહિતાકાશાદિપ્રપઞ્ચોત્પત્તિઃ । તત્ર ચ દેશકાલાદેઃ કારણત્વપ્રતીતિઃ, પ્રપઞ્ચસ્ય કાર્યત્વપ્રતીતિશ્ચ ભવતિ । યસ્યા માયાયાઃ સકાશાત્ દેશકાલસહિતપ્રપઞ્ચોત્પત્તિર્ભવતિ તયૈવ માયયા

દેશકાલયોઃ કારણત્વં પ્રપઞ્ચસ્ય કાર્યત્વં ચ પ્રતીયતે । કિઞ્ચ કિઞ્ચિદ્વસ્તુ ક્વચિદ્દેશવિશેષે ક્વચિત્કાલવિશેષે ચ જાયતે । દેશાન્તરે કાલાન્તરે વા ન જાયતે । તથા પ્રલયકાલે સકલઃ પ્રપઞ્ચો નોત્પદ્યતે । સૃષ્ટિકાલે ઉત્પદ્યતે ચ । તસ્માદપિ દેશકાલયોઃ કારણત્વં પ્રતીયતે । વસ્તુતસ્તુ ન દેશકાલાદિકમાકાશાદિપ્રપઞ્ચસ્ય કારણમ્ ।
કાર્યકારણતા હ્યત્ર ન કિઞ્ચિદુપપદ્યતે ।
યાદૃગેવ પરં બ્રહ્મ તાદૃગેવ જગત્ત્રયમ્ ॥ યો. વા. ॥

તુચ્છાનિર્વચનીયા ચ વાસ્તવી ચેત્યસૌ ત્રિધા ।
માયા જ્ઞેયા ત્રિભિર્બોધૈઃ શ્રૌતયૌક્તિકલૌકિકૈઃ ॥ પ. ૬.૧૩૦॥

ઇત્યાદિશ્રુતિસ્મૃતિભ્યઃ ।

૧. દેશકાલયોરુત્પત્તૌ પૂર્વકાલસ્ય કારણત્વે તસ્ય પૂર્વકાલસ્યોત્પત્તિં પ્રતિ કસ્યચિત્કાલસ્ય કારણત્વં વાચ્યમ્ । તન્ન સમ્ભવતિ । પૂર્વકાલસ્યૈવ સ્વોત્પત્તિકારણત્વે આત્માશ્રયો દોષઃ । અસ્ય પૂર્વકાલસ્યાન્યઃ પૂર્વકાલઃ કારણમન્યસ્ય ચાયમેવ કારણમિત્યાશ્રયણે અન્યોન્યાશ્રયઃ । દ્વિતીયસ્ય પૂર્વકાલસ્ય તૃતીયઃ પૂર્વકાલઃ કારણં તૃતીયપૂર્વકાલસ્ય ચ પ્રથમઃ પૂર્વકાલઃ કારણમિત્યભ્યુપગમે ચક્રકદોષઃ । તૃતીયસ્ય પૂર્વકાલસ્ય ચતુર્થઃ પૂર્વકાલઃ કારણં ચતુર્થસ્ય પઞ્ચમઃ કારણમિત્યઙ્ગીકારેઽનવસ્થાદોષઃ । ઇત્થં દોષસમૂહસદ્ભાવાત્ દેશકાલયોરુત્પત્તૌ પૂર્વકાલસ્ય કારણત્વાઙ્ગીકારો ન યુજ્યતે ।

## (A. 332-334) બ્રહ્મનિષ્ઠકારણતાયા દેશકાલોયરઙ્ગીકારે

અન્યથાખ્યાત્યાપત્તિઃ સ્યાદિત્યાક્ષેપઃ-

### (૩૩૨)

દેશકાલયોરાકાશાદિકારણતાસ્તીતિ પૂર્વપક્ષિણઃ શઙ્કાઅત્રૈવં શઙ્કા ભવતિ - અસન્ પદાર્થો ન પ્રતીયેત । સિદ્ધાન્તે ચ ન તથાઙ્ગીક્રિયતે વેદાન્તિભિઃ । યદ્યસન્ પદાર્થો ભાસેત તર્હ્યસત્ખ્યાત્યભ્યુપગમપ્રસઙ્ગઃ સ્યાત્ । અપિ ચ શશશૃઙ્ગવન્ધ્યાસુતાદેરપિ ભાનં સ્યાત્ । ન તુ તથા ભાસતે । તસ્માદસતઃ પ્રતીતિર્નાસ્ત્યેવ । કિઞ્ચ દેશકાલયોઃ કારણત્વં સ્વતો યદિ ન સ્યાત્ તર્હિ માયાબલાદપિ તન્ન ભાતુમર્હતિ । પરન્તુ દેશકાલયોઃ કારણત્વં પ્રતીયતે । અતો દેશકાલૌ સકલપ્રપઞ્ચકારણમિત્યઙ્ગીકાર્યમેવ । સિદ્ધાન્તિના યદપ્યુચ્યતે - બ્રહ્મ સકલપ્રપઞ્ચકારણમ્, તન્નિષ્ઠં કારણત્વમેવ દેશકાલયોઃ પ્રતીયતે । ન તુ દેશકાલયોઃ કારણત્વં સ્વતો વિદ્યતે ઇતિ । તદપિ ન સઙ્ગતમ્ । તથા હિ, (૧) બ્રહ્મ યથા દેશકાલયોરધિષ્ઠાનં તથા

સકલપ્રપઞ્ચસ્યાપ્યધિષ્ઠાનં ભવતિ । તતશ્ચ દેશકાલયોરેવ બ્રહ્મનિષ્ઠકારણતા પ્રતીયતે ન ત્વન્યત્રેત્યત્ર વિનિગમકં નાસ્તિ । તસ્માદધિષ્ઠાનબ્રહ્મનિષ્ઠકારણતા યદિ દેશકાલયોઃ પ્રતીયતે તર્હિ સર્વપ્રપઞ્ચાધિષ્ઠાનત્વાદ્બ્રહ્મણઃ નિખિલપ્રપઞ્ચેઽપિ કારણતા પ્રતીયેતૈવ । બ્રહ્મકાર્યભૂતે પ્રપઞ્ચે ક્વચિત્ (દેશકાલયોઃ) કારણતા ક્વચિચ્ચ (આકાશાદૌ) કાર્યતેતિ વૈષમ્યં ન યુજ્યતે । (૨) કિઞ્ચ દેશકાલયોઃ કારણત્વં નાસ્તિ, કિન્તુ બ્રહ્મણ્યેવ કારણત્વમસ્તિ । તચ્ચ બ્રહ્મનિષ્ઠં કારણત્વં દેશકાલયોઃ પ્રતીયત ઇત્યુચ્યમાને અન્યથાખ્યાતિરઙ્ગીકૃતા ભવતિ । યતો વસ્તુનો રૂપાન્તરેણ ભાનમન્યથાખ્યાતિરિતીર્યતે । અકારણભૂતૌ દેશકાલૌ રૂપાન્તરેણ કારણાત્મના ભાતઃ ઇત્યન્યથાખ્યાતિરેવાભ્યુપગતા ભવતિ । સિદ્ધાન્તે ત્વન્યથાખ્યાતિર્નાઙ્ગીકૃતા । અત્ર વિષયેઽન્યથાખ્યાતેરઙ્ગીકારે શુક્તાવનિર્વચનીયરજતમુત્પદ્યતે ઇતિ સિદ્ધાન્તો નિષ્ફલો ભવેત્ । તથા હિ, અન્યથાખ્યાતિર્દ્વિવિધા । (૧) દેશાન્તરસ્થપદાર્થસ્ય દેશાન્તરે ભાનમિત્યેકાન્યથાખ્યાતિઃ । યથા કાન્તાકરગતરજતં પુરોવર્તિશુક્તૌ ભાસતે । (૨) અથવા વસ્તુનો રૂપાન્તરેણ ભાનમપ્યન્યથાખ્યાતિઃ । યથા શુક્તિકાયા રજતરૂપેણ ભાનમ્ । ઇત્થં સર્વભ્રમસ્થલેઽપિ અન્યથાખ્યાત્યૈવ નિર્વાહસમ્ભવેઽનિર્વચનીયરજતોત્પત્તિકથનમસઙ્ગતં સ્યાત્ । કિઞ્ચ વિષયસમાનાકારમેવ જ્ઞાનં ભવતિ । અન્યવસ્તુનોઽન્યરૂપેણ જ્ઞાનં ન સમ્ભવેત્ । અતશ્ચ રજતાકારજ્ઞાનવિષયીભૂતમનિર્વચનીયં રજતમુત્પદ્યતે એવ ઇત્યદ્વૈતસિદ્ધાન્તે અકારણીભૂતદેશકાલયોર્બ્રહ્મનિષ્ઠકારણત્વસ્ય પ્રતીતિર્ન સમ્ભવેત્ । યતો દેશકાલયોઃ પ્રતીયમાનં યત્કારણત્વં તત્તત્રાવિદ્યમાનં સન્ન ભાયાત્ । ન વા બ્રહ્માશ્રિતં સદત્ર ભાયાત્, તતશ્ચ દેશકાલયોરેવ કારણત્વમસ્તિ । વિદ્યમાનમેવ કારણત્વં દેશકાલયોર્ભાતીતિ વક્તવ્યમ્ । તતશ્ચાકાશાદિપ્રપઞ્ચસ્ય દેશકાલૌ ન કારણમિતિ સિદ્ધાન્ત્યુક્તિરસઙ્ગતૈવ ।

## (૩૩૩)

અધિષ્ઠાનબ્રહ્મનિષ્ઠકારણતા દેશકાલોરન્યથાખ્યાત્યા પ્રતીયત ઇતિ સિદ્ધાન્તિનઃ સમાધાનમ્શઙ્કેયં ન સઙ્ગચ્છતે । તથા હિ, બ્રહ્મનિષ્ઠકારણતૈવ દેશકાલાદૌ પ્રતીયતે । યથા જપાકુસુમસમ્બદ્ધસ્ફટિકે ઉપાધિકુસુમનિષ્ઠરક્તિમા પ્રતીયતે, યથા ચ સ્વપ્ને અધિષ્ઠાનનિષ્ઠસત્યતા સ્વપ્નોપલભ્યમાનમિથ્યાપર્વતહસ્ત્યાદિષૂપલભ્યતે, તદ્વત્ । અત્ર સ્ફટિકે અનિર્વચનીયલૌહિત્યોત્પત્તિર્નાઙ્ગીક્રિયતે । કિન્તુ સન્નિહિતજપાકુસુમસ્થલૌહિત્યમેવ સ્ફટિકે પ્રતીયતે । તતશ્ચ શુક્લસ્ફટિકસ્ય રક્તવર્ણત્વેન ભાસમાનત્વાત્ સ્ફટિકે રક્તવર્ણજ્ઞાનમન્યથાખ્યાતિરેવ । તથૈવ સ્વાપ્નમિથ્યાપદાર્થેષુ સત્યતાપ્રતીતિરપ્યન્યથાખ્યાતિરેવ । તત્રાનિર્વચનીયસત્યતોત્પત્ત્યઙ્ગીકારસ્તુ "સત્યમિદં વસ્તુ મિથ્યા" ઇતિ વ્યાહતવચનવદસઙ્ગતઃ । ન ચાસત્પ્રતીયેત । અતશ્ચ સ્વપ્નાધિષ્ઠાનચૈતન્યગતસત્યતૈવ મિથ્યાપદાર્થે પ્રતીયતે ઇતિ મિથ્યાપદાર્થનિષ્ઠસત્યતાવિષયકજ્ઞાનમપ્યન્યથાખ્યાતિરિત્યેવાઙ્ગીક્રિયતે । એવમેવાધિષ્ઠાનબ્રહ્મનિષ્ઠકારણતા દેશકાલયોરન્યથાખ્યાતિરીત્યૈવ પ્રતિભાતિ ।

## (૩૩૪)

અન્તઃકરણસ્ય યત્ર દ્વાભ્યાં પદાર્થાભ્યાં સમ્બન્ધસ્તત્રાન્યથાખ્યાતિઃ । યત્રૈકેન પદાર્થેન સમ્બન્ધસ્તત્રાનિર્વચનીયખ્યાતિઃન ચૈવં સર્વભ્રમેષ્વપ્યન્યથાખ્યાત્યભ્યુપગમપ્રસઙ્ગ ઇતિ વાચ્યમ્ । શુક્તિકાદિષુ રજતાદિભાનસ્થલે

અન્યથાખ્યાત્યભ્યુપગમે “વિષયવિલક્ષણં જ્ઞાનં નોદેતિ” ઇતિ ન્યાયવિરોધસ્ય પ્રસઙ્ગાત્ । યત્ર સ્ફટિકે લૌહિત્યજ્ઞાનં જાયતે તત્ર લોહિતકુસુમસ્ય સ્ફટિકેન સહ સમ્બન્ધોઽસ્તિ । તસ્માત્ સ્ફટિકસમ્બદ્ધકુસુમગતલૌહિત્યં સ્ફટિકે પ્રતીયતે । અન્તઃકરણવૃત્તેર્લોહિતકુસુમાકારતાદશાયાં તસ્યાઃ વૃત્તેર્વિષયો લોહિતકુસુમસમ્બદ્ધસ્ફટિકોઽપિ । તસ્માત્ કુસુમગતલૌહિત્યં સ્ફટિકે પ્રતીયતે । એવં શુક્તી રજતરૂપેણ ન જ્ઞાયેત યતોઽન્યમતરીત્યા શુક્તિદેશે અનિર્વચનીયં વા વ્યાવહારિકં વા રજતં નાસ્તિ । કિન્તુ શુક્તિરેવાસ્તિ । અન્તઃકરણસ્ય શુક્તિસમ્બન્ધે સતિ શુક્તિસમાનાકારૈવ વૃત્તિર્જાયેત ન રજતાકારાન્તઃકરણવૃત્તિર્ભવેત્ । તસ્માદસ્મન્મતે શુક્તિરજતાદિભ્રમસ્થલે અવિદ્યાપરિણામરૂપં ચૈતન્યવિવર્તરૂપં ચાનિર્વચનીયં રજતં તજ્જ્ઞાનં ચેત્યુભયમપ્યુત્પદ્યતે ઇત્યઙ્ગીક્રિયતે । સ્ફટિકલૌહિત્યભ્રમસ્થલે તુ સ્ફટિકેન લોહિતકુસુમેન ચાન્તઃકરણવૃત્તેઃ સમ્બન્ધોઽસ્તિ । લોહિતપુષ્પસમ્બન્ધાલ્લૌહિત્યાકારા વૃત્તિર્જાયતે । તસ્યા વૃત્તેઃ સ્ફટિકેનાપિ સમ્બન્ધોઽસ્તિ । સ્ફટિકે ચ લૌહિત્યપ્રતિફલનમસ્તિ । તસ્માત્ પુષ્પધર્મભૂતલૌહિત્યં સ્ફટિકે તસ્યા વૃત્તેર્વિષયીભવતિ । તથા ચ યત્ર દ્વયોઃ પદાર્થયોઃ સંસર્ગોઽસ્તિ તત્રાન્યધર્મસ્યાન્યત્ર પ્રતિભાનં અન્યથાખ્યાતિરેવ ભવતિ । યત્ર દ્વયોઃ પદાર્થયોઃ સમ્બન્ધો નાસ્તિ ન તત્રાન્યથાખ્યાતિઃ । કિન્ત્વનિર્વચનીયખ્યાતિરેવ । યથા લોહિતપુષ્પસમ્બદ્ધે સ્ફટિકે પુષ્પગતલૌહિત્યં પ્રતિભાતિ । તથા સ્વપ્ને અધિષ્ઠાનચૈતન્યેન સમ્બદ્ધેષુ હસ્ત્યાદિષુ અધિષ્ઠાનચૈતન્યધર્મસત્યતા પ્રતિભાતિ । સ્ફટિકે લૌહિત્યભાનમિવ સ્વાપ્નપદાર્થે સત્યતાભાનમપ્યન્યથાખ્યાતિરેવ । એવમેવાધિષ્ઠાનચૈતન્યગતં કારણત્વમધિષ્ઠાનચૈતન્યસમ્બદ્ધદેશકાલયોઃ પ્રતીયતેઽન્યથાખ્યાતિવિધયૈવ ।

(૩૩૫)

જાગ્રત્પ્રપઞ્ચઃ સામગ્રીં વિનોત્પદ્યતે । તસ્માત્ સ્વપ્નપ્રપઞ્ચવજ્જાગ્રત્પ્રપઞ્ચોઽપિ મિથ્યૈવાન્યનિષ્ઠધર્મસ્યાન્યત્ર પ્રતીતાવન્યથાખ્યાત્યભ્યુપગમેનાધિષ્ઠાનચૈતન્યગતા સત્યતા યથા ચૈતન્યેન સમ્બદ્ધે સકલપ્રપઞ્ચેઽપ્યભ્યુપગમ્યતે । તથૈવાધિષ્ઠાનચૈતન્યસ્થકારણતાપ્યધિષ્ઠાનસમ્બદ્ધસકલપ્રપઞ્ચેઽઙ્ગીકાર્યા ભવેદિતિ યદાશઙ્કિતં તન્ન સઙ્ગચ્છતે । તથા હિ, (૧) સ્વપ્ને પિતૃશરીરં પુત્રશરીરં ચેતિ દ્વે શરીરે ઉત્પદ્યેતે । સ્વપ્નોપલભ્યમાનપિતૃપુત્રશરીરયોરુભયોરપ્યધિષ્ઠાનચૈતન્યસ સમત્વેઽપિ પિતૃશરીરે અધિષ્ઠાનચૈતન્યધર્મભૂતા કારણતા પ્રતીયતે । પુત્રશરીરે તુ તાદૃશપિતૃજન્યત્વરૂપકાર્યતૈવ પ્રતીયતે, ન તુ કારણતા । એવમધિષ્ઠાનચૈતન્યસમ્બન્ધસ્ય સર્વપ્રપઞ્ચસાધારણત્વેઽપિ દેશકાલયોરેવ ચૈતન્યનિષ્ઠકારણતા પ્રતીયતે । અન્યત્ર તુ કાર્યતૈવ નિસર્ગતઃ પ્રતીયતે । (૨) અથવા અસઙ્ગોદાસીનસ્વભાવત્વાદધિષ્ઠાનચૈતન્યં ન કસ્યાપિ પરમાર્થતઃ કારણં ભવતિ । માયાપ્રિબિમ્બિતચિદાભાસસ્ય કારણત્વેઽપિ આભાસસ્ય સ્વરૂપં મિથ્યા । યચ્ચ સ્વયં મિથ્યા ન તદન્યસ્ય કારણં ભવેત્ । તસ્માદ્યદિ પરમાત્મનિ પ્રપઞ્ચં પ્રતિ કારણતા સમ્ભવેત્ તત્ ભ્રમવશાદ્દેશકાલયોઃ પ્રતીયેત । પરમાત્મનિ તુ કારણતા નાસ્તિ । તસ્માત્કારણત્વાદિધર્મશૂન્યસ્યાસઙ્ગસ્ય ચૈતન્યસ્ય કારણત્વં દેશકાલયોઃ પ્રતીયતે ઇત્યુક્તિર્ન સઙ્ગચ્છતે । “અપૂર્વમનપરમ્” (બૃ. ૨.૫.૧૯) “અન્યદેવ તદ્વિદિતાદથોઽવિદિતાદધિ” (કે. ૧.૩) “ન તસ્ય કાર્યં કરણં ચ વિદ્યતે” (શ્વે. ૬.૮) “કાર્યકારણતા હ્યત્ર ન કિઞ્ચિદુપપદ્યતે । યાદૃગેવ પરં બ્રહ્મ તાદૃગેવ જગત્ત્રયમ્” ઇત્યાદિશ્રુતિસ્મૃતિશતેભ્યઃ । કિન્તુ માયાકૃતાનિર્વચનીયદેશકાલાવનિર્વચનીયકારણત્વવન્તૌ ભવતઃ । પરમાર્થતસ્તુ દેશકાલયોર્નાસ્તિ કારણતા ।

સ્વપ્ને કશ્ચનાપુત્રો વન્ધ્યઃ પુરુષઃ સ્વકીયં પુત્રં પૌત્રં ચ પશ્યતિ । તત્ર પુત્રપૌત્રયોઃ શરીરમનિર્વચનીયતયોત્પદ્યતે । પુત્રશરીરે પૌત્રશરીરં પ્રત્યનિર્વચનીયકારણતા ચોત્પદ્યતે । ન તુ સ્વપ્ને પરમાર્થતઃ પુત્રપૌત્રયોઃ શરીરં વા, પુત્રપૌત્રશરીરયોઃ પરસ્પરં કારણકાર્યતા વાસ્તિ । તથૈવ દેશકાલાવનિર્વચનીયાવેવ પ્રતિભાતઃ । પરમાર્થતસ્તુ દેશકાલયોરાકાશાદિપ્રપઞ્ચસ્ય ચ કારણકાર્યતા નાસ્ત્યેવ । ઇત્થમુઇચતદેશકાલરૂપસામગ્રીમન્તરેણૈવ જાગ્રત્પ્રપઞ્ચ ઉત્પદ્યતે । અતો જાગ્રદપિ સ્વપ્નવન્મિથ્યૈવ । યથા સ્વપ્નોપલભ્યમાનસ્ત્રીપુત્રાદીનાં સ્વપ્ને એવ સુખદુઃખહેતુતા ભવતિ । ન તુ જાગ્રદાદૌ; તદા તેષામભાવાત્ । તથૈવ જાગ્રત્પદાર્થાનામપિ તાત્કાલિકસુખદુઃખાદિહેતુત્વમેવ, ન તુ સ્વપ્નાદૌ સુખદુઃખાદિહેતુત્વમ્, તદા તેષાં પદાર્થાનામેવાભાવાત્ । તસ્માજ્જાગ્રત્સ્વપ્નૌ સમાવેવ ।

"ત્રય આવસથાસ્ત્રયઃ સ્વપ્ના અયમાવસથોઽયમાવસથોઽયમાવસથઃ ।" (ઐ. ૧.૩.૧૨)

"સ્વસ્વપ્રમાપરોક્ષ્યેણ દૃષ્ટ્વા પશ્યન્ સ્વજાગરમ્ ।
ચિન્તયેદપ્રમત્તઃ સન્નુભાવનુદિનં મુહુઃ ॥ પ. ૭.૧૭૩॥

ચિરં તયોઃ સર્વસામ્યમનુસન્ધાય જાગરે ।
સત્યત્વબુદ્ધિં સન્ત્યજ્ય નાનુરજ્યતિ પૂર્વવત્ ॥ ૧૭૩॥

ઇત્યાદિશ્રુતિસ્મૃતિશતેભ્યઃ ।

## (A. 336-337) જાગ્રતિ પદાર્થા જ્ઞાનસમકાલમેવોત્પદ્યન્તે

અજ્ઞાતસત્તાભાવાદ્દ્વિતીયજાગરણપર્યન્તં નાનુવર્તન્તે । જાગ્રત્સ્વપ્નપદાર્થા અસ્થિરાઃ ।

### (૩૩૬)

મુખ્યસિદ્ધાન્તાજ્ઞાનામેવ જાગ્રત્પદાર્થાનાં સ્થિરત્વબુદ્ધિઃનનુ જાગરાત્ સ્વપ્નમનુભૂય પુનર્જાગરણે સતિ પ્રથમજાગરે યેઽર્થા અનુભૂતાસ્ત એવ સ્વપ્નવ્યવહિતદ્વિતીયજાગરેઽપ્યનુભૂયન્તે । ન તુ તથા પ્રથમસ્વપ્નદૃષ્ટપદાર્થા દ્વિતીયસ્વપ્ને દૃશ્યન્તે । તસ્માત્સ્વપ્નપદાર્થાપેક્ષયા જાગ્રત્પદાર્થા વિલક્ષણા એવેતિ ચેત્ તન્ન । મુખ્યસિદ્ધાન્તાજ્ઞાનમૂલકત્વાદસ્યાઃ શઙ્કાયાઃ । તથા હિ, અદ્વૈતશાસ્ત્રસ્ય મુખ્યસિદ્ધાન્તાજ્ઞાનામેવં દૃષ્ટિર્ભવતિ - સંસારપ્રવાહોઽયમનાદિઃ । તત્ર જીવસ્ય જાગ્રત્સ્વપ્નસુષુપ્ત્યવસ્થા ભવન્તિ । જાગ્રત્કાલે સ્વપ્નસુષુપ્તી નશ્યતઃ । સ્વપ્નકાલે જાગ્રત્સુષુપ્તી નશ્યતઃ । તથૈવ સુષુપ્તૌ જાગ્રત્સ્વપ્ને નશ્યતઃ । પરન્તુ યદા સ્વપ્નસુષુપ્તી ભવતઃ તદા જાગ્રત્યનુભૂતદારાપત્યધનપશુગૃહક્ષેત્રારામાદયોઽવિનશ્યન્તોઽનુવર્તન્ત એવ । તેષાં જ્ઞાનમેવ વિનશ્યતિ । પુનર્જાગરણં યદા ભવતિ તદા પ્રથમજાગ્રતિ સ્થિતપદાર્થાનામેવ જ્ઞાનં ભવતીતિ । ઇયં ચ મુખ્યસિદ્ધાન્તાજ્ઞાનાં દૃષ્ટિઃ ।

(૩૩૭)

જાગ્રત્પદાર્થાઃ સર્વેઽપિ તદ્વિષયકજ્ઞાનેન સહોત્પદ્યન્તે । જ્ઞાનેન સહૈવ વિનશ્યન્તિ ચસિદ્ધાન્તસ્ત્વેવં - સર્વે પદાર્થાશ્ચૈતન્યવિવર્તા અજ્ઞાનસ્ય પરિણામાશ્ચ । તસ્માત્ શુક્તિરજતવત્ યદા યઃ પદાર્થઃ પ્રતીયતે તદા અધિષ્ઠાનચૈતન્યાશ્રિતાવિદ્યાયા દ્વિવિધઃ પરિણામો જાયતે । અવિદ્યાયાસ્તમોગુણાંશસ્ય ઘટાદિવિષયરૂપઃ પરિણામો ભવતિ । અવિદ્યાયાઃ સત્ત્વગુણાંશસ્ય જ્ઞાનરૂપપરિણામો ભવતિ । યદ્યપિ ચૈતન્યસ્યૈવ જ્ઞાનમિતિ વ્યપદેશાત્સત્ત્વગુણપરિણામસ્ય જ્ઞાનત્વોક્તિર્ન સઙ્ગચ્છતે । તથાપિ સર્વં વ્યાપકચૈતન્યં ન જ્ઞાનમ્, કિન્તુ સાભાસવૃત્ત્યારૂઢચૈતન્યમેવ જ્ઞાનમિત્યુચ્યતે । તસ્માચ્ચૈતન્યે જ્ઞાનવ્યવહારસ્ય સમ્પાદિકા વૃત્તિરેવેતિ ચેતન્યસ્ય જ્ઞાનત્વાપાદકોપાધિભૂતવૃત્તાવપિ જ્ઞાનશબ્દઃ પ્રયુજ્યતે । “ઘટજ્ઞાનં જાતં પટજ્ઞાનં નષ્ટમ્” ઇતિ લોકે વ્યવહારો દૃશ્યતે । તત્ર વૃત્ત્યારૂઢચૈતન્યસ્ય સ્વત ઉત્પત્તિનાશાસમ્ભવેઽપિ ઉપાધિભૂતવૃત્તેસ્તત્સમ્ભવાત્ જ્ઞાને ઉત્પત્તિનાશવ્યવહારો ભવતિ । ઇત્થં વૃત્તૌ જ્ઞાનશબ્દપ્રયોગસમ્ભવાત્ તાદૃશવૃત્તિરૂપં જ્ઞાનં સત્ત્વગુણપરિણામો ભવતિ । તસ્યાં વૃત્તૌ ચૈતન્યાભાસો જાયતે । ઘટાદિવિષયરૂપપરિણામે તુ ચૈતન્યસ્યાભાસો ન જાયતે । ઉભયોરપિ ઘટાદિવિષયતજ્જ્ઞાનયોરવિદ્યાપરિણામત્વેઽપિ ઘટાદિવિષયા અવિદ્યાયાસ્તમોગુણપરિણામત્વાન્મલિના ભવન્તિ । અતસ્તત્ર ચિદાભાસોદયો ન ભવતિ । વૃત્તિસ્તુ સત્ત્વગુણપરિણામત્વાત્ સ્વચ્છા ભવતિ । અતસ્તત્ર ચિદાભાસોદયઃ સમ્ભવતિ । ઇત્થં વૃત્તૌ ચૈતન્યપ્રતિબિમ્બગ્રહણયોગ્યતાસત્ત્વાત્ તદવચ્છિન્નં ચૈતન્યં જ્ઞાનં ઇતિ, તદુપહિતં ચૈતન્યં સાક્ષીતિ ચોચ્યતે । ઘટાદિવિષયાણાં તુ ચૈતન્યાભાસગ્રહણયોગ્યતાયા અભાવાત્ વિષયાવચ્છિન્નચૈતન્યં ન જ્ઞાનં ન વા સાક્ષી । ઇત્થં જાગ્રત્પદાર્થાસ્તજ્જ્ઞાનાનિ ચ સહૈવોત્પદ્યન્તે સહૈવ નશ્યન્તિ । અતસ્તેઽપિ પ્રાતિભાસિકા એવ સ્વાપ્નપદાર્થવત્ ઇતિ વેદાન્તરહસ્યમ્ । તસ્માત્ પ્રથમજાગ્રતિ દૃષ્ટા એવ પદાર્થાઃ સ્વપ્નસુષુપ્ત્યનન્તરં પુનરપિ દ્વિતીયજાગ્રત્યનુભૂયન્તે ઇત્યુક્તિરસઙ્ગતૈવ ।

## (A. 338-340) જાગ્રત્પદાર્થાનાં મિથઃ કાર્યકારણતાનાસ્તીતિ પ્રતિપાદનમ્-

(૩૩૮)

સ્વપ્નપદાર્થઃ સાક્ષાદવિદ્યાકાર્યં, જાગ્રત્પદાર્થાસ્તદીયાસાધારણકારણજન્ય ઇતિ જાગ્રત્સ્વપ્નયોર્ન સામ્યમિતિ શઙ્કા - નનુ સ્વપ્નાત્ પ્રબુદ્ધઃ “પૂર્વં યે પદાર્થા મયા દૃષ્ટાસ્તાનેવાદ્ય પશ્યામિ” ઇતિ પ્રત્યભિજાનાતિ । તસ્માજ્જાગ્રત્પદાર્થા જ્ઞાનસમકાલોત્પત્તિનાશશાલિનો ન ભવન્તિ । કિન્તુ જ્ઞાનાત્પ્રાગૂર્ધ્વં ચ વિદ્યન્તે । અતોઽજ્ઞાતસત્તાકા જાગ્રત્પદાર્થા ઇત્યેવ યુક્તમિતિ ચેત્, ન । સ્વપ્ને તત્ક્ષણોત્પન્નેષુ પદાર્થેષુ ઇમે ગિરિનદીસમુદ્રાદયો મમ જન્મનઃ પ્રાગેવોત્પન્ના વર્ષસહસ્રકાલાદારભ્ય વર્તન્ત ઇતિ પ્રતીતિર્ભવતિ કેષાઞ્ચિત્ । તત્ર તત્ક્ષણોત્પન્ને સ્વાપ્નપદાર્થે યા ચિરન્તનત્વપ્રતીતિઃ સા ભ્રાન્તિરેવ । તસ્માદ્યયાવિદ્યયા સ્વપ્ને મિથ્યાભૂતા ગિરિનદીસમુદ્રાદયઃ પદાર્થા ઉત્પાદિતાસ્તયૈવાવિદ્યયા તત્તત્પદાર્થાનાં ચિરન્તનત્વં તાદૃશચિરન્તનત્વવિષયકજ્ઞાનં ચાનિર્વચનીયતયોત્પદ્યતે । એવમેવ જાગ્રત્પદાર્થેષુ વસ્તુતશ્ચિરન્તનત્વાભાવેઽપિ અવિદ્યાવશાદેવ તત્તત્પદાર્થૈઃ સહૈવ મિથ્યાભૂતં સ્થિરત્વમપ્યનિર્વચનીયતયોત્પદ્યતે । અતશ્ચ જાગ્રત્પદાર્થાનામપિ સ્થિરત્વપ્રતીતિર્ભ્રાન્તિરેવ । આક્ષેપઃ -

નન્વેવં સતિ સ્વાપ્નપદાર્થાઃ સાક્ષાદવિદ્યાપરિણામાઃ । જાગ્રત્પદાર્થાસ્તુ ન સાક્ષાદવિદ્યાપરિણામાઃ । કિન્તુ યથા ઘટાદયો દણ્ડચક્રકુલાલાદિભિર્જાયન્તે તથૈવ સર્વેઽપિ જાગ્રત્પદાર્થાસ્તત્તદસાધારણકારણવશાજ્જાયન્તે । યદિ જાગ્રત્પદાર્થાઃ સાક્ષાદવિદ્યાપરિણામાઃ સ્યુઃ, તદા આકાશાદિક્રમેણ પઞ્ચભૂતોત્પત્તિઃ પઞ્ચીકરણં પઞ્ચીકૃતભૂતેભ્યો બ્રહ્માણ્ડોત્પત્તિ૧. સુપ્તપ્રબુદ્ધસ્ય પુરુષસ્ય ઘટાદિજાગ્રત્પદાર્થાન્ દૃષ્ટ્વા પૂર્વં જાગરકાલે યેઽવસ્થિતાસ્ત એવૈતે ઘટાદય ઇતિ જાયમાનઃ પ્રત્યભિજ્ઞાપ્રત્યયઃ સોઽયં નદીપ્રવાહઃ, સેયં દીપજ્વાલા ઇત્યાદિપ્રત્યભિજ્ઞાપ્રત્યયવદ્ભ્રમ એવ । તસ્માન્મુખ્યદૃષ્ટાન્તઃ સ્વપ્ન એવ । સ ચાર્થો ગ્રન્થકારેણૈવોપરિ વક્ષ્યતે । રિત્યાદિકં શ્રુત્યોચ્યમાનમસઙ્ગતં ભવેત્ । તસ્માદીશ્વરસૃષ્ટા જાગ્રત્પદાર્થાઃ સ્વસ્વોપાદાનકરણપરિણામા એવ । ન તુ સાક્ષાદવિદ્યાપરિણામાઃ । સ્વાપ્નપદાર્થાસ્તુ સર્વેઽપિ સાક્ષાદવિદ્યાપરિણામાઃ । યસ્માત્ સર્વેષાં સ્વાપ્નપદાર્થાનામેકૈવાવિદ્યોપાદાનં ભવતિ તસ્માત્ સ્વાપ્નપદાર્થાનાં તજ્જ્ઞાનાનાં ચ યુગપદે- વૈકસ્યા અવિદ્યાયાઃ સકાશાદુત્પત્તિઃ સમ્ભવેત્ । જાગ્રત્પદાર્થાસ્તુ સ્વોત્પત્તેઃ પ્રાગ્વિદ્યમાનેભ્યો ભિન્નભિન્નેભસ્તેભ્યસ્તેભ્યઃ સ્વસ્વોપાદાનકારણવિશેષેભ્ય ઉત્પદ્ય સ્વસ્વોપાદાનકારણેષુ વિલીયન્તે । ઘટાદિજાગ્રત્પદાર્થોત્પત્તેઃ પૂર્વં નાશાદૂર્ધ્વં ચ મૃત્પિણ્ડાદિરૂપોપાદાનકારણાનિ વર્તન્તે । એવં જાગ્રત્પદાર્થાઃ કેચન સ્વલ્પકાલાવસ્થાયિનઃ કેચન સ્થિરકાલાવસ્થાયિનો યથોચિતં પરસ્પરં કાર્યકારણભાવમાપન્નાશ્ચ વર્તન્તે । ન તથા સ્વાપ્નપદાર્થા ઇતિ જાગ્રત્સ્વપ્નયોઃ સામ્યં ન યુજ્યતે ઇતિ ચેત્ ।

## (૩૩૯)

જાગ્રત્સ્વપ્નયોઃ સામ્યસમર્થનમ્નૈષ દોષઃ । જાગ્રત્પદાર્થેષ્વિવ સ્વાપ્નપદાર્થેષ્વપિ કાર્યકારણતાપ્રતીતિરસ્તિ । "મદીયા ગૌર્વત્સમજનયત્ । મમ જાયા પુત્રમસૂત" ઇતિ સ્વપ્નો નૈસર્ગિકઃ । તત્ર યુગપદેવોત્પદ્યમાનેષુ સ્વાપ્નપદાર્થેષુ ગોજાયાદીનાં બહુકાલસ્થાયિતા કારણતા ચ પ્રતીયેતે । વત્સપુત્રાદીનાં તુ પશ્ચાદ્ભાવિતા કાર્યતા ચ પ્રતિભાસેતે । દૃષ્ટિસમયે સમકાલે એવોત્પન્નાનાં તેષાં મધ્યે નૈવાસ્તિ વસ્તુતઃ પૂર્વપશ્ચાત્કાલતા પરસ્પરં કાર્યકારણતા વા । ગોર્વત્સસ્ય ચ તથૈવ જાયાયાઃ પુત્રસ્ય ચાવિદ્યૈવ સાક્ષાદુપાદાનમ્ । એવમેવ જાગ્રદ્દશાયામપિ કેચન પદાર્થા અધિકકાલસ્થાયિનો જ્યાયાંસઃ કારણરૂપા ઇતિ, કેચન પદાર્થા અલ્પકાલસ્થાયિતનો યવીયાંસઃ કાર્યરૂપા ઇતિ ચ સ્વપ્ને ઇવ પ્રતિભાન્તિ । પરમાર્થતસ્તુ ન કોઽપિ પદાર્થઃ કસ્યચિદપિ પદાર્થસ્ય કારણભાવં વા કાર્યભાવં વા ભજતે । કિન્ત્વવિદ્યયૈવ તે તે પદાર્થાસ્તથા તથા પ્રતિભાન્તિ । તસ્માત્સ્વપ્ન ઇવ જાગ્રદપિ સાક્ષાદવિદ્યાકાર્યમેવ ।

## (૩૪૦)

સૃષ્ટિશ્રુતીનાં લયચિન્તનદ્વારાદ્વૈતે તાત્પર્યમ્સૃષ્ટિક્રમપ્રતિપાદકશ્રુતીનાં ન સૃષ્ટૌ તાત્પર્યમ્, કિન્તુ બ્રહ્મણોઽદ્વિતીયત્વબોધને એવ । સર્વે પદાર્થાઃ પરમાત્મન એવ જાયન્તે ઇતિ તદ્વિવર્તભૂતા એવ । યદ્યદ્વિવર્તભૂતં તત્તત્સ્વરૂપમેવ ભવતિ, ન તતોઽતિરિચ્યતે । અતો નામરૂપાત્મકઃ સકલઃ પ્રપઞ્ચો બ્રહ્માવ્યતિરિક્તતયા બ્રહ્મૈવેતીમમર્થં બોધયિતુમેવ સૃષ્ટિશ્રુતિઃ પ્રવૃત્તા નાન્યત્પ્રયોજનમસ્તિ સૃષ્ટિશ્રુતેઃ । તત્ર સૃષ્ટૌ યઃ ક્રમ ઉક્તસ્તસ્યાપિ સ્થૂલદૃશાં પુંસામુત્પત્તિક્રમવિપરીતક્રમેણ પરમકારણે બ્રહ્મણિ સર્વકાર્યલયચિન્તનદ્વારાદ્વિતીયબ્રહ્મભાવબોધનાયૈવેત્યદ્વૈતબોધનમેવ પ્રયોજનમ્ । ન ત્વાકાશાદીનામુત્પત્તૌ ક્રમબોધને વા, તેષાં પરસ્પરકાર્યકારણતાબોધને વા સૃષ્ટિશ્રુતેઃ

પ્રામાણ્યમ્ । સૃષ્ટૌ નાસ્તિ ક્રમઃ કિન્તુ સર્વે પદાર્થા એકસ્યા એવાવિદ્યાયાઃ સકાશાદુત્પન્નાઃ । તત્ર પરસ્પરં કાર્યકારણભાવો વા પૂર્વપશ્ચાત્કાલીનત્વં વા અવિદ્યાકૃતે સ્વપ્ને ઇવ મિથ્યૈવ પ્રતિભાસતે । શ્રુત્યોક્તમાકાશાદીનાં પૂર્વપશ્ચાદ્ભાવિત્વકાર્યકારણત્વાદિકં તુ કારણવ્યતિરેકેણ કાર્યં નાસ્તીતિ મન્દાનાં લયચિન્તનાર્થં કૃતમ્ । યથા વસ્તુસ્વરૂપમસ્તિ તથૈવ ધ્યાનં કર્તવ્યમિતિ નિયમો નાસ્તિ । તસ્માજ્જાગ્રત્પદાર્થાનામપિ પરસ્પરં કાર્યકારણભાવો નાસ્ત્યેવ ।

## (૩૪૧)

દૃષ્ટિસૃષ્ટિવાદ એવાઙ્ગીકાર્યઃપરમાર્થતસ્તુ જાગરિતપદાર્થાનામપિ કાર્યકારણત્વાદિકં કિઞ્ચિદપિ ન સમ્ભવતિ । સર્વેઽપિ પદાર્થાઃ સાક્ષાદવિદ્યાકાર્યભૂતાઃ શુક્તિરજતાદિવત્ સ્વાપ્નવચ્ચ । સાક્ષાદવિદ્યાકાર્યત્વેન પ્રાતિભાસિકત્વાદવિદ્યાવૃત્ત્યુપહિતસાક્ષિણૈવ સર્વેઽપિ પદાર્થાઃ પ્રકાશ્યન્તે । અવિદ્યાયા જ્ઞેયાકારો જ્ઞાનાકારશ્ચ પરિણામો યુગપદેવોત્પદ્ય યુગપદેવ નશ્યતિ સ્વપ્નવદેવ । “દર્શનં સૃષ્ટિરદર્શનં લયઃ” ઇતિ ન્યાયાદ્યદા પદાર્થઃ પ્રતીયતે તદૈવ પ્રતીતિવિષયઃ પદાર્થો જાયતે । ન તુ કાલાન્તરે પદાર્થોત્પત્તિરસ્તિ । અયમેવ દૃષ્ટિસૃષ્ટિવાદ ઇત્યુચ્યતે ।

૧. દૃષ્ટિઃ = અવિદ્યાવૃત્તિરૂપં જ્ઞાનમ્, તદુત્પત્તિસમયે એવ સૃષ્ટિઃ = દૃશ્યપ્રપઞ્ચોત્પત્તિઃ । અસ્યાર્થસ્ય પ્રતિપાદનં દૃષ્ટિસૃષ્ટિવાદ ઇતિ અજાતવાદ ઇતિ ચ કથ્યતે । અયં ચ વાદો બૃહદારણ્યકોપનિષદ્ભાષ્યે, વાર્તિકે, માણ્ડૂક્યોપનિષત્કારિકાયામ્, તદ્ભાષ્યે, તત્રૈવાનન્દગિરિવ્યાખ્યાને, વાસિષ્ઠે, સૂતસંહિતાયામ્, વેદાન્તમુક્તાવલ્યામ્, આત્મપુરાણે, અદ્વૈતસિદ્ધૌ, અન્યેષુ ચ વેદાન્તગ્રન્થેષુ પ્રતિપાદ્યતેઽત્યાદરેણ । વિશેષજિજ્ઞાસવસ્તાન્ગ્રન્થાનવલોકયેયુઃ । “અર્કે ચેન્મધુ વિન્દેત કિમર્થં પર્વતં વ્રજેત્” ઇતિ ન્યાયેનૈતદ્ગ્રન્થેનૈવ જિજ્ઞાસૂનાં દૃષ્ટિસૃષ્ટિસિદ્ધાન્તજ્ઞાનં સમ્યક્ જાયતે । ગ્રન્થાન્તરાવલોકનં તુ તેષાં બુદ્ધિવિનોદનાય ભવતિ । ઇતોઽપ્યન્યો દૃષ્ટિસૃષ્ટિવાદોઽસ્તિ । તત્ર-

સત્તા સર્વપદાર્થાનાં નાન્યા સંવેદનાદૃતે ।
જ્ઞાનસ્વરૂપમેવાહુર્જગદેતદ્વિચક્ષણાઃ ॥

અર્થસ્વરૂપં ભ્રામ્યન્તઃ પશ્યન્ત્યન્યે કુદૃષ્ટયઃ । ઇતિ । સત્તાન્તરનિન્દાપૂર્વકં સત્તૈકત્વપ્રતિપાદનેન જગતસ્તુચ્છત્વમુચ્યતે । અયમેવ સર્વોત્તમઃ પક્ષો દુર્લભાધિકારિકઃ । અસ્મિન્ પક્ષે પદાર્થાનામજ્ઞાતસત્તા નાસ્તિ । કિન્તુ જ્ઞાતસત્તૈવાસ્તિ । અદ્વૈતવાદેઽયમેવ સિદ્ધાન્તપક્ષઃ । અસ્મિન્ પક્ષે સત્તાદ્વૈવિધ્યમેવ ન સત્તાત્રૈવિધ્યમ્ । સર્વેષામેવ દૃશ્યાનામનાત્મપદાર્થાનાં સ્વાપ્નપદાર્થાનામિવ પ્રાતિભાસિકસત્તૈવ । પ્રતિભાસકાલાદન્યકાલેઽનાત્મપદાર્થાનાં સત્તા નાસ્તિ । તસ્માન્નાસત્યેવ તૃતીયા વ્યાવહારિકી સત્તા ।

કિઞ્ચાસ્મિન્ પક્ષે નિખિલાનાત્મપદાર્થાઃ સાક્ષિભાસ્યાઃ । પ્રમાતૃપ્રમાણયોર્વિષયભૂતં ન કિઞ્ચિદપ્યસ્તિ વસ્તુ । યતોઽન્તઃકરણમિન્દ્રિયાણિ ઘટાદિવિષયા ઇતિ ત્રિપુટીજ્ઞાનં ચેતિ સર્વમપિ સ્વપ્ન ઇવ યુગપદેવ જાયતે । અતસ્તેષાં મધ્યે ન વિષયવિષયિત્વં સમ્ભવતિ । ઘટાદિવિષયાઃ, નેત્રાદીન્દ્રિયાણિ, અન્તઃકરણં ચેત્યેતાનિ યદિ જ્ઞાનાત્પૂર્વં સ્યુસ્તદા નેત્રાદિદ્વારાન્તઃકરણસ્ય વૃત્તિરૂપં જ્ઞાનં પ્રમાણજન્યં ભવેત્ । તચ્ચાન્તઃકરણમ્, ઇન્દ્રિયાણિ, વિષયાશ્ચેતિ ત્રિતયં જ્ઞાનપૂર્વકાલે નાસ્તિ । જ્ઞાનકાલે એવ સ્વપ્ને ઇવ ત્રિપુટી ઉત્પદ્યતે । તસ્માત્ ત્રિપુટીજન્યં જ્ઞાનં કિઞ્ચિદપિ નાસ્તિ । તથાપિ જ્ઞાને સ્વપ્નવત્ ત્રિપુટીજન્યતા પ્રતીયતે । તસ્માજ્જાગ્રત્પદાર્થાઃ સાક્ષિભાસ્યાઃ; ન પ્રમાણજન્યજ્ઞાનવિષયાઃ । અતોઽપિ જાગ્રત્પદાર્થાઃ સ્વપ્નસમાઃ મિથ્યા ભવન્તિ । કિઞ્ચ જાગ્રતિ કેચન પદાર્થા મિથ્યારૂપેણ કેચન સત્યરૂપેણ ચ પ્રતીયન્તે । તત્રાપિ અનાદિકાલમારભ્ય કેચન પદાર્થા વિદ્યન્તે । કેચન વિનશ્યન્તિ । તત્સદૃશાશ્ચાન્યે ઉત્પદ્યન્તે । ઇત્થં પ્રપઞ્ચધારા ઉચ્છેદો ન કદાપિ ભવતીતિ સમુત્પન્નજ્ઞાનસ્ય પ્રપઞ્ચો ન પ્રતીયતે । ઇતરેષાં તુ ભાસતે ઇતિ । તાદૃશસ્ય જ્ઞાનસ્ય ગુરુર્વેદાન્તાશ્ચ સાધનાનિ । તૈઃ સાધનૈઃ પરમાર્થસત્યસ્ય લાભઃ સિદ્ધ્યતીતિ ચેત્યેવંરૂપા પ્રતીતિર્જાગ્રતિ ભવતિ । એવં કેષાઞ્ચિત્પદાર્થાનાં મિથ્યાત્વમ્, કિષાઞ્ચિન્નાશઃ, કેષાઞ્ચિદુત્પત્તિઃ, ગુરુવેદાન્તાદિસાધનૈઃ પરમપુરુષાર્થલાભ ઇતિ ચ । એતત્સર્વમવિદ્યાકૃતસ્વપ્નવન્મિથ્યૈવ ।

ન નિરોધો ન ચોત્પત્તિર્ન બદ્ધો ન ચ સાધકઃ ।
ન મુમુક્ષુર્ન વૈ મુક્ત ઇત્યેષા પરમાર્થતા ॥ પ. ચિ. ૨૩૫, કૂ. ૭૧॥

યત્ર હિ દ્વૈતમિવ ભવતિ તદિતર ઇતરં પશ્યતિ, યત્ર ત્વસ્ય સર્વમાત્મૈવાભૂત્ તત્કેન કં પશ્યેત્ ॥ બૃ. ૨.૪.૧૪॥

ન બન્ધોઽસ્તિ ન મોક્ષોઽસ્તિ કદાચિત્ કસ્યચિત્ ક્વચિત્ ।
સર્વમાત્મમયં શાન્તમિત્યેવં પ્રત્યયં સ્ફુટમ્ ॥

સબાહ્યાભ્યન્તરં રામ સર્વત્ર દૃઢતાં નય ।
અવિદ્યમાનોઽપ્યવભાસતે દ્વયો
ધ્યાતુર્ધિયા સ્વપ્નમનોરથૌ યથા ।
તત્કર્મ સઙ્કલ્પવિકલ્પકં મનો
બુધો નિરુન્ધ્યાદભયં તતઃ સ્યાત્ ॥ ભા. પુ. ૧૧.૨.૩૮॥

ઇત્યાદ્યનેકશ્રુતિસ્મૃતીતિહાસપુરાણાનુભવાદિભ્યઃ । વાસિષ્ઠરામાયણે ચેત્થમનેકેતિહાસા ઉપલભ્યન્તે । કિઞ્ચ ક્ષણકાલમાત્રવ્યાપિનિ સ્વપ્ને અનન્તકલ્પકાલો ભાતિ । જાગ્રતીવ સ્થિરતયા પદાર્થાઃ પ્રતિભાન્તિ । તૈઃ પદાર્થૈશ્ચિરકાલં ભોગો ભુજ્યતે । તથા ચોક્તં પઞ્ચદશ્યાં બ્રહ્માનન્દેઽદ્વૈતાનન્દપ્રકરણે-

નિદ્રાશક્તિર્યથા જીવે દુર્ઘટસ્વપ્નકારિણી ।
બ્રહ્મણ્યેષા સ્થિતા માયા સૃષ્ટિસ્થિત્યન્તકારિણી ॥ ૮૬॥

સ્વપ્ને વિયદ્ગતિં પશ્યેત્ સ્વમૂર્ધચ્છેદનં તથા ।
મુહૂર્તે વત્સરૌઘં ચ મૃતપુત્રાદિકં પુનઃ ॥ ૮૭॥

ઇદં યુક્તમિદં નેતિ વ્યવસ્થા તત્ર દુર્લભા ।

યથા યથેક્ષ્યતે યદ્યત્ તત્તદ્યુક્તં તથા તથા ॥ ૮૮॥

ઈદૃશો મહિમા દૃષ્ટો નિદ્રાશક્તેર્યદા તદા ।
માયાશક્તેરચિન્ત્યોઽયં મહિમેતિ કિમદ્ભુતમ્ ॥ ૮૯॥

તસ્માજ્જાગ્રત્પદાર્થાનાં સ્વાપ્નપદાર્થાપેક્ષયા વૈલક્ષણ્યં કિઞ્ચિદપિ નાસ્તિ । કિન્ત્વાત્મનો ભિન્નં સર્વં મિથ્યૈવ । "અતોઽન્યદાર્તમ્", "ન તુ તદ્વિતીયમસ્તિ તતોઽન્યદ્વિભક્તમ્" (બૃ. ૪.૩.૨૩-૩૧) ઇત્યાદિશ્રુતિભ્યશ્ચ ।

૧. કલ્પકાલનિર્ણયઃ - ૧૫ નિમેષાઃ (અક્ષિપક્ષ્મપરિસ્પન્દાઃ) એકા કાષ્ઠા ।
૩૦ કાષ્ઠા એકા કલા ।
૩૦ કલા એકો મુહૂર્તઃ (ઘટિકાદ્વયમ્) ।
૩૦ મુહૂર્તા એકં દિનં (અહોરાત્રમ્) ।
૧૫ દિનાનિ એકઃ પક્ષઃ ।
૨ પક્ષૌ એકો માસઃ ।
૨ માસૌ એકો ઋતુઃ ।
૩ ઋતવ એકમયનમ્ ।
૨ અયને એકો વત્સરઃ ।

## (A. 342-460) ગુરુવેદાન્તાદીનાં મિથ્યાત્વે દૃષ્ટાન્તપ્રદર્શનમ્-

### (૩૪૨)

સંસારસ્ય સ્વપ્નવત્સ્વલ્પકાલસ્થાયિત્વે બન્ધાનાદિત્વમ્, તન્નિવૃત્તિરૂપમોક્ષોદ્દેશ્યકશ્રવણાઇદસાધનાનુષ્ઠાનં ચ ન ઘટેતેતિ તર્કદૃષ્ટેસ્તૃતીયઃ પ્રશ્નઃ - તર્કદૃષ્ટિઃ પૃચ્છતિ - ઈશ્વરસૃષ્ટિરનન્તકલ્પકાલાદનાદિતયા પ્રવર્તતે । તત્ર જ્ઞાની મુચ્યતે, અજ્ઞાની સંસરતિ । યદિ જાગ્રદપિ સ્વપ્નસમઃ સ્યાત્ તદા યથા સ્વપ્નઃ ક્ષણમ્, મુહૂર્તમ્, પ્રહરકાલં વા ભવતિ, તથા સંસારોઽપિ ક્ષણમ્, મુહૂર્તમ્, પ્રહરકાલમ્, તતઃ કિઞ્ચિદધિકકાલં વા ભવિતુમર્હતિ ।

(૧) સંસારસ્ય સ્વપ્નવત્સ્વલ્પકાલસ્થાયિત્વે બન્ધોઽનાદિકાલાત્પ્રવર્તતે ઇતિ ન યુજ્યેત । (૨) બન્ધનિવૃત્તિરૂપમોક્ષપ્રાપ્તયે શ્રવણાદિસાધનાનુષ્ઠાનં ચ નિષ્ફલં ભવેદિતિ ।

૧,૭૨૮,૦૦૦ વત્સરા એકં કૃતયુગમ્ ।
૧,૨૯૬,૦૦૦ વત્સરા એકં ત્રેતાયુગમ્ ।
૮૬૪,૦૦૦ વત્સરા એકં દ્વાપરયુગમ્ ।
૪૩૨,૦૦૦ વત્સરા એકં કલિયુગમ્ ।
૪,૩૨૦,૦૦૦ વત્સરા અથવા ચતુર્યુગસમાહાર એકં મહાયુગમ્ ।
૩૦૬,૭૨૦,૦૦૦ વત્સરા અથવા ૭૧ મહાયુગાનિ એકં મન્વન્તરમ્ ।

૪,૨૯૪,૦૮૦,૦૦૦ વત્સરા અથવા ૯૯૪ મહાયુગાનિ ચતુર્દશ મન્વન્તરાણિ ।

૨૫,૯૨૦,૦૦૦ વત્સરા અથવા ૬ મહાયુગાનિ દ્વૌ યુગસન્ધી ।

૪,૩૨૦,૦૦૦,૦૦૦ વત્સરા અથવા ૧૦૦૦ મહાયુગાનિ કલ્પઃ - અથવા બ્રહ્મણ બ્રહ્મણ એકમહઃ (દિવા) ।

૮,૬૪૦,૦૦૦,૦૦૦ વત્સરા અથવા ૨૦૦૦ મહાયુગાનિ બ્રહ્મણ એકં દિનં (અહોરાત્રમ્) ।

૩,૧૧૦,૪૪૦,૦૦૦,૦૦૦ વત્સરા બ્રહ્મણ એકોऽબ્દઃ (વત્સરઃ) ।

૩૧૧,૯૪૦,૦૦૦,૦૦૦,૦૦૦ વત્સરા બ્રહ્મણ આયુઃ - અથવા મહાકલ્પઃ, દ્વિપરાર્ધાવસાનમ્ ।

૧. અયં ચ દૃષ્ટિસૃષ્ટિવાદસ્ય નિશ્ચયઃ ।

ગુરુરુત્તરમાહ - યદ્યપિ પૂર્વોક્તસિદ્ધાન્તે (૧) બન્ધમોક્ષૌ ગુરુવેદાન્તાદયશ્ચ નાઙ્ગીક્રિયન્તે । (૨) કિન્તુ ચૈતન્યમેકં નિત્યમુક્તમસ્તિ (૩) અવિદ્યાપરિણામશ્ચૈતન્યે નાનાવિવર્તરૂપા ભવન્તિ । તૈર્વિવર્તૈરાત્મસ્વરૂપસ્ય ન કાચિદપિ હાનિઃ । (૪) આત્મા સદાસઙ્ગ એકરસશ્ચાસ્તે । (૫) અદ્યાવધિ ન કોऽપિ મુક્તઃ । અગ્રે ચ ન કોऽપિ મુક્તો ભવિષ્યતિ । જીવન્મુક્તિશાસ્ત્રં તુ પ્રરોચકોऽર્થવાદઃ । કિન્તુ ચૈતન્યં નિત્યમુક્તમસ્તિ । (૬) અવિદ્યાયાસ્તત્પરિણામાનાં ચ ચૈતન્યેન સહ કદાચિદપિ સમ્બન્ધો નાસ્તિ । તસ્માદ્બન્ધઃ, વેદઃ, ગુરુઃ, શ્રવણાદીનિ, સમાધિઃ, મોક્ષશ્ચેત્યેતેષાં પ્રતીતિઃ સ્વપ્ન ઇવાવિદ્યાજન્યૈવ । તસ્માન્મિથ્યૈવ સર્વે પદાર્થાઃ । (૭) એતેષાં બહુકાલસ્થાયિત્વમપ્યવિદ્યાજન્યમેવ । તથાપિ સિદ્ધાન્તમિમમજાનતઃ સ્થૂલદૃષ્ટેરયં પ્રશ્ન ઇતિ ।

## (A. 343-460) અગૃધદેવસ્ય (ઇચ્છારહિતાત્મદેવસ્ય)

સ્વપ્નવ્યાખ્યાનવ્યાજેન તત્ત્વદૃષ્ટિં પ્રતિ ગુરોરુત્તરમ્-

### (૩૪૩)

શિષ્યસ્ય ગુરુતદુપદેશાદિપ્રતીતિર્મિથ્યેતિ સદૃષ્ટાન્તં ગુરોર્વચનમ્૧. અત્રાયમભિપ્રાયઃ - અસ્મિન્ દૃષ્ટિસૃષ્ટિવાદે "બ્રહ્મ વા ઇદમગ્ર આસીત્ તદાત્માનમેવાવેત્ । અહં બ્રહ્માસ્મીતિ" (બૃ. ૧.૪.૧૦) ઇત્યાદિશ્રુત્યા, "બ્રહ્મૈવ સ્વાવિદ્યયા સંસરતિ સ્વવિદ્યયા મુચ્યતે ચ" ઇતિ બૃહદારણ્યકભાષ્યાત્, વ્યાધસૂનોઃ સ્મૃતિપ્રાપ્તૌ વ્યાધભાવો નિવર્તતે । યથૈવમાત્મનોऽજ્ઞસ્ય તત્ત્વમસ્યાદિવાક્યતઃ ॥ ઇત્યાદિવાર્તિકાચ્ચ સ્વાવિદ્યયા જીવભાવમાપન્નસ્ય બ્રહ્મણ એકત્વાદેક એવ જીવોऽઙ્ગીક્રિયતે । અન્યજીવરૂપગુરુશિષ્યયોરઙ્ગીકારો નાસ્ત્યેવ । કિન્તુ સ્વપ્નગતૈકમુખ્યજીવાદ્ભિન્ના અન્યે જીવાભાસા યથા પ્રતીયન્તે, તથૈવાભાસરૂપા ગુરુશિષ્યાદયઃ પ્રતિભાન્તિ । તસ્મિન્ ગુરાવીશ્વરબુદ્ધ્યા ભક્ત્યાદિપ્રદર્શનમપિ સ્વાપ્નગુર્વાદૌ ભક્ત્યાદિપ્રદર્શનવન્મિથ્યૈવ । કિઞ્ચાસ્મિન્ પક્ષે જીવેશ્વરાદયઃ ષટ્ પદાર્થાઃ સ્વરૂપતોऽનાદય અઙ્ગીકૃતાઃ ।

જીવ ઈશો વિશુદ્ધા ચિત્ તથા જીવેશયોર્ભિદા ।

અવિદ્યા તચ્ચિતોર્યોગઃ ષડસ્માકમનાદયઃ ॥ ઇતિ ।

તત્ર બ્રહ્મણિ પારમાર્થિકસત્તાસ્તિ । બ્રહ્મભિન્નપઞ્ચકે (પ્રપઞ્ચે) વ્યાવહારિકા સત્તા વર્તતે । પ્રવાહરૂપેણાનાદાવિતરસ્મિન્ સકલકાર્યપ્રપઞ્ચે પ્રાતિભાસિકસત્તા વિદ્યતે । અતશ્ચાસ્મિન્ પક્ષે ઉત્તરોત્તરાધ્યાસકારણીભૂતપૂર્વપૂર્વાધ્યાસજ્ઞાનજન્યસંસ્કારાશ્રયાવિદ્યાયા ઈશ્વરસ્ય ચ સત્ત્વાત્ ન ક્ષણિકવિજ્ઞાનવાદપ્રાપ્તિઃ । ન વા નિરીશ્વરવાદપ્રાપ્તિઃ । અયમર્થોઽદ્વૈતસિદ્ધૌ મધુસૂદનસરસ્વતીભિઃ પ્રતિપાદિતઃ । અયમર્થો જીવપ્રસઙ્ગાદત્ર વર્ણિતઃ । હે સોમ્ય, યથા નિદ્રાદોષાત્સ્વપ્ને અધ્યાપકોઽધ્યયનમ્, વેદશાસ્ત્રપુરાણધર્મશાસ્ત્રાણિ, અધ્યેતા, કર્મ, તત્ફલં ચેત્યાદિકં પ્રતીયતે । તેષુ સર્વેષુ પદાર્થેષુ સત્યત્વભ્રાન્તિશ્ચોપજાયતે । તથાપિ સ્વપ્ને સર્વે પદાર્થા મિથ્યૈવ ભવન્તિ । તથા જાગ્રત્યપિ સર્વે પદાર્થા મિથ્યૈવ । તેષુ સત્યત્વપ્રતીતિર્ભ્રમ એવ । અહં તવ ગુરુત્વેન પ્રતીતઃ સન્ બન્ધનિવર્તકવેદાન્તોપદેશં કરોમીતિ યત્ તદપિ તવ મિથ્યાપ્રતીતિરેવ । યથા અગૃધદેવસ્ય સ્વપ્ને મિથ્યાપ્રતીતિવિષયા ગુરુવેદાન્તાદયોઽનિર્વચનીયતયોત્પન્નાસ્તથૈવ તવ પ્રતીતૌ અહં મદુપદેશાદિકં ચ સર્વં વસ્તુ મિથ્યૈવાનિર્વચનીયતયા પ્રતિભાતિ ।

## (A. 344-460) અગૃધદેવસ્ય સ્વપ્નઃ-

### (૩૪૪)

અગૃધદેવસ્ય સ્વપ્નદર્શનમગૃધદેવસ્યૈવં સ્વપ્નઃ સમભવત્ - અગૃધનામા કશ્ચન દેવઃ સ્વયમનાદિકાલનિદ્રાં કુર્વાણ ઇવ સ્વપ્નં અપશ્યત્ । તસ્મિન્ સ્વપ્ને તસ્ય પુરુષસ્યૈવં પ્રતીતિરભવત્ - (૧) અહં ચણ્ડાલોઽસ્મિ, (૨) મહાદુઃખી ભવામિ, (૩) અસ્થિમજ્જારુધિરત્વઙ્માંસમેદોવીર્યરૂપસપ્તધાતુભિર્મે મુખં પૂરિતમસ્તિ, (૪) મહાઘોરે ભયઙ્કરે વ્યાઘ્રગજાદિસઙ્કુલે મહારણ્યે ઇતસ્તતઃ પરિભ્રમામિ; ઇતિ । તાદૃશદેવોઽહમિતસ્તતો ભ્રમન્ નાનાસ્થાનાનિ પશ્યામિ । (૧) તત્ર ક્વચિદ્દેશે નાના ભયઙ્કરાઃ પ્રાણિનો માં ભક્ષયિતું મમાભિમુખાઃ પ્રધાવન્તિ, (૨) ક્વચિત્પૂયશોણિતપૂર્ણે મહાગર્તે પતિતાઃ કેચન પ્રાણિનો હાહાકારશબ્દાન્ કુર્વન્તિ, (૩) અન્યત્ર ક્વચિત્ સન્તપ્તલોહમયસ્તમ્ભનિબદ્ધાઃ પ્રાણિનો વિક્રોશન્તિ, (૪) ક્વચિચ્ચ સન્તપ્તવાલુકાપૂર્ણે માર્ગે પાદુકાહીના નગ્નપાદાઃ પુરુષા ગચ્છન્તિ । તાંશ્ચ રાજભટા લોહમયદણ્ડેન તાડયન્તિ । ઇત્થં નાનાભયઙ્કર

૧. ગૃધા નામેચ્છા । સા ચ સર્વદોષાણામુપલક્ષણમ્ ।
ગૃધારહિતોઽગૃધઃ । દેવઃ = સ્વપ્રકાશચૈતન્યમ્
। અગૃધશ્ચાસૌ દેવશ્ચાગૃધદેવઃ । તથા ચ
અવિદ્યાતત્પ્રયુક્તરાગાદિરૂપસર્વમલશૂન્યશુદ્ધચૈતન્યમગૃધદેવશબ્દસ્ય
ગૂઢોઽર્થઃ ।

૨. સ્વપ્નઃ = જનનમરણપ્રવાહરૂપસંસારાખ્યો મહાસ્વપ્નઃ ।

૩. ચણ્ડાલઃ = અવિદ્યાહઙ્કારાદિવિશિષ્ટઃ સ્થૂલસૂક્ષ્મદેહદ્વયાભિમાની જીવઃ ।

૪. મહારણ્યે = સંસારાખ્યે જગતિ ।

५. ઇત આરભ્ય નરકવર્ણનં ક્રિયતે ।

સ્થાનાનિ સ્વપ્ને પશ્યન્ સ દેવઃ કદાચિદાત્માનમપ્યપરાધિનં તાદૃશાપરાધફલભૂતદુઃખભાગિનં ચ સ્વપ્નેઽપશ્યત્ । તસ્મિન્નેવ સ્વપ્ને સોઽગૃધદેવોઽન્યત્ર દિવ્યં સ્થાનં અપશ્યત્ । તત્ર ચ (૧) ઉત્તમા દેવતા વિરાજન્તે, (૨) તાસાં દેવતાનાં ભોગા દિવ્યા ભવન્તિ, (૩) અમૃતસ્ય દર્શનમાત્રેણ તા દેવતાસ્તૃપ્તાઃ, (૪) ક્ષુત્પિપાસે તા દેવતા ન બાધેતે, (૫) તાસાં દેવતાનાં શરીરાણિ મલમૂત્રાદિરહિતાનિ દિવ્યાનિ પ્રકાશન્તે, (૬) ઉત્તમવિમાને સ્થિતઃ કશ્ચન દેવો રમતે । તચ્ચ વિમાનં તસ્ય દેવસ્યેચ્છાનુસારેણ ગચ્છતિ, (૭) કુત્રચિદ્રમ્ભોર્વશ્યાદયોઽપ્સરસો નૃત્યન્તિ । તાસાં સકલાન્યપ્યઙ્ગાનિ નિર્દોષાણિ વિલસન્તિ । તત્ર સર્વા યોષિતઃ સમ્પૂર્ણગુણોપેતા રાજન્તે, (૮) તાસામઙ્ગેભ્યઃ કામોદ્દીપકોત્તમસુગન્ધઃ પ્રસરતિ । ક્વચિત્તાભિઃ સહ દેવા રમન્તે, (૯) અગૃધદેવઃ સ્વયમપિ કદાચિદ્દેવભાવં પ્રાપ્તઃ તાભિર્દિવ્યાઙ્ગનાભિઃ સાકં દિવ્યેષુ સ્થાનેષુ સુચિરં કાલં રમતે । (૧૦) એવં દિવ્યસ્થાનેષ્વપ્સરોભી રમમાણોઽગૃધદેવઃ સહસાકસ્માદેવ રુધિરમલાદિપૂરિતે કુણ્ડે નિમગ્નો ભવતિ । તસ્મિન્નેવ સ્વપ્ને સોઽગૃધદેવો અન્યત્ર સ્થાને સ્થિતં સર્વાધિપતિં પુરુષં પશ્યતિ । તસ્યાજ્ઞાકરા અનુચરાઃ તસ્યાગ્રે તિષ્ઠન્તિ । (૧) કેષાઞ્ચિત્પુરુષાણાં સોઽધિપતિસ્તસ્યાનુચરાશ્ચ સૌમ્યરૂપાઃ પ્રતીયન્તે, (૨) કેષાઞ્ચિત્પુરુષાણાં તે ભયઙ્કરરૂપાઃ પ્રતીયન્તે, (૩) તદ્વનસ્થિતાનાં પુરુષાણાં કર્માનુસારેણ સોઽધિપતિઃ ફલં યચ્છતિ ।

ઇત્થમગૃધદેવઃ સ્વપ્ને નાનાસ્થાનાનિ પશ્યન્ ક્વચિત્ (૧) વેદપારાયણપરાન્ બ્રાહ્મણાનપશ્યત્, (૨) ક્વચિદ્યજ્ઞશાલાયાં યાયજૂકા ઉત્તમાન્ ક્રતૂનનુતિષ્ઠન્તિ, (૩) ક્વચિદુત્તમાઃ પુણ્યા નદ્યઃ પ્રવહન્તિ । તત્ર પુણ્યકાઙ્ક્ષિણો

૧. ઇત આરભ્ય સ્વર્ગવર્ણનમ્ ।

૨. કાવ્યાલઙ્કારાદિગ્રન્થેષૂક્તાઃ સ્ત્રીણાં સૌન્દર્યાદયો દ્વાત્રિંશદ્ગુણા યે ઉક્તાસ્તૈરુપેતાઃ ।

૩. પુણ્યે ક્ષીણે, પાપે ફલોન્મુખે સતિ ।

૪. ઇત આરભ્ય યમલોકવર્ણનમ્ ।

૫. ધર્મરાજો યમઃ ।

૬. યમદૂતાઃ ।

૭. પુણ્યવતામ્ ।

૮. પાપિષ્ઠાનામ્ ।

૯. ઇત આરભ્ય ભૂલોકસ્ય, તત્રાપિ ભારતવર્ષસ્ય વર્ણનમ્ ।

જનાઃ સ્નાન્તિ, (૪) ક્વચિજ્જ્ઞાનિન આચાર્યાઃ શિષ્યેભ્યો બ્રહ્મવિદ્યામુપદિશન્તિ, અધિગતબ્રહ્મવિદ્યા વિદ્યાબલાત્તદ્વનાન્નિષ્ક્રાન્તા ભવન્તિ । અનયા રીત્યાગૃધદેવસ્ય સ્વપ્ને ક્ષણમાત્રે નાનાશ્ચર્યરૂપાન્ પદાર્થાન્ પશ્યતઃ પુનરપ્યેવં પ્રતીતિઃ સમજાયત । (૧) અહમસ્મિન્ વને બહોઃ કાલાન્નિવસામિ, (૨) અસ્ય વનસ્ય કદાપ્યુચ્છેદો ન ભવતિ, (૩.૧) કદાચિત્ ભગવતઃ ચતુર્ભ્યો મુખેભ્યો નિર્ગતૈર્નાનાવિધૈર્બીજૈર્વનમિદમુત્પન્નં, (૩.૨) જલસેચનેન વનમિદં પાલ્યતે, (૩.૩) કદાચિદ્ભગવતો ઘોરહાસ્યકારિમુખાદુદ્ગમિષ્યતાગ્નિના વનં ઇદં દગ્ધં ભવિષ્યતિ, (૪) વનોત્પત્ત્યા સહ મમાપ્યુત્પત્તિરભૂત્ । વનદાહે મમાપિ દાહો ભવિષ્યતિ, (૫) સર્વં વનં દગ્ધ્વા ઈશ્વરોઽવશિષ્ટો ભવિષ્યતિ, (૬) તસ્યેશ્વરસ્ય શરીરે વનસ્ય બીજમવસ્થિતં ભવેત્ । એવં પ્રતીતિઃ સ્વપ્ને એવ તસ્યાગૃધદેવસ્ય સ્વાપ્નવેદશ્રવણાત્સમજાયત ।

(૩૪૫)

અગૃધદેવસ્ય સ્વપ્ન એવ ગુરુણા સમાગમઃવારં વારમાત્મનો જન્મમરણપ્રવાહપાતં શ્રુત્વાગૃધદેવ એવં વિચારયતિ સ્મ - (૧) કેનોપાયેનાહમસ્માદ્વનાન્નિર્ગચ્છેયમ્, (૨) વનાન્નિર્ગમનાસિદ્ધાવપિ કથં મમ ચણ્ડાલભાવો દૂરીભવેત્ । સદા દેવભાવશ્ચ સિદ્ધ્યેત્ । (૩) વનાન્નિર્ગન્તું નાન્ય ઉપાયોઽસ્તિ । બ્રહ્મવિદ્યોપદેષ્ટા આચાર્ય એવ સ્વશિષ્યાન્ વનાદસ્માન્નિસ્તારયેદિતિ । એવં વિચારયન્નેવ સોઽગૃધદેવઃ સ્વપ્ન એવ કઞ્ચન આચાર્યવર્યં અલભત । વિધિવદુપસન્નાય તસ્મૈ શિષ્યાયાચાર્યો દેવવાણીમયં મિથ્યાભૂતવેદાન્તગ્રન્થમુપદિદેશ ।

૧. ભગવાન્ = બ્રહ્મવિષ્ણુશિવરૂપેણ જગત ઉત્પત્તિપાલનસંહારકર્તેશ્વરઃ ।

૨. બીજૈઃ = જીવાનાં પરિપક્વાદૃષ્ટૈઃ ।

૩. જલસેચનેન = કર્માનુસારેણ સુખદુઃખાનુભવરૂપભોગપ્રદાનેન ।

૪. વનં = જન્મમરણપ્રવાહરૂપઃ સંસારઃ ।

૫. દગ્ધં = પ્રલયં ગતમ્ ।

૬. ચણ્ડાલભાવઃ = જીવભાવઃ ।

૭. દેવભાવઃ = બ્રહ્મત્વમ્ ।

૮. આચિનોતિ હિ શાસ્ત્રાર્થમાચારે સ્થાપયત્યપિ ।
સ્વયમાચરતે યસ્માત્ તસ્માદાચાર્ય ઉચ્યતે ॥

આમ્નાયતત્ત્વવિજ્ઞાનાત્ ચરાચરસમત્વતઃ ।
યમાદિયોગસિદ્ધત્વાદાચાર્ય ઇતિ કથ્યતે ॥ ઇતિ વાયુપુરાણે ।

## (A. 346-352) મિથ્યાચાર્યેણ મિથ્યાશિષ્યાય મિથ્યાસંસ્કૃતગ્રન્થેનોપદેશઃ

## (A. 346-348) ગ્રન્થારમ્ભે મઙ્ગલાચરણમ્-

(૩૪૬)

મઙ્ગલાચરણસ્ય પ્રયોજનમ્, મઙ્ગલાચરણપ્રકારભેદાશ્ચ- ગ્રન્થારમ્ભેઽવશ્યં મઙ્ગલમાચરિતવ્યમ્ । (૧) મઙ્ગલાચરણેન ગ્રન્થસમાપ્તિપ્રતિબન્ધીભૂતવિઘ્ના વિનશ્યન્તિ । વિઘ્નો નામ પાપમેવ । પાપેન પ્રતિબદ્ધાનિ ભૂત્વા શુભકાર્યાણિ ન સિદ્ધ્યન્તિ । તાનિ ચ પાપાનિ મઙ્ગલાચરણેન નશ્યન્તિ । (૨) પાપરહિતેનાપિ ગ્રન્થાદૌ મઙ્ગલમાચરણીયમેવ । તદકરણે ગ્રન્થકર્તરિ પુરુષાણાં નાસ્તિકત્વભ્રાન્ત્યા તદીયગ્રન્થે પ્રવૃત્તિર્ન સ્યાત્ ।
તચ્ચ મઙ્ગલં ત્રિવિધં - (૧) વસ્તુનિર્દેશરૂપમ્, (૨) આશીર્વાદરૂપમ્, (૩) નમસ્કારરૂપઞ્ચેતિ । સગુણોઽથવા નિર્ગુણો યઃ પરમાત્મા સ વસ્તુ ઇત્યભિધીયતે; તસ્ય કીર્તનમેવ વસ્તુનિર્દેશઃ । આત્મનોઽથવા શિષ્યસ્ય યદ્વાઞ્છિતં તસ્ય

પ્રાર્થનમેવાશીર્વાદરૂપમઙ્ગલમ્ । સ્વાપકર્ષબોધનાનુકૂલઃ નમઃશબ્દોચ્ચારણાદિરૂપો વ્યાપારો નમસ્કારરૂપમઙ્ગલમ્ ।

(૩૪૭)

ગ્રન્થારમ્ભે ગણેશદેવ્યાદ્યનુસન્ધાનમપિ મઙ્ગલાચરણમેવગણેશસ્ય દેવ્યાશ્ચેશ્વરત્વં પુરાણેષુ પ્રસિદ્ધમ્ । તસ્માદ્ગણેશાદીનાં ચિન્તા નાનીશ્વરચિન્તા । પુરાણે ગણેશસ્ય યજ્જન્મોક્તં તત્ જીવાનામિવ ન કર્મફલભૂતં જન્મ । રામકૃષ્ણાદિરિવ ગણેશોઽપિ ભક્તાનુગ્રહપ્રયોજનકઃ પરમાત્મન આવિર્ભાવવિશેષ એવેતિ ભગવતો વ્યાસસ્ય પરમાભિપ્રાયઃ । અત્રેદં રહસ્યમ્પરમાર્થદૃષ્ટ્યા જીવોઽપિ પરમાત્મનો ન ભિન્નઃ । કિન્તુ જનનમરણાદિરૂપબન્ધસ્યાત્મનિ યોઽધ્યાસઃ સ એવ જીવસ્ય જીવત્વમ્ । સ ચ જન્માદિરૂપો બન્ધો ગણેશાદીનામાત્મનિ ન પ્રતીયતે । તસ્માત્તે ન જીવાઃ । અનેન પ્રકારેણ ગણેશાદીનામીશ્વરત્વં સિદ્ધમ્ । ("જુષ્ટં યદા પશ્યત્યન્યમીશમસ્ય મહિમાનમિતિ વીતશોકઃ" (મુ. ૩.૧.૨, શ્વે. ૪.૭) । અસ્ય મન્ત્રસ્યાયમર્થઃ- અન્યં = દેહોપાધિકજીવાદ્વિલક્ષણમ્, ઈશં = અસંસારિણમ્, મહિમાનં = સર્વસ્ય જગતો જગદ્રૂપાં વિભૂતિમ્, અસ્યેતિ = મમ પરમેશ્વરસ્યૈવેતિ, યદા પશ્યતિ તદા વીતશોકો ભવતિ = સર્વસ્માચ્છોકસાગરાદ્વિમુચ્યતે કૃતકૃત્યો ભવતિ (ઇતિ ભાષ્યે વર્ણિતોઽર્થઃ) । તસ્માદ્ગ્રન્થારમ્ભે ગણેશાદીનાં ચિન્તનમુપપદ્યતે । ઈશ્વરસ્ય નાનારૂપવર્ણનં સર્વેષામીશ્વરત્વદ્યોતનાય । ગુરુભક્તિરીશ્વરભક્તિશ્ચ વિદ્યાપ્રાપ્તાવન્તરઙ્ગસાધનમિતિ દ્યોતનાય ચ ।

(૩૪૮)

નિર્ગુણસગુણવસ્તુનિર્દેશરૂપનમસ્કારરૂપાશીર્વાદરૂપમઙ્ગલપ્રદર્શનં - તત્ર નિર્ગુણવસ્તુનિર્દેશરૂપમઙ્ગલં યથાપરિપૂર્ણં ચિદાનન્દં બુદ્ધિસાક્ષિ યદદ્વયમ્ ।
સૂર્યાદિભાસકં નિત્યં તેજઃ શુદ્ધં તદસ્મ્યહમ્ ॥

સગુણવસ્તુનિર્દેશરૂપમઙ્ગલં યથાવિઘ્નાઃ સમૂલં નશ્યન્તિ યન્નામોચ્ચારણાત્સકૃત્ ।
ત્રિપુરઘ્નોઽપિ યં સ્મૃત્વા જઘાન ત્રિપુરાસુરાન્ ॥

વિના તુ યેન દેવાશ્ચ સ્વેપ્સિતં નાપ્નુવન્તિ હિ ।
સર્વવિઘ્નવિનાશાય ચિદ્ગણેશં નમામિ તમ્ ॥

નમસ્કારરૂપમઙ્ગલં યથાઅસુરાણાં નિહન્તારં ત્રાતારં સુરચેતસામ્ ।
રમાકાન્તમુમાકાન્તં નમામ્યનિશમદ્વયમ્ ॥

ગુરોઃ સ્વવાઞ્છિતપ્રાર્થનરૂપમાશીર્વાદમઙ્ગલમ્યયા શક્ત્યા દેવદેવો જગત્સૃષ્ટ્યાદિકર્મકૃત્ ।
સા મે તિષ્ઠતુ વાક્પીઠે ગ્રન્થસ્યાસ્ય સમાપ્તયે ॥

શિષ્યસ્ય સ્વવાઞ્છિતપ્રાર્થનરૂપમઙ્ગલમ્સંસારબન્ધસંશાન્ત્યા નિજાનન્દપ્રકાશનાત્ ।